CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रा॰ न्या॰ ९० 3८६४

इल्वलास् (तच्छिरोदेशे तारका निवसन्ति याः) ॥९६॥
वृहस्पतिः सुराचार्य्यो गीष्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश् चित्रशिखण्डिजः ॥ ९७ ॥
शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः । ॥
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ ९८ ॥
रौहिणेयो बुधः सौम्यः

(समौ) शौरि शनैश्चरौ ।
तमस् (तु) राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥९९॥
(सप्तर्षयो मरीच्यत्रिमुखाश्) चित्रशिखण्डिनः ।
(राशीनामुदयो) लग्नं

(ते तु मेषवृषादयः) ॥१००॥
सूर सूर्य्यार्य्यमादित्य द्वादशात्म दिवाकराः ।
भास्कराहस्कर ब्रध्न प्रभाकर विभाकराः ॥ १०१ ॥
भास्वद् विवस्वत् सप्ताश्व हरिदश्वोष्णरश्मयः ।
विकर्त्तनार्क मार्त्तण्ड मिहिरारुण पूषणः ॥ १०२ ॥
द्युमणिस् तरणिर्मित्रश् चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस् त्विषांपतिरहर्पतिः ॥ १०३ ॥
भानुर्हंसः सहस्रांशुस् तपनः सविता रविः ।
माठरः पिङ्गलो दण्डश् (चण्डांशोः पारिपार्श्विकाः) ॥१०४॥
सूरसूतो ऽरुणो ऽनूरुः काश्यपिर्गरुडाग्रजः ।
परिवेशस् (तु) परिधिरुपसूर्य्यक मण्डले ॥ १०५ ॥
किरणोस्र मयूखांशु गभस्तिघृणि घृष्णयः ।
भानुः करो मरीचिः (स्त्रीपुंसयो) दीधितिः (स्त्रियाम्) १०६
)स्युः) प्रभारुग् रुचि त्विड् भा भाश् छवि द्युति दीप्तयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोचिः शोचि (रुभे क्लीवे)

प्रकाशो द्योत आतपः ॥१०७॥

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं (त्रिषु तद्वति) ।

तिग्मं तीक्ष्णं खरं (तद्वन्)

मृगतृष्णा मरीचिका ॥१०८॥

कालो दिष्टो (प्य) नेहा (पि) समयो (प्य)

(ऽथ) पक्षतिः ।

प्रतिपद् (द्वे इमे स्त्रीत्वे)

(तदाद्यास्) तिथयो (द्वयोः)॥१०९

घस्रो दिनाहनी (वा तु क्लीवे) दिवस वासरौ ।

प्रत्यूषो ऽहर्मुखं कल्यमुषः प्रत्यूषसी (अपि) ॥११०॥

प्रभातं (च)

(दिनान्ते तु) सायं

सन्ध्या पितृप्रसूः ।

प्राह्णापराह्ण मध्याह्नास् (त्रिसन्ध्यम्)

(अथ) शर्वरी १११

निशा निशीथिनी रात्रिस् त्रियामा क्षणदा क्षपा ।

विभावरी तमस्विन्यौ रजनी यामिनी तमी ॥ ११२ ॥

तमिस्रा तामसी (रात्रिः)

ज्योत्स्नी (चन्द्रिकयान्विता) ।

(आगामिवर्त्तमानाहर्युक्तायां निशि) पक्षिणी ॥११३॥

गणरात्रं (निशाबह्वाः)

प्रदोषो रजनीमुखम् ।

अर्द्धरात्र निशीथौ (द्वौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(द्वौ) याम प्रहरौ (समौ)॥११४॥
(स) पर्वसन्धिः (प्रतिपत्पञ्चदश्योर्यदन्तरम्)।
पक्षान्तौ (पञ्चदश्यौ द्वे)
पौर्णमासी (तु) पूर्णिमा॥११५॥
(कलाहीने सा) ऽनुमतिः
(पूर्णे) राका (निशाकरे)।
अमावास्या (त्व) ऽमावस्या दर्शः सूर्येन्दुसङ्गमः॥११६॥
(सा दृष्टेन्दुः) सिनीवाली
(सा नष्टेन्दुकला) कुहूः।
उपरागो ग्रहो
(राहुग्रस्ते त्विन्दौ च पूष्णि च)॥११७॥
सोपप्लवोपरक्तौ (द्वाव)
ऽग्न्युत्पात उपाहितः।
(एकयोक्त्या) पुष्पवन्तौ (दिवाकर निशाकरौ)॥११८॥
(अष्टादश निमेषास्तु) काष्ठाः
(त्रिंशत्तु ताः) कलाः।
(तास्तु त्रिंशत्) क्षणः
(ते तु) मुहूर्त्तो (द्वादशास्त्रियाम्)॥११९॥
(ते तु त्रिंशद) ऽहोरात्रः
पक्ष (स्ते दश पञ्च च)।
(पक्षौ पूर्वापरौ) शुक्ल कृष्णौ
मास (स्तु तावुभौ)॥१२०॥
(द्वौ द्वौ माघादिमासौ स्याद) ऋतु
(स्तैर) यनं (त्रिभिः)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अयने द्वे गतिरुदग् दक्षिणार्कस्य) वत्सरः ॥१२१॥
(समरात्रिंदिवे काले) विषुवद्विषुवं (च तत्)।
मार्गशीर्षे सहा मार्ग आग्रहायणिक (श्च सः) ॥१२२॥
पौषे तैष सहस्यौ (द्वौ)

तपा माघे।

(ऽथ) फाल्गुने।

(स्यात्) तपस्यः फाल्गुनिकः

(स्याच्) चैत्रे चैत्रिको मधुः ॥१२३॥
वैशाखे माधवो राधो

ज्यैष्ठे शुक्रः

शुचि (स्त्वयम्)।

आषाढे

श्रावणे (तु स्यान्) नभाः श्रावणिक (श्चसः)॥१२४॥
(स्यु) र्नभस्यप्रौष्ठपद भाद्र भाद्रपदाः (समाः)।
(स्यादा) श्विन इषो (ऽप्या) श्वयुजो (ऽपि)

(स्यात्तु) कार्त्तिके ॥ १२५ ॥
बाहुलोर्जौ कार्त्तिकिको

हेमन्तः

शिशिरो (ऽस्त्रियाम्)।

वसन्ते पुष्पसमयः सुरभिर्

ग्रीष्म उष्मकः ॥ १२६ ॥
निदाघ उष्णोपगम उष्ण उष्मागमस् तपः।
(स्त्रियां) प्रावृट् (स्त्रियां भूम्नि) वर्षा

(अथ) शरद् (स्त्रियाम्) ॥१२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(षड़मी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्) ।
संवत्सरो वत्सरोऽब्दो हायनो (ऽस्त्री) शरत् समाः ॥१२८॥
(मासेन स्याद) ऽहोरात्रः पैत्रो
(वर्षेण) दैवतः ।
(दैवे युगसहस्रे द्वे) ब्राह्मः
कल्पो (तु तौ नृणाम्)॥१२९॥
मन्वन्तरं (तु दिव्यानां युगानामेकसप्ततिः) ।
संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त (इत्यपि)॥१३०॥
(अस्त्री) पङ्कं (पुमान्) पाप्मा पापं किल्बिष कल्मषम् ।
कलुषं वृजिनैनोऽघमंहो दुरित दुष्कृतम् ॥ १३१ ॥
(स्याद्) धर्म (मस्त्रियां) पुण्य श्रेयसी सुकृतं वृषः ।
मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोद संमदाः ॥१३२॥
(स्यादा) नन्दथुरानन्दः शर्म शात सुखानि (च) ।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ १३३ ॥
भावुकं भविकं भव्यं कुशलं क्षेम (मस्त्रियाम्) ।
शस्तं (चा)
(ऽथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च)॥१३४॥
मतल्लिका मचर्चिका प्रकाण्ड मुद्व तल्लजौ ।
(प्रशस्तवाचकान्यमून्य)
ऽयः (शुभावहो विधिः) ॥१३५॥
दैवं दिष्टं भागधेयं भाग्यं (स्त्री) नियतिर्विधिः ।
हेतु (र्ना) कारणं वीजं
(निदानं त्वा) दिकारणं॥१३६॥
क्षेत्रज्ञ आत्मा पुरुषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रधानं प्रकृतिः (स्त्रियाम्) ।
(विशेषः कालिको) ऽवस्था
(गुणाः) सत्वं रजस् तमः ॥१३७॥
जनुर्जनन जन्मानि जनिरुत्पत्तिरुद्भवः ।
प्राणी (तु) चेतनो जन्मी जन्तु जन्यु शरीरिणः ॥१३८॥
जातिर्जातं (च) सामान्यं
व्यक्ति (स्तु) पृथगात्मिका ।
चित्तं (तु) चेतो हृदयं स्वान्तं हृन् मानसं मनः ॥१३९॥
बुद्धि र्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश् चित् सम्वित् प्रतिपज् ज्ञप्ति चेतनाः ॥१४०॥
(धीर्धारणावती) मेधा
संकल्पः (कर्म मानसम्) ।
चित्ताभोगो मनस्कारश्
चर्चा संख्या विचारणा ॥१४१॥
अध्याहारस् तर्क ऊहो
विचिकित्सा (तु) संशयः ।
संदेह द्वापरौ (चा)
(ऽथ समौ) निर्णय निश्चयौ ॥१४२॥
मिथ्यादृष्टिर्नास्तिकता
व्यापादो द्रोहचिन्तनम् ।
(समौ) सिद्धान्त राद्धान्तौ
भ्रान्तिर्मिथ्यामति र्भ्रमः ॥१४३॥
संविदागूः प्रतिज्ञानं नियमाश्रव संश्रवाः ।
अङ्गीकाराभ्युपगम प्रतिश्रव समाधयः ॥ १४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(मोक्षे धीः) ज्ञानं
(अन्यत्र) विज्ञानं (शिल्पशास्त्रयोः)।
मुक्तिः कैवल्य निर्वाणं श्रेयोनिःश्रेयसामृतम् ॥१४५॥
मोक्षोऽपवर्गो
(ऽथा) ज्ञानमविद्याहंमतिः (स्त्रियाम्)।
रूपं शब्दो गन्ध रस स्पर्शाश् (च)
विषया (अमी) ॥१४६॥
गोचरा इन्द्रियार्थाश् (च)
हृषीकं विषयीन्द्रियम्।
कर्मेन्द्रियं (तु पाय्वादि)
(मनो नेत्रादि) धीन्द्रियम् ॥१४७॥
तुवरस् (तु) कषायो (ऽस्त्री)
मधुरो लवणः कटुः।
तिक्तोऽम्लश् (च रसाः पुंसि)
(तद्वत्सु षड़मी त्रिषु) ॥१४८॥
(विमर्दोत्थे) परिमलो (गन्धे जनमनोहरे)।
आमोदः (सोऽतिनिर्हारी)
(वाच्यलिङ्गत्वमागुणात्)॥१४९॥
समाकर्षी (तु) निर्हारी
सुरभिर्घ्राणतर्पणः।
इष्टगन्धः सुगन्धिः (स्याद्)
आमोदी मुखवासनः ॥१५०॥
पूतिगन्धिस् (तु) दुर्गन्धो
विस्रं (स्याद्) आमगन्धि (यत्)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्ल शुभ्र शुचि श्वेत विशद श्येत पाण्डुराः ॥१५१॥
अवदातः सितो गौरो बलक्षो धवलो ऽर्ज्जुनः ।
हरिणः पाण्डुरः पाण्डुर्
(ईषत्पाण्डुस्तु) धूसरः ॥१५२
कृष्णे नीलासित श्याम काल श्यामल मेचकाः ।
पीतो गौरो हरिद्राभः
पालाशो हरितो हरित् ॥१५३॥
रोहितो लोहितो रक्तः
शोणः कोकनदच्छविः ।
(अव्यक्तरागस्त्व) रुणः
(श्वेतरक्तस्तु) पाटलः ॥१५४॥
श्यावः (स्यात्) कपिशो
धूम्र धूमलो कृष्णलोहिते ।
कड़ारः कपिलः पिङ्ग पिशङ्गो कद्रु पिङ्गलो ॥१५५॥
चित्रं किर्मीर कल्माष शवलैता (स्व) कर्वुरे ।
(गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति) ॥१५६॥
ब्राह्मी (तु) भारती भाषा गीर्वाग् वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १५७ ॥
अपभ्रंशो ऽपशब्दः (स्याच्)
(छास्त्रे) शब्द (स्तु) वाचकः ।
(तिङ्सुवन्तचयो) वाक्यं (क्रिया वा कारकान्विता)॥१५८॥
श्रुतिः (स्त्री) वेद आम्नायस्
त्रयीधर्म्म (स्तु तद्विधिः) ।
(स्त्रियां) ऋक् साम यजुषी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(इति वेदास्त्रयः) त्रयी ॥१५९॥
(शिक्षेत्यादि श्रुतेर्) अङ्गम्
ओङ्कार प्रणवौ (समौ)।
इतिहासः पुरावृत्तं
(उदात्ताद्यास्त्रयः) स्वराः ॥१६०॥
आन्वीक्षिकी दण्डनीति (स्तर्कविद्यार्थशास्त्रयोः)।
आख्यायिको (पलब्धार्था)
पुराणं पञ्चलक्षणं ॥१६१॥
(प्रबन्धकल्पना) कथा
प्रबह्लिका प्रहेलिका।
स्मृति (स्तु) धर्मसंहिता
समाहृति (स्तु) संग्रहः ॥१६२॥
समस्या (तु) समासार्था
किंवदन्ती जनश्रुतिः।
वार्त्ताप्रवृत्तिर्वृत्तान्तं उदन्तः (स्याद्)
(अथा) ह्वयः ॥१६३॥
आख्याह्वे (चा) भिधानं (च) नामधेयं (च) नाम (च)
हूतिराकरणाह्वानं
संहूति (र्बहुभिः कृता) ॥१६४॥
विवादो व्यवहारः (स्याद्)
उपन्यास (स्तु) वाङ्मुखम्।
उपोद्घात उदाहारः
शपनं शपथः (पुमान्) ॥१६५॥
प्रश्नो ऽनुयोगः पृच्छा (च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिवाक्योत्तरे (समे)।
मिथ्याभियोगो ऽभ्याख्यानम्
(अथ) मिथ्याभिशंसनम् ॥१६६॥
अभिशापः
प्रणाद (स्तु शब्दः स्यादनुरागजः)।
यशः कीर्त्तिः समाज्ञा (च)
स्तवः स्तोत्रं स्तुतिर्नुतिः ॥१६७॥
आम्रेड़ितं (द्विस्त्रिरुक्तम्)
(उच्चैर्घुष्टं (तु) घोषणा।
काकुः (स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः) १६८
अवर्णाक्षेपनिर्वाद परीवादापवाद (वत्)।
उपक्रोशो जुगुप्सा (च) कुत्सा निन्दा (च) गर्हणे १६९
पारुष्यमभिवादः (स्यात्)
भर्त्सनं (त्व) पकारगीः।
(यः सनिन्द उपालम्भ स्तत्र स्यात्) परिभाषणम् १७०
(तत्र त्वा) ऽऽच्चारणा (यः स्यादाक्रोशो मैथुनं प्रति)।
(स्याद) आभाषणमालापः
प्रलापो (ऽनर्थकं वचः)॥१७१॥
अनुलापो मुहुर्भाषा
विलापः परिदेवनम्।
विप्रलापो विरोधोक्तिः
संलापो (भाषणं मिथः)॥१७२॥
सुप्रलापः सुवचनं
अपलाप (स्तु) निह्नवः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्देशवाग् वाचिकं (स्याद्)
(वाग्भेदास्तु त्रिषूत्तरे)॥ १७३॥
उषती (वागकल्याणी)
(स्यात्) कल्या (तु शुभात्मिका)।
(अत्यर्थमधुरं) सान्त्वं
सङ्गतं हृदयं गमम्॥१७४॥
निष्ठुरं परुषं
ग्राम्यमश्लीलं
सूनृतं (प्रिये।
सत्ये)
(ऽथ) सङ्कुलः क्लिष्टे परस्परपराहते ॥ १७५ ॥
(लुप्तवर्णपदं) ग्रस्तं
निरस्तं त्वरितोदितम्।
(अम्बूकृतं) सनिष्ठेवं
अबद्धं (स्याद) ऽनर्थकम् ॥१७६॥
अनक्षरमवाच्यं (स्याद्)
आहतं (तु) मृषार्थकम्।
(अथ) म्लिष्टमविस्पष्टं
वितथं (त्व) नृतं (वचः)॥१७७॥
सत्यं तथ्यमृतं सम्यग्
(अमूनि त्रिषु तद्वति)।
शब्दे निनाद निनद ध्वनि ध्वान रव स्वनाः ॥ १७८ ॥
स्वान निर्घोष निर्ह्राद नाद निस्वान निस्वनाः।
आरवाराव संराव विरावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(भगिनीपतिरा) वुत्तो

भावो (विद्वान्)

(अथा) वुकः ॥१९३॥

(जनको)

(युवराजस्तु) कुमारो भर्तृदारकः ।

(राजा) भट्टारको देवस्

(तत्सुता) भर्तृदारिका ॥१९४॥

देवी (कृताभिषेकायां)

(इतरासु च) भट्टिनी ।

अब्रह्मण्य (मबध्योक्तौ)

(राजश्यालस्तु) राष्ट्रियः ॥१९५॥

अम्बा (माता)

(ऽथ वाला स्याद्) वासूर्

(आर्य्यस्तु) मारिषः।

अत्तिका (भगिनी ज्येष्ठा)

निष्ठा निर्वहणे (समे) ॥१९६॥

हण्डे हञ्जे हला (ह्वानं नीचं चेटीं सखीं प्रति) ।

अङ्गहारोऽङ्गविक्षेपो

व्यञ्जकाभिनयौ (समौ) ॥१९७॥

(निर्वृत्ते त्वङ्गसत्वाभ्यां द्वे त्रिष्वा) ङ्गिक सात्विके ।

(शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ॥१९८॥

वीभत्सरौद्रे च) रसाः

शृङ्गारः शुचिरुज्ज्वलः ।

उत्साहवर्द्धनो वीरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारुण्यं करुणा घृणा ॥१९९॥

कृपा दयानुकम्पा (स्याद्) ऽनुक्रोशो (ऽप्य)

(ऽथो) हसः।

हासो हास्यं (च)

बीभत्सं विकृतं (त्रिष्विदं द्वयम्) ॥२००॥

विस्मयो ऽद्भुतमाश्चर्यं चित्र (मप्य)

(ऽथ) भैरवम्।

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥ २०१ ॥

भयङ्करं प्रतिभयं

रौद्रं (तू) ग्रं

(अमी त्रिषु।

चतुर्दश)

दर त्रासौ भीतिर्भीः साध्वसं भयम् ॥२०२॥

(विकारो मानसो) भावो

ऽनुभावो (भावबोधकः)।

गर्वो ऽभिमानो ऽहंकारो

मानश्चित्तसमुन्नतिः ॥२०३॥

अनादरः परिभवः परिभावस्तिरस्क्रिया।

रीढ़ावमाननावज्ञा अवहेल मसूर्क्षणम् ॥ २०४ ॥

मन्दाक्षं ह्रीस्त्रपा व्रीड़ा लज्जा

(सा) ऽपत्रपा (ऽन्यतः)।

क्षान्तिस्तितिक्षा

ऽभिध्या (तु परस्वविषये स्पृहा) ॥२०५॥

अक्षान्तिरीर्ष्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽसूया (तु दोषारोपो गुणेष्वपि)।
वैरं विरोधो विद्वेषो
मन्यु शोकौ (तु) शुक् (स्त्रियाम्) ॥२०६॥
पश्चात्तापो ऽनुताप (श्च) विप्रतीसार (इत्यपि)।
कोप क्रोधा ऽमर्ष रोष प्रतिघा रुट्क्रुधौ(स्त्रियाम्)॥२०७॥
(शुचौ तु चरिते) शीलं
उन्माद श्चित्तविभ्रमः।
प्रेमा (ना) प्रियता हार्दं प्रेम स्नेहो
(ऽथ) दोहदम् ॥२०८॥
इच्छाकांक्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः।
कामोऽभिलाष स्तर्ष (श्च)
(स महान्) लालसा (द्वयोः) ॥२०९॥
उपाधि (र्ना) धर्मचिन्ता
(पुंस्या) धि (र्मानसी व्यथा)।
(स्यात्) चिन्ता स्मृतिराध्यानं
उत्कण्ठोत्कलिके (समे) ॥२१०॥
उत्साहोऽध्यवसायः (स्यात्)
(स) वीर्य्यं (मतिशक्तिभाक्)।
कपटो (ऽस्त्री) व्याज दम्भोपधयश्छद्म कैतवे ॥२११॥
कुसृतिर्निकृतिः शाठ्यं
प्रमादो ऽनवधानता।
कौतूहलं कौतुकं (च) कुतुकं (च) कुतूहलम् ॥२१२॥
(स्त्रीणां विलास बिब्बोक विभ्रमा ललितं तथा।
हेला लीलेत्यमी) हावाः (क्रियाः शृङ्गारभावजाः) ॥२१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव केलि परीहासाः क्रीड़ा लीला (च) नर्म (च)।
व्याजो ऽपदेशो लक्ष्यं (च)
क्रीडा खेला (च) कूर्दनम् ॥२१४॥
घर्मो निदाघः स्वेदः (स्यात्)
प्रलयो नष्टचेष्टता।
अवहित्थाकारगुप्तिः
(समौ) संवेग सम्भ्रमौ ॥२१५॥
(स्यादा) च्छुरितकं (हासः सोत्प्रासः)
(स मनाक्) स्मितम्।
(मध्यमः स्याद्) विहसितं
रोमाञ्चो लोमहर्षणम् ॥२१६॥
क्रन्दितं रुदितं क्रुष्टं
जृम्भ (स्तु त्रिषु) जृम्भणम्।
विप्रलम्भो विसम्वादो
रिङ्गण स्खलने (समे) ॥२१७॥
(स्यात्) निद्रा शयनं स्वापः स्वप्नः सम्बेश (इत्यपि)।
तन्द्री प्रमीला
भ्रकुटि र्भ्रुकुटी भ्रू कुटिः (स्त्रियः) ॥२१८॥
अदृष्टिः (स्यादसौम्ये ऽक्ष्णिः)
संसिद्धि प्रकृती (त्विमे)।
स्वरूपं (च) स्वभाव (श्च) निसर्ग (श्चा)
(ऽथ) वेपथुः ॥२१९॥
कम्पो (ऽथ) क्षण उद्धर्षो मह उद्धव उत्सवः।
इति स्वर्ग वर्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पाताल वर्गः ।

अधोभुवन पाताल बलिसद्म रसातलम् ।
नागलोको
(ऽथ) कुहरं शुषिरं विवरं विलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।
गर्त्ता ऽवटौ (भुवि श्वभ्रे)
(सरन्ध्रे) शुषिरं (त्रिषु) ॥ २ ॥
अन्धकारो (ऽस्त्रियां) ध्वान्तं तमिस्रं तिमिरं तमः ।
(ध्वान्ते गाढे) ऽन्धतमसं
(क्षीणे) ऽवतमसं
(तमः ॥ ३ ॥
विष्वक्) सन्तमसं
नागाः काद्रवेयास्
(तदीश्वरः) ।
शेषो ऽनन्तो
वासुकि (स्तु) सर्पराजो
(ऽथ) गोनसे ॥ ४ ॥
तिलित्सः (स्याद्)
अजगरे शयुर्वाहस (इत्युभौ) ।
अलगर्द्दो जलव्यालः
(समौ) राजिल डुण्डुभौ ॥ ५ ॥
मालुधानो मातुलाहिर्
निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर्भुजगो भुजङ्गो ऽहिर्भुजङ्गमः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशीविषो विषधरश्चक्री व्यालः सरीसृपः।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको विलेशयः।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥
(त्रिष्वा)-हेयं (विषास्थ्यादि)
फटायां (तु) फणा (द्वयोः)।
(समौ) कञ्चुक निर्मोकौ
क्ष्वेड (स्तु) गरलं विषम् ॥ ९ ॥
(पुंसि क्लीवे च) काकोल कालकूट हलाहलाः।
सौराष्ट्रिकः शौल्किकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभ (श्च विषभेदा अमी नव)।
विषवैद्यो जाङ्गुलिको
व्यालग्राह्यहितुण्डिकः ॥ ११ ॥
(स्यात्) नारक (स्तु) नरको निरयो दुर्गतिः (स्त्रियाम्)।
(तद्भेदास्) तपनावीचि महारौरव रौरवाः ॥ १२ ॥
संहारः कालसूत्रं (चेत्याद्याः)
(सत्वास्तु) नारकाः।
प्रेता
वैतरणी (सिन्धुः)
(स्याद) ऽलक्ष्मी (स्तु) निर्ऋतिः ॥१३॥
विष्टिराजूः
कारणा (तु) यातना तीव्रवेदना।
पीडा वाधा व्यथा दुःखममानस्यं प्रसूतिजम् ॥ १४ ॥
(स्यात्) कष्टं कृच्छ्रमाभीलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(त्रिष्वेषां भेद्यगामि यत्) ।
समुद्रो ऽब्धिरकूपारः पारावारः सरित्पतिः ॥ १५ ॥
उदन्वानुदधिः सिन्धुः सरस्वान् सागरो ऽर्णवः ।
रत्नाकरो जलनिधिर्यादः पतिरपाम्पतिः ॥ १६ ॥
(तस्य प्रभेदाः) क्षीरोदो लवणोद (स्तथापरे) ।
आपः (स्त्री भूम्नि) वार्वारि सलिलं कमलं जलम् ॥१७॥
पयः कीलालममृतं जीवनं भुवनं वनम् ।
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ॥ १८ ॥
अम्भो ऽर्णस्तोय पानीय नीर क्षीराम्बुशम्बरम् ।
मेघपुष्पं घनरसम्

(त्रिषु द्वे) आप्यमम्मयम् ॥ १९ ॥
भङ्गस्तरङ्ग ऊर्म्मि (र्वा स्त्रियां) वीचिर

(ऽथोर्म्मिषु ।
महत्सू-)-ल्लोल कल्लोलौ

(स्यादा)-वर्त्तो (ऽम्भसां भ्रमः) ॥२०॥
पृषन्ति विन्दु पृषताः (पुमांसो) विप्रुषः (स्त्रियः) ।
चक्राणि पुटभेदाः (स्युर्)

भ्रमा (श्च) जलनिर्गमाः ॥ २१ ॥
कूलं रोध (श्च) तीरं (च) प्रतीरं (च) तटं (त्रिषु) ।
पारावारे (परार्वाची तीरे)

पात्रं (तदन्तरम्) ॥२२॥
द्वीपो (ऽस्त्रियाम) न्तरीपं (यदन्तर्वारिणस्तटम्) ।
(तोयोत्थितं तत्) पुलिनं

सैकतं सिकतामयम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषद्वर (स्तु) जम्बालः पङ्को (ऽस्त्री) शाद कर्द्दमौ।
जलोच्छ्वासाः परीवाहाः
कूपका (स्तु) विदारकाः॥ २४॥
नाव्यं (त्रिलिङ्गं नौतार्य्ये)
(स्त्रियां) नौस्तरणिस्तरिः।
उडुपं (तु) प्लवः कोलः
स्रोतो (ऽम्बु सरणं स्वतः) ॥२५॥
आतरस्तरपण्यं (स्याद्)
द्रोणी काष्ठाम्बुवाहिनी।
सांयात्रिकः पोतवणिक्
कर्णधार (स्तु) नाविकः ॥२६॥
नियामकाः पोतवाहाः
कूपको गुणवृक्षकः।
नौकादण्डः क्षेपणिः (स्याद्)
अरित्रं केनिपातकः॥ २७॥
अभ्रिः (स्त्री) काष्ठकुद्दालः
सेकपात्रं (तु) सेचनम्।
(क्लीबे) ऽर्द्धनावं (नावोऽर्द्धे)
(अतीत नौके) ऽतिनु (त्रिषु) ॥२८॥
(त्रिष्वागाधात्)
प्रसन्नो ऽच्छः
कलुषो ऽनच्छ आविलः।
निम्नं गभीरं गम्भीरं
उत्तानं (तद्विपर्य्यये)॥ २९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अगाधमतलस्पर्शं

कैवर्त्ते दास धीवरौ ।

आनायः (पुंसि) जालं (स्यात्)

शणसूत्रं पवित्रकम् ॥३०॥

मत्स्याधानी कुवेणी (स्याद्)

वडिशं मत्स्यवेधनम् ।

पृथुरोमा झषो मत्स्यो मीनो वैसारिणो ऽण्डजः ॥३१॥

विसारः शकुली (चा)

(ऽथ) गडकः शकुलार्भकः ।

सहस्रदंष्ट्रः पाठीन

उलूपी शिशुकः (समौ) ॥ ३२ ॥

नलमीनश्चिलिचिमः

प्रोष्ठी (तु) शफरी (द्वयोः) ।

क्षुद्राण्डमत्स्यसङ्घातः पोताधानम्

(अथो झषाः) ॥ ३३ ॥

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।

तिमिङ्गिला (दयश्चा)

(ऽथ) यादांसि जलजन्तवः ॥ ३४ ॥

(तद्भेदाः) शिशुमारोद्र शङ्कवो मकरा (दयः) ।

(स्यात्) कुलीरः कर्कटकः

कूर्मे कमठ कच्छपौ ॥ ३५ ॥

ग्राहो ऽवहारो

नक्र (स्तु) कुम्भीरो

(ऽथ) महीलता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गण्डूपदः किञ्चुलुको

निहाका गोधिका (समे) ॥ ३६ ॥

रक्तपा (तु) जलौकायां (स्त्रियां भूम्नि) जलौकसः ।

मुक्तास्फोटः (स्त्रियां) शुक्तिः

शङ्खः (स्यात्) कम्बु (रस्त्रियाम् ॥ ३७ ॥

क्षुद्रशङ्खाः शङ्खनखाः

शम्बूका जलशुक्तयः ।

भेके मण्डूक वर्षाभू शालूर प्लव दर्दुराः ॥ ३८ ॥

शिली गण्डूपदी

भेकी वर्षाभ्वी

कमठी दुलिः ।

(मद्गुरस्य प्रिया) शृङ्गी

दुर्नामा दीर्घकोषिका ॥ ३९ ॥

जलाशया जलाधारास्

(तत्रागाधजलो) ह्रदः ।

आहाव (स्तु) निपानं (स्यादुपकूप जलाशये) ॥ ४० ॥

(पुंस्येवा-) न्धु प्रही कूप उदपानं (तु पुंसि वा) ।

नेमिस्त्रिका (ऽस्य)

वीनाहो (मुखबन्धनमस्य यत्) ॥ ४१ ॥

पुष्करिण्यां (तु) खातं (स्याद्)

अखातं देवखातकम् ।

पद्माकरस्तडागो (ऽस्त्री)

कासारः सरसी सरः ॥ ४२ ॥

वेशन्तः पल्वलं (चा) ऽल्पसरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वापी (तु) दीर्घिका ।
खेयं (तु) परिखा
-ऽऽधार (स्त्वम्भसां यत्र धारणम्) ॥४३॥
(स्याद्) आलवालमावालमावापो
(ऽथ) नदी सरित् ।
तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी ॥ ४४ ॥
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा ।
गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ४५ ॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसू (रपि) ।
कालिन्दी सूर्य्यतनया यमुना शमनस्वसा ॥ ४६ ॥
रेवा (तु) नर्मदा सोमोद्भवा मेकलकन्यका ।
करतोया सदानीरा
बाहुदा सैतवाहिनी ॥ ४७ ॥
शितद्रु (स्तु) शतद्रुः (स्याद्)
विपाशा (तु) विपाट् (स्त्रियाम्) ।
शोणो हिरण्यबाहुः (स्यात्)
कुल्या (ल्पा कृत्रिमा सरित्) ॥४८॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी (सरितोऽन्याश्च)
सम्भेदः सिन्धुसङ्गमः ॥ ४९ ॥
(द्वयोः) प्रणाली (पयसः पदव्यां)
(त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे) दाविक सारवौ ॥ ५० ॥
सौगन्धिकं (तु) कह्लारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हल्लकं रक्तसन्ध्यकम् ।

(स्याद्) उत्पलं कुवलयं
(अथ) नीलाम्बुजन्म (च) ॥ ५१ ॥

इन्दीवरं (च नीले ऽस्मिन्)
(सिते) कुमुद कैरवे ।

शालूक (मेषां कन्दः स्याद्)
वारिपर्णी (तु) कुम्भिका ॥५२॥

जलनीली (तु) शैवालं शैवलो
(ऽथ) कुमुद्वती ।

कुमुदिन्यां
नलिन्यां (तु) विसिनी पद्मिनी (मुखाः) ॥५३॥

(वा पुंसि) पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ ५४ ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
विसप्रसून राजीव पुष्कराम्भोरुहाणि (च) ॥ ५५ ॥

पुण्डरीकं सिताम्भोजं
(अथ) रक्तसरोरुहे ।

रक्तोत्पलं कोकनदं
नालानालं
(अथास्त्रियाम्) ॥५६॥

मृणालं विसं
(अब्जादिकदम्बे) षण्ड (मस्त्रियाम्) ।

करहाटः शिफाकन्दं
किञ्जल्कः केशरो (ऽस्त्रियाम्) ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवर्त्तिका नवदलं

वीजकोशो वराटकः ।

(उक्तं स्वर्व्योम दिक्कालधीशब्दादि सनाट्यकम् ॥५८॥

पातालभोगि नरकं वारि चैषां तु सङ्गतम्) ।

इति पाताल वर्गः ।

अथ पृथिवी वर्गः ।

वर्गाः पृथ्वी पुर क्ष्माभृद्वनौषधि मृगादिभिः ।

नृ ब्रह्म क्षत्र विट् शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ।

धरा धरित्री धरणिः क्षोणी ज्या काश्यपी क्षितिः ॥२॥

सर्व्वंसहा वसुमती वसुधोर्व्वी वसुन्धरा ।

गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥ ३ ॥

मृन्मृत्तिका

(प्रशस्ता तु) मृत्सा मृत्स्ना (च मृत्तिका) ।

उर्व्वरा (सर्व्वशस्याढ्या)

(स्याद्) ऊषः क्षारमृत्तिका ॥४॥

ऊषवानूषरो (द्वावप्यन्यलिङ्गौ)

स्थलं स्थली ।

(समानौ) मरु धन्वानौ

(द्वे) खिलाऽप्रहते (समे) ॥५॥

(त्रिष्व)

(ऽथो) जगती लोको विष्टपं भुवनं जगत् ।

(लोको ऽयं) भारतं (वर्षं)

(शरावत्याश्च यो ऽवधेः ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देशः प्राग्दक्षिणः) प्राच्य
उदीच्यः (पश्चिमोत्तरः) ।
प्रत्यन्तो म्लेच्छदेशः (स्यात्)
मध्यदेश (स्तु) मध्यमः ॥ ७ ॥
आर्य्यावर्त्तः पुण्यभूमि (र्मध्यं विन्ध्यहिमालयोः)
नीवृज्जनपदो
देश विषयौ (तू)-पवर्त्तनम् ॥ ८ ॥
(त्रिष्वागोष्ठात्)
(नडप्राये) नड्वान्नड्वल (इत्यपि) ।
कुमुद्वान् (कुमुदप्राये)
वेतस्वान् (बहुवेतसे) ॥ ९ ॥
शाद्वलः (शादहरिते)
(सजम्बाले तु) पङ्किलः ।
जलप्रायमनूपं (स्यात्)
(पुंसि) कच्छ (स्तथाविधः) ॥ १० ॥
(स्त्री) शर्करा शर्करिलः शार्करः शर्करावति ।
(देश एवादिमाव्)
(एवमुन्नेयाः) सिकतावति ॥ ११ ॥
(देशो नद्यम्बु, वृष्ट्यम्बु सम्पन्नब्रीहिपालितः ।
स्यात्) नदीमातृको
देवमातृक (श्च यथाक्रमम्) ॥ १२ ॥
(सुराज्ञि देशे) राजन्वान्
(स्यात्ततो ऽन्यत्र) राजवान् ।
गोष्ठं गोस्थानकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(तत्तु) गोष्ठीनं (भूतपूर्व्वकम्) ॥ १३ ॥

पर्य्यन्तभूः परिसरः

सेतुरालौ (स्त्रियां पुमान्)।

वामलूर (स्च) नाकु (स्च) वल्मीकं (पुन्नपुंसकम्) ॥१४॥

अयनं वर्त्म मार्गाध्व पन्थानः पदवी स्रुतिः।

सरणिः पद्धतिः पद्या वर्त्तन्येकपदो-(ति च) ॥ १५ ॥

अतिपन्थाः सुपन्था (स्च) सत्पथ (स्वार्च्चितेऽध्वनि)।

व्यध्वो दुरध्वो विपथः कदध्वा कापथः (समाः) ॥१६॥

अपन्था (स्त्व) पथं (तुल्ये)

शृङ्गाटक चतुष्पथे।

प्रान्तरं (दूरशून्योऽध्वा)

कान्तारो (वर्त्म दुर्गमम्) ॥ १७॥

गव्यूतिः (स्त्री) क्रोशयुगं

नल्वः (किष्कु चतुःशतम्)।

घण्टापथः संसरणं

(तत्पुरस्यो)-पनिष्करम् ॥ १८ ॥

अथ पुरवर्गः।

पूः (स्त्री) पुरी नगर्य्यौ (वा) पत्तनं पुटभेदनम्।

स्थानीयं निगमो

(ऽन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥

(तत्) शाखानगरं

वेशो वेश्याजनसमाश्रयः।

आपण (स्तु) निषद्यायां

विपणिः पण्यवीथिका ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथ्या प्रतोली विशिखा
(स्यात्) चयो वप्र (मस्त्रियाम्) ।
प्राकारो वरणः शालः
प्राचीरं (प्रान्ततो वृतिः) ॥ ३ ॥
भित्तिः (स्त्री) कुड्यम्
एडूकं (यदन्तर्न्यस्तकीकसम्) ।
गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तवस्त्य सदनं भवनागार मन्दिरम् ।
गृहाः (पुंसि च भूम्न्येव) निकाय्य निलयालयाः ॥५॥
वासः कूटी (द्वयोः) शाला सभा
सञ्जवनं (त्विदम्) ।
चतुःशालं
(मुनीनां तु) पर्णशालोटजो (ऽस्त्रियाम्) ॥६॥
चैत्यमायतनं (तुल्ये)
वाजिशाला (तु) मन्दुरा ।
आवेशनं शिल्पशाला
प्रपा पानीय शालिका ॥७॥
मठ (श्छात्रादिनिलयो)
गञ्जा (तु) मदिरागृहम् ।
गर्भागारं वासगृहं
अरिष्टं सूतिकागृहम् ॥ ८ ॥
वातायनं गवाक्षः (स्यात्)
मण्डपो (ऽस्त्री) जनाश्रयः ।
हर्म्यादि (धनिनां वासः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रासादो (देवभूभुजाम्) ॥९॥
सौधो (ऽस्त्री) राजसदनं
उपकार्य्योपकारिका।
स्वस्तिकः सर्वतोभद्रो नन्द्यावर्त्ता-(दयो ऽपि च) ॥१०॥
विच्छन्दकः (प्रभेदा हि भवन्तीश्वरसद्मनाम्)।
(स्त्र्यगारं भूभुजाम्) अन्तःपुरं (स्याद्) अवरोधनम् ॥११॥
शुद्धान्त (श्चा) ऽवरोध (श्च)
(स्याद्) अट्टः क्षौम (मस्त्रियाम्)।
प्रघाण प्रघणालिन्दा (बहिर्द्वारप्रकोष्ठके) ॥ १२ ॥
गृहावग्रहणी देहल्य
ऽङ्गनं चत्वराऽजिरे।
(अधस्ताद्दारुणि) शिला
नासा (दारूपरिस्थितम्) ॥१३
प्रच्छन्नमन्तर्द्वारं (स्यात्)
पक्षद्वारं (तु) पक्षकः।
वलीक नीध्र पटलप्रान्ते
(ऽथ) पटलं छदिः ॥ १४ ॥
गोपानसी (तु) वलभी (छादने वक्रदारुणि)।
कपोतपालिकायां (तु) विटङ्कं (पुन्नपुंसकम्) ॥ १५ ॥
(स्त्री) द्वार्द्वारं प्रतीहारः
(स्याद्) वितर्द्दि (स्तु) वेदिका।
तोरणो (ऽस्त्री) बहिर्द्वारं
पुरद्वारं (तु) गोपुरम् ॥ १६ ॥
(कूटं पूर्द्वारि यद्) हस्तिनख (स्तस्मिन्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अथ त्रिषु) ।

कपाटमररं (तुल्ये)

(तद्विष्कम्भे) ऽर्गलं (न ना) ॥१७॥

आरोहणं (स्यात्) सोपानं

निःश्रेणि (स्त्व) धिरोहिणी ।

सम्मार्जनी शोधनी (स्यात्)

सङ्करो ऽवकर (स्तया) ॥१८॥

(क्षिप्ते)

सुखं निःसरणं

सन्निवेशो निकर्षणम् ।

(समौ) संवसथ ग्रामौ

वेश्मभूर्वास्तु (रस्त्रियाम्) ॥ १९ ॥

ग्रामान्त उपशल्यं (स्यात्)

सीमसीमे (स्त्रियामुभे) ।

घोष आभीरपल्ली (स्यात्)

पक्कणः शवरालयः ॥ २० ॥

अथ पर्व्वतवर्गः ।

महीध्रे शिखरि-क्ष्माभृदहार्य्य धर पर्वताः ।

अद्रि गोत्र गिरि ग्रावाचल शैल शिलोच्चयाः ॥ १ ॥

लोकालोकश्चक्रवाल

स्त्रिकूटस्त्रिककुत् (समौ) ।

अस्त (स्तु) चरमक्ष्माभृद्

उदयः पूर्व्वपर्व्वतः ॥ २ ॥

हिमवान्निषधो विन्ध्यो माल्यवान् पारियात्रकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धमादन (मन्ये) च हेमकूटा-(दयो नगाः) ॥ ३ ॥
पाषाण प्रस्तर ग्रावोपलाश्मानः शिला दृषत् ।
कूटो (ऽस्त्री) शिखरं शृङ्गं
प्रपात (स्त्व)-तटोभृगुः ॥ ४ ॥
कटको (ऽस्त्री नितम्बो ऽद्रेः)
स्नुः प्रस्थः सानु-(रस्त्रियौ) ।
उत्सः प्रस्रवणं
(वारिप्रवाहो) निर्झरो झरः ॥ ५ ॥
दरी (तु) कन्दरो (वा स्त्री)
(देवखात-विले) गुहा ।
गह्वरं
गण्डशैला (स्तु च्युताः स्थूलोपला गिरेः) ॥६॥
खनिः (स्त्रियाम्) आकरः (स्यात्)
पादाः प्रत्यन्तपर्वताः ।
उपत्यका (ऽद्रेरासन्ना भूमिर्)
(ऊर्द्ध्वम)-धित्यका ॥ ७ ॥
धातु (र्मनः शिलाद्यद्रेर्)
गैरिकं (तु विशेषतः) ।
निकुञ्ज कुञ्जौ (वा क्लीवे लतादिपिहितोदरे ॥ ८ ॥

वनौषधि वर्गः ।

अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी
गृहारामा (स्तु) निष्कुटाः ॥ १ ॥
आरामः (स्याद्) उपवनं (कृत्रिमं वनमेव तत्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अमात्यगणिका गेहोपवने) वृक्षवाटिका ॥ २ ॥
(पुमाना)-क्रीड़ उद्यानं (राज्ञः साधारणं वनम्) ।
(स्यादेतदेव) प्रमदवन (मन्तः पुरोचितम्) ॥ ३ ॥
वीथ्यालिरावलिः पंक्तिः श्रेणी
लेखा (स्तु) राजयः ।
वन्या वनसमूहे (स्याद्)
अङ्कुरोऽभिनवोद्भिदि ॥ ४ ॥
वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रु द्रुमागमाः ॥ ५ ॥
वानस्पत्यः (फलैः पुष्पात्)
(तैरपुष्पाद्) वनस्पतिः ।
ओषध्यः (फलपाकान्ताः)
(स्याद्) अवन्ध्यः फलेग्रहिः ॥ ६ ॥
वन्ध्योऽफलोऽवकेशी (च)
फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्ल संफुल्ल व्याकोष विकच स्फुटाः ॥ ७ ॥
फुल्ल (स्चैतं) विकसिते (स्यु र्)
(अवन्ध्यादय स्त्रिषु) ॥ ८ ॥
स्थाणु (वा ना) ध्रुवः शङ्कुर्
(ह्रस्वशाखाशिफः) क्षुपः ।
(अप्रकाण्डे) स्तम्ब गुल्मौ
वल्ली (तु) व्रततिर्लता ।
(लता प्रतानिनी) वीरुद्गुल्मिन्युलप (इत्यपि) ॥ ९ ॥
(नगाद्यारोह) उच्छ्राय उत्सेध (श्चो) च्छ्रय (श्च सः) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्त्री) प्रकाण्डः स्कन्धः (स्यान्मूलाच्छाखावधिस्तरोः)॥१०॥
(समे) शाखा लते
स्कन्धशाखा शाले
शिफा जटे ।
(शाखा शिफा) ऽवरोहः (स्यात्)
(मूलाच्चाग्रं गता) लता ॥११॥
शिरो ऽग्रं शिखरं (वा ना)
मूलं बुध्नो (ऽङ्घ्रिनामकः) ।
सारो मज्जा (समौ)
त्वक् (स्त्री) वल्कं वल्कल (मस्त्रियाम्) ॥१२॥
काष्ठं दार्व्
इन्धनं (त्वे) ध इध्ममेधः समित् (स्त्रियाम्) ।
निष्कुहः कोटरं (वा ना)
वल्लरिर्मञ्जरिः (स्त्रियौ) ॥१३॥
पत्रं पलाशं छदनं दलं पर्णं छदः (पुमान्) ।
पल्लवो (ऽस्त्री) किसलयं
विस्तारो विटपो (ऽस्त्रियाम्) ॥१४॥
(वृक्षादीनां) फलं शस्यं
वृन्तं प्रसवबन्धनम् ।
(आमे फले) शलाटुः (स्यात्)
(शुष्के) वान (मुभे त्रिषु) ॥१५॥
क्षारको जालकं (क्लीवे)
कलिका कोरकः (पुमान्) ।
(स्याद्) गुच्छक (स्तु) स्तवकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुड्मलो मुकुलो (ऽस्त्रियाम्) ।
(स्त्रियः) सुमनसः पुष्पं प्रसूनं कुसुमं (समम्) ।
मकरन्दः पुष्परसः
परागः सुमनोरजः ॥ १७ ॥
(द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्) ।
आश्वत्थ वैणव प्लाक्ष नैयग्रोधैङ्गुदं (फले) ॥ १८ ॥
बार्हतं (च)
(फले जंव्वा) जम्बूः (स्त्री) जम्बु जाम्बवम् ।
(पुष्पे जातीप्रभृतयः स्वलिङ्गा ब्रीहयः फले ॥ १९ ॥
विदार्य्याद्यास्तु मूले ऽपि)
(पुष्पे क्लीबे ऽपि) पाटला ॥२०॥
बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ।
अश्वत्थे
(ऽथ) कपित्थे (स्युर्) दधित्थ ग्राहि मन्मथाः ॥२१॥
(तस्मिन्) दधिफलः पुष्पफलदन्तशठा (वपि) ।
उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ २२ ॥
कोविदारे चमरिकः कुद्दालो युगपत्रकः ।
सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ॥ २३ ॥
आरग्वधे राजवृक्ष सम्पाक चतुरङ्गुलाः ।
आरेवत व्याधिघात कृतमाल सुवर्णकाः ॥ २४ ॥
(स्युर्) जम्बीरे दन्तशठ जम्भ जम्भीर जम्भलाः ।
वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ॥ २५ ॥
पुन्नागे पुरुषस्तुङ्गः केसरी देवबल्लभः ।
पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः।
वञ्जुलश्चित्रकृच्च (चा
ऽथ द्वौ) पीतन कपीतनौ ॥ २७ ॥
आम्रातके
मधूके (तु) गुड़पुष्प मधुद्रुमौ।
वानप्रस्थ मधुष्ठीलौ
(जलजे ऽत्र) मधूलकः ॥ २८ ॥
पीलौ गुड़फलः स्रंसी
(तस्मिंस्तु गिरिसम्भवे)।
अक्षोड़ कन्दरालौ (द्वा)
वङ्कोठे (तु) निकोचकः ॥२९
पलाशे किंशुकः पर्णो वातपोथो
(ऽथ) वेतसे।
रथा ऽभ्रपुष्प विदुल शीत वानीर वञ्जुलाः ॥ ३० ॥
(द्वौ) परिव्याधविदुलौ नादेयी (चां) बुवेतसे।
शोभाञ्जने शिग्रु तीक्ष्णगन्धकाक्षीव मोचकाः ॥ ३१ ॥
(रक्तो ऽसौ) मधुशिग्रुः (स्याद)
अरिष्टः फेनिलः (समौ)।
विल्वे शाण्डिल्य शैलूषौ मालूर श्रीफला (वपि) ॥३२॥
प्लक्षो जटी पर्कटी (स्यान्)
न्यग्रोधो बहुपादटः।
गालवः शावरो लोध्रस्तिरीटस्तिल्व मार्जनौ ॥ ३३ ॥
आम्रश्चूतो रसालो
(ऽसौ) सहकारो (ऽतिसौरभः)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुम्भोलूखलकं (क्लीबे) कौशिको गुग्गुलुः पुरः ॥ ३४ ॥
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः।
राजादनं पियाल (स्त्व) सन्नकद्रुर्धनुः पटः ॥ ३५ ॥
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका।
श्रीपर्णी भद्रपर्णी (च) काश्मर्य्य (श्चा प्य)
(ऽथ द्वयोः) ॥३६॥
कर्कन्धूर्वदरी कोलिः
कोलं कुवल फेनिले।
सौवीरं वदरं घोण्टा (ऽप्य)
(ऽथ स्यात्) स्वादुकण्टकः॥३७॥
विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपाद-(पि)।
ऐरावतो नागरङ्गो नादेयो भूमिजम्बुका ॥ ३८ ॥
तिन्दुकः स्फूर्जकः कालस्कन्ध (स्च) शितिसारके।
काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ॥ ३९ ॥
गोलीढ़ो झाटलो घण्टापाटलिर्मोक्ष मुष्ककौ।
तिलकः चुरकः श्रीमान्
(समौ) पिचुल झावुकौ ॥४०॥
श्रीपर्णिका कुमुदिका कुम्भी कैटर्य्य कट्फली।
क्रमुकः पट्टिका (ख्यः स्यात्) पट्टी लाचाप्रसादनः ॥४१॥
नूद (स्तु) पूषः क्रमुको ब्रह्मण्यो ब्रह्मदारु (च)।
तूल (श्च)
नीप प्रियक कदम्बा (स्तु) हलिप्रिये ॥ ४२ ॥
वीरवृक्षो ऽरुष्करो ऽग्निमुखी भल्लातकी (त्रिषु)।
गर्द्दभाण्डे कन्दराल कपीतन सुपार्श्वका: ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्लक्ष (श्च)

तिन्तिड़ी चिञ्चा ऽम्लिका

(ऽथ) पीतसालके।

सर्ज्जका ऽसन वन्धूकपुष्प प्रियक जीवकाः ॥ ४४ ॥

साले (तु) सर्ज कार्ष्या (ऽश्वकर्णकाः शस्यसंवरः।

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभो ऽर्जुनः ॥ ४५ ॥

राजादन-फलाध्यक्षे क्षीरिकायां

(अथ द्वयोः)।

इङ्गुदी-तापसतरु

भूर्ज्जे चर्मि मृदुत्वचौ ॥ ४६ ॥

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलि (र्द्वयोः)।

पिच्छा (तु) शाल्मलीवेष्टे

रोचनः कूटशाल्मलिः ॥ ४७ ॥

चिरविल्वो नक्तमालः करज (श्च) करञ्जके।

प्रकीर्य्यः पूतिकरजः पूतिकः कलिमारकः ॥ ४८ ॥

(करञ्जभेदाः) षड्ग्रन्थो मर्कटयङ्गारवल्लरी।

रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः ॥ ४९ ॥

गायत्री बालतनयः खदिरो दन्तधावनः।

अरिमेदो विट्खदिरे

कदरः (खदिरे सिते) ॥ ५० ॥

सोमवल्को (ऽप्य)

(ऽथ) व्याघ्रपुच्छ गन्धर्वहस्तकौ।

एरण्ड उरुवूक (श्च) रुचकश्चित्रक (श्च सः) ॥ ५१ ॥

चञ्चुः पञ्चाङ्गुलो मण्ड वर्द्धमान व्यडम्बकाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्या शमी) शमीरः (स्यात्)

शमी सक्तुफला शिवा ॥५२॥

पिण्डीतको मरुवकः श्वसनः करहाटकः ।

शल्य (श्च) मदने

शक्रपादपः पारिभद्रकः ॥ ५३ ॥

भद्रदारु द्रुकिलिमं पीतदारु (च) दारु (च) ।

पूतिकाष्ठ (ञ्च सप्त स्युर्) देवदारुण्य

(ऽथ द्वयोः) ॥ ५४ ॥

पाटलिः पाटला ऽमोघा काचस्थाली फलेरुहा ।

कृष्णवृन्ता कुबेराक्षी

श्यामा (तु) महिला-(ह्वया) ॥५५॥

लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।

विष्वक्सेना गन्धफली कारम्भा प्रियक (श्च सा) ॥५६॥

मण्डूकपर्ण पत्रोर्ण नट कट्वङ्ग टुण्टुकाः ।

श्योनाक शुकनासर्क्ष दीर्घवृन्त कुटन्नटाः ॥ ५७ ॥

शोणक (श्चा) ऽरलो

तिष्यफला (त्वा) मलकी (त्रिषु) ।

अमृता (च) वयस्था (च)

(त्रिलिङ्ग (स्तु) विभीतकः ॥५८॥

अक्षस्तुषः कर्षफलो भूतवासः कलिद्रुमः ।

अभया (त्व) व्यथा पथ्या वयस्था पूतना ऽमृता ॥ ५९ ॥

हरीतकी हैमवती चेतकी श्रेयसी शिवा ।

पीतद्रुः सरलः पूतिकाष्ठं (चा)

(ऽथ) द्रुमोत्पलः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्णिकारः परिव्याधो

लकुचो लिकुचो डहुः।

पनसः कण्टकिफलो

निचुलो ऽम्बुज इज्जलः॥ ६१॥

काकोडुम्बरिका फल्गुर्मलपूर्ज्जघनेफला।

अरिष्टः सर्वतोभद्र हिङ्गुनिर्य्यास मालकाः॥ ६२॥

पिचुमर्द्द(श्च) निम्बे

(ऽथ) पिच्छिला ऽगुरु शिंशपा।

कपिला भस्मगर्भा (सा)

शिरीष (स्तु) कपीतनः॥ ६३॥

भण्डिलो (ऽप्य)

(ऽथ) चाम्पेयश्चम्पको हेमपुष्पकः।

(एतस्य कलिका) गन्धफली (स्याद)

(ऽथ) केसरे॥ ६४॥

बकुलो

वञ्जुलो ऽशोके

(समौ) करक दाड़िमौ।

चाम्पेयः केसरो नागकेसरः काञ्चनः(ह्वयः)॥ ६५॥

जया जयन्ती तर्क्कारी नादेयी वैजयन्तिका।

श्रीपर्णमग्निमन्थः (स्यात्) कणिका गणिकारिका॥६६

जयो

(ऽथ) कूटजः शक्रो वत्सको गिरिमल्लिका।

(एतस्यैव) कलिङ्गेन्द्रयवं भद्रयवं (फले)॥ ६७॥

कृष्णपाकफला ऽविग्न सुषेणाः करमर्द्दके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालस्कन्धस्तमालः (स्यात्) तापिच्छो (ऽप्य)
(ऽथ) सिन्दुकः ॥६८॥

सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिके (त्यपि) ।
वेणी खरा गरी देवताडी जीमूत (इत्यपि) ॥ ६९ ॥

श्रीहस्तिनी (तु) भूरुण्डी
तृणशून्यं (तु) मल्लिका ।

भूपदी शीतभीरु (श्च)
(सैवा) स्फोता (वनोद्भवा) ॥७०॥

शेफालिका (तु) सुवहा निर्गुण्डी नीलिका (च सा) ।
(सितासौ) श्वेतसुरसा भूतवेशी
(ऽथ) मागधी ॥ ७१ ॥

गणिका यूथिका ऽम्बष्ठा
(सा पीता) हेमपुष्पिका ।

अतिमुक्तः पुण्ड्रकः (स्याद्) वासन्ती माधवीलता ॥७२॥
सुमना मालती जातिः
सप्तला नवमालिका ।

माध्यं कुन्दं
रक्तक (स्तु) बन्धूको बन्धुजीवकः ॥ ७३ ॥

सहा कुमारी तरणिर्
अम्लान (स्तु) महासहा ।

(तत्र शोणे) कुरवक
(स्तत्र पीते) कुरण्टकः ॥ ७४ ॥

(नीला झिण्टी द्वयोर्) बाणा दासी (चा) ऽऽर्तगल (श्च सा) ।
सैरीयक (स्तु) झिण्टी (स्यात्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(तस्मिन्) कुरवको (ऽरुणे) ॥७५॥
(पीता) कुरण्टको (झिण्टी तस्मिन्) सहचरी (द्वयोः)।
ओड्रपुष्पं जवा
वज्रपुष्पं (पुष्पं तिलस्य यत्) ॥ ७६ ॥
प्रतिहास शतप्रास चण्डात हयमारकाः।
करवीरे
करीरे (तु) क्रकर ग्रन्थिला (वुभौ) ॥ ७७ ॥
उन्मत्तः कितवो धूर्त्तो धुस्तूरः कनका (ह्वयः)।
मातुलो मदन (स्वा)
(ऽस्य फले) मातुलपुत्रकः ॥ ७८ ॥
फलपूरो बीजपूरो रुचको मातुलुङ्गके।
समीरणो मरुवकः प्रस्थपुष्पः फणिज्झकः ॥ ७९ ॥
जम्बीरो (ऽप्य)
(ऽथ) पर्णासे कठिञ्जर कुठेरकौ।
(सिते) ऽर्ज्जको (ऽत्र)
पाठी (तु) चित्रको वह्नि (संज्ञकः) ॥८०॥
अर्का (ह्व) वसुकास्फोत गणरूप विकीरणाः।
मन्दार (स्वा) ऽर्कपर्णौ
(ऽत्र शुक्ले) ऽलर्क प्रतापसौ ॥ ८१॥
शिवमल्ली पाशुपत एकाष्ठीलो वको वसुः।
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिके-(त्यपि) ॥ ८२ ॥
वत्सादनी च्छिन्नरुहा गुडूची तन्त्रिका ऽमृता।
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्य (ऽपि) ॥८३॥
मूर्वा देवी मधुरसा मोरटा तेजनी स्रुवा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्य (ऽपि) ॥८४॥
पाठाऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ।
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ॥ ८५ ॥
कटुः कटम्बराऽशोकरोहिणी कटुरोहिणी ।
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ॥ ८६ ॥
आत्मगुप्ता जडाऽव्यण्डा कण्डूरा प्रावृषायणी ।
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छु (श्च) मर्कटी ॥८७॥
चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ।
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्य (ऽपि) ॥८८॥
अपामार्गः शैखरिको धामार्गव मयूरकौ ।
प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरी ॥ ८९ ॥
हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाक वर्वर वर्द्धकाः ॥ ९० ॥
मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्य (ऽपि) ॥ ९१ ॥
यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ॥ ९२ ॥
पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका ।
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ॥ ९३ ॥
निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिके (त्यपि) ॥ ९४ ॥
नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ।
रञ्जनी श्रीफली तुत्था द्रोणी दोला (च) नीलिनी ॥९५॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालमेषी कृष्णफला वाकुची पूतिफल्य (ऽपि) ॥ ९६ ॥
कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
उषणा पिप्पली शौण्डी काला
(ऽथ) करिपिप्पली ॥९७॥
कपिवल्ली कोलवल्ली श्रेयसी वशिरः (पुमान्) ।
चव्य (न्तु) चविका
काकचिञ्ची गुञ्जे (तु) कृष्णला ॥९८॥
पलङ्कषा (त्वि) क्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट (इत्यपि) ॥ ९९ ॥
विश्वा विषा प्रतिविषा ऽतिविषोपविषा ऽरुणा ।
शृङ्गी महौषधं (चा)
(ऽथ) क्षीरावी दुग्धिका (समे) ॥१००॥
शतमूली बहुसुता ऽभीरुरिन्दीवरी वरी ।
ऋष्यप्रोक्ता भीरुपत्री नारायण्यः शतावरी ॥१०१॥
अहेरु
(रथ) पीतद्रु कालेयक हरिद्रवः ।
दार्वी पचम्पचा दारुहरिद्रा पर्ज्जनी-(त्यपि) ॥१०२॥
वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
(शुक्ला) हैमवती
वैद्यमातृ सिंह्यौ (तु) वासिका ॥१०३॥
वृषो ऽटरुषः सिंहास्यो वासको वाजिदन्तकः ।
आस्फोता गिरिकर्णी(स्याद्)विष्णुक्रान्ता ऽपराजिता ॥१०४॥
इक्षुगन्धा (तु) काण्डेक्षु कोकिलाक्षेक्षुरक्षुराः ।
शालेयः (स्यात्) शीत शिवञ्छत्रा मधुरिका मिशी॥१०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिश्रेया (प्य)

(ऽथ) सीहुण्डो वज्रद्रुः स्नुक् स्नुही गुडा ।

समन्तदुग्धा

(ऽथो) वेल्लममोघा चित्रतण्डुला ॥१०६॥

तण्डुल (श्च) क्रमिघ्न) (श्च) विडङ्गं (पुन्नपुंसकम्) ।

बला वाट्यालको

घण्टारवा (तु) शणपुष्पिका ॥ १०७ ॥

मृद्वीका गोस्तनी द्राचा स्वाद्वी मधुरसे (ति च) ।

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ॥ ॥१०८॥

त्रिभण्डी रोचनी

श्यामा पालिन्ध्यौ (तु) सुषेणिका ।

काला मसूरविदला ऽर्द्धचन्द्रा कालमेषिका ॥ १०९ ॥

मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ।

विदारी चोरशुक्लेक्षुगन्धा क्रोष्ट्री (च या शिता)॥१०१॥

(अन्या) चीरविदारी (स्यात्) महाश्वेतर्क्षगन्धिका ।

लाङ्गली शारदी तोयपिप्पली शकुलादनी ॥ १११ ॥

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ।

गोपी श्यामा शारिवा(स्यात्)अनन्तोत्पलशारिवा॥११२॥

योग्यमृद्धिः सिद्धि लक्ष्म्यौ

वृद्धे (रप्याह्वया इमे) ।

कदली वारणबुसा रम्भा मोचांशुमत्फला ॥ ११३ ॥

काष्ठीला

मुद्गपर्णी (तु) काकमुद्गा सहे (त्यपि) ।

वार्त्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी ॥११४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी च्छत्राकी सुवहा (च सा) ॥११५॥
विदारीगन्धांशुमती सालपर्णी स्थिरा ध्रुवा ।
तुण्डिकेरी समुद्रान्ता कर्पासी बदरे (ति च) ॥११६॥
भारद्वाजी (तु सा वन्या)
श्रृङ्गी (तु) वृषभो वृषः ।
गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ॥ ११७ ॥
धामार्गवो घोषकः (स्यात्)
महाजाली (स पीतकः) ।
ज्योत्स्नी पटोलिका जाली
नादेयी भूमिजम्बुका ॥११८॥
(स्यात्) लाङ्गलिक्यग्निशिखा
काकाङ्गी काकनासिका ।
गोधापदी (तु) सुवहा
मुसली तालमूलिका ॥ ११९ ॥
अजश्रृङ्गी विषाणी (स्याद्)
गोजिह्वा दार्विके (समे) ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्य (प्य)
(ऽथ) द्विजा ॥१२०॥
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।
एलवालुकमैलेयं सुगन्धि हरिवालुकम् ॥ १२१ ॥
वालुकं (चा)
(ऽथ) पालङ्क्यां मुकुन्दः कुन्द कुन्दुरू ।
बालं ह्रीबेरं बर्हिष्ठो दीच्यं (केशाम्बुनाम च) ॥ २२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालानुसार्य्यं वृद्धा ऽश्मपुष्प शीतशिवानि (तु) ।
शैलेयं
तालपर्णी (तु) दैत्या गन्धकूटी मुरा ॥ १२३ ॥
गन्धिनी
गजभक्ष्या (तु) सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी शल्लकी ह्लादिनी (ति च) ॥ १२४ ॥
अग्निज्वालां सुभिक्षे (तु) धातकी धातृपुष्पिका ।
पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुला
(ऽथ सा) ॥ १२५ ॥
(सूक्ष्मोप) कुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ।
व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ॥ १२६ ॥
शङ्खिनी चोरपुष्पी (स्यात्) केशिन्य
(ऽथ) वितुन्नकः ।
झटाऽमलाऽज्झटा ताली शिवा तामलकी (ति च) १२७
प्रपौण्डरीकं पुण्डर्य्यं
(अथ) तुन्नः कुवेरकः ।
कुणिः कच्छः कान्तलको नन्दिवृक्षो
(ऽथ) राक्षसी ॥ १२८ ॥
चण्डा धनहरी क्षेम दुष्पत्र गणहासकाः ।
व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ॥ १२९ ॥
शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ।
धमन्यञ्जनकेशी (च) हनुर्हट्टविलासिनी ॥ १३० ॥
शुक्तिः शङ्खः खुरः कोलदलं नखं
(अथा)-ढकी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काची मृत्स्ना तुबरिका मृतालक सुराष्ट्रजे ॥ १३१ ॥
कुटन्नटं दाशपुरं वानेयं परिपेलवम्।
प्लव गोपुर गोनर्द कैवर्त्तिमुस्तकानि (च) ॥ १३२ ॥
ग्रन्थिपर्णं शुकं वर्हिपुष्पं स्थौणेय कुक्कुरे।
मरुन्माला (तु) पिशुना स्पृक्का देवी लता लघुः ॥१३३॥
समुद्रान्ता बधूः कोटिवर्षा लङ्कोपिके (त्यपि)।
तपस्विनी जटामांसी जटिला लोमशा मिसी ॥ १३४॥
त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम्।
कर्चूरको द्राविड़कः काल्पको वेधमुख्यकः ॥ १३५ ॥
ओषध्यो (जातिमात्रे स्युर्)
(अजातौ सर्वम्) औषधम्।
शाका (ख्यं पत्र पुष्पादि)
तण्डुलीयो ऽल्पमारिषः ॥१३६॥
विशल्या ऽग्निशिखा ऽनन्ता फलिनी शक्रपुष्प्य (ऽपि)।
(स्याद्) ऋच्चगन्धा छगलान्त्र्यावेगी वृद्धदारकः ॥ १३७॥
जुङ्गो
ब्राह्मी (तु) मत्स्याक्षी वयस्था सोमवल्लरी।
पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥ १३८ ॥
हयपुच्छी (तु) काम्बोजी मासपर्णी महासहा।
तुण्डिकेरी रक्तफला विम्बिका पीलुपर्ण्य (ऽपि) ॥१३९॥
वर्वरा कवरी तुङ्गी खरपुष्पा ऽजगन्धिका।
एलापर्णी (तु) सुवहा रास्ना युक्तरसा (च सा) ॥१४०॥
चाङ्गेरी चुक्रिका दन्तशठा अम्बष्ठा ऽम्ललोणिका।
सहस्रवेधी चक्री ऽम्लवेतसः शतवेध्य (ऽपि) ॥ १४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमस्कारी गण्डकाली समङ्गा खदिरी (त्यपि) ।
जीवन्ती जीवनी जीवा जीवनीया मधु (स्रवा) ॥१४२॥
कूर्चशीर्षो मधुरकः शृङ्ग ह्रस्वाङ्ग जीवकाः ।
किराततिक्तो भूनिम्बो ऽनार्य्यतिक्तो

(ऽथ) सप्तला ॥१४३॥
विमला सातला भूरिफेना चर्मकषे (त्यपि) ।
वायसोली स्वादुरसा वयस्या

(ऽथ) मकूलकः ॥१४४॥
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्य (ऽपि) ।
अजमोदा (तू) ग्रगन्धा

ब्रह्मदर्भा यवानिका ॥ १४५ ॥
(मूले) पुष्कर काश्मीर पद्मपत्राणि (पौष्करे) ।
अव्यथा ऽतिचरा पद्मा चारटी पद्मचारिणी ॥१४६॥
काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनी (त्यपि) ।
प्रपुन्नाड (स्त्वे) डगजो दद्रुघ्नश्चक्रमर्द्दकः ॥ १४७ ॥
पद्माट उरणाच (श्च)

पलाण्डु (स्तु) सुकन्दकः ।
लतार्क दुद्रुमौ (तत्र हरिते)

(ऽथ) महौषधम् ॥ १४८ ॥
लशुनं गृञ्जना ऽरिष्ट महाकन्द रसोनकाः ।
पुनर्नवा (तु) शोथघ्नी

वितुन्नं सुनिषण्णकम् ॥ १४९ ॥
(स्याद्) वातकः शीतलो ऽपराजिता ऽशनपर्ण्य (ऽपि) ।
पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ॥१५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वार्षिकं त्रायमाणा (स्यात्) त्रायन्ती बलभद्रिका।
विष्वक्सेनप्रिया गृष्टिर्वाराही बदरे (त्यपि) ॥ १५१ ॥
मार्कवो भृङ्गराजः (स्यात्)
काकमाची (तु) वायसी।
शतपुष्पा सितच्छत्रा ऽतिच्छत्रा मधुरा मिसिः ॥१५२॥
अवाक्पुष्पी कारवी (च)
सरणा (तु) प्रसारणी।
(तस्यां) कटम्भरा राजबला भद्रबले-(ति च) ॥ १५३ ॥
जनी जतूका रजनी जतुकृच्चक्रवर्त्तिनी।
संस्पर्शा
(ऽथ) शटी गन्धमूली षड्ग्रन्थिके (त्यपि) ॥१५४॥
कर्चूरो (ऽपि) पलाशो
(ऽथ) कारवेल्लः कटिल्लकः।
सुषवी (चा
ऽथ) कुलकं पटोलस्तिक्तकः पटुः ॥१५५॥
कूष्माण्डक (स्तु) कर्कारु-
र्र्वारुः कर्कटी (स्त्रियौ)।
इक्ष्वाकुः कटुतुम्बी (स्यात्)
(तुम्ब्यलाबू (रुभे समे) ॥१५६॥
चित्रा गवाक्षी गोडुम्बा
विशाला (त्वि) न्द्रवारुणी।
अर्शोघ्नः सूरणः कन्दो
गण्डीर (स्तु) समष्ठिला ॥१५७॥
कलम्बुरुपोदिका (स्त्री तु) मूलकं हिलमोचिका।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वास्तूकं (शाकभेदाः स्युर्)
दूर्व्वा (तु) शतपर्व्विका ॥१५८॥
सहस्रवीर्य्या भार्गव्यौरुहा ऽनन्ता
(ऽथ सा सिता) ।
गोलोमी शतवीर्य्या(च) गण्डाली शकुलाक्षकः ॥१५९॥
कुरुविन्दो मेघ (नामा) मुस्ता मुस्तक (मस्त्रियाम्) ।
स्याद् भद्रमुस्तको गुन्द्रा
चूडाला चक्रलोच्चटा ॥ १६० ॥
वंशे त्वक्सार कर्मार त्वचिसार तृणध्वजाः ।
शतपर्वा यवफलो वेणु मस्कर तेजनाः ॥ १६१ ॥
(वेणवः) कीचका (स्ते स्युर्ये स्वनन्त्यनिलोद्धताः) ।
ग्रन्थि (र्ना) पर्वपरुषी
गुन्द्रस्तेजनकः शरः ॥ १६२ ॥
नड (स्तु) धमनः पोटगलो
(ऽथ) काश (मस्त्रियाम्) ।
इक्षुगन्धा पोटगलः
(पुंसि भूम्नि तु) वल्वजाः ॥१६३॥
रसाल इक्षुस्
(तद्भेदाः) पुण्ड्र कान्तारका (दयः) ।
(स्याद्) वीरणं वीरतरं
(मूले ऽस्यो)-शीर (मस्त्रियाम्)॥१६४॥
अभयं नलदं सेव्यमसृणालं जलाशयम् ।
लामज्जकं लघुलयमवदाहेष्टकापथे ॥ १६५ ॥
(नडादयस्) तृणं (गर्मुत्श्यामाकप्रमुखा अपि) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्त्री) कुशं कुशो दर्भः पवित्रं

(अथ) कत्तृणम् ॥१६

पौर सौगन्धिक ध्याम देवजग्धक रौहिषम् ।

छत्रा ऽतिछत्र पालघ्नौ

मालातृणक भूस्तृणे ॥ १६७ ॥

शष्पं बालतृणं

घासो यवसस्

तृणमर्जुनम् ।

(तृणानां संहतिस्) तृण्या

नड्या (तु नडसंहतिः) ॥१६८

तृणराजा (ह्वयम्) तालो

नारिकेर (स्तु) लाङ्गली ।

घोण्टा (तु) पूगः क्रमुकी गुवाकः खपुरो

(ऽस्य तु ॥ १६९

फलम्) उद्वेगम्

(एते च) हिन्ताल (सहितास्त्रयः) ।

खर्जूरः

केतकी

ताली

खर्जूरी (च) तृणद्रुमाः ॥१७०॥

इति वनौषधिवर्गः ।

पशु वर्गः ।

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।

शार्दूल द्वीपिनौ व्याघ्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरक्षु (स्तु) मृगादनः ॥ १ ॥
वराहः शूकरो घृष्टिः कोलः पोत्री किरः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार (इत्यपि) ॥ २ ॥
कपि प्लवङ्ग प्लवग शाखामृग वलीमुखाः ।
मर्कटो वानरः कीशो वनौका
(अथ) भल्लुके ॥ ३ ॥
ऋक्षा ऽच्छभल्ल भालूका
गण्डके खड्ग खड्गिनौ ।
लुलापो महिषो वाहद्विषत्कासर सैरिभाः ॥ ४ ॥
(स्त्रियां) शिवा भूरिमाय गोमायु मृगधूर्त्तकाः ।
शृगाल वञ्चक क्रोष्टृ फेरु फेरव जम्बुकाः ॥ ५ ॥
ओतुर्विड़ालो मार्जारो वृषदंशक आखु भुक् ।
(त्रयो) गौधेर गौधार गौधेया गोधिकात्मजे ॥ ६ ॥
श्वावित् (तु) शल्यस्
(तल्लोम्नि) शललो शललं शलम् ।
वातप्रमीर्वातमृगः
कोक ईहामृगो वृकः ॥ ७ ॥
मृगे कुरङ्ग वातायु हरिणा ऽजिनयोनयः ।
ऐणेयम् (एण्याश्चर्माद्यम्)
(एणस्यै)-णम् (उभे त्रिषु) ॥८॥
कदली कन्दली चीनश्चमूरु प्रियका (वपि) ।
समूरु (श्चेति हरिणा अमी अजिनयोनयः) ॥ ९ ॥
कृष्णसार रुरु न्यङ्कु रङ्कु शम्बर रौहिषाः ।
गोकर्ण पृषतैणर्श्य रोहिताश्चमरो (मृगाः) ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
(इत्यादयो मृगेन्द्राद्या गवाद्याः) पशु-(जातयः) ॥ ११
उन्दुरुर्मूषिको (प्या) खुर्
गिरिका बालमूषिका ।
सरटः कृकलासः (स्यात्)
मुसली गृहगोधिका ॥ १२
लूता (स्त्री) तन्तुवायोर्णनाभ मर्कटकाः (समाः) ।
नीलङ्गु (स्तु) कृमिः
कर्णजलौकाः शतपद्यु-(भे) ॥ १
वृश्चिकः शूककीटः (स्याद्)
अलि द्रुणौ (तु) वृश्चिके ।
पारावतः कलरवः कपोतो
(ऽथ) शशादनः ॥ १४ ॥
पत्री श्येन
उलूके (तु) वायसाराति पेचकौ ।
व्याघ्राटः (स्याद्) भरद्वाजः
खञ्जरीट (स्तु) खञ्जनः ॥ १५
लोहपृष्ठ (स्तु) कङ्कः (स्याद्)
(अथ) चाषः किकीदिविः ।
कलिङ्ग भृङ्ग धूम्याटा
(ऽथ स्यात्) शतपत्रकः ॥ १६ ॥
दार्वाघाटो
(ऽथ) सारङ्गः स्तोककश्चातकः (समाः) ।
कृकवाकुस्ताम्रचूड़ः कुक्कुटश्चरणायुधः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चटकः कलविङ्कः (स्यात्)

(तस्य स्त्री) चटका

(तयोः ।

पुमपत्ये) चाटकैरः (स्त्र्यपत्ये) चटकै-(व हि) ॥१८॥

कर्करेटु करेटुः (स्यात्)

कृकण क्रकरौ (समौ) ।

वनप्रियः परभृतः कोकिलः पिक (इत्यपि) ॥ १९ ॥

काके (तु) करटा ऽरिष्ट बलिपुष्ट सकृत्प्रजाः ।

ध्वांक्षात्मघोष परभृद्बलिभुग्वायसा (अपि) ॥ २० ॥

द्रोणकाक (स्तु) काकोलो

दात्यूहः कालकण्टकः ।

आतायि चिल्लौ

दाक्षाय्य गृध्रौ

कीर शुकौ (समौ) ॥२१॥

क्रुङ् क्रौञ्चौ

(ऽथ) वकः कह्वः

पुष्कर (ह्वस्तु) सारसः ।

कोकश्चक्रश्चक्रवाको रथाङ्ग (ह्वयनामकः) ॥ २२ ॥

कादम्बः कलहंसः (स्याद्)

उत्क्रोश कुररौ (समौ) ।

हंसा (स्तु) श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥

राजहंसा (स्तु ते चञ्चुचरणैर्लोहितैः सिताः) ।

(मलिनै) र्मल्लिका (ख्या स्ते) धार्त्तराष्ट्राः (सितेतरैः)॥२४॥

शरारिराटिराडि (श्च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वलाका विसकण्ठिका ।

(हंसस्य योषिद्) वरटा

(सारसस्य तु) लक्ष्मणा ॥ २५ ॥

जतुकाजिनपत्रा (स्यात्)

परोष्णी तैलपायिका ।

वर्वणा (मक्षिका नीला)

सरघा मधुमक्षिका ॥ २६ ॥

पतङ्गिका पुत्तिका (स्याद्)

दंश (स्तु) वनमक्षिका ।

दंशी (तज्जातिरल्पा स्याद्)

गन्धोली वरटा (द्वयोः) ॥२७॥

भृङ्गारी झीरुका चीरी झिल्लिका (च समा इमाः) ।

(समौ) पतङ्गशलभौ

खद्योतो ज्योतिरिङ्गणः ॥ २८ ॥

मधुव्रतो मधुकरो मधुलिण्मधुपाऽलिनः ।

द्विरेफ पुष्पलिड्भृङ्ग षट्पद भ्रमराऽलयः ॥ २९ ॥

मयूरो वर्हिणो वर्ही नीलकण्ठो भुजङ्गभुक् ।

शिखावलः शिखी केकी मेघनादानुलास्य (ऽपि) ॥३०॥

केका (वाणी मयूरस्य)

(समौ) चन्द्रक मेचकौ ।

शिखा चूड़ा

शिखण्ड (स्तु) पिच्छ वर्हं (नपुंसके) ॥ ३१ ॥

खगे विहङ्ग विहग विहङ्गम विहायसः ।

शकुन्ति पक्षि शकुनि शकुन्त शकुन द्विजाः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतत्रि पत्रि पतग पतत्पत्ररथाऽण्डजाः ।
नगौको वाजि विकिर वि विष्किर पतत्रयः ॥ ३३ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ।
(तेषां विशेषा) हारितो मद्गुः कारण्डवः प्लवः ॥ ३४ ॥
तित्तिरिः कुक्कुभो लावो जीवञ्जीवश्चकोरकः ।
कोयष्टिकष्टिट्टिभको वर्त्तको वर्त्तिका (दयः) ॥ ३५ ॥
गरुत्पक्षच्छदाः पत्रं पतत्र (ञ्च) तनूरुहम् ।
(स्त्री) पक्षतिः पक्षमूलं
चञ्चुस्त्रोटि (रुभे स्त्रियौ) ॥३६॥
प्रडीनो ड्डीन संडीना (न्येताः खगगतिक्रियाः) ।
पेशी कोषो (द्विहीने) ऽण्डं
कुलायो नीड़ (मस्त्रियाम्) ॥३७॥
पोतः पाको ऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
(स्त्री पुंसौ) मिथुनं द्वन्द्वं
युग्मं (तु) युगलं युगम् ॥ ३८ ॥
समूह निवह व्यूहसन्दोह विसर व्रजाः ।
स्तोमौघ निकर व्रात वार सङ्घात सञ्चयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।
(स्त्रियां तु) संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४० ॥
(वृन्दभेदाः समैर्) वर्गः
सङ्घ सार्थौ (तु जन्तुभिः) ।
(सजातीयैः) कुलं
यूथं (तिरश्चां पुन्नपुंसकम्) ॥ ४१ ॥
(पशूनां) समजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ऽन्येषां) समाजो

(ऽथ सधर्मिणाम् ।

स्यान्) निकायः

पुञ्ज राशी) तू त्करः कूट (मस्त्रियाम् ॥ ४२ ॥

कापोत शौकः मायूर तैत्तिरा (दीनि तद्गणे) ।

(गृहासक्ताः पक्षिमृगाश्) छेका (स्ते) गृह्यका (श्च ते) ॥ ४३

अथ नरवर्गः ।

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।

(स्युः) पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ॥ १ ॥

स्त्री योषिदबला योषा नारी सीमन्तिनी बधूः ।

प्रतीपदर्शिनी वामा वनिता महिला (तथा) ॥ २ ॥

(विशेषास्त्व) ङ्गना भीरुः कामिनी वामलोचना ।

प्रमदा भाविनी कान्ता ललना (च) नितम्बिनी ॥ ३ ॥

सुन्दरी रमणी रामा

कोपना (सैव) भामिनी ।

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

(कृताभिषेका) महिषी

भोगिन्यो (ऽन्या नृपस्त्रियः) ।

पत्नी पाणिगृहीती (च) द्वितीया सहधर्मिणी ॥ ५ ॥

भार्या जाया (ऽथ पुंभूम्नि) दाराः

(स्यात्तु) कुटुम्बिनी ।

पुरन्ध्री

सुचरित्रा (तु) सती साध्वी पतिव्रता ।

कृतसापत्निका ऽध्यूढा ऽधिविन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ऽथ) स्वयम्वरा।

पतिम्वरा (च) वर्य्या

(ऽथ) कुलस्त्री कुलपालिका ॥७॥

कन्या कुमारी

गौरी (तु) नग्निका ऽनागतार्त्तवा।

(स्यान्) मध्यमा दृष्टरजास्

तरुणी युवतिः (समे) ॥ ८ ॥

(समाः) स्नुषा जनी बध्वश्

चिरण्टी (तु) सुवासिनी।

इच्छावती कामुका (स्याद्)

वृषस्यन्ती (तु) कामुकी ॥९॥

(कान्तार्थिनी तु या याति सङ्केतं सा) ऽभिसारिका।

पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥

स्वैरिणी पांशुला

(ऽथ स्याद्) अशिश्वी (शिशुना विना)।

अवीरा (निष्पतिसुता)

विश्वस्ता विधवे (समे) ॥ ११ ॥

आलिः सखी वयस्या (च)

पतिवत्नी सभर्तृका।

वृद्धा पलिक्नी

प्राज्ञी (तु) प्राज्ञा

प्रज्ञा (तु) धीमती ॥ १२ ॥

शूद्री (शूद्रस्य भार्य्या स्यात्)

शूद्रा (तज्जातिरङ्गना)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आभीरी (तु) महाशूद्री (जातिपुंयोगयोः समा) ॥१३॥
अर्य्याणी (स्वयम्) अर्य्या (स्यात्)
क्षत्रिया क्षत्रियाण्य (ऽपि)
उपाध्याया (प्यु) पाध्यायी
(स्याद्) आचार्य्या (ऽपि च स्वतः) ॥१४॥
आचार्य्याणी (तु पुंयोगे)
(स्याद्) अर्य्यी
(क्षत्रियी (तथा)।
उपाध्यायान्युपाध्यायी
पोटा (स्त्री पुंसलक्षणा ॥ १५॥
वीरपत्नी वीरभार्य्या
वीरमाता (च) वीरसूः ।
जातापत्या प्रजाता (च) प्रसूता (च) प्रसूतिका ॥ १६॥
(स्त्री) नग्निका कोटवी (स्याद्)
दूती सञ्चारिके (समे)।
कात्यायन्य (र्द्धवृद्धा या काषायवसनाधवा) ॥ १७॥
सैरिन्ध्री (परवेश्मस्था स्ववशा शिल्पकारिका)।
असिक्नी (स्यादवृद्धा या प्रैष्यान्तः पुरचारिणी ॥ १८॥
वारस्त्री गणिका वेश्या रूपाजीवा
(ऽथ सा जनैः ।
सत्कृता) वारमुख्या (स्यात्)
कुट्टनी शम्भली (समे) ॥ १९॥
विप्रश्निका (त्वी) क्षणिका दैवज्ञा
(ऽथ) रजस्वला ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्य (ऽपि) ॥२०॥
ऋतुमत्य (प्यु) दक्या (ऽपि)
(स्याद्) रजः पुष्पमार्त्तवम्।
श्रद्धालुर्दोहदवती
निष्कला विगतार्त्तवा ॥२२॥
आपन्नसत्वा (स्याद्) गुर्विण्यन्तर्वत्नी (च) गर्भिणी।
(गणिकादेस्तु) गाणिक्यं
गार्भिण्यं
यौवतं (गणे) ॥ २३ ॥
पुनर्भूर्दिधिषु (रूढ़ा द्वि')
(तस्या) दिधिषुः (पतिः)।
(स तु द्विजो) ऽग्रेदिधिषुः (सैव यस्य कुटुम्बिनी।
कानीनः कन्यकाजातः (सुतो)
(ऽथ) सुभगासुतः।
सौभागिनेयः (स्यात्)
पारस्त्रैणेय (स्तु परस्त्रियाः) ॥२४॥
पैतृष्वसेयः (स्यात्) पैतृष्वस्रीय (स्व पितृष्वसुः।
सुतो)
(मातृष्वसुश्चैवं)
वैमात्रेयो विमातृजः ॥ २५ ॥
(अथ) बान्धकिनेयः (स्याद्) बन्धुल (श्चा) ऽसतीसुतः।
कौलटेयः कौलटेरो
(भिक्षुकी तु सती यदि ॥ २६ ॥
तदा) कौलटिनेयो (ऽस्याः) कौलटेयो (ऽपि चात्मजः)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मजस्तनयः सूनुः सुतः पुत्रः
(स्त्रियान्त्वमी ॥ २७ ॥
आहुर्) दुहितरं (सर्वे)
ऽपत्यं तोकं (तयोः समे) ।
(स्वजाते त्वौ)-रसोरस्यौ
तात (स्तु) जनकः पिता ॥२८॥
जनयित्री प्रसूर्माता जननी
भगिनी स्वसा ।
ननान्दा (तु स्वसा पत्यु)
र्नप्त्री पौत्री सुतात्मजा ॥२९॥
(भार्यास्तु भ्रातृवर्गस्य) यातरः (स्युः परस्परम्) ।
प्रजावती भ्रातृजाया
मातुलानी (तु) मातुली ॥३०॥
(पतिपत्न्योः प्रसूः) श्वश्रूः
श्वशुर (स्तु पिता तयोः) ।
(पितुर्भ्राता) पितृव्यः (स्यान्)
(मातुर्भ्राता तु) मातुलः ॥३१॥
श्यालाः (स्युर्भ्रातरः पत्न्याः)
(स्वामिनो) देवृ देवरौ ।
स्वस्रीयो भागिनेयः (स्याज्)
जामाता दुहितुः पतिः ॥३२॥
पितामहः पितृपिता
(तत्पिता) प्रपितामहः ।
(मातुर्) मातामहा (द्येवं)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धु   सपिण्डा (स्तु) सनाभयः ॥३३॥
समानोदर्य्ये सोदर्य्य सगर्भ्य सहजाः (समाः)।
सगोत्र बान्धव ज्ञाति बन्धु स्व स्वजनाः (समाः) ॥३४॥
ज्ञातेयं
        बन्धुता (तेषां क्रमाद्भावसमूहयोः)।
धवः प्रियः पतिर्भर्त्ता
                    जार (स्तू) पपतिः (समौ) ॥३५॥
(अमृते जारजः) कुण्डो
                    (मृते भर्त्तरि) गोलकः।
भ्रात्रीयो भ्रातृजे
                    भ्रातृभगिन्यौ भ्रातराव् (उभौ) ॥३६॥
मातापितरौ पितरौ मातरपितरौ (च तौ)।
श्वश्रूश्वशुरौ श्वशुरौ
                    पुत्रौ (पुत्रश्च दुहिता च) ॥ ३७ ॥
दम्पती जम्पती जायापती भार्य्यापती (च तौ)।
गर्भाशयो जरायुः (स्याद्) उल्वं (च) कललो (ऽस्त्रियाम्॥३८॥
सूतिमासो वैजननो
                    गर्भो भ्रूण (इमौ समौ)।
तृतीया प्रकृतिः शण्ढः क्लीवं पण्डो नपुंसकम् ॥३९॥
शिशुत्वं शैशवं बाल्यं
                    तारुण्यं यौवनं (समे)।
(स्यात्) स्थाविरं (तु) वृद्धत्वं
                    वृद्धसङ्घे (ऽपि) वार्द्धकम् ॥४०॥
पलितं (जरसा शौक्ल्यं केशादौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्रसा जरा।
(स्याद्) उत्तानशया डिम्भा स्तनपा (च) स्तनन्धयी ४१॥
बाल (स्तु स्यान्) माणवको
वयस्थस्तरुणो युवा।
प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्न (ऽपि) ॥४२॥
वर्षीयान् दशमी ज्यायान्
पूर्व्वज (स्त्व) ग्रियो ऽग्रजः।
जघन्यजे (स्युः) कनिष्ठ यवीयो ऽवरजा ऽनुजाः ॥४३॥
अमांसो दुर्बलश्छातो
बलवान्मांसलो ऽंसलः।
तुन्दिलस्तुन्दिकस्तुन्दी वृहत्कुक्षिः पिचिण्डिलः ॥४४॥
अवटीटो ऽवनाट (श्चा) ऽवभ्रटो नतनासिके।
केशवः कैशिकः केशी
वलिनो वलिभः (समौ) ॥ ४५ ॥
विकलाङ्ग (स्तु) पोगण्डः
खर्वो ह्रस्व (श्च) वामनः।
खरणाः (स्यात्) खरणसो
विग्र (स्तु) गतनासिकः ॥४६॥
खुरणाः (स्यात्) खुरणसः
प्रज्ञुः प्रगतजानुकः।
ऊर्द्ध्वज्ञुरूर्द्ध्वजानुः (स्यात्)
संज्ञुः संहतजानुकः ॥४७॥
(स्याद्) एडे बधिरः
कुब्जे गडुलः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुकरे कुणिः ।

पृश्निरल्पतनौ

श्रोणः पङ्गौ

मुण्ड (स्तु) मुण्डिते ॥ ४८ ॥

वलिरः केकरे

खोडे खञ्ज

(स्त्रिषु जरावराः) ।

जटुलः कालकः पिप्लुस्

तिलकस्तिलकालकः ॥४९॥

अनामयं (स्याद्) आरोग्यं

चिकित्सा रुक्प्रतिक्रिया ।

भेषजौषध भैषज्यान्यगदो जायु (रित्यपि) ॥ ५० ॥

(स्त्री) रुग्रुजा (चो) पताप रोग व्याधि गदामयाः ।

(पुमान्) यक्ष्मा क्षयः शोषः

प्रतिश्याय (स्तु) पीनसः ॥५१॥

(स्त्री) क्षुत् क्षुतं क्षवः (पुंसि)

कास (स्तु) क्षवथुः (पुमान्) ।

शोफ (स्तु) श्वयथुः शोथः

पादस्फोटो विपादिका ॥५२॥

किलासं सिध्म

कच्छ्वां (तु) पाम पामा विचर्चिका ।

कण्डूः खर्जूः (च) कण्डूया

विस्फोटः पिटक (स्त्रिषु) ॥५३॥

व्रणो (ऽस्त्रियाम्) ईर्मम् अरुः (क्लीबे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाड़ीव्रणः (पुमान्) ।
कोठो मण्डलकं
कुष्ठ श्वित्रे
दुर्नामका ऽर्शसी ॥ ५४ ॥
आनाह (स्तु) विबन्धः (स्याद्)
ग्रहणीरुक् प्रवाहिका ।
प्रच्छर्दिका वमि (श्च स्त्री पुमांस्तु) वमथुः (समाः) ॥५५॥
(व्याधिभेदा) विद्रधिः (स्त्री) ज्वर मेह भगन्दराः ।
अश्मरी मूत्रकृच्छ्रं (स्यात्)
(पूर्वं शुक्रावधेस्त्रिषु ॥ ५६ ॥
रोगहार्य्यगदंकारो भिषग्वैद्यौ चिकित्सके ।
वार्त्तौ निरामयः कल्य उल्लाघो (निर्गतो गदात्) ॥५७॥
ग्लान ग्लास्नू
आमयावी विकृतो व्याधितोऽपटुः ।
आतुरो ऽभ्यमितो ऽभ्यान्तः
(समौ) पामन कच्छुरौ ॥ ५८ ॥
दद्रुणो दद्रुरोगी (स्याद्)
अर्शरोगयुतो ऽर्शसः ।
वातकी वातरोगी (स्यात्)
सातिसारो ऽतिसारकी ॥ ५९ ॥
(स्यु:) क्लिन्नाक्षे चुल्ल चिल्ल पिल्लाः (क्लिन्ने ऽक्ष्णिचाप्यमी) ।
उन्मत्त उन्मादवति
स्लेष्मलः स्लेष्मणः कफी ॥ ६० ॥
न्युब्जो (भुग्ने रुजा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(वृद्धनाभौ) तुण्डिल तुण्डिभौ ।

किलासी सिध्मलो

ऽन्धो ऽदृङ्

मूर्च्छाले मूर्त्तमूर्च्छितौ ॥ ६१ ॥

शुक्रं तेजो रेतसी (च) वीज वीर्य्येन्द्रियाणि (च) ।

मायुः पित्तं

कफः श्लेष्मा

(स्त्रियां तु) त्वगसृग्धरा ॥ ६२ ॥

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।

उत्तप्तं शुष्कमांसं (स्याद्) वल्लूरं (तत् त्रिलिङ्गकम् ॥ ६३ ॥

रुधिरे ऽसृग्लोहिता ऽस्र रक्त क्षतज शोणितम् ।

बुक्का ऽग्रमांसं हृदयं हृत्

मेद (स्तु) वपा वसा ॥ ६४ ॥

(पश्चाद्ग्रीवा शिरा) मन्या

नाड़ी (तु) धमनिः सिरा ।

तिलकं क्लोम

मस्तिष्कं गोर्द्दं

किट्टं मलो (ऽस्त्रियाम्) ॥ ६५ ॥

अन्त्रं पुरी तद्

गुल्म (स्तु) प्लीहा (पुंस्य)

(ऽथ) वस्नसा ।

स्नायुः (स्त्रियां)

कालखण्ड यकृती (तु समे इमे) ॥ ६६ ॥

कर्णिका स्यन्दिनी लाला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूषिका (नेत्रयोर्मलम्) ।

मूत्रं प्रस्राव

उच्चारा ऽवस्करौ शमलं शकृत् ॥ ६७ ॥

गूथं पुरीषं वर्च्चस्क (मस्त्री) विष्ठा विषौ (स्त्रियौ) ।

(स्यात्) कर्प्परः कपालो (ऽस्त्री)

कीकसं कुल्यमस्थि (च) ॥ ६८ ॥

(स्यात्शरीरास्थ्नि) कङ्कालः

(पृष्ठास्थ्नि तु) कशेरुका ।

शिरोस्थ्नि (तु) करोटिः (स्त्री)

पार्श्वास्थनि (तु) पर्शुका ॥ ६९ ॥

अङ्गं प्रतीको ऽवयवो ऽपघनो

(ऽथ) कलेवरम् ।

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥

कायो देहः (क्लीवपुंसोः स्त्रियां) मूर्त्तिस्तनू स्तनूः ।

पादाग्रं प्रपदं

पादः पदंङ्घ्रिश्चरणो (ऽस्त्रियाम्) ॥ ७१ ॥

(तद्ग्रन्थी) घुटिके गुल्फौ

(पुमान्) पार्ष्णि (रधस्तयोः) ।

जङ्घा (तु) प्रसृता

जानूरुपर्वा ऽष्ठीवद (ऽस्त्रियाम्) ॥ ७२ ॥

सक्थि (क्लीवे पुमान्) ऊरुस्

(तत्सन्धिः पुंसि) वंक्षणः ।

गुदं (त्व) पानं पायु (र्नां)

वस्ति (र्नाभेरधो) द्वयोः) ॥७२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कटो (ना) श्रोणिफलकं कटिः श्रोणी ककुद्मती ।
(पश्चान्) नितम्बः (स्त्रीकट्याः)
(क्लीवे तु) जघनं (पुरः) ॥७३॥
(कूपकौ तु नितम्बस्थौ द्वयहीने) कुकुन्दरे ।
(स्त्रियां) स्फिचौ कटिप्रोथाव्
उपस्थो (वक्ष्यमाणयोः) ॥७४॥
भगं योनि (र्द्वयोः)
शिश्नो मेढ्रो मेहन शेफसी ।
मुष्कोऽण्डकोषो वृषणः
(पृष्ठवंशाधरे) त्रिकम् ॥७५॥
पिचिण्ड कुक्षी जठरोदरं तुन्दं
स्तनौ कुचौ ।
चूचुकं (तु) कुचाग्रं (स्यान्)
(नना) क्रोड़ं भुजान्तरम् ॥७६॥
उरो वत्स (श्च) वक्षश् (च)
पृष्ठं (तु चरमं तनोः) ।
स्कन्धो भुजशिरोऽंसो (ऽस्त्री)
(सन्धी तस्यैव) जत्रुणी ॥७७॥
बाहुमूले (उभौ) कक्षौ
पार्श्व (मस्त्री तयोरधः) ।
मध्यम (स्त्रा) ऽवलग्न (श्च) मध्यो (ऽस्त्री)
(द्वौ परौ द्वयोः) ॥७८॥
भुज बाहू प्रवेष्टो दोः
(स्यात्) कफोणि (स्तु) कूर्परः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्योपरि) प्रगण्ड: (स्यात्)

प्रकोष्ठ (स्तस्य चाप्यधः) ॥७९॥

(मणिबन्धादाकनिष्ठं करस्य) करभो (वहिः) ।

पञ्चशाखः शयः पाणिस्

तर्जनी (स्यात्) प्रदेशनी ॥८०॥

अङ्गुल्यः करशाखाः (स्युः)

(पुंस्य)-ङ्गुष्ठः प्रदेशिनी ।

मध्यमा ऽनामिका (चापि) कनिष्ठा (चेति ताः क्रमात्) ८१

पुनर्भवः कररुहो नखो (ऽस्त्री) नखरो (ऽस्त्रियाम्) ।

प्रादेश ताल गोकर्णा (स्तर्जन्यादियुते तते) ॥ ८२ ॥

(अङ्गुष्ठे स कनिष्ठे स्याद्) वितस्ति (र्द्वादशाङ्गुलः) ।

(पाणौ) चपेट प्रतल प्रहस्ता (विस्तृताङ्गुलौ) ॥ ८३ ॥

(द्वौ संहतौ) संहतलः (प्रतलौ वामदक्षिणौ) ।

(पाणिर्निकुब्जः) प्रसृतम्

(तौ युताव्) अञ्जलिः (पुमान्) ॥८४॥

(प्रकोष्ठे विसृतकरे) हस्तो

(मुष्ट्या तु बद्धया) ।

सरत्निः (स्याद्)

अरत्नि (स्तु निष्कनिष्ठेन मुष्टिना) ॥८५॥

व्यामो (वाह्वोः सकरयोस्ततयो स्तिर्यगन्तरम्) ।

(ऊर्द्ध्वविस्तृतदोः पाणिनृमाने) पौरुषं (त्रिषु) ॥ ८६ ॥

कण्ठो गलो

(ऽथ) ग्रीवायां शिरोधिः कन्धरे-(त्यपि) ।

कम्बुग्रीवा (त्रिरेखा सा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽवटुर्घाटा कृकाटिका ॥ ८७ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
(क्लीबे) घ्राणं गन्धवहा घोणा नासा (च) नासिका ॥८८॥
ओष्ठाऽधरौ (तु) रदनच्छदौ दशनवाससी ।
(अधः स्याच्) चिबुकं
गण्डौ कपोलौ
(तत्परो) हनुः ॥८९॥
रदना दशना दन्ता रदास्
तालु (तु) काकुदम् ।
रसज्ञा रसना जिह्वा
(प्रान्तावोष्ठस्य) सृक्कणी ॥ ९० ॥
ललाटमलिकं गोधिर्
(ऊर्ध्वे दृग्भ्यां) भ्रुवौ (स्त्रियाम्) ।
कूर्च (मस्त्री) (भ्रुवोर्मध्यं)
तारका (ऽक्ष्णः) कनीनिका ॥ ९१ ॥
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी (चा)
ऽस्रु नेत्राम्बु रोदनं (चा) ऽस्रमस्रु (च) ॥ ९२ ॥
अपाङ्गौ (नेत्रयोरन्तौ)
कटाक्षे (ऽपाङ्गदर्शने) ।
कर्णं शब्दग्रहौ श्रोत्रं श्रुतिः (स्त्री) श्रवणं श्रवः ॥ ९३ ॥
उत्तमाङ्गं शिरः शीर्षं मूर्द्धा (ना) मस्तको (ऽस्त्रियाम्) ।
चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥ ९४ ॥
(तद्वृन्दे) कैशिकं कैश्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्योपरि) प्रगण्ड: (स्यात्)

प्रकोष्ठ (स्तस्य चाप्यध:) ॥७९॥

(मणिबन्धादाकनिष्ठं करस्य) करभो (बहि:)।

पञ्चशाख: शय: पाणिस्

तर्जनी (स्यात्) प्रदेशनी ॥८०॥

अङ्गुल्य: करशाखा: (स्यु:)

(पुंस्य)-ङ्गुष्ठ: प्रदेशिनी।

मध्यमा ऽनामिका (चापि) कनिष्ठा (चेति ता: क्रमात्) ८१

पुनर्भव: कररुहो नखो (ऽस्त्री) नखरो (ऽस्त्रियाम्)।

प्रादेश ताल गोकर्णा (स्तर्जन्यादियुते तते) ॥ ८२ ॥

(अङ्गुष्ठे स कनिष्ठे स्याद्) वितस्ति (र्द्वादशाङ्गुल:)।

(पाणौ) चपेट प्रतल प्रहस्ता (विस्तृताङ्गुलौ) ॥ ८३ ॥

(द्वौ संहतौ) संहतल: (प्रतलौ वामदक्षिणौ)।

(पाणिर्निकुब्ज:) प्रसृतम्

(तौ युताव्) अञ्जलि: (पुमान्) ॥८४॥

(प्रकोष्ठे विसृतकरे) हस्तो

(मुष्ट्या तु बद्धया)।

सरत्नि: (स्याद्)

अरत्नि (स्तु निष्कनिष्ठेन मुष्टिना) ॥८५॥

व्यामो (बाह्वो: सकरयोस्ततयो स्तिर्यगन्तरम्)।

(ऊर्द्ध्वविस्तृतदो: पाणिनृमाने) पौरुषं (त्रिषु) ॥ ८६ ॥

कण्ठो गलो

(ऽथ) ग्रीवायां शिरोधि: कन्धरे-(त्यपि)।

कम्बुग्रीवा (त्रिरेखा सा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽवटुर्घाटा कृकाटिका ॥ ८७ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्।
(क्लीबे) घ्राणं गन्धवहा घोणा नासा (च) नासिका ॥८८॥
ओष्ठाऽधरौ (तु) रदनच्छदौ दशनवाससी।
(अधः स्याच्) चिबुकं
गण्डौ कपोलौ
(तत्परो) हनुः ॥८९॥
रदना दशना दन्ता रदास्
तालु (तु) काकुदम्।
रसज्ञा रसना जिह्वा
(प्रान्तावोष्ठस्य) सृक्कणी ॥ ९० ॥
ललाटमलिकं गोधिर्
(ऊर्द्ध्वे दृग्भ्यां) भ्रुवौ (स्त्रियाम्)।
कूर्चं (मस्त्री) (भ्रुवोर्मध्यं)
तारका (ऽक्ष्णः) कनीनिका ॥ ९१ ॥
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी।
दृग्दृष्टी (चा)
ऽश्रु नेत्राम्बु रोदनं (चा) ऽस्रमस्रु (च) ॥ ९२ ॥
अपाङ्गौ (नेत्रयोरन्तौ)
कटाक्षे (ऽपाङ्गदर्शने)।
कर्णे शब्दग्रहौ श्रोत्रं श्रुतिः (स्त्री) श्रवणं श्रवः ॥ ९३ ॥
उत्तमाङ्गं शिरः शीर्षं मूर्द्धा (ना) मस्तको (ऽस्त्रियाम्)।
चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥ ९४ ॥
(तद्वृन्दे) कैशिकं कैश्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलकाश्चूर्णकुन्तलाः ।
(ते ललाटे) भ्रमरकाः
काकपक्षः शिखण्डकः ॥ ९
कवरी केशवेशो
(ऽथ) धम्मिल्लः (संयताः कचाः) ।
शिखा चूड़ा केशपाशी
(व्रतिनस्तु) जटा सटा ॥ ९
वेणिः प्रवेणिः
शीर्षण्य शिरस्यौ (विशदे कचे) ।
पाशः पक्ष (श्च) हस्त (श्च कलापार्थाः कचात्परे) ॥९
तनूरुहं रोम लोम
(तद्वृद्धौ) श्मश्रु (पुंमुखे) ।
आकल्प वेशौ नेपथ्यं प्रतिकर्म्म प्रसाधनम् ॥ ९८ ॥
(दशैते त्रिष्व)
ऽलङ्कर्त्ता ऽलङ्करिष्णु (श्च) मण्डितः ।
प्रसाधितो ऽलङ्कृत (श्च) भूषित (श्च) परिष्कृतः ॥ ९९
विभ्राड्भ्राजिष्णु रोचिष्णू
भूषा (तु स्याद्) अलङ्क्रि
अलङ्कार (स्त्वा) भरणं परिष्कारो विभूषणम् ॥१०
मण्डनं (चा)
(ऽथ) मुकुटं किरीटं (पुन्नपुंसकम्) ।
चूड़ामणिः शिरोरत्नं
तरलो (हारमध्यगः) ॥१०
बालप्राश्या पारितथ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्रपाश्या ललाटिका ।

कर्णिका तालपत्र (स्यात्)

कुण्डलं कर्णवेष्टनम् ॥१०२॥

ग्रैवेयकं कण्ठभूषा

लम्बनं (स्यात्) ललन्तिका ।

(स्वर्णैः) प्रालम्बिका

(ऽथो) रःसूत्रिका (मौक्तिकैः कृता) ॥१०३॥

हारो मुक्तावली

देवच्छन्दो (ऽसौ) शतयष्टिकः ।

(हारभेदा यष्टिभेदा) गुत्स गुत्सार्द्ध गोस्तनाः ॥१०४॥

अर्द्धहारो माणवक

एकावल्य-(एकयष्टिका) ।

(सैव) नक्षत्रमाला (स्यात् सप्तविंशतिमौक्तिकैः) ॥१०५॥

आवापकः पारिहार्य्यः कटको वलयो (ऽस्त्रियाम्) ।

केयूरमङ्गदं (तुल्ये)

अङ्गुलीयकमूर्मिका ॥१०६॥

(साक्षरा)-ङ्गुलिमुद्रा (सा)

कङ्कणं करभूषणम् ।

(स्त्रीकट्यां) मेखला काञ्ची सप्तकी रसना (तथा) ॥१०७॥

(क्लीबे) सारसनं (चा)

(ऽथ पुंस्कट्यां) शृङ्खलं (त्रिषु) ।

पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरो (ऽस्त्रियाम्) ॥१०८॥

हंसकः पादकटकः

किङ्किणी क्षुद्रघण्टिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(त्वक्फलकृमिरोमाणि) वस्त्रयोनिर्
(दश त्रिषु) ॥१०
वाल्कं (क्षौमादि)
फालं (तु) कार्प्पासं वादरं (च तत्)।
कौशेयं कृमिकोशोत्थं
राङ्कवं मृगरोमजम् ॥ ११०॥
अनाहतं निष्प्रवाणि तन्त्रकं (च) नवाम्बरे।
(तत् स्याद्) उद्गमनीयं (यद्धौतयोर्वस्त्रयोर्युगम्) ॥११
पत्त्रोर्णं धौतकौशेयं
बहुमूल्यं महाधनम्।
क्षौमं दुकूलं (स्याद्)
(द्वे तु) निवीतं प्रावृतं (त्रिषु) ॥११
(स्त्रियां बहुत्वे वस्त्रस्य) दशाः (स्यु र्) वस्तयो (द्वयोः)
दैर्घ्यमायाम आरोहः
परिणाहो विशालता ॥ ११३
पटच्चरं जीर्णवस्त्रं
(समौ) नक्तक कर्पटौ।
वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥ ११४ ॥
सुचेलकः पटो (ऽस्त्री स्याद्)
वराशिः स्थूलशाटकः।
निचोलः प्रच्छदपटः
(समौ) रल्लक कम्बलौ ॥ ११५।
अन्तरीयोपसंव्यान परिधानान्यधोंशुके।
(द्वौ) प्रावारोत्तरासङ्गौ (समौ) वृहतिका (तथा)॥११६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संव्यानमुत्तरीयं (च)

चोलः कूर्पासकः (स्त्रियाः) ।

नीशारः (स्यात्प्रावरणे हिमानिलनिवारणे) ॥ ११७ ॥

(अर्द्धोरुकं वरस्त्रीणां स्यात्) चण्डातक (मंशुकम्) ।

(स्यात्त्रिष्वा) प्रपदीनं (तत्प्राप्नोत्याप्रपदं हि यत्) ॥ ११८ ॥

(अस्त्री) वितानमुल्लोचो

दूष्या-(द्यं वस्त्रवेश्मनि) ।

प्रतिसीरा जवनिका (स्यात्) तिरस्करणी (च सा) ॥ ११९ ॥

परिकर्माङ्गसंस्कारः

(स्यान्) मार्ष्टिर्मार्ज्जना मृजा ।

उद्वर्त्तनोत्सादने (द्वे समे)

आप्लाव आप्लवः ॥ १२० ॥

स्नानं

चर्चा (तु) चार्च्चिक्यं स्थासको

(ऽथ) प्रबोधनम् ।

अनुबोधः

पत्रलेखा पत्राङ्गुलि (रिमे समे ॥ १२१ ॥

तमालपत्र तिलक चित्रकानि विशेषकम् ।

(द्वितीयं च तुरीयं च न स्त्रियाम्)

(अथ) कुङ्कुमम् ॥ १२२ ॥

काश्मीरजन्मा ऽग्निशिखं वरं बाह्लीक पीतने ।

रक्त सङ्कोच पिशुनं धीर लोहितचन्दनम् ॥ १२३ ॥

लाक्षा राक्षा जतु (क्लीबे) यावो ऽलक्तो द्रुमामयः ।

लवङ्गं देवकुसुमं श्री-(संज्ञम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अथ) जायकम् ॥ १२४ ॥
कालीयकं (च) कालानुसार्य्यं (चा)
(ऽथ समार्थकम्) ।
वंशिका ऽगुरु राजार्हलोह क्रिमिज जोङ्गकम् ॥ १२५ ॥
कालागुर्वगुरुः
(स्यात्तत्) मङ्गल्या (मल्लिगन्धि यत्) ।
य च्चधूपः सर्ज्जरसो ऽराल सर्वरसा (वपि) ॥ १२६ ॥
बहुरूपो (ऽप्य)
(ऽथ) वृकधूप कृत्रिमधूपकौ ।
तुरुष्कः पिण्डकः सिह्लो यावनो (ऽप्य)
(ऽथ) पायसः ॥ १२७ ॥
श्रीवासो वृकधूपो (ऽपि) श्रीवेष्ट सरलद्रवौ ।
मृगनाभिर्मृ गमदः कस्तूरी (चा
ऽथ) कोलकम् ॥ १२८ ॥
कक्कोलकं कोशफलम्
(अथ) कर्पूर (मस्त्रियाम्) ।
घनसार श्चन्द्र (संज्ञः) सिताभ्रो हिमा वालुका ॥ १२९ ॥
गन्धसारो मलयजो भद्रश्रीश्चन्दनो (ऽस्त्रियाम्) ।
तैलपर्णिक गोशीर्षे हरिचन्दन (मस्त्रियाम्) ॥ १३० ॥
तिलपर्णी (तु) पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं (चा)
(ऽथ जातीकोश जातीफले (समे) ॥ १३१ ॥
(कर्पूरागुरुकस्तूरी कक्कोलैर्) यक्षकर्द्दमः ।
गात्रानुलेपनी वर्त्तिर्वर्णकं (स्याद्) विलेपनम् ॥ १३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चूर्णानि वासयोगाः (स्युर्)

भावितं वासितं (त्रिषु)।

(संस्कारो गन्धमाल्याद्यैर्यः स्यात्तद्)अधिवासनम्॥१२३॥

माल्यं माला स्रजौ (मूर्ध्नि)

(केशमध्ये तु) गर्भकः।

प्रभ्रष्टकं (शिखालम्बि)

(पुरो न्यस्तं) ललामकम्॥१२४॥

प्रालम्ब (मृजुलम्बि स्यात्कण्ठाद्)

वैकक्षकं (तु तत्)।

(यत्तिर्य्यक् क्षिप्तमुरसि)

(शिखास्वा) पीड़ शेखरौ॥१२५॥

रचना (स्यात्) परिस्पन्द

आभोगः परिपूर्णता।

उपधानं (तू) पवर्हः

शय्यायां शयनीय (वत्)॥ १२६॥

शयनं

मञ्च पर्यङ्क पल्यङ्काः खट्वया (समाः)।

गेण्डुकः कन्दुको

दीपः प्रदीपः

पीठमासनम्॥ १२७॥

समुद्गकः सम्पुटकः

प्रतिग्राहः पतद्ग्रहः।

प्रसाधनी कङ्कतिका

पिष्टातः पटवासकः॥ १२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्पणे मुकुरादर्शौ

व्यजनं तालवृन्तकम् ।

अथ ब्रह्मवर्गः ।

सन्ततिर्गोत्र जननकुलान्यभिजनाऽन्वयौ ।
वंशोऽन्ववायः सन्तानो

वर्णाः (स्युर्ब्राह्मणादयः) ॥ १ ॥

राजबीजी राजवंश्यो

बीज्य (स्तु) कुलसम्भवः ।

महाकुल कुलीनार्य्य सभ्यसज्जनसाधवः ॥ २ ॥
ब्रह्मचारी गृही वानप्रस्थो भिक्षु (श्चतुष्टये) ।
आश्रमी (ऽस्त्री)

द्विजात्यग्रजन्म भूदेव वाड़वाः ॥ ३ ॥

विप्र (श्च) ब्राह्मणो

(ऽसौ) षट्कर्मा (यागादिभिर्युतः) ।

विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ॥४॥
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ।
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ॥ ५ ॥
दूरदर्शी दीर्घदर्शी

श्रोत्रियच्छान्दसौ (समौ) ।

उपाध्यायोऽध्यापको

(ऽथ स्यान्निषेकादिकृद्) गुरुः ॥ ६ ॥

(मन्त्रव्याख्याकृद्) आचार्य्य

(आदेष्टा त्वध्वरे) व्रती ।

यष्टा (च) यजमान (श्च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स सोमवति) दीक्षितः ॥ ७॥

इज्याशीलो यायजूको
यज्वा (तु) विधिनेष्टवान् ।

(स गीष्पतीष्ट्या) स्थपतिः
सोमपीती (तु) सोमपः ॥ ८ ॥

सर्ववेदाः (स येनेष्टो यागः सर्वस्वदक्षिणः) ।
अनूचानः (प्रवचने साङ्गे ऽधीती)
(गुरोस्तु यः ॥ ९ ॥

लब्धानुज्ञः) समावृत्तः
सुत्वा (त्वभिषवे कृते) ।

छात्रान्तेवासिनौ शिष्ये
शैक्षाः प्राथमकल्पिकाः ॥१०॥

(एकब्रह्मव्रताचारा मिथः) सब्रह्मचारिणः ।
सतीर्थ्या (स्त्वे) कगुरव
(श्चितवानग्निम्) अग्निचित् ॥११॥

(पारम्पर्योपदेशे स्याद्) ऐतिह्यमितिह (ऽव्ययम्) ।
उपज्ञा (ज्ञानमाद्यं स्यात्)
(ज्ञात्वारम्भ) उपक्रमः ॥१२॥

यज्ञः सवो ऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ।
(पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ॥ १३ ॥
एते पञ्च) महायज्ञा (ब्रह्मयज्ञादिनामकाः) ।
समज्यापरिषद्गोष्ठी सभासमिति संसदः ॥ १४ ॥
आस्थानी (क्लीवम्) आस्थानं (स्त्रीनपुंसकयोः) सदः ।
प्राग्वंशः (प्राग्घविर्गेहात्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदस्या विधिदर्शिनः ॥ १५
सभासदः सभास्तारा: सभ्याः सामाजिका (स्च ते)।
अध्वर्यूद्गातृहोतारो (यजुःसामर्ग्विदः क्रमात्) ॥१६
(आग्नीध्राद्या धनैर्वाय्या) ऋत्विजो याजका (स्च ते)।
वेदिः (परिष्कृता भूमिः)
(समे) स्थण्डिलचत्वरे ॥ १७
चषालो यूपकटकः
कुम्बा (सुगहनावृतिः)।
यूपाग्रं तर्म
(निर्मन्थ्यदारुणित्व) रणि (र्द्वयोः) ॥१८॥
दक्षिणाग्निर्गार्हपत्याहवनीयौ (त्रयोऽग्नयः)।
(अग्नित्रयमिदं) त्रेता
प्रणीतः (संस्कृतोऽनलः)॥ १९ ।
समूह्यः परिचाय्योपचाय्याव् (अग्नौ प्रयोगिणः)।
(यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ॥ २० ॥
तस्मिन्) आनाय्यो
(ऽथा) ऽग्नायी स्वाहा (च) हुतभुक्प्रिया।
(ऋक्) सामिधेनी धाय्या (च या स्यादग्निसमिन्धने)॥२१
(गायत्री प्रमुखं) छन्दो
(हव्यपाके) चरुः (पुमान्)।
आमिक्षा (सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ॥२२॥
धुवित्रं (व्यजनं तद्यद्रचितं मृगचर्मणा)।
पृषदाज्यं (सदध्याज्ये)
परमान्नं (तु) पायसः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हव्य कव्ये (दैवपित्र्ये अन्ने)

पात्रं (स्रुवादिकम्) ।

ध्रुवोपभृज्जुहू (र्ना तु) स्रुवो (भेदाः) स्रुचः (स्त्रियः)॥२४॥

उपाकृतः (पशुरसौ योऽभिमन्त्र्य क्रतौ हतः) ।

परम्पराकं शमनं प्रोक्षणं (च वधार्थकम् ॥ २५ ॥

(वाच्यलिङ्गाः) प्रमीतोपसम्पन्नप्रोक्षिता (हते) ।

सान्नाय्यं हविर्

(अग्नौ तु हुतं त्रिषु) वषट्कृतम् ॥२६॥

(दीक्षान्तो) ऽवभृथो (यज्ञ)

(स्तत्कर्मार्हन्तु) यज्ञियम्

(त्रिष्व)

(ऽथ क्रतुकर्मे) ष्टं

पूर्त्तं (खातादिकर्मणि) ॥ २७ ॥

अमृतं विघसो (यज्ञशेषभोजनशेषयोः) ।

त्यागो विहापितं दानमुत्सर्ज्जन विसर्जने ॥ २८ ॥

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।

प्रादेशनं निर्वपणमपवर्ज्जनमंहतिः ॥ २९ ॥

(मृतार्थं तदहर्दानं त्रिषु स्याद्) और्द्ध्वदेहिकम् ।

पितृदानं निवापः (स्यात्)

श्राद्धं (तत्कर्म शास्त्रतः) ॥ ३० ॥

अन्वाहार्य्यं मासिके

(ऽंशो ऽष्टमो ऽह्नः) कुतपो (ऽस्त्रियाम्)

पर्य्येषणा परीष्टि (श्चा) न्वेषणा (च) गवेषणा ॥ ३१ ॥

सनि (स्त्व) ध्येषणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याच्ञाऽभिशस्तिर्याचनाऽर्थना
(षट् तु त्रिष्व)
ऽर्घ्यं (मर्घार्थे)
पाद्यं (पादाय वारिणि) ॥ ३२ ॥
(क्रमाद्) आतिथ्यातिथेये (अतिथ्यर्थेऽत्र साधुनि) ।
(स्याद्) आवेशिक आगन्तुरतिथि (र्ना गृहागते) ॥ ३३ ॥
पूजा नमस्याऽपचितिः सपर्य्याऽर्चाऽर्हणाः (समाः) ।
वरिवस्या (तु) शुश्रूषा परिचर्य्या (प्यु) पासनम् ॥ ३४ ॥
व्रज्याऽटाट्या पर्य्यटनं
चर्य्या (त्वीर्य्यापथस्थितिः) ।
उपस्पर्श (स्त्वा) चमनम्
(ऽथ) मौनमभाषणम् ॥ ३५ ॥
आनुपूर्वी (स्त्रियां) (वा) वृत् परिपाटी अनुक्रमः ।
पर्य्याय (स्त्वा)
ऽतिपात (स्तु स्यात्) पर्य्यय उपात्ययः ॥ ३६ ॥
नियमो व्रत (मस्त्री तच्चोपवासादि) पुण्यकम् ।
उपवस्तं (तू) पवासो
विवेकः पृथगात्मता ॥ ३७ ॥
(स्याद्) ब्रह्मवर्चसं वृत्ताध्ययनर्द्धि (र्
ऽथाञ्जलिः ।
पाठे) ब्रह्माञ्जलिः
(पाठे विप्रुषो) ब्रह्मविन्दवः ॥ ३८ ॥
ध्यानयोगासने ब्रह्मासनं
कल्पे विधि क्रमौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुख्यः (स्यात्प्रथमः कल्पो)

ऽनुकल्प (स्तु ततो ऽधमः) ॥३९ ॥

(संस्कारपूर्वं ग्रहणं स्याद्) उपाकरणं (श्रुतेः) ।

(समे तु) पादग्रहणमभिवादन (मित्युभे) ॥ ४० ॥

भिक्षुः परिव्राट् कर्मन्दी पाराशर्य्य (पि) मस्करी ।

तपस्वी तापसः पारिकाङ्क्षी

वाचंयमो मुनिः ॥ ४१ ॥

तपः क्लेशसहो दान्तो

वर्णिनो ब्रह्मचारिणः ।

ऋषयः सत्यवचसः

स्नातक (स्त्वा) प्लवव्रती ॥ ४२ ॥

(ये) निर्जितेन्द्रियग्रामा यतिनो यतय (श्च ते) ।

(यः स्थण्डिले व्रतवशाच्छेते) स्थण्डिलशाय्य (सौ) ॥४३॥

स्थाण्डिल (श्चा)

(ऽथ) विरजस्तमसः (स्युर्) द्वयातिगाः ।

पवित्रः प्रयतः पूतः

पाषण्डाः सर्वलिङ्गिनः ॥ ४४ ॥

(पालाशो दण्ड) आषाढो (व्रते)

राम्भ (स्तु वैणवः) ।

(अस्त्री) कमण्डलुः कुण्डी

(व्रतिनामासनं) वृषी ॥ ४५ ॥

अजिनं चर्म कृत्तिः (स्त्री)

भैक्षं (भिक्षाकदम्बकम्) ।

स्वाध्यायः (स्याज्) जपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्या ऽभिषवः सवनं (च सा) ॥४६॥
(सर्वैनसामपध्वंसि जप्यं त्रिष्व) घमर्षणम् ।
दर्श (श्च) पौर्णमास (श्च यागौ पक्षान्तयोः पृथक्) ॥४७॥
(शरीरसाधनापेक्षं नित्यं यत्कर्म तद्) यमः ।
नियम (स्तु स यत्कर्मानित्यमागन्तुसाधनम्) ॥ ४८ ॥
उपवीतं (यज्ञसूत्रं प्रोद्धृते दक्षिणे करे) ।
प्राचीनावीत (मन्यस्मिन्)
निवीतं (कण्ठलम्बितम्) ॥४९॥
(अङ्गुल्यग्रे तीर्थं) दैवं
(स्वल्पाङ्गुल्यो र्मूले) कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः) पैत्रं
(मूले त्वङ्गुष्ठस्य) ब्राह्मम् ॥५०॥
(स्याद्) ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्य (मित्यपि) ।
देवभूया (दिकं तद्वत्)
कृच्छ्रं (सान्तपनादिकम्) ॥५१॥
(सन्न्यासवत्यनशने पुमान्) प्रायो
(ऽथ) वीरहा ।
नष्टाग्निः
कुहना (लोभान्मिथ्येर्यापथकल्पना) ॥५२॥
व्रात्यः संस्कारहीनः (स्याद्)
अस्वाध्यायो निराकृतिः ।
धर्मध्वजी लिङ्गवृत्तिर्
अवकीर्णी क्षतव्रतः ॥ ५३ ॥
(सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अंशुमान्) अभिनिर्मुक्ता ऽभ्युदितौ (तौ यथाक्रमम्)५४॥
परिवित्ता (ऽनुजो ऽनूढे ज्येष्ठे दारपरिग्रहात्)।
परिवित्ति (स्तु तज्ज्यायान्)
विवाहोपयमौ (समौ) ॥५५॥
(तथा) परिणयोद्वाहोपयमाः पाणिपीड़नम्।
व्यवायो ग्राम्यधर्म (स्व) रतं निधुवनं (च सः) ॥ ५६ ॥
त्रिवर्गो (धर्म्मकामार्थैश्)
(चतुर्वर्गः (समोक्षकैः)।
(सवलैस्तैश्) चतुर्भद्रं
जन्याः (स्निग्धा वरस्य ये) ॥५७॥

अथ क्षत्रवर्गः।

मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्।
राज्ञि राट् पार्थिव क्ष्माभृन्नृप भूप महीक्षितः॥ १ ॥
(राजा तु प्रणताशेषसामन्तः स्याद्) अधीश्वरः।
चक्रवर्त्ती सार्वभौमो
(नृपो ऽन्यो) मण्डलेश्वरः॥ २ ॥
(येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः।
शास्ति यश्चाज्ञया राज्ञः स) सम्राड्
(अथ) राजकम्॥ ३ ॥
राजन्यकं (च नृपति क्षत्रियाणां गणे क्रमात्)।
मन्त्री धीसचिवो ऽमात्यो
(ऽन्ये) कर्म्मसचिवा (स्ततः) ॥ ४ ॥
महामात्राः प्रधानानि
पुरोधा (स्तु) पुरोहितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(द्रष्टरि व्यवहाराणां) प्राड्विवाको ऽक्षदर्शको ॥ ५ ॥
प्रतीहारो द्वारपाल द्वास्थ द्वास्थित दर्शकाः ।
रक्षिवर्ग (स्त्व) नीकस्थो
(ऽथा) ऽध्यक्षाऽधिकृतौ (समौ) ॥६॥
स्थायुको (ऽधिकृतो ग्रामे)
गोपो (ग्रामेषु भूरिषु) ।
भौरिकः कनकाध्यक्षो
रूप्याध्यक्ष (स्तु) नैष्किकः ॥ ७ ॥
(अन्तःपुरे त्वधिकृतः स्याद्) अन्तर्वंशिको (जनः) ।
सौविदल्लाः कञ्चुकिनः स्यापत्याः सौविदा (स्च ते) ॥ ८ ॥
शण्ढो वर्षवर (स्तुल्यौ)
सेवकार्थ्यनुजीविनः ।
(विषयानन्तरो राजा) शत्रुर्
मित्र (मतः परम्) ॥ ९ ॥
उदासीनः (परतरः)
पार्ष्णिग्राह (स्तु पृष्ठतः) ।
रिपौ वैरि सपत्ना ऽरि द्विषद्द्वेषण दुर्हृदः ॥ १० ॥
द्विड् विपक्षा ऽहिता ऽमित्र दस्यु शात्रव शत्रवः ।
अभिघातिपरा ऽरातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥
वयस्यः स्निग्धः सवया
(ऽथ) मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं (स्याद्)
अनुरोधो ऽनुवर्त्तनम् ॥ १२ ॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चार (श्च) गूढ़पुरुषश्

(चा) प्तः प्रत्ययित (स्त्रिषु) ॥१३॥

साम्वत्सरो ज्यौतिषिको दैवज्ञ गणका (वपि) ।

(स्यु र्) मौहूर्त्तिक मौहूर्त्त ज्ञानि कार्त्तान्तिका (अपि)॥१४॥

तान्त्रिको ज्ञातसिद्धान्तः

सत्री गृहपतिः (समौ) ।

लिपिकारो ऽक्षरचनो ऽक्षरचुञ्चु (श्च) लेखके ॥ १५ ॥

लिखिता ऽक्षरसंस्थाने लिपिर्लिवि (रुभे स्त्रियौ) ।

(स्यात्) सन्देशहरो दूतो

दूत्यं (तद्भावकर्मणि) ॥ १६ ॥

अध्वनीनो ऽध्वगो ऽध्वन्यः पान्थः पथिक (इत्यपि) ।

(स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च) ॥ १७ ॥

राज्याङ्गानि प्रकृतयः

(पौराणां श्रेणयो ऽपि च) ।

(सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः) ॥ १८ ॥

(षड्) गुणाः

शक्तय (स्तिस्रः प्रभावोत्साहमन्त्रजाः) ।

(क्षयः स्थानं च वृद्धिश्च) त्रिवर्गो (नीतिवेदिनाम्) ॥१९॥

(स) प्रतापः प्रभाव (श्च यत्तेजः कोषदण्डजम्) ।

(भेदो दण्डः साम दानमित्य) पाय (चतुष्टयम्) ॥२०॥

साहसं (तु) दमो दण्डः

साम सान्त्वम्

(अथो समौ) ।

भेदोपजापाव्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(द्रष्टरि व्यवहाराणां) प्राड्विवाको ऽक्षदर्शकौ ॥ ५ ॥
प्रतीहारो द्वारपाल द्वास्थ द्वास्थित दर्शकाः ।
रक्षिवर्ग (स्त्व) नीकस्थो
(ऽथा) ऽध्यक्षा ऽधिकृतौ (समौ) ॥ ६ ॥
स्थायुको (ऽधिकृतो ग्रामे)
गोपो (ग्रामेषु भूरिषु) ।
भौरिकः कनकाध्यक्षो
रूप्याध्यक्ष (स्तु) नैष्किकः ॥ ७ ॥
(अन्तःपुरे त्वधिकृतः स्याद्) अन्तर्वंशिको (जनः) ।
सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदा (श्च ते) ॥ ८ ॥
षण्ढो वर्षवर (स्तुल्यौ)
सेवकार्थ्यनुजीविनः ।
(विषयानन्तरो राजा) शत्रुर्
मित्र (मतः परम्) ॥ ९ ॥
उदासीनः (परतरः)
पार्ष्णिग्राह (स्तु पृष्ठतः) ।
रिपौ वैरि सपत्ना ऽरि द्विषद्द्वेषण दुर्हृदः ॥ १० ॥
द्विड् विपक्षा ऽहिता ऽमित्र दस्यु शात्रव शत्रवः ।
अभिघातिपरा ऽरातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥
वयस्यः स्निग्धः सवया
(ऽथ) मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं (स्याद्)
अनुरोधो ऽनुवर्त्तनम् ॥ १२ ॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चार (श्च) गूढ़पुरुषश्

(चा) प्तः प्रत्ययित (स्त्रिषु) ॥१३॥

साम्वत्सरो ज्यौतिषिको दैवज्ञ गणका (वपि) ।

(स्यु र्) मौहूर्त्तिक मौहूर्त्त ज्ञानि कार्त्तान्तिका (अपि)॥१४॥

तान्त्रिको ज्ञातसिद्धान्तः

सत्री गृहपतिः (समौ) ।

लिपिकारो ऽक्षरचनो ऽक्षरचुञ्चु (श्च) लेखके ॥ १५ ॥

लिखिता ऽक्षरसंस्थाने लिपिर्लिवि (रुभे स्त्रियौ) ।

(स्यात्) सन्देशहरो दूतो

दूत्यं (तद्भावकर्मणि) ॥ १६ ॥

अध्वनीनो ऽध्वगो ऽध्वन्यः पान्थः पथिक (इत्यपि) ।

(स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च) ॥ १७ ॥

राज्याङ्गानि प्रकृतयः

(पौराणां श्रेण्यो ऽपि च) ।

(सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः) ॥ १८ ॥

(षड्) गुणाः

शक्तय (स्तिस्रः प्रभावोत्साहमन्त्रजाः) ।

(क्षयः स्थानं च वृद्धिश्च) त्रिवर्गो (नीतिवेदिनाम्) ॥१९॥

(स) प्रतापः प्रभाव (श्च यत्तेजः कोषदण्डजम्) ।

(भेदो दण्डः साम दानमित्य) पाय (चतुष्टयम्) ॥२०॥

साहसं (तु) दमो दण्डः

साम सान्त्वम्

(अथो समौ) ।

भेदोपजापाव्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपधा (धर्माद्यैर्यत्परीक्षणम्) ॥ २१ ॥
(पत्वं त्रिषु)
ऽपच्छीर्णो (यस्तृतीयाद्यगोचरः)।
विविक्त विजनच्छन्न निःशलाका (स्तथा) रहः ॥ २२ ॥
रह (श्चो) पांशु (चालिङ्गे)
रहस्यं (तद्भवे त्रिषु)।
(समौ) विस्रम्भ विश्वासौ
भ्रेषो (भ्रंशो यथोचितात्) ॥२३॥
अभ्रेष न्याय कल्पा (स्तु) देशरूपं समञ्जसम्।
युक्तमौपयिकं लभ्यं भजमानाऽभिनीत (वत्) ॥ २४ ॥
न्याय्यं (च त्रिषु षट्)
सम्प्रधारणा (तु) समर्थनम्।
अववाद (स्तु) निर्देशो निदेशः शासनं (च सः) ॥ २५ ॥
शिष्टि (श्चा) ज्ञा (च)
संस्था (तु) मर्य्यादा धारणा स्थितिः।
आगोऽपराधो मन्तु (श्च)
(समे तू) द्दानवन्धने ॥ २६ ॥
द्विपाद्यो (द्विगुणो दण्डो)
भागधेयः करो वलिः।
(घट्टादिदेयं) शुल्को (ऽस्त्री)
प्राभृतं (तु) प्रदेशनम् ॥ २७ ॥
उपायनमुपग्राह्यमुपहार (स्तथो) पदा।
(यौतकादि तु यद्देयं) स दायो हरणं (च तत्) ॥ २८ ॥
तत्काल (स्तु) तदात्वं (स्याद्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(उत्तरः काल) आयतिः
साग्दृष्टिकं (फलं सद्यः)
उदर्कः (फलमुत्तरम्) ॥ २९ ॥
अदृष्टं (वह्नितोयादि)
दृष्टं (स्वपरचक्रजम्)।
(महीभुजाम्) अहिभयं (स्वपक्षप्रभवं भयम्) ॥ ३० ॥
प्रक्रिया (त्व) धिकारः (स्याच)
चामरं (तु) प्रकीर्णकम्।
नृपासनं (यत्तद्) भद्रासनं
सिंहासनं (तु तत्) ॥ ३१ ॥
(हैमं)
छत्रं (त्वा) तपत्रं
(राज्ञस्तु) नृपलक्ष्म (तत्)।
भद्रकुम्भः पूर्णकुम्भो
भृङ्गारः कनकालुका ॥ ३२ ॥
निवेशः शिविरं (शण्ढे)
सज्जनं (तू) परक्षणम्।
(हस्त्यश्वरथपादातं) सेनाङ्गं (स्याच्चतुष्टयम्) ॥ ३३ ॥
दन्ती दन्तावलो हस्ती द्विरदो ऽनेकपो द्विपः।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥
इभः स्तम्बेरमः पद्मी
यूथनाथ (स्तु) यूथपः।
मदोत्कटो मदकलः
कलभः करिशावकः ॥ ३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रभिन्नो गर्जितो मत्तः
(समाव्) उद्दान्त निर्मदौ ।
हास्तिकं गजता (वृन्दे)
करिणी धेनुका वशा ॥ ३६ ॥
गण्डः कटो
मदो दानं
वमथुः करशीकरः
कुम्भौ (तु पिण्डौ शिरसः)
(तयोर्मध्ये) विदुः (पुमान्) ॥३
अवग्रहो ललाटं (स्यात्)
ईषिका (त्वक्षिकूटकम्) ।
(अपाङ्गदेशो) निर्याणं
(कर्णमूलं तु) चूलिका ॥ ३८ ।
(अधः कुम्भस्य) वाहित्थं
प्रतिमान (मधो ऽस्य यत्) ।
आसनं स्कन्धदेशः (स्यात्)
पद्मकं विन्दुजालकम् ॥ ३९
पक्षभागः पार्श्वभागो
दन्तभाग (स्तु यो ऽग्रतः) ।
(द्वौ पूर्वपश्चाज्जङ्घादिदेशौ) गात्रा ऽवरे (क्रमात्) ॥
तोत्रं वैणुकम्
आलानं बन्धस्तम्भे
(ऽथ) शृङ्खले ।
अन्दुको निगडो (ऽस्त्री स्याद्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्कुशो (ऽस्त्री) सृणिः (स्त्रियाम्) ॥४१॥
चूषाकक्ष्या वरत्रा (स्यात्)
कल्पना सज्जना (समे) ।
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो (द्वयोः) ॥ ४२ ॥
वीतं (त्वसारं हस्त्यश्वं)
वारी (तु) गजबन्धनी ।
घोटके पीति तुरग तुरङ्गा ऽश्व तुरङ्गमाः ॥ ४३ ॥
वाजि वाहा ऽर्व गन्धर्व हय सैन्धव सप्तयः ।
आजानेयाः कुलीनाः (स्युर्)
विनीताः साधुवाहिनः ॥४४॥
वानायुजाः पारसीकाः काम्बोजा वाह्लिका (हयाः) ।
ययुर् (अश्वो) ऽश्वमेधीयो
जवन (स्तु) जवाधिकः ॥ ४५ ॥
पृष्ठ्यः स्थौरी
(सितः) कर्को
रथ्यो (वोढा रथस्य यः) ।
बालः किशोरो
वाम्यश्वा वडवा
वाडवं (गणे) ॥४६॥
(त्रिष्वा) श्वीनं (यदश्वेन दिनेनैकेन गम्यते) ।
कश्यं (तु मध्यमश्वानां)
हेषा ह्रेषा (च निस्वनः) ॥४७॥
निगाल (स्तु) गलोद्देशो
(वृन्दे त्व) ऽश्वीयमाश्व (वत्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥
(गतयोऽमूः पञ्च) धारा

घोणा (तु) प्रोथ (मस्त्रियाम्) ।

कविका (तु) खलीनोऽ(स्त्री)

शफं (क्लीबे) खुरः (पुमान्) ॥४९॥

पुच्छोऽ(स्त्री) लूम लाङ्गूले बालहस्त (श्च) बालधिः ।
(त्रिषु) पावृत्त लुठितौ (परावृत्ते मुहुर्भुवि) ॥५०॥
(याने चक्रिणि युद्धार्थे) शताङ्गः स्यन्दनो रथः ।
(असौ) पुष्यरथ (श्चक्रयानं न समराय यत्) ॥ ५१ ॥
कर्णीरथः प्रवहणं डयनं (च समं त्रयम्) ।
(क्लीबे)ऽनः शकटोऽ(स्त्री स्याद्)

(गन्त्री (कम्बलिवाह्यकम्) ॥५२॥

शिविका याप्ययानं (स्याद्)

दोला प्रेङ्खा (दिकाः स्त्रियाम्) ।

(उभौ तु) द्वैप वैयाघ्रौ (द्वीपिचर्मावृते रथे) ॥ ५३ ॥
(पाण्डुकम्बलसंवीतः स्यन्दनः) पाण्डुकम्बली ।
(रथे) काम्बल वास्त्रा (द्याः कम्बलादिभिरावृते) ॥५४॥
(त्रिषु द्वैपादयो)

रथ्या रथकट्या (रथव्रजे) ।

धूः (स्त्री क्लीबे) यानमुखं

(स्याद्) रथाङ्गमपस्करः ॥५५॥

चक्रं रथाङ्गं

(तस्यान्ते) नेमिः (स्त्री स्यात्) प्रधिः (पुमान्) ।

पिण्डिका नाभिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षाग्रकीलके (तु द्वयोर्) अणिः ॥५४॥
रथगुप्तिर्वरूथो (ना)
कूवर (स्तु) युगन्धरः ।
अनुकर्षो (दार्वधःस्थं)
प्रासङ्गो (ना युगाद्युगः) ॥ ५७ ॥
(सर्वं स्याद्) वाहनं यानं युग्यं पत्रं (च) धारणम् ।
(परम्परावाहनं यत्तद्) वैनीतकम् (ऽस्त्रियाम्) ॥५८॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
नियन्ता प्राजिता यन्ता सूतः क्षत्ता (च) सारथिः ॥५९॥
सव्येष्ठृ दक्षिणस्थौ (च संज्ञा रथकुटुम्बिनः) ।
रथिनः स्यन्दनारोहाः
अश्वारोहा (स्तु) सादिनः ॥ ६० ॥
भटा योधा (श्च) योद्धारः
सेनारक्षा (स्तु) सैनिकाः ।
(सेनायां समवेता ये) सैन्या (स्ते) सैनिका (श्च ते) ॥६१॥
बलिनो ये सहस्रे ण) साहस्रा (स्ते) सहस्रिणः ।
परिधिस्थः परिचरः
सेनानीर्वाहिनीपतिः ॥ ६२ ॥
कञ्चुको वारवाणो (ऽस्त्री)
(यत्तु मध्ये सकञ्चुकाः) ।
(बध्नन्ति तत्) सारसना ऽधिकाङ्गे
(ऽथ) शीर्षकम् ॥६३॥
शीर्षण्य (ञ्च) शिरस्त्रे
(ऽथ) तनुत्रं व(र्म) दंशनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उरश्छदः कङ्कटको जागरः कवचो (ऽस्त्रियाम्) ॥६४॥
आमुक्तः प्रतिमुक्त (श्च) पिनद्ध (श्चा) ऽपिनद्ध (वत्) ।
सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥
(त्रिष्वामुक्तादयो)

(वर्मभृतां) कावचिकं (गणे) ।
पदाति पत्तिपदग पादातिक पदातयः ॥ ६६ ॥
पद्ग (श्च) पदिक (श्चा)

(ऽथ) पादातं पत्तिसंहतिः ।
शस्त्राजीवे काण्डस्पृष्टा ऽयुधीया ऽयुधिकाः (समाः) ॥६
(कृतहस्तः सुप्रयोगविशिखः कृतपुङ्ख (वत्) ।
अपराद्धपृषत्को (ऽसौ लक्ष्याद्यश्च्युतसायकः) ॥ ६८ ॥
धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्द्धरः ।
(स्यात्) काण्डवां (स्तु) काण्डीरः

शाक्तीकः शक्तिहेतिकः ॥६
याष्टीक पारश्वधिकौ (यष्टिपरशुहेतिकौ ।
नैस्त्रिंशिको ऽसिहेतिः (स्यात्)

(समौ) प्रासिक कौन्तिकौ ॥७
चर्मी फलकपाणिः (स्यात्)

पताकी वैजयन्तिकः ।
अनुप्लवः सहाय (श्चा) ऽनुचरो ऽभिसरः (समाः) ॥७
पुरोगा ऽग्रेसरप्रष्ठा ऽग्रतःसर पुरःसराः ।
पुरोगमः पुरोगामी

मन्दगामी (तु) मन्थरः ॥७२॥
जङ्घालो ऽतिजवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(तुल्यौ) जङ्घाकरिक जाङ्घिकौ ।
तरस्वी त्वरितो वेगो प्रजवी जवनो जवः ॥ ७३ ॥
जय्यो (यः शक्यते जेतुं)
जेयो (जेतव्यमात्रके) ।
जैत्र (स्तु) जेता
(यो गच्छत्यलं विद्विषतः प्रति) ॥७४॥
(सो) ऽभ्यमित्र्यो ऽभ्यमित्रीयो (ऽप्य) ऽभ्यमित्रीण (इत्यपि) ।
ऊर्जस्वलः (स्याद्) ऊर्जस्वी (य ऊर्जातिशयान्वितः) ॥७५॥
(स्याद्) उरस्वानुरसिलो
रथिको रथिरो रथी ।
कामगाम्यनुकामीनो (ह्य)
ऽत्यन्तीन (स्तथा भृशम्) ॥७६॥
शूरो वीर (श्च) विक्रान्तो
जेता जिष्णु (श्च) जित्वरः ।
सांयुगीनो (रणे साधुः)
(शस्त्राजीवादयस्त्रिषु) ॥ ७७ ॥
ध्वजिनी वाहिनी सेना पृतना ऽनीकिनी चमूः ।
वरूथिनी बलं सैन्यं चक्रं (चा) ऽनीक (मस्त्रियाम्) ॥७८॥
व्यूह (स्तु) बलविन्यासो
(भेदा दण्डादयो युधि) ।
प्रत्यासारो व्यूहपार्ष्णिः
(सैन्यपृष्ठे) प्रतिग्रहः ॥ ७९ ॥
(एकेभैकरथा त्र्यश्वा) पत्तिः (पञ्चपदातिका) ।
(पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम्) ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेनामुखं गुल्म गणौ वाहिनी पृतना चमूः ।
अनीकिनी
(दशानीकिन्य) ऽक्षौहिण्य
(ऽथ) सम्पदि ॥८१॥
सम्पत्तिः श्री (श्च) लक्ष्मी (श्च)
(विपत्त्यां विपदापदौ ।
आयुधं (तु) प्रहरणं शस्त्रमस्त्रम्
(अथा ऽस्त्रियौ) ॥ ८२ ॥
धनुश्चापौ धन्व शरासन कोदण्ड कार्मुकम् ।
इष्वासो (ऽप्य)
(ऽथ कर्णस्य) कालपृष्ठं (शरासनम्) ॥८३॥
(कपिध्वजस्य) गाण्डीव गाण्डिवौ (पुन्नपुंसकौ) ।
(कोटिरस्या) ऽटनी
गोधा तले (ज्याघातवारणे) ॥ ८४ ॥
लस्तक (स्तु) धनुर्मध्यं
मौर्वी ज्या शिञ्जिनी गुणः ।
(स्यात्) प्रत्यालीढमालीढ (मित्यादिस्थानपञ्चकम्) ॥८५॥
लक्ष्यं लक्षं शरव्यं (च)
शराभ्यास उपासनम् ।
पृषत्क वाण विशिखा अजिह्मग खगाशुगाः ॥ ८६ ॥
कलम्ब मार्गण शराः पत्री रोप इषु (र्द्वयोः) ।
प्रक्ष्वेडना (स्तु) नाराचाः
पक्षो वाजः
(स्त्रिषूत्तरे) ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरस्तः (प्रहिते वाणे)

(विषाक्ते) दिग्ध लिप्तकौ ।

तूणो पासङ्ग तूणीर निषङ्गा इषुधि (र्द्वयोः) ॥ ८८ ॥

तूण्यां

खड्गे (तु) निस्त्रिंश चन्द्रहासा ऽसिरिष्टयः ।

कौक्षेयको मण्डलाग्रः करपालः कृपाण (वत्) ॥ ८९ ॥

त्सरुः (खड्गादिमुष्टौ स्यात्)

मेखला (तन्निबन्धनम्) ।

फलको (ऽस्त्री) फलं चर्म

संग्राही (मुष्टिरस्य यः) ॥ ९० ॥

द्रुघणे मुद्गर घनौ

(स्यादू) ईली करपालिका ।

भिन्दिपालः सृग (स्तुल्यौ)

परिघः परिघातनः ॥ ९१ ॥

(द्वयोः) कुठारः स्वधितिः परशु (श्च) परश्वधः ।

(स्यात्) शस्त्री (चा) ऽसिपुत्री (च) छुरिका (चा)

ऽसिधेनुका ॥९२॥

(वा पुंसि) शल्यं शङ्कु (र्ना)

सर्वला तोमरो (ऽस्त्रियाम्) ।

प्रास (स्तु) कुन्तः

कोण (स्तु स्त्रियः) पाल्यश्रि कोटयः ॥९३॥

सर्वाभिसारः सर्वौघः सर्वसन्नहना (र्थकः) ।

लोहाभिहारो (ऽस्त्रभृतां राज्ञां नीराजनाविधिः) ॥९४॥

(यत्से नयाभिगमनमरौ तद) अभिषेणन ।न्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यात्रा व्रज्याऽभिनिर्य्याणं प्रस्थानं गमनं गमः ॥ ९५॥
(स्याद्) आसारः प्रसरणं
प्रचक्रं चलिता (र्थकम्) ।
(अहितान्प्रत्यभीतस्य रणे यानम्) अतिक्रमः ॥ ९६।
वैतालिका बोधकराश्
चक्रिका घाण्टिका (र्थकाः) ।
(स्युर्) मागधा (स्तु) मगधा
वन्दिनः स्तुतिपाठकाः ॥९७॥
संशप्तका (स्तु समयात्संग्रामादनिवर्त्तिनः) ।
रेणु (र्द्वयोः स्त्रियां) धूलिः पांशु (र्ना न द्वयो) रजः॥
चूर्णे क्षोदः
समुत्पिञ्ज पिञ्जलौ (भृशमाकुले) ।
पताका वैजयन्ती (स्यात्) केतनं ध्वज (मस्त्रियाम्)
(सा) वीराशंसनं (युद्धभूमिर्यातिभयप्रदा) ।
(अहं पूर्व्वमहंपूर्व्वमित्य) ऽहंपूर्व्विका (स्त्रियाम्)॥१०
आहोपुरुषिका (दर्प्पाद्या स्यात्सम्भावनात्मनि) ।
अहमहमिका (तु सा स्यात्परस्पर यो भवत्यहङ्कारः)
द्रविणन्तरः सहो बल शौर्य्याणि स्थाम शुष्म (च) ॥१
शक्तिः पराक्रम प्राणौ
विक्रम (स्त्व) ऽतिशक्तिता
वीरपाण (तु यत्पानं वृत्ते भाविनि वा रणे) ॥१०२॥
युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं संख्यं समीकं साम्परायिकम् ॥ १०३
(अस्त्रियां) समरा ऽनीक रणाः कलह विग्रहौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्प्रहारा ऽभिसम्पात कलि संस्फोट संयुगाः ॥१०४॥
अभ्यामर्द समाघात संग्रामा ऽभ्यागमाहवाः ।
समुदायः (स्त्रियः) संयत्समित्याजि समद्युधः ॥१०५॥
नियुद्धं बाहुयुद्धे
(ऽथ) तुमुलं रणसङ्कुले ।
क्ष्वेड़ा (तु) सिंहनादः (स्यात्)
(करिणां) घटना घटा ॥१०६॥
क्रन्दनं योधसंरावो
बृंहितं करिगर्ज्जितम् ।
विस्फारो (धनुषः स्वानः)
पटहाड़म्बरौ (समौ) ॥ १०७॥
प्रसभं (तु) बलात्कारो हठो
(ऽथ) स्खलितं छलम् ।
अजन्यं (क्लीवम्) उत्पात उपसर्गः (समं त्रयम्) ॥१०८॥
मूर्च्छा (तु) कश्मलं मोहो (ऽप्य)
ऽवमर्द (स्तु) पीड़नम् ।
अभ्यवस्कन्दनं (त्व) ऽभ्यासादनं
विजयो जयः ॥१०९॥
वैरशुद्धिः प्रतीकारो वैरनिर्यातनं (च सा) ।
प्रद्रावोद्द्राव सन्द्रावसंदावा विद्रवोद्रवः ॥ ११० ॥
अपक्रमो ऽपयानं (च)
(रणे भङ्गः) पराजयः ।
पराजित पराभूतौ (त्रिषु)
नष्टतिरोहितौ ॥१११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमापणं निबर्हणं निकारणं विशारणम् ।
प्रवासनं परासनं निषूदनं निहिंसनम् ॥ ११२ ॥
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्ज्जनम् ॥ ११३ ॥
निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उद्वासन प्रमथन क्रथनोज्जासनानि (च) ॥ ११४ ॥
आलम्भ पिञ्ज विशर घातोन्मथ वधा (अपि) ।
(स्यात्) पञ्चता कालधर्मो दिष्टान्तः प्रलयो ऽत्ययः ॥११
अन्तो नाशो (द्वयोर्) मृत्युर्मरणं निधनो (ऽस्त्रियाम्)
परासु प्राप्तपञ्चत्व परेत प्रेत संस्थिताः ॥ ११६ ॥
मृत प्रमीतौ (त्रिष्वेतं)

चिता चित्या चितिः (स्त्रियाम्)

कबन्धो (ऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्) ॥ ११७ ॥
श्मशानं (स्यात्) पितृवनं

कुणपः शवम् (अस्त्रियाम्) ।

प्रग्रहोपग्रहौ वन्द्यां

कारा (स्याद्) बन्धनालये ॥ ११८ ॥

(पुंसि भूम्न्य) ऽसवः प्राणा (श्चैवं)

जीवो ऽसुधारणम् ।

आयुर्जीवितकालो (ना)

जीवातुर्जीवनौषधम् ॥ ११९ ॥

अथ वैश्यवर्गः ।

ऊरव्या ऊरुजा अर्य्या वैश्या भूमिस्पृशो विशः ।
आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तन जीवनं ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्त्रियां) कृषिः पाशुपाल्यं वाणिज्यं (चेति वृत्तयः) ।
सेवा श्ववृत्तिर्
अनृतं कृषिर्
उञ्छशिलं (त्वृ) तम् ॥ २ ॥
(द्वे याचितायाचितयोर्यथासंख्यं) मृतामृते ।
सत्यानृतं वणिग्भावः
(स्याद्) ऋणं पर्युदञ्चनम् ॥ ३ ॥
उद्धारो
ऽर्थप्रयोग (स्तु) कुसीदं वृद्धिजीविका ।
(याच्ञयाप्तं) याचितकं
(नियमाद्) आपमित्यकम् ॥ ४ ॥
उत्तमर्णाऽधमर्णौ (द्वौ प्रयोक्तृग्राहकौ क्रमात्) ।
कुसीदिको वार्द्धुषिको वृद्ध्याजीव (श्च) वार्द्धुषिः ॥ ५ ॥
क्षेत्राजीवः कर्षक (श्च) कृषिक (श्च) कृषीवलः ।
(क्षेत्रं) व्रैहेयशालेयं (व्रीहिशाल्युद्भवोचितम्) ॥ ६ ॥
यव्यं यवक्यं षष्टिक्यं (यवादिभवनं हि यत्) ।
तिल्यं तैलीन (तन्माषोमाणुभङ्गाद्द्विरूपता) ॥ ७ ॥
मौद्गीनं कोद्रवीणा (दिक्षेत्रधान्योद्भवोचितम्) ।
बीजाकृतं (तू) प्तकृष्टं
सीत्यं कृष्टं (च) हल्य (वत्) ॥ ८ ॥
त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्य (मपि तस्मिन्) ।
द्विगुणाकृते (तु सर्वं पूर्वं) शम्बाकृत (मपीह) ॥ ९ ॥
(द्रोणाढकादिवापादौ) द्रौणिकाढकिका (दयः) ।
(खारीवापस्तु) खारीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(उत्तमर्णादयस्त्रिषु) ॥ १० ॥

(पुन्नपुंसकयोः) वप्रः केदारः क्षेत्रम्

(अस्य तु) ।

कैदारकं (स्यात्) कैदार्य्यं क्षेत्रं कैदारिकं (गणे) ॥ ११ ॥

लोष्टानि लेष्टवः (पुंसि)

कोटिशो लोष्टभेदनः ।

प्राजनं तोदनं तोत्त्रं

खनित्रमवदारणम् ॥ १२ ॥

दात्रं लवित्रम्

आबन्धो योत्रं योक्त्रम्

(अथो) फलम् ।

निरीषं कूटकं

फालः कृषिको

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं (च) सीरो

(ऽथ) शम्या (स्त्री) युगकीलकः ।

ईषा लाङ्गलदण्डः (स्यात्)

सीता लाङ्गलपद्धतिः ॥ १४ ॥

(पुंसि) मेधिः (खले दारु न्यस्तं यत्पशुबन्धने) ।

आशु व्रीहिः पाटलः (स्यात्)

सितशूक यवौ (समौ) ॥ १५ ॥

तोक्म (स्तु तत्र हरिते)

कलाय (स्तु) सतीलकः ।

हरेणु खण्डिकौ (चास्मिन्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोरदूश (स्तु) कोद्रवः ॥ १६॥
मङ्गल्यको मसूरो
(ऽथ) मयुष्टक मपष्टको।
वनमुद्गः
सर्षपे (तु द्वौ) तन्तुभ कदम्बकौ ॥ १७॥
सिद्धार्थ (स्त्वेष धवलो)
गोधूमः सुमनः (समौ)।
(स्याद्) यावक (स्तु) कलमाषश्
चणको हरिमन्थकः ॥ १८॥
(द्वौ तिले) तिलपेज (श्च) तिलपिञ्ज (श्च निष्फले)।
क्षवः क्षुधाभिजननो राजिका कृष्णिकासुरी ॥ १९॥
(स्त्रियौ) कङ्गु प्रियङ्गू (द्वे)
अतसी (स्याद्) उमा क्षुमा।
मातुलानी (तु) भङ्गायां
व्रीहिभेद (स्त्व) ऽणुः (पुमान्) ॥२०॥
किंशारुः शस्यशूकं (स्यात्)
कणिशं शस्यमञ्जरी।
धान्यं व्रीहिः स्तम्बकरिः
स्तम्बो गुच्छ (स्तृणादिनः) ॥२१॥
नाड़ी नालं (च) काण्डो (ऽस्य)
पलालो (ऽस्त्री स निष्फलः)।
कडङ्गरो बुसं (क्लीबे)
(धान्यत्वचि पुमां) स्तुषः ॥ २२॥
शूको (ऽस्त्री श्लक्ष्ण तीक्ष्णाग्रे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शमी सिम्बा (त्रिषूत्तरे)।

ऋद्धमावसितं (धान्यं) पूतं (तु) बहुलीकृतम् ॥ २३ ॥

(माषादयः) शमीधान्ये शूकधान्य (यवादयः)।

शालयः (कलमाद्या श्च षष्टिकाद्या श्च पुंस्यमी) ॥ २४ ॥

तृणधान्यानि नीवाराः (स्त्री) गवेडुर्गवेधुका।

अयोग्रं मुसलो (ऽस्त्री स्याद्) उदूखलमुलूखलम् ॥ २५ ॥

प्रस्फोटनं शूर्प्पं (मस्त्री) चालनी तितउः (पुमान्)।

स्यूत प्रसेवौ कण्डालपिटौ कठ किलिञ्जकौ ॥ २६ ॥

(समानौ) रसवत्या न्तु पाकस्थान महानसे।

पौरोगव (स्तदध्यक्षः) सूपकारा (स्तु) बल्लवाः ॥ २७ ॥

आरालिका आन्धसिकाः सूदा औदनिका गुणाः।

आपूपिकः कान्दविको भक्ष्यकार (इमे त्रिषु) ॥ २८ ॥

अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका।

अङ्गारधानिका ऽङ्गारशकटी (पि) हसन्त्य (पि) ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हसन्य (प्य)

(ऽथ न स्त्री स्याद्) अङ्गारो ऽलातमुल्मुकम् ।

क्लीबे) ऽम्बरीषं भ्राष्ट्रो (ना)

कन्दू (र्वा) स्वेदनी (स्त्रियाम्) ॥३०॥

अलिञ्जरः (स्यान्) मणिकं

कर्कर्यालुर्गलन्तिका ।

पिठरः स्थाल्युखा कुण्डं

कलश (स्तु त्रिषु द्वयोः) ॥ ३१ ॥

घटः कुट निपाव्

(अस्त्री) सरावो वर्द्धमानकः ।

ऋजीषं पिष्टपचनं

कंसो (ऽस्त्री) पानभाजनम् ॥३२॥

कुतूः (कृत्तेः स्नेहपात्रं)

(सैवाल्पा) कुतुपः (पुमान्) ।

(सर्वम्) आवपनं भाण्डं पात्रा मत्रे (च) भाजनम् ३३॥

दर्विः कम्बिः खजाका (च स्यात्)

तर्दूर्दारुहस्तकः ।

(अस्त्री) शाकं हरितकं शिग्रु र्

(अस्य तु नाड़िका) ॥३४॥

कड़म्ब (श्च) कलम्ब (श्च)

वेसवार उपस्करः ।

तिन्तिड़ीक (ञ्च) चुक्र (ञ्च) वृक्षाम्लम्

(अथ) वेल्लजम् ॥३५॥

मरीचं कोलकं कृष्णमूषणं धर्म्मपत्तनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीरको जरणो ऽजाजी कणाः

(कृष्णे तु जीरके) ॥३६॥

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका।

आर्द्रकं शृङ्गवेरं (स्याद्)

(अथ) छत्रा वितुन्नकम् ॥ ३७॥

कुस्तुम्बुरु (च) धन्याकम्

(ऽथ) शुण्ठी महौषधम्।

(स्त्रीनपुंसकयोर्) विश्वं नागरं विश्वभेषजम् ॥ ३८॥

आरनालक सौवीर कुल्माषा ऽभिषुतानि (च)।

अवन्तिसोम धन्याम्ल कुञ्जलानि (च) काञ्जिके ॥ ३९॥

सहस्रवेधि जतुकं वाह्लिकं हिङ्गु रामठम्।

तत्पत्री कारवी पृथ्वी वाष्पिका कबरी पृथुः ॥ ४० ॥

निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी।

सामुद्रं (यत्तु) लवणमक्षीवं वसिरं (च तत्) ॥ ४१ ॥

सैन्धवो (ऽस्त्री) शितशिवं माणिमन्थ (च) सिन्धुजे।

रौमकं वसुकं

पाक्यं विड़ (च) कृतके (द्वयम्) ॥ ४२॥

सौवर्चले ऽक्षरुचके

तिलकं (तत्र मेचके)।

मत्स्यण्डी फाणितं (खण्डविकारे)

शर्करा सिता ॥४३॥

कूर्चिका क्षीरविकृतिः (स्याद्)

(रसाला (तु) मार्जिता।

(स्यात्) तेमनं (तु) निष्ठानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(त्रिलिङ्गा वासितावधेः) ॥ ४४ ॥

शूलाकृतं भटित्रं (स्याच्) छूल्यं

उख्यं (तु) पैठरम् ।

प्रणीतमुपसम्पन्नं

प्रयस्तं (स्यात्) सुसंस्कृतम् ॥ ४५ ॥

(स्यात्) पिच्छिलं (तु) विजिलं

संमृष्टं शोधितं (समे) ।

चिक्कणं मसृणं स्निग्धं

(तुल्ये) भावित वासिते ॥ ४६ ॥

आपक्वं पौलिरभ्यूषो

लाजाः (पुंभूम्नि चा) ऽक्षतम् ।

पृथुकः (स्याच्) चिपिटको

धाना (भृष्टयवे स्त्रियाम्) ॥४७॥

पूपो ऽपूपः पिष्टकः (स्यात्)

करम्भो दधिसक्तवः ।

भिस्सा (स्त्री) भक्तमन्धो ऽन्नमोदनो (ऽस्त्री स) दीदिविः ४८॥

भिस्सटा दग्धिका

(सर्वरसाग्रे) मण्ड (मस्त्रियाम्) ।

मासराचाम निस्रावा (मण्डे भक्तसमुद्भवे) ॥ ४९ ॥

यवागूरुष्णिका श्राणा विलेपी तरला (च सा) ।

गव्यं (त्रिषु गवां सर्वं)

गोविड् गोमय (मस्त्रियाम्) ॥५०॥

(तत्तु शुष्कं) करीषो (ऽस्त्री)

दुग्धं क्षीरं पयः (समम्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयस्य (माज्यदध्यादि)

द्रप्सं (दधि घनेतरम्) ॥ ५१ ॥

घृतमाज्यं हविः सर्पिर्

नवनीतं नवोद्धृतम् ।

(तत्तु) हैयङ्गवीनं (यत् ह्योगोदोहोद्भवं घृतम्) ॥ ५२ ॥

दण्डाहतं कालशेय मरिष्ट (मपि) गोरसः ।

तक्रं (ह्यु) दश्विन्मथितं (पादाम्ब्वर्द्धाम्बुनिर्जलम्) ॥ ५३ ॥

(मण्डं दधिभवं) मस्तु

पीयूषो (ऽभिनवं पयः) ।

अशनाया बुभुक्षा क्षुद्

ग्रास (स्तु) कवला (ऽर्थकः) ॥ ५४ ॥

सपीतिः (स्त्री) तुल्यपानं

सग्धिः (स्त्री) सहभोजनम् ।

उदन्या (तु) पिपासा तृट् तर्षो

जग्धि (स्तु) भोजनम् ॥ ५५ ॥

जेमनं लेप आहारो निघसो न्याद (इत्यपि) ॥

सौहित्य तर्पणं तृप्तिः

फेलाभुक्तसमुज्झितम् ॥ ५६ ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

गोपे गोपाल गोसंख्य गोधुगाभीर वल्लवाः ॥ ५७ ॥

(गोमहिष्यादिकं) पादबन्धनं

(द्वौ) गवीश्वरे ।

गोमान् गोमी

गोकुल (न्तु) गोधनं (स्याद्) गवां व्रजः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(त्रिष्वा) श्रितं गवीनं (तद्गावो यत्राश्रिताः पुरा)।
उक्षाभद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥
अनड्वान् सौरभेयो गौर्
(उक्ष्णांसंहतिर्) आौक्षकम्।
गव्या गोत्रा (गवां)
(वत्सधेन्वोर्) वात्सक धैनुके ॥ ६० ॥
(वृषो महान्) महोक्षः (स्याद्)
वृद्धोक्ष (स्तु) जरद्गवः।
(उत्पन्न उक्षा) जातोक्षः
(सद्योजातस्तु) तर्णकः ॥ ६१ ॥
शकृत्करि (स्तु) वत्सः (स्याद्)
दम्य वत्सतरौ (समौ)।
आर्षभ्यः (षण्डतायोग्यः)
षण्डो गोपति रिट्चरः ॥ ६२ ॥
(स्कन्धप्रदेशस्तु) वहः
सास्ना (तु) गलकम्बलः।
(स्यान्) नस्तित (स्तु) नस्योतः
प्रष्ठवाड् युगपार्श्वगः ॥ ६३ ॥
(युगादीनाञ्च वोढ़ारो) युग्य प्रासङ्ग्य शाकटाः।
(खनति तेन तद्वोढ़ा ऽस्येदं) हालिक सैरिकौ ॥ ६४ ॥
धुर्वहे धुर्य्य धौरेय धुरीणाः (स) धुरन्धरः।
(उभाव्) एकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥
(सतु) सर्वधुरीणः (स्याद्योवै) सर्वधुरावहः।
माहेयी सौरभेयी गौरुस्रा माता (च) शृङ्गिणी ॥६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्ज्जुन्यघ्न्या रोहिणी (स्याद्)

(उत्तमा गोषु नैचिकी।

(वर्णादिभेदात्संज्ञाः स्युः) शवली धवला (द्वयः)॥६७

द्विहायनी द्विवर्षा (गौर्)

एकाब्दा (त्वे) कहायनी।

चतुरब्दा चतुर्हायणी

(एवं) त्र्यब्दा त्रिहायणी॥६८

वशा बन्ध्या

ऽवतोका (तु) स्रवद्गर्भा

(ऽथ) सन्धिनी।

(आक्रान्ता वृषभेण)

(ऽथ) वेहद्गर्भोपघातिनी॥ ६९॥

काल्योपसर्य्या (प्रजने)

प्रष्ठौही बालगर्भिणी।

(स्याद्) अचण्डी (तु) सुकरा

बहुसूतिः परेष्टुका॥७०

चिरसूता वष्कयणी

धेनुः (स्यान्) नवसूतिका।

सुव्रता सुखसन्दोह्या

पीनोध्नी पीवरस्तनी॥ ७१

द्रोणक्षीरा द्रोणदुग्धा

धेनुष्या (बन्धके स्थिता)।

समांसमीना (सा यैव प्रतिवर्षं प्रसूतये)॥ ७२॥

ऊध (स्तु क्लीबम्) आपीनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(समौ) शिवक कीलकौ ।

(नपुंसि) दाम सन्दानं

पशुरज्जु (स्तु) दामनी ॥७३॥

वैशाख मन्थ मन्थान मन्थानो मन्थदण्डके ।

कुठरो दण्डविष्कम्भे

मन्थनी गर्गरी (समे) ॥ ७४ ॥

उष्ट्रे क्रमेलक मय महाङ्गा:

करभ: शिशु: ।

(करभा: स्यु:) शृङ्खलका (दारवै: पादबन्धनै: ॥७५॥

अजा छागी

शुभ: च्छाग वस्त च्छगलका अजे ।

मेढ्रोरभ्रोरणोर्णायुमेष वृष्णय एडका: ॥ ७६ ॥

(उष्ट्रोरभ्राजवृन्दे स्याद्) औष्ट्रकौरभ्रकाजकम् ।

चक्रीवन्त (स्तु) बालेया रासभा गर्द्दभा: खरा: ॥७७॥

वैदेहक: सार्थवाहो नैगमो वाणिजो वणिक् ।

पण्याजीवो (ह्या) पणिक: क्रयविक्रयिक (श्च स:) ॥७८॥

विक्रेता (स्याद्) विक्रयिक:

क्रायक क्रयकौ (समौ) ।

वाणिज्यं (तु) वणिज्या (स्यात्)

मूल्यं वस्नो (प्य) वक्रय: ॥७९॥

नीवी परिपणं मूलधनं

लाभो (ऽधिकं) फलम् ।

परिदानं परीवर्त्तो नैमेय निम [illegible] ॥ ८० ॥

(पुमान्) उपनिधि न्यास:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिदानं (तदर्पणम्) ॥

(क्रये प्रसारितं) क्रय्यं

क्रेयं क्रेतव्य (मात्रके) ॥ ८१ ॥

विक्रेयं पणितव्यं (च) पण्यं (क्रय्यादयस्त्रिषु) ।

(क्लीवे) सत्यापनं सत्यङ्कारः सत्याकृतिः (स्त्रियाम्) ॥८२॥

विपणो विक्रयः

(संख्याः सङ्ख्येये ह्यादश त्रिषु ।

विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः ॥ ८३ ॥

सङ्ख्यार्थे द्विबहुत्वे स्तः तासु चानवतेः स्त्रियः ।

पंक्तेः शतसहस्रादिक्रमाद्दशगुणोत्तरम्) ॥ ८४ ॥

यौतवं द्रुवयं पाय्य (मिति) मानाः (र्थकं त्रयम्) ।

(मानं) तुला ऽङ्गुलिप्रस्थैर्

(गुञ्जाः पञ्चा) द्यमाषकः ॥ ८५ ॥

(ते षोडशा) ऽक्ष कर्षो (ऽस्त्री)

पलं (कर्षचतुष्टयम्) ।

सुवर्णं विस्तो (हेम्नो ऽक्षे)

कुरुविस्त (स्तु तत्पले) ॥ ८६ ॥

तुला (स्त्रियां पलशतं)

भारः (स्याद्विंशतिस्तुलाः) ।

आचितं (दशभाराः स्युः)

(शाकटो भार) आचितः ॥८७॥

कार्षापणः कार्षिकः (स्यात्)

(कार्षिके ताम्रिके) पणः ।

(अस्त्रियाम्) आढक द्रोणौ खारी वाहो निकुञ्चकः ॥ ८८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुडवः प्रस्थ (इत्याद्याः परिमाणार्थकाः पृथक्) ।
पाद (स्तुरीयो भागः स्याद्)
अंश भागौ (तु) वण्टकः ॥८९॥
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्न मर्थरै विभवा (अपि) ॥ ९० ॥
(स्यात्) कोश (श्च) हिरण्यं (च हेमरूप्ये कृताकृते) ।
(ताभ्यां यदन्यत्तत्) कुप्यं
रूप्यं (तद्द्वयमाहतम्) ॥९१॥
गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।
शोणरत्नं लोहितकः पद्मरागो
(ऽथ) मौक्तिकम् ॥ ९२ ॥
मुक्ता
(ऽथ) विद्रुमः (पुंसि) प्रवालं (पुंनपुंसकम्) ।
रत्नं मणि (र्द्वयोरश्मजातौ मुक्तादिकेऽपि ऽच) ॥९३॥
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥ ९४ ॥
चामीकरं जातरूपं महारजत काञ्चने ।
रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदो (ऽस्त्रियाम्) ॥९५॥
(अलङ्कार सुवर्णं यच्) छृङ्गीकनक (मित्यदः) ।
दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेत (मित्यपि) ॥ ९६ ॥
रीतिः (स्त्रियाम्) आरकूटो (न स्त्रियाम्)
(अथ) ताम्रकम् ।
शुल्वं म्लेच्छमुखं द्व्यष्टं वरिष्ठोदुम्बराणि (च) ॥९७॥
लोहो (ऽस्त्री) शस्त्रकं तीक्ष्णं पिण्डं कालायसाऽयसी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्मसारो

(ऽथ) मण्डूरं सिंहान (मपि तन्मले) ॥९८॥

(सर्वं स्यात्तैजसं) लौहं

(विकारस्त्वयस:) कुशी।

क्षार: काचो

(ऽथ) चपलो रस: सूत (श्च) पारदे॥ ९९॥

गवलं (माहिषं शृङ्गम्)

अभ्रकं गिरिजा ऽमले।

स्रोतोञ्जन (न्तु) सौवीरं कापोताञ्जनयामुने॥ १००।

तुत्थाञ्जनं शिखिग्रीवं वितुन्नक मयूरके।

कर्परी दार्विका (क्वाथोद्भवं) तुत्थं

रसाञ्जनम्॥ १०१॥

रसगर्भं तार्क्ष्यशैलं

गन्धाश्मनि (तु) गन्धक:।

सौगन्धिक (श्च)

चक्षुष्य कुलाल्यौ (तु) कुलत्थिका॥१०२॥

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम्।

पिञ्जरं पीतकं तालमालं (च) हरितालके॥ १०३॥

गैरेयमर्थ्यं गिरिजमश्मज (ञ्च) शिलाजतु।

वोल गन्धरस प्राण पिण्ड गोप रसा: (समा:) ॥१०४

डिण्डीरो ऽब्धिकफ: फेन:

सिन्दूरं नागसम्भवम्।

नाग सीसक योगेष्ट वप्राणि

त्रपु पिच्चटम्॥ १०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रङ्ग वङ्गे

(ऽथ) पिचुस्तूलो

(ऽथ) कमलोत्तरम् ।

(स्यात्) कुसुम्भं वह्निशिखं महारजन (मित्यपि) ॥ १०६ ॥

मेषकम्बल ऊर्णायुः

शशोर्णं शशलोमनि ।

मधु क्षौद्रं माक्षिका (दि)

मधूच्छिष्टं (तु) सिक्थकं ॥ १०७ ॥

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।

नैपाली कुनटीगोला

यवक्षारो यवाग्रजः ॥ १०८ ॥

पाक्यो

(ऽथ) सर्जिकाक्षारः कापोतः सुखवर्चकः ।

सौवर्चलं (स्याद्) रुचकं

त्वक्क्षीरा वंशरोचना ॥ १०९ ॥

शिग्रुजं श्वेतमरिचं

मोरटं (मूलमैक्षवम्) ।

ग्रन्थिकं पिप्पलीमूलं चटिकाशिर (इत्यपि) ॥ ११० ॥

गोलोमी भूतकेशो (ना)

पत्राङ्गं रक्तचन्दनम् ।

त्रिकटु त्र्यूषणं व्योषं

त्रिफला (तु) फलत्रिकम् ॥ १११ ॥

अथ शूद्रवर्गः ।

शूद्राः (स्वा) ऽवरवर्णा (श्च) वृषला (श्च) जघन्यजाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारवाह (स्तु) भारिकः ॥ १५ ॥

विवर्णः पामरो नीचः प्राकृत (श्च) पृथग्जनः ।
निहीनो ऽपसदो जाल्मः क्षुल्लक (श्चे) तर (श्च सः) ॥१६
भृत्ये दासेर दासेय दास गोप्यक चेटकाः ।
नियोज्य किङ्कर प्रैष्य भुजिष्य परिचारकाः ॥ १७ ॥
पराचित परिस्कन्द परजात परैधिताः ॥ १८ ॥
मन्दस्तुन्दपरिमृज आलस्यः शीतको ऽलसो ऽनुष्णः ।
दक्षे (तु) चतुर पेशल पटवः सूत्थान उष्ण (श्च) ॥१९॥
चण्डाल प्लव मातङ्ग दिवाकीर्त्ति जनङ्गमाः ।
निषाद श्वपचावन्तेवासि चाण्डाल पुक्कसाः ॥ २० ॥
(भेदाः (किरातशवरपुलिन्दा) म्लेच्छ (जातयः) ।
व्याधो मृगवधाजीवो मृगयुर्लुब्धको (ऽपि सः) ॥२१॥
कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।
शुनको भषकः श्वा (स्याद्)

अलर्क (स्तु स योगितः) ॥२२॥

(श्वा) विश्वकद्रु (र्मृगयाकुशलः)

सरमा शुनी ।

विट्चरः सूकरो ग्राम्यो

वर्कर (स्तरुणः पशुः) ॥ २३ ॥

आच्छोदनं मृगव्यं (स्याद्) आखेटो मृगया (स्त्रियाम्)
(दक्षिणारुर्लुब्धयोगाद्) दक्षिणेर्मा (कुरङ्गकः) ॥ २४ ॥
चौरैकागारिक स्तेन दस्यु तस्कर मोषकाः ।
प्रतिरोधि परास्कन्दि पाटच्चर मलिम्लुचाः ॥ २५ ॥
चौरिका स्तैन्य चौर्ये (च)यंस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोम्नं (तु तद्वनम्) ।
गीतंस (स्तूपकरणं बन्धने मृगपक्षिणाम्) ॥ २६ ॥
उन्माथः कूटयन्त्रं (स्याद्)
वागुरा मृगबन्धिनी ।
गुल्वं वराटकः (स्त्री तु) रज्जु (स्त्रिषु) वटी गुणः ॥२७॥
उद्घाटनं घटीयन्त्रं (सलिलोद्वाहनं प्रहेः) ।
(पुंसि) वेमा वायदण्डः
सूत्राणि (नरि) तन्तवः ॥ २८ ॥
ाणि व्यूतिः (स्त्रियौ तुल्ये)
पुस्तं (लेप्यादिकर्मणि) ।
ाञ्चालिका पुत्रिका (स्याद्वस्त्रदन्तादिभिः कृता) ॥२९॥
पिटकः पेटकः पेटा मञ्जूषा
(ऽथ) विहङ्गिका ।
ारयष्टिस्
(तदालम्बि) शिक्यं काचो
(ऽथ) पादुका ॥ ३० ॥
पादूरुपानत् ((स्त्री)
(सैवा) ऽनुपदीना (पदायता) ।
नद्ध्री वद्ध्री वरत्रा (स्याद्)
(अश्वादेस्ताड़नी) कशा ॥३१॥
चाण्डालिका (तु) कण्डोलवीणा चण्डालवल्लकी ।
नाराची (स्याद्) एषणिका
शाण (स्तु) निकषः कषः ॥ ३२ ॥
व्रश्चनः पत्रपरशुर्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईषिका तूलिका (समे)।

तैजसावर्त्तनी मूषा

भस्त्रा चर्मप्रसेविका ॥ ३३ ॥

आस्फोटनी वैधनिका

कृपाणी कर्त्तरी (समे)।

वृक्षादनो वृक्षभेदी

टङ्कः पाषाणदारणः ॥ ३४ ॥

क्रकचो (ऽस्त्री) करपत्रं

(स्याद्) आरा चर्मप्रभेदिका।

सूर्मी स्थूणा लोहप्रतिमा

शिल्पं (कर्म कलादिकम्) ॥३

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया

प्रतिकृतिरर्चा (पुंसि) प्रतिनिधिर्

उपमोपमानं (स्यात्) ॥

(वाच्यलिङ्गाः) समस्तुल्यः सदृक्षः सदृशः सदृक् ।

साधारणः समान (श्च)

(स्युरुत्तरपदेत्वमी) ॥ ३७ ॥

निभ सङ्काश नीकाश प्रतीकाशोपमा- (दयः)।

कर्मण्या (तु) विधा भृत्या भृतयो भर्मवेतनम् ॥ ३८

भरण्यं भरणं मूल्यं निर्वेशः पण (इत्यपि)।

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा ॥ ३९ ॥

गन्धोत्तमा प्रसन्नेरा कादम्बर्यः स्त्र परिस्रुता।

मदिरा कश्य मद्ये (चाप्य)

ऽवदंश (स्तु भक्षणम्) ॥४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुण्डापानं मदस्थानं

मधुवारा मधुक्रमाः।

मध्वासवो माधवको मधु माध्विक (मद्वयोः) ॥ ४१ ॥

मैरेयमासवः शीधुर्

मेदको जगलः (समौ)।

सन्धानं (स्याद्) अभिषवः

किण्वं (पुंसितु) नग्नहुः ॥४२॥

कारोत्तरः सुरामण्ड

आपानं पानगोष्ठिका।

चषको (ऽस्त्री) पानपात्रं सरको (प्य) नुतर्षणम् ॥४३॥

धूर्त्तो ऽक्षदेवी कितवो ऽक्षधूर्त्तो द्यूतकृत् (समाः)।

(स्युर्) लग्नकाः प्रतिभुवः

सभिका द्यूतकारकाः ॥४४॥

द्यूतो (ऽस्त्रियाम्) अक्षवती कैतवं पण (इत्यपि)।

पणो (ऽक्षेषु) ग्लहो

ऽक्षा (स्तु) देवनाः पाशका (श्च ते) ॥४५॥

परिणाय (स्तु शारीणां समन्तान्नयने)

(ऽस्त्रियौ)।

अष्टापदं शारिफलं

प्राणिद्यूतं समाह्वयः ॥ ४६ ॥

(उक्ताभूरिप्रयोगत्वादेकस्मिन् ये ऽत्र यौगिकाः।

ताद्धर्म्यादन्यतो वृत्तावह्या लिङ्गान्तरे ऽपि ते) ॥ ४७ ॥

अथ विशेष्य निघ्नवर्गः।

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥
स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥
सुकृती पुण्यवान् धन्यो
महेच्छ (स्तु) महाशयः।
हृदयालुः सुहृदयो
महोत्साहो महोद्यमः ॥ ३ ॥
प्रवीणे निपुणाऽभिज्ञ विज्ञनिष्णात शिक्षिताः।
वैज्ञानिकः कृतमुखः कृती कुशल (इत्यपि) ॥ ४ ॥
पूज्यः प्रतीक्ष्यः
सांशयिकः संशयापन्नमानसः।
दक्षिणीयो दक्षिणार्ह (स्तत्र) दाक्षिण्य (इत्यपि) ॥ ५ ॥
(स्युर्) वदान्य स्थूललक्ष्य दानशौण्डा बहुप्रदे।
जैवातृकः (स्याद्) आयुष्मान्
अन्तर्वाणि (स्तु) शास्त्रवित् ॥ ६ ॥
परीक्षकः कारणिको
वरद (स्तु) समर्द्धकः ॥
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥
दुर्मना विमना अन्तर्मनाः (स्याद्)
उत्क उन्मनाः ॥
दक्षिणे सरलो दारो
सुकलो (दातृभोक्तरि) ॥ ८ ॥
(तत्परे) प्रसितासक्ताव्
इष्टार्थोद्युक्त उत्सुकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीते प्रथित ख्यात वित्त विज्ञात विश्रुताः ॥ ९ ॥
(गुणैः प्रतीतेतु) कृतलक्षणा हतलक्षणौ ।
इभ्य आढ्यो धनी
स्वामी (त्वी) श्वरः पतिरीशिता ॥ १० ॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।
अधिकर्द्धिः समृद्धः (स्यात्)
कुटुम्बव्यापृत (स्तु यः) ॥ ११ ॥
(स्याद्) अभ्यागारिक (स्तस्मिन्) उपाधि (र्हिपुमानयम्) ।
(वराङ्गरूपोपेतो यः) सिंहसंहननो (हि सः) ॥१२॥
निर्वार्य्यः (कार्य्यकर्त्ता यः सम्पन्नः सत्वसम्पदा) ।
अवाचि मूको
(ऽथ) मनोजवः (स) पितृसन्निभः ॥ १३ ॥
(सत्कृत्यालङ्कृतां कन्यां यो ददाति स) कूकुदः ।
लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमान्
स्निग्ध (स्तु) वत्सलः ॥ १४ ॥
(स्याद्) दयालुः कारुणिकः कृपालुः सूरतः (समाः) ।
स्वतन्त्रो ऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥१५ ॥
परतन्त्रः पराधीनः परवान्नाथवान् (अपि) ।
अधीनो निघ्न आयत्तो ऽस्वच्छन्दो गृह्यको (ऽप्यमी) ॥ १६ ॥
खलपूः (स्याद्) बहुकरी
दीर्घसूत्रश्चिरक्रियः ।
जाल्मो ऽसमीक्ष्यकारी (स्यात्)
कुण्ठो (मन्दः क्रियासु यः) ॥ १७ ॥
कर्म्मक्षमो ऽलङ्कर्मीणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियावान् कर्मसूद्यतः ।
(स) कार्मः कर्मशीलो (यः)
कर्मशूर (स्तु) कर्मठः ॥ १८ ॥
भरण्यभुक्कर्मकरः
कर्मकार (स्तु) तत्क्रियः ।
अपस्नातो मृतस्नात
आमिषाशी (तु) शौष्कलः ॥१९॥
बुभुक्षितः (स्यात्) क्षुधितो जिघत्सुरशनायितः ।
परान्नः परपिण्डादो
भक्षको घस्मरो ऽद्मरः ॥ २० ॥
आद्यूनः (स्याद्) औदरिको (विजिगीषाविवर्जिते)।
(उभाव्) आत्मम्भरिः कुक्षिम्भरि (स्वोदरपूरके) ॥ २१ ।
सर्वान्नीन (स्तु) सर्वान्नभोजी
गृध्नु (स्तु) गर्द्धनः ।
लुब्धो ऽभिलाषुक स्तृष्णक्
(समौ) लोलुप लोलुभौ ॥ २२ ।
उन्मद (स्तू) न्मदिष्णुः (स्यात्)
अविनीतः समुद्धतः ।
मत्ते शौण्डोत्कट क्षीवाः
कामुके कमिता ऽनुकः ॥ २३ ।
कम्रः कामयिता ऽभीकः कमनः कामनो ऽभिकः ।
विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥
वश्यः प्रणेयो
निभृत विनीत प्रश्रिताः (समाः) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धृष्टे धृष्णग्वियात (श्च)
प्रगल्भः प्रतिभान्वितः ॥ २५ ॥
(स्याद्) अधृष्टे (तु) शालीनो
विलक्षो विस्मयान्विते ।
अधीरे कातरस्
त्रस्नौ भीरु भीरुक भीलुकाः ॥ २६ ॥
आशंसुराशंसितरि
गृहयालुर्ग्रहीतरि ।
श्रद्धालुः (श्रद्धया युक्ते)
पतयालु (स्तु) पातुकः ॥ २७ ॥
(लज्जाशीलेऽ) ऽपत्रपिष्णुर्
वन्दारुरभिवादके ।
शरारुर्घातुको हिंस्रः
(स्याद्) वर्द्धिष्णु (स्तु) वर्द्धनः ॥ २८ ॥
उत्पतिष्णु (स्तू) त्पतिता
ऽलङ्करिष्णु (स्तु) मण्डनः ।
भूष्णुर्भविष्णुर्भविता
वर्त्तिष्णुर्वर्तनः (समौ) ॥ २९ ॥
निराकरिष्णुः क्षिप्नुः (स्यात्)
सान्द्रस्निग्ध (स्तु) मेदुरः ।
ज्ञाता (तु) विदुरो विन्दुर्
विकासी (तु) विकस्वरः ॥ ३० ॥
विसृत्वरो विसृमरः प्रसारी (च) विसारिणि ।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रोधनो ऽमर्षण: कोपी
चण्ड (स्त्व) ऽत्यन्तकोपन: ।
जागरूको जागरिता
घूर्णित: प्रचलायित: ॥ ३२ ।
स्वप्नक् शयालुर्निद्रालुर्
निद्राण शयितौ (समौ) ।
पराङ्मुख: पराचीन:
(स्याद्) अवाङ् (ऽप्य) ऽधोमुख: ॥ ३३ ।
(देवानञ्चति) देवद्र्यङ्
विष्वद्र्यङ् (विष्वगञ्चति) ।
(य: सहाञ्चति) सध्र्यङ् (स)
(स) तिर्यङ् (यस्तिरो ऽञ्चति) ॥ ३४ ।
वदो वदावदो वक्ता
वागीशो वाक्पति: (समौ) ।
वचोयुक्तिपटुर्वाग्मी वावदूक (स्त्व) वक्तरि ॥ ३५ ॥
(स्यात्) जल्पाक (स्तु) वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखरा ऽबद्धमुखौ
शक्लु: प्रियम्वदे ॥ ३६ ।
लोहल: (स्याद्) अस्फुटवाग्
गर्ह्यवादी (तु) कद्वद: ।
(समौ) कुवाद कुचरौ
(स्याद्) असौम्यस्वरो ऽस्वर: ॥ ३७ ।
रवण: शब्दनो
नान्दी वादी नान्दीकर: (समौ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जडोऽज्ञ

एडमूक (स्तु वक्तुं श्रोतुमशिक्षिते ॥३८॥

तुष्णींशील (स्तु) तुष्णीको

नग्नो ऽवासा दिगम्बरे।

निःकासितो ऽवकृष्टः (स्याद्)

अपध्वस्त (स्तु) धिक्कृतः ॥ ३९ ॥

आत्तगर्वो ऽभिभूतः (स्याद्)

दापितः साधितः (समौ)।

प्रत्यादिष्टो निरस्तः (स्यात्) प्रत्याख्यातो निराकृतः ॥४०॥

निकृतः (स्याद्) विप्रकृतो

विप्रलब्ध (स्तु) वञ्चितः।

मनोहतः प्रतिहतः प्रतिबद्धो हत (श्च सः) ॥४१॥

अधिक्षिप्तः प्रतिक्षिप्तो

बद्धे कीलित संयतौ।

आपन्न आपत्प्राप्तः (स्यात्)

कान्दिशीको भयद्रुतः ॥ ४२ ॥

आक्षारितः क्षारितो ऽभिशस्ते

सङ्कसुको ऽस्थिरे।

व्यसनार्त्तो परक्तौ (द्वौ)

विहस्त व्याकुलौ (समौ) ॥ ४३ ॥

विक्लवो विह्वलः

(स्यात्तु) विवशो ऽरिष्टदुष्टधीः।

कश्यः कशार्हे

सन्नद्धे (त्वा) ततायी वधोद्यते ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वेष्ये (त्व) ऽक्षिगतो
वध्यः शीर्षच्छेद्य (इमौ समौ)।
विष्यो (विषेणयो वध्यः)
मुसल्यो (मुसलेन यः) ॥ ४५।
शिक्षिदानो ऽकृष्णकर्मा
चपल श्चिकुरः (समौ)।
दोषैकदृक् पुरोभागी
निकृत (स्त्व) ऽनृजुः शठः ॥ ४६॥
कर्णेजपः सूचकः (स्यात्) पिशुनो
दुर्जनः खलः।
नृशंसो घातुकः क्रूरः पापो
धूर्त्त (स्तु) वञ्चकः ॥ ४७।
अज्ञ मूढ यथाजात मूर्ख वैधेय वालिशाः।
कदर्य्ये कृपण क्षुद्र किम्पचान मितम्पचाः ॥ ४८॥
निःस्व (स्तु) दुर्विधो दीनो दरिद्रो दुर्गतो (ऽपि सः)।
वनीयको याचनको मार्गणो याचका ऽर्थिनो ॥ ४९।
अहङ्कारवानहंयुः (स्यात्)
शुभंयु (स्तु) शुभान्वितः।
दिव्योपपादुका (देवाः)
(नृगवाद्या) जरायुजाः ॥ ५०
स्वेदजाः (कृमिदंशाद्याः)
(पक्षिसर्प्पादयो) ऽण्डजाः ॥५१

अथ सङ्कीर्णवर्गः।

उद्भिद (स्तरुगुल्माद्या)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्भिदुद्भिज्ज मुद्भिदम्।

सुन्दरं रुचिरं चारु सुसमं साधु शोभनम्॥ १॥

कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्।

(तद्) ऽसेचनकं (तृप्तेर्नास्त्यन्तो यस्य दर्शनात्)॥ २॥

अभीष्टे ऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम्।

निकृष्ट प्रतिकृष्टाऽर्व रेफ याप्या ऽवमा ऽधमाः॥ ३॥

कुपूय कुत्सिता ऽवद्य खेट गर्ह्या ऽणकाः (समाः)।

मलीमसं (तु) मलिनं कच्चरं मलदूषितम्॥ ४॥

पूतं पवित्रं मेध्यं (च)

वीध्रं (तु) विमला (त्मकम्)।

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम्॥ ५॥

असारं फल्गु

शून्य (न्तु) वशिकं तुच्छ रिक्तके।

(क्लीवे) प्रधानं प्रमुख प्रवेका ऽनुत्तमोत्तमाः॥ ६॥

मुख्य वर्य वरेण्या (श्च) प्रवर्हो ऽनवरार्ध्य (वत्)।

परार्ध्य ऽग्र प्राग्रहर प्राग्र्या ऽग्र्या ऽग्रीयमग्रियम्॥ ७॥

श्रेयान् श्रेष्ठः पुष्कलः (स्यात्) सत्तम (श्चा) ऽतिशोभने।

(स्युरुत्तरपदे) व्याघ्र पुङ्गवर्षभ कुञ्जराः॥ ८॥

सिंह शार्दूल नागा (द्याः पुंसि श्रेष्ठार्थगोचराः)।

अप्राग्र्यं (द्वयहीने द्वे) अप्रधानोपसर्जने॥ ९॥

विशङ्कटं पृथु बृहद्विशालं पृथुलं महत्।

वड्रोरु विपुलं

पीन पीव्नी (तु) स्थूलपीवरे॥ १०॥

स्तोका ऽल्प क्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्त्रियां) मात्रा त्रुटीं (पुंसि) लव लेश कणा ऽणवः ॥ ११ ॥
अत्यल्पे ऽल्पिष्ठम ल्पीयः कणीयो ऽणीय (इत्यपि) ।
प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ॥ १२ ॥
पुरुहं पुरु भूयिष्ठं स्फिरं भूय (श्च) भूरि (च) ।
परःशता (द्यास्ते येषां परा संख्या शतादिकात्) ॥ १३ ॥
गणनीये (तु) गणेयं
संख्याते गणितम्
(अथ) समं सर्वम् ।
विश्वमशेषं कृत्स्नं समस्त निखिला ऽखिलानि निःशेषम् ॥ १४ ॥
समग्रं सकलं पूर्णमखण्डं (स्याद्) अनूनके ।
घनं निरन्तरं सान्द्रं
पेलवं विरलं तनु ॥ १५ ॥
समीपे निकटासन्न सन्निकृष्ट सनीड (वत्) ।
सदेशो ऽभ्यास सविधः समर्याद सवेश (वत्) ॥ १६ ॥
उपकण्ठा ऽन्तिका ऽभ्यर्णा ऽभ्यग्रा (अप्य) ऽभितो
(ऽव्ययम्) ।
संसक्ते (त्व) ऽव्यवहितमपदान्तर (मित्यपि) ॥ १७ ॥
नेदिष्ठमन्तिकतमं
(स्याद्) दूरं विप्रकृष्टकम् ।
दवीय (श्च) दविष्ठं (च) सुदूरं
दीर्घमायतम् ॥ १८ ॥
वर्त्तुलं निस्तलं वृत्तं
बन्धुरं (तू) न्नतानतम् ।
उच्च प्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ऽथ) वामने ॥ १९ ॥

न्यङ्नीच खर्व ह्रस्वाः (स्युर्)

अवाग्रे ऽवनतानतम् ।

अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ॥ २० ॥

आविद्धं कुटिलं भुग्नं वेल्लितं वक्र (मित्यपि) ।

ऋजावजिह्म प्रगुणौ

व्यस्ते (त्व) प्रगुणाकुलौ ॥ २१ ॥

शाश्वत (स्तु) ध्रुवो नित्य सदातन सनातनाः ।

स्थास्नुः स्थिरतरः स्थेयान्

(एकरूपतया तु यः) ॥ २२ ॥

(कालव्यापीस) कूटस्थः

स्थावरो (जङ्गमेतरः) ।

चरिष्णुर्जङ्गम चर त्रस मिङ्ग चराचरम् ॥ २३ ॥

चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ।

चञ्चलं तरलं (चैव) पारिप्लव परिप्लवे ॥ २४ ॥

अतिरिक्तः समधिको

दृढसन्धि (स्तु) संहतः ।

कक्खटं कठिणं क्रूरं कठोरं निष्ठुरं दृढम् ॥ २५ ॥

जठरं

मूर्त्तिमन्मूर्त्तं

प्रवृद्धं प्रौढमेधितम् ।

पुराणे प्रतनं प्रत्न पुरातन चिरन्तनाः ॥ २६ ॥

प्रत्यग्रो ऽभिनवो नव्यो नवीनो नूतनो नवः ।

नूत्न (श्च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुकुमारं (तु) कोमलं मृदुलं मृदु ॥ २७ ॥
अन्वगन्वक्षमनुगे ऽनुपदं (क्लीबमव्ययम्) ।
प्रत्यक्षं (स्याद्) ऐन्द्रियकम्
अप्रत्यक्षमतीन्द्रियम् ॥ २८ ॥
एकतानो ऽनन्यवृत्तिरेकाग्रैकायना (वपि) ।
(अप्ये)-कसर्ग एकाग्र्यो (ऽप्ये) कायनगतो (ऽपि च) ॥२९
पुंस्यादिः पूर्व पौरस्त्य प्रथमाद्या
(अथास्त्रियाम्) ।
अन्तो जघन्यं चरममन्त्य पाश्चात्य पश्चिमाः ॥ ३० ॥
मोघं निरर्थकं
स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ।
साधारणं (तु) सामान्यम्
एकाकी (त्वे)-क एककः ॥३१॥
भिन्ना (र्थका) अन्यतर एकस्त्वो ऽन्येतरा (वपि) ।
उच्चावचं नैकभेदम्
उच्चण्डमविलम्बितम् ॥ ३२ ॥
अरुन्तुद (स्तु) मर्मस्पृग्
अवाधं (तु) निरर्गलम् ।
प्रसव्यं प्रतिकूलं (स्याद्) अपसव्यमपष्ठु (च) ॥ ३३ ॥
वामं (शरीरं) सव्यं (स्याद्)
अपसव्यं (तु) दक्षिणम् ।
सङ्कटं (ना तु) सम्बाधः
कलिलं गहनं (समे) ॥ ३४ ॥
सङ्कीर्णं सङ्कुलाकीर्णे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुण्डितं परिवापितम् ।
ग्रन्थितं सन्दितं दृब्धं
विसृतं विस्तृतं ततम् ॥ ३५ ॥
अन्तर्गतं विस्मृतं (स्यात्)
प्राप्तप्रणिहिते (समे) ।
वेल्लितं प्रेङ्खिताधूत चलिताकम्पिताधुते ॥ ३६ ॥
नुत्तनुन्नाऽस्तनिष्ठ्यूताविद्धक्षिप्तेरिताः (समाः) ।
परिक्षिप्तं (तु) निवृतं
मूषितं मुषिता (र्थकम्) ॥ ३७ ॥
प्रवृद्ध प्रसृते
न्यस्त निसृष्टे
गुणिताहते ।
निदिग्धोपचिते
गूढगुप्ते
गुण्डित रूषिते ॥ ३८ ॥
द्रुताऽवदीर्णे
उद्गूर्णोद्यते
काचित शिक्यिते ।
घ्राण घ्राते
दिग्ध लिप्ते
समुदक्तोद्धृते (समे) ॥ ३९ ॥
वेष्टितं (स्यात्) वलयितं सम्वीतं रुद्धमावृतम् ।
रुग्न भुग्ने
(ऽथ) निशितक्ष्णुत शातानि तेजिते ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्याद्) विनाशोन्मुखं पक्वं

क्षीण ह्रीतौ (तु) लज्जिते।

वृते (तु) वृत्तवावृत्तौ

संयोजित उपाहितः॥ ४१॥

प्राप्यं गम्यं समासाद्यं

स्यन्नं रीणं स्नुतं स्रुतम्।

सङ्गूढः (स्यात्) सङ्कलितो

ऽवगीतः ख्यातगर्हणः॥ ४२॥

विविधः (स्याद्) वहुविधो नानारूपः पृथग्विधः।

अवरीणो धिक्कृत (श्चाप्य)

ऽवध्वस्तो ऽवचूर्णितः॥ ४३॥

अनायासकृतं फाण्टं

स्वनितं ध्वनितं (समे)।

बद्धे सन्दानितं मूतमुदितं सन्दितं सितम्॥ ४४॥

निष्पक्वं क्वथितं

(पाके क्षीराज्यपयसां) शृतम्।

निर्वाणो (मुनिवह्न्यादौ)

निर्वात (स्तुगते ऽनिले)॥ ४५॥

पक्वं परिणते

गूनं हन्ने

मीढ (न्तु) मूत्रिते।

पुष्टे (तु) पुषितं

सोढे क्षान्तम्

उद्वान्तमुद्गते॥ ४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दान्त (स्तु) दमिते
शान्तः शमिते
प्रार्थितेऽर्दितः।
ज्ञप्त (स्तु) ज्ञपिते
छन्नश्छादिते
पूजितेऽञ्चितः॥ ४७॥
पूर्ण (स्तु) पूरिते
क्लिष्टः क्लिशिते
ऽवसिते सितः।
प्रुष्ट प्लुष्टोषिता दग्धे
तष्ट त्वष्टौ तनूकृते॥ ४८॥
वेधितच्छिद्रितौ विद्धे
विन्न वित्तौ विचारिते।
निःप्रभे विगता ऽरोकौ
विलीने विद्रुत द्रुतौ॥ ४९॥
सिद्धे निर्वृत्त निष्पन्नौ
दारिते भिन्न भेदितौ।
ऊतं स्यूतमुतं (चेति त्रितयं तन्तुसन्तते)॥ ५०॥
(स्याद्) अर्हिते नमस्यितं नमसितमपचायिता ऽर्चिता ऽपचितम्।
वरिवसिते वरिवस्यितमुपासित (ञ्चो) पचरितं(च)॥५१॥
सन्तापित सन्तप्तौ धूपित धूपायितौ (च) दून (श्च)।
हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः॥ ५२॥
छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ॥५३॥
लब्धं प्राप्तं विन्नं भावितमासादितं (च) भूतं (च)।
अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥ ५४ ॥
आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं (च)।
त्रातं त्राणं रक्षितमवितं गोपायितं (च) गुप्तं (च) ५५
अवगणितमवमताऽवज्ञातेऽवमानितं (च) परिभूते।
त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम् ॥ ५६ ॥
उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम्।
बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसिताऽवगते ५७
ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम्।
सङ्गीर्णं सम्विदितं संश्रुतं समाहितोपश्रुतोपगतम् ॥५८॥
ईलित शस्त पणायित पनायित प्रणुत पणित पनितानि।
अपिगीर्ण वर्णिताऽभिष्टुतेड़ितानि स्तुता (र्थानि) ॥५९॥
भक्षितचर्वित लिप्त प्रत्यवसित गिलित खादितप्सातम्।
अभ्यवहृताऽन्नजग्ध ग्रस्त ग्लस्ताऽशितं भुक्तम् ॥६०॥
क्षेपिष्ठ क्षोदिष्ठ प्रेष्ठ वरिष्ठ स्थविष्ठ बंहिष्ठाः।
(क्षिप्र क्षुद्राभीप्सित पृथु पीन बहुल प्रकर्षार्थाः) ॥६१॥
साधिष्ठ द्राघिष्ठ स्फेष्ठ गरिष्ठ ह्रसिष्ठ वृन्दिष्ठाः।
(वाढ़ व्यायत बहु गुरु वामन वृन्दारकातिशये) ॥६२॥

इति विशेष्यनिघ्नवर्गः।

अथ सङ्कीर्णवर्गः।

(प्रकृतिप्रत्ययाद्यर्थैः सङ्कीर्णे लिङ्गमुन्नयेत्)।

कर्म क्रिया

(तत्सातत्ये गम्ये स्युर्) अपरस्पराः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(साकल्यासङ्गवचने) पारायण
परायणे ।
यदृच्छा स्वरिता
(हेतु शून्या त्वास्था) विलक्षणम् ॥२॥
शमथ (स्तु) शमः शान्तिर्
दान्ति (स्तु) दमथो दमः ।
अवदानं (कर्म्मवृत्तं)
काम्यदानं प्रवारणम् ॥ ३ ॥
वशक्रिया संवदनं
मूलकर्म्म (तु) कार्म्मणम् ।
विधूननं विधुवनं
तर्प्पणं प्रीणना ऽवनम् ॥ ४ ॥
पर्य्याप्तिः (स्यात्) परित्राणं हस्तवारण (मित्यपि) ।
सेवनं सीवनं स्यूतिर्
विदरः स्फुटनं भिदा ॥ ५ ॥
आक्रोशनमभीषङ्गः
संवेदो वेदना (न ना) ।
सम्मूर्च्छनमभिव्याप्तिर्
याच्ञा भिक्षा ऽर्थना ऽर्दना ॥६॥
वर्द्धनं छेदने
(ऽथ द्वे) आनन्दन सभाजने ।
आप्रच्छनम्
(अथा) म्नायः सम्प्रदायः
क्षये क्षिया ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहे ग्राहो
वशः कान्तौ
रक्ष्णस्त्राणे
रणः क्वणे ।
व्यधो वेधे
पचा पाके
हुती हूतौ
वरो वृतौ ॥ ८ ॥
ओषः प्लोषे
नयो नाये
ज्यानिर्जीर्णौ
भ्रमो भ्रमौ ।
स्फातिर्वृद्धौ
प्रथा ख्यातौ
स्पृष्टिः पृक्तौ
स्नवः स्रवे ॥ ९ ॥
एधा समृद्धौ
स्फुरणं स्फुरणे
प्रमितौ प्रमा ।
प्रसूतिः प्रसवे
श्च्योते प्राघारः
क्लमथः क्लमे ॥ १० ॥
उत्कर्षोऽतिशये
सन्धिः श्लेषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय आश्रये।
क्षिपायां क्षेपणं
गोर्णि गिरौ
गुरणमुद्यमे ॥ ११ ॥
उन्नाय उन्नये
आयः अयणे
जयने जयः।
निगादो निगदे
मादो मद
उद्वेग उद्भ्रमे ॥ १२ ॥
विमर्दनं परिमले
ऽभ्युपपत्तिरनुग्रहः।
निग्रह (स्तद्विरुद्धः स्याद्)
अभियोग (स्त्व) भिग्रहः ॥१३॥
मुष्टिबन्ध (स्तु) संग्राहो
डिम्बे डमर विप्लवौ।
बन्धनं प्रसितिश्चारः
स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥
निकारो विप्रकारः (स्याद्)
आकारस्त्विङ्ग इङ्गितः।
परिणामो विकारो (द्वे समे) विकृति विक्रिये ॥ १५ ॥
अपहार (स्त्व) पचयः
समाहारः समुच्चयः।
प्रत्याहार उपादानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विहार (स्तु) परिक्रमः ॥ १६ ॥

अभिहारोऽभिग्रहणं

निर्हारोऽभ्यवकर्षणम् ।

अनुहारोऽनुकारः (स्याद्)

(अर्थस्यापगमे) व्ययः ॥१७॥

प्रवाह (स्तु) प्रवृत्तिः (स्यात्)

प्रवहो (गमनं वहिः) ।

वियामो वियमो यामो यमः संयाम संयमौ ॥ १८ ॥

हिंसाकर्माऽभिचारः (स्याज्)

जागर्य्या जागरा (द्वयोः)

विघ्नोऽन्तरायः प्रत्यूहः

(स्याद्) उपघ्नोऽन्तिकाश्रये ॥१९॥

निर्वेश उपभोगः (स्यात्)

परिसर्पः परिक्रिया ।

विधुर (न्तु) प्रविश्लेषो

ऽभिप्रायश्छन्द आशयः ॥ २० ॥

संक्षेपणं समसनं

पर्य्यवस्था विरोधनम् ।

परिसर्य्या परीसारः

(स्याद्) आस्या (तु) सना स्थितिः ॥२१॥

विस्तारो विग्रहो व्यासः

(स च शब्दस्य) विस्तरः ।

(स्यान्) मर्द्दनं सम्वाहनं

विनाशः (स्याद्) अदर्शनम् ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्तवः (स्यात्) परिचयः
प्रसर (स्तु) विसर्पणम् ।
नीवाक (स्तु) प्रयामः (स्यात्)
सन्निधिः सन्निकर्षणम् ॥२३॥
लवो ऽभिलावो लवने
निष्पावः पवने पवः ।
प्रस्तावः (स्याद्) अवसरः
त्रसरः सूत्रवेष्टनम् ॥२४॥
प्रजनः (स्याद्) उपसरः
प्रश्रय प्रणयौ (समौ) ।
धीशक्तिर्निष्क्रमो
ऽस्त्री तु) संक्रामो दुर्गसञ्चरः ॥ २५ ॥
प्रत्युत्क्रमः प्रयोगार्थः
प्रक्रमः (स्याद्) उपक्रमः ।
(स्याद्) अभ्यादानमुद्घात आरम्भः
सम्भ्रमस्त्वरा ॥२६॥
प्रतिबन्धः प्रतिष्टम्भो
ऽवनाय (स्तु) निपातनम् ।
उपलम्भ (स्त्व) ऽनुभवः
समालम्भो विलेपनम् ॥ २७ ॥
विप्रलम्भो विप्रयोगो
विलम्भ (स्त्व) तिसर्जनम् ।
विश्राव (स्तु) प्रविख्यातिर्
अवेक्षा प्रतिजागरः ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निपाठ निपठो पाठे

तेमस्तेमौ समुन्दने ।

आदीनवास्नवौ क्लेशे

मेलके सङ्ग सङ्गमौ ॥ २९ ॥

सम्वीक्षणं विचयनं मार्गणं मृगणा मृगः ।

परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥

निर्वर्णनं (तु) निध्यानं दर्शनालोकनेक्षणम् ।

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥

उपशायो विशाय (श्च पर्य्यायशयनार्थकौ) ।

अर्त्तनं (च) ऋतीया (च) हृणीया (च) घृणा (र्थके) ३२

(स्याद्) व्यत्यासो विपर्य्यासो व्यत्यय (श्च) विपर्य्यये ।

पर्य्ययो ऽतिक्रम (स्तस्मिन्न) ऽतिपात उपात्ययः ॥३३॥

(प्रेषणं यत्समाहूय तत्र स्यात्) प्रतिशासनम् ।

(स) संस्तावः (क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम्) ॥३४॥

(निधाय तक्ष्यते यत्र काष्ठे काष्ठं स) उद्घनः ।

स्तम्बघ्न (स्तु) स्तम्बघनः (स्तम्बो येन निहन्यते) ॥ ३५॥

आविधो (विध्यते येन तत्र)

(विष्वक्समे) निघः ।

उत्कार (श्च) निकार (श्च द्वौ धान्योत्क्षेपणार्थकौ) ॥३६॥

निगारोद्गार विक्षावोद्ग्राहा (स्तु गरणादिषु) ।

आरत्यवरति विरतय उपरामे

(वा स्त्रियां तु) निष्ठेवः ॥३७॥

निष्ठ्यूति निष्ठेवनं निष्ठीवन (मित्यभिन्नानि) ।

जवनो जूतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सातिः (स्त्व) ऽवसाने (स्याद्)
(अथ) ज्वरे जूर्त्तिः ॥३८॥
उदज (स्तु) पशुप्रेरणम्
अकरणि (रित्यादयः शापे)।
(गोत्रान्तेभ्यस्तस्य वृन्दमित्यौ) पगवका (दिकम्) ॥३९॥
आपूपिकं शाष्कुलिक (मेवमाद्यमचेतसाम्)।
(माणवानान्तु) माणव्यं
(सहायानां) सहायता ॥४०॥
हल्या (हलानां)
ब्राह्मण्य वाड़व्ये (तु द्विजन्मनाम्)।
(द्वे पर्शुकानां पृष्ठानां) पार्श्वं पृष्ठ्य (मनुक्रमात्) ॥४१॥
(खलानां) खलिनी खल्या (ऽप्य)
(ऽथ) मानुष्यकं (नृणाम्)।
ग्रामता जनता धूम्या पाश्या गल्या (पृथक् पृथक्) ॥४२॥
(अपि) साहस्र कारीष चार्मणाथर्वणा (दिकम्) ॥४३॥

अथ नानार्थाः।

(नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्त्तिताः।
भूरि प्रयोगा ये येषु पर्य्यायेष्वपि तेषु ते) ॥१॥

अथ कान्तवर्गः।

(आकाशे (त्रिदिवे) नाको
लोक (स्तु भुवने जने)।
(पद्ये यशसि च) श्लोकः
(शरे खड्गे च) सायकः ॥ २ ॥
जम्बुकौ (क्रोष्टु वरुणौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथुकौ (चिपिटार्भकौ)।
आलोकौ (दर्शनोद्योतौ)
(भेरी पटहम्) आनकौ ॥३॥
(उत्सङ्ग चिह्नयोर्) अङ्कः
कलङ्को (ऽङ्कापवादयोः)।
तक्षका (नागवर्द्धक्योर्)
अर्कः (स्फटिकसूर्य्ययोः) ॥४॥
(मारुते वेधसि व्रध्ने पुंसि) कः
कं (शिरोऽम्बुनोः)।
(स्यात् पुलाक (स्तुच्छधान्ये संक्षेपे भक्तसिक्थके) ॥ ५॥
(उलूके करिणः पुच्छमूलोपान्ते च) पेचकः ।
(कमण्डलौ च) करकः
(सुगते च) विनायकः ॥ ६॥
किष्कु (र्हस्ते वितस्तौ च)।
(शूककीटे च) वृश्चिकः।
(प्रतिकूले) प्रतीक (स्त्विष्वेकदेशे च पुंस्ययम्) ॥ ७॥
(स्याद्) भूतिक (न्तु भूनिम्बे कत्तृणे भूस्तृणे ऽपि च)।
(ज्योत्स्निकायां च घोषे च) कोषातक्य
(ऽथ कट्फले)॥८
सिते च खदिरे) सोमवल्कः (स्याद्)
(ऽथ सिह्लके।
तिलकल्के च) पिण्याकौ
वाह्लीकं (रामठे ऽपि च) ॥९॥
(महेन्द्रगुग्गुलूलूकव्यालग्राहिषु) कौशिकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(रुक्तायशङ्कास्वा) तङ्कः

(स्वल्पे ऽपि) चुल्लक (स्त्रिषु) ॥१०॥

जैवात्टकः (शशाङ्के ऽपि)

(खुरें ऽप्यश्वस्य) वर्त्तकः।

व्याघ्रे ऽपि) पुण्डरीको (ना)

यवान्यामपि) दीपकः ॥११

शालावृकाः (कपि क्रोष्टृश्वानः)

स्वर्णेऽपि) गैरिकम्।

(पीडार्थे ऽपि) व्यलीकं (स्यात्)

अलीकं (त्वप्रिये ऽनृते) ॥१२॥

शीलान्वयाव) ऽनूके (द्वे)

शल्के (शकलवल्कले)।

(साष्टे शते सुवर्णानां हेम्नुरोभूषणे पले ॥ १३ ॥

दीनारे ऽपि च) निष्को (ऽस्त्री)

कल्को (ऽस्त्री) समलैनसोः।

दम्भे (ऽप्य)

(ऽथ) पिनाकी (ऽस्त्री शूलशङ्करधन्वनोः) ॥ १४ ॥

धेनुका (तु करिण्यां च)

(मेघजाले च) कालिका।

कारिका (यातनावृत्त्योः)

कर्णिका (कर्णभूषणे ॥ १५ ॥

करिहस्ताङ्गुली पद्मवीजकोश्यां)

(त्रिषूत्तरे)।

वृन्दारको (रूपिमुख्याव्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एके (मुख्यान्यकेवलाः) ॥ १६ ॥
(स्याद्दाम्भिकः) कौक्कुटिको (यश्चादूरेरितेक्षणः) ।
लालाटिकः (प्रभोर्भालदर्शी कार्य्याक्षमश्च यः) ॥ १७ ॥
(भूभृन्नितम्बवलये चक्रेषु) कटको (ऽस्त्रियाम्) ।
(सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च) कण्टकः ॥ १८ ॥

अथ खान्तवर्गः ।

मयूख (स्त्विट्कर ज्वालास्व)
(ऽलिवाणौ) शिलीमुखौ ।
शंखो (निधौ ललाटास्थ्निकम्बौ न स्त्री)
(न्द्रिये ऽपि)खम् ॥
(घृणिज्वाले अपि) शिखे

गान्तवर्गः ।

(शैलवृक्षौ) नगावगौ ।
आशुगौ (वायुविशिखौ)
(शरार्कविहगाः) खगाः ॥२
पतङ्गौ (पक्षिसूर्य्यौ च)
पूगः (क्रमुकवृन्दयोः) ।
(पशवो ऽपि) मृगा
वेगः (प्रवाहजवयोरपि) ॥ २१ ॥
परागः (कौसुमे रेणौ स्नानीयादौ रजस्यपि) ।
(गजे ऽपि) नागमातङ्गाव्
अपाङ्ग (स्तिलके ऽपि च) ॥२
सर्गः (स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु) ।
योगः (सन्नहनोपायध्यानसङ्गतियुक्तिषु) ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोगः (सुखे स्त्र्यादिभृतावहेश्च फणकाययोः) ।
(चातके हरिणे पुंसि) सारङ्गः (शबले त्रिषु) ॥ २४ ॥
(कपौ च) प्लवगः
(शापे त्व) ऽभिषङ्गः (पराभवे) ।
(यानाद्यङ्गे) युगः (पुंसि)
युगं (युग्मे कृतादिषु) ॥२५॥
(स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि) गौर्
लिङ्गं (चिह्न शेफसोः) ॥२६॥
शृङ्गं (प्राधान्यसान्वोश्च)
वराङ्गं (मूर्द्धगुह्ययोः) ।
भगं (श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु) ॥ २७ ॥

अथ घान्तवर्गः ।

परिघः (परिघाते ऽस्त्रे ऽप्य्)
ओघो (वृन्दे ऽम्भसां रये) ।
मूल्ये पूजाविधाव्) ऽर्घः
(ऽंहो दुःखव्यसनेष्व) ऽघम् ॥ २८ ॥
(त्रिष्विष्टे ऽपि) लघुः

अथ चान्तवर्गः ।

काचाः (शिक्यमृद्भेदृग्रुजः) ।
(विपर्य्यासे विस्तरे च) प्रपञ्चः
(पावके) शुचिः ॥ २९ ॥
(मास्यमात्ये चाप्युपधे पुंसि मेध्ये सिते त्रिषु) ।
(अभिष्वङ्गे स्पृहायाञ्च गभस्तौ च) रुचिः (स्त्रियाम्)॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ छान्तवर्गः ।

(प्रसन्ने भल्लुकेऽप्य) ऽच्छो
गुच्छः (स्तवकहारयोः) ।
(परिधानाञ्चले) कच्छो (जलप्रान्ते त्रिलिङ्गकः) ॥ ३१ ॥

अथ जान्तवर्गः ।

(केकिताक्ष्यांव) ऽहिभुजौ
(दन्तविप्राण्डजा) द्विजाः ।
अजा (विष्णुहरच्छागा)
(गोष्ठाध्वनिवहा) व्रजाः ॥ ३२ ॥
धर्म्मराजौ (जिनयमौ)
कुञ्जो (दन्ते ऽपि न स्त्रियाम्) ।
बलजे (क्षेत्रपूर्द्वारे)
बलजा (वल्गुदर्शना) ॥ ३३ ॥
(समे क्ष्मांशे रणे ऽप्या) जिः
प्रजा (स्यात्सन्ततौ जने) ।
अब्जौ (शङ्खशशाङ्कौ च)
(स्वके नित्ये) निजं (त्रिषु) ॥ ३४ ॥

अथ ञान्तवर्गः ।

(पुंस्यात्मनि प्रवीणे च) क्षेत्रज्ञो (वाच्यलिङ्गकः)
संज्ञा (स्याच्चेतनानामहस्ताद्यैश्चार्थसूचना) ॥ ३५ ॥
दोषज्ञौ (वैद्यविद्वांसौ)
ज्ञो (विद्वान्सोमजो ऽपि च)

अथ टान्तवर्गः ।

(काकेभगण्डौ) करटौ
(गजगण्डकटी) कटी ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिपिविष्ट (स्तु खलतौ दुश्चर्मणि महेश्वरे)।
(देवशिल्पिन्यपि) त्वष्टा
दिष्टं (देवे ऽपि न द्वयोः) ॥३७॥
(रसे) कटुः
कटु (कार्य्ये त्रिषु मत्सरतीक्ष्णयोः)।
रिष्टं (क्षेमाशुभाभावेष्व)
ऽरिष्टे (तु शुभाशुभे) ॥ ३८ ॥
(मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ।
अयोघने शैलशृङ्गे सीराङ्गे) कूट (मस्त्रियाम्) ॥ ३९ ॥
(सूक्ष्मैलायां) त्रुटिः (स्त्री स्यात्काले ऽल्पे संशये ऽपि स)
(अत्युत्कर्षाश्रयः) कोटी
(मूले लग्नकचे) जटा ॥ ४० ॥
व्युष्टिः (फले समृद्धौ च)
दृष्टि (र्ज्ञाने ऽक्ष्णि दर्शने)।
इष्टि (र्यागेच्छयोः)
सृष्टि (र्निश्चिते बहुले त्रिषु) ॥ ४१ ॥
कष्टे (तु कृच्छ्रगहने)
(दक्षामन्दागदेषु तु)।
पटु (र्द्वौ वाच्यलिङ्गौ च)

अथ ठान्तवर्गः ।

नीलकण्ठः (शिवे ऽपि च) ॥४२॥
(पुंसि) कोष्ठो (ऽन्तर्जठरं कुसूलो ऽन्तर्गृहं तथा)।
निष्ठा (निष्पत्तिनाशान्ताः)
काष्ठो (त्कर्षे स्थितौ दिशि) ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(त्रिषु) ज्येष्ठौ (ऽतिशस्ते ऽपि)
कनिष्ठौ (ऽतियुवाल्पयोः)॥४४॥
दण्डो (ऽस्त्री लगुडे ऽपि स्याद्)
गुडो (गोलेक्षुपाकयोः)।
(सर्पमांसात्पशू) व्याडौ
(गोभूवाचस्त्वि) डा इलाः ॥४५॥
क्ष्वेडा (वंशशलाकापि)
नाडी (काले ऽपि षट्क्षणे)।
काण्डो (ऽस्त्री दण्डबाणार्ववर्गावसरवारिषु)।
(स्याद्) भाण्ड (मश्वाभरणे ऽमत्रे मूलवणिग्धने ॥४६॥

अथ ढान्तवर्गः ।

(भृशप्रतिज्ञयोर्) बाढं
प्रगाढं (भृशकृच्छ्रयोः।
(शक्तस्थूलौ त्रिषु) दृढौ
व्यूढौ (ऽविन्यस्तसंहतौ ॥ ४७।

अथ णान्तवर्गः ।

भ्रूणो (ऽर्भकेस्त्रैणगर्भे)
बाणो (बलिसुते शरे)।
कणो (ऽतिसूक्ष्मे धान्यांशे)
(संघाते प्रमथे) गणः ॥ ४८।
पणो (द्यूतादिषूत्सृष्टे भृतौ मूल्ये धने ऽपि च)।
(मौर्व्यां द्रव्याश्रिते सत्वशुक्लसन्ध्यादिके) गुणः॥ ४९॥
(निर्व्यापारस्थितौ कालविशेषोत्सवयोः) क्षणः।
वर्णो (द्विजादौ शुक्लादौ स्तुतौ)
वर्णं (न्तु वाक्षरे) ॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरुणो (भास्करे ऽपि स्याद्वर्णभेदे ऽपि च त्रिषु) ।
स्थाणुः (शर्वे ऽप्य)

(ऽथ) द्रोणः (काके ऽपि च)

(रवे) रणः ॥५१॥

ग्रामणी (र्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु) ।
ऊर्णा (मेषादिलोम्नि स्यादावर्त्ते चान्तराभ्रुवोः) ॥५२॥
हरिणी (स्यान्मृगी हेमप्रतिमा हरिता च या) ।
(त्रिषु पाण्डौ च) हरिणः

स्थूणा (स्तम्भे ऽपि वेश्मनः)॥५३॥

तृष्णे (स्पृहापिपासे द्वे)

(जुगुप्साकरुणे) घृणे ।

(वणिक्पथे ऽपि) विपणिः

(सुराप्रत्यक्च) वारुणी ॥५४॥

करेणु (रिभ्यां स्त्रीनेभे)

द्रविणं (तु बलं धनम्) ।

शरणं (गृहरक्षित्रोः)

श्रीपर्णं (कमले ऽपि च) ॥ ५५ ॥

(विषाभिमरलोहेषु) तीक्ष्णं (क्लीबे खरे त्रिषु) ।
प्रमाणं (हेतुमर्य्यादाशास्त्रेयत्ताप्रमातृषु) ॥ ५६ ॥
करणं (साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि) ।
(प्राण्युत्पादे) संसरणम् (असम्बाधचमूगतौ ॥ ५७ ॥
घण्टापथे)

(ऽथ वान्तान्ने) समुद्गिरणम् (उन्नये) ।

(अतस्त्रिषु)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषाणं (स्यात्पशुशृङ्गेभदन्तयोः) ॥ ५८।

प्रवणः (क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे)।

सङ्कीर्णौ (निचिताशुद्धाव्)

इरिणं (शून्यमूषरम्) ॥ ५९।

अथ तान्तवर्गः ।

(देवसूर्य्यौ) विवस्वन्तौ

सरस्वन्तौ (नदार्णवौ)।

(पक्षिताक्ष्यौ) गरुत्मन्तौ

शकुन्तौ (भासपक्षिणौ) ॥ ६०।

(अग्न्युत्पातौ) धूमकेतू

जीमूतौ (मेघपर्वतौ)।

हस्तौ (तु पाणिनक्षत्रे)

मरुतौ (पवनामरौ) ॥ ६१।

यन्ता (हस्तिपके सूते)

भर्त्ता (धातरि पोष्टरि)।

(यानपात्रे शिशौ) पोतः

प्रेतः (प्राण्यन्तरे मृते) ॥६२

(ग्रहभेदे ध्वजे) केतुः

(पार्थिवे तनये) सुतः।

स्थपतिः (कारुभेदे ऽपि)

भूभृद् भूमिधरे नृपे) ॥ ६३।

मूर्द्धाभिषिक्तो (भूपे ऽपि)

ऋतुः (स्त्रीकुसुमे ऽपि च)।

(विष्णावप्य) ऽजिता ऽव्यक्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत (स्त्वष्टरि सारथौ) ॥६४॥
व्यक्तः (प्राज्ञे ऽपि)
दृष्टान्ताव् (उभे शास्त्रनिदर्शने)।
क्षत्ता (स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे) ॥६५॥
वृत्तान्तः (स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः)।
आनर्त्तः (समरे नृत्यस्थाननीवृद्विशेषयोः) ॥ ६६ ॥
कृतान्तो (यमसिद्धान्तदैवाकुशलकर्मसु)।
(श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ॥ ६७ ॥
इन्द्रियाण्यश्मविकृति शब्दयोनिश्च) धातवः।
(कक्षान्तरे ऽपि) शुद्धान्तो (नृपस्यासर्वगोचरे) ॥ ६८ ॥
(कासूसामर्थ्ययोः) शक्तिर्
मूर्त्तिः (काठिन्यकाययोः)।
(विस्तारवल्ल्योर्) व्रततिर्
(वसती) रात्रिवेश्मनोः ॥६९॥
(क्षयार्चयोर्) अपचितिः
साति (र्दानावसानयोः)।
अर्त्तिः (पीडा धनुष्कोट्योर्)
जातिः(सामान्यजन्मनोः)॥७०॥
(प्रचारस्यन्दयो) रीतिर्
ईति (र्डिम्बप्रवासयोः)।
(उदये ऽधिगमे) प्राप्तिः
त्रेता (त्व ऽग्नित्रये युगे) ॥ ७१ ॥
(वीणाभेदे ऽपि) महती
भूति (र्भस्मनि सम्पदि)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(नदीनगर्य्योर्नागानां) भोगवत्य
(ऽथ सङ्गरे ॥ ७२ ॥

संगे सभायां) समितिः
(क्षयवासावपि) क्षितिः ।
(रवेरर्चिश्च शस्त्रं च वह्निज्वाला च) हेतयः ॥ ७३ ॥
जगती (जगति च्छन्दोविशेषे ऽपि क्षितावपि) ।
पंक्ति (श्छन्दो ऽपि दशमं)
(स्यात्प्रभावे ऽपि चा) यतिः ॥७४॥
पत्ति (गंतौ च)
(मूले तु) पत्रतिः (पत्रभेदयोः) ।
प्रकृति (योंनिलिङ्गे च)
(कौशिक्याद्याश्च) वृत्तयः ॥७५॥
सिकताः (स्युर्वालुकापि)
(वेदे श्रवसि च) श्रुतिः ।
वनिता (जनितात्यर्थानुरागायां च योषिति) ॥ ७६ ॥
गुप्तिः (क्षितिव्युदासे ऽपि)
धृति (धारण धैर्य्ययोः) ।
बृहती (क्षुद्रवार्त्ताकीच्छन्दोभेदे महत्यपि) ॥ ७७ ॥
वासिता (स्त्रीकरिण्योश्च)
वार्त्ता (वृत्तौ जनश्रुतौ) ।
वार्त्तं (फल्गुन्यरोगे च त्रिष्व)
(ऽप्सु च) घृता ऽमृते ॥७८॥
कलधौतं (रूप्यहेम्नोर्)
निमित्तं (हेतुलक्ष्मणोः) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतं (शास्त्रावधृतयोर्)

(युगपर्य्याप्तयोः) कृतम्॥ ७९॥

अत्याहितं (महाभीतिः कर्म्मजीवानपेक्षि च)।

(युक्ते क्ष्मादावृते) भूतं प्राण्यतीते समे त्रिषु)॥ ८०॥

वृत्तं (पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले)।

महद् (राज्यं चा)

ऽवगीतं (जन्ये स्याद्गर्हिते त्रिषु)॥८१॥

श्वेतं (रूप्ये ऽपि)

रजतं (हारे रूप्ये सिते त्रिषु)।

त्रिष्विती

जगद् (इङ्गेऽपि)

रक्तं (नील्यादिरागि च)॥८२॥

अवदातः (सिते पीते शुद्धे)

(बद्धार्ज्जुनौ) सितौ।

(युक्तेऽतिसंस्कृते मर्षिण्य (ऽभिनीतो

(ऽथ संस्कृतम्)॥८३॥

(कृत्रिमे लक्षणोपेते ऽप्य)

ऽनन्तो (ऽनवधावपि)।

(ख्याते हृष्टे) प्रतीतो

ऽभिजात (स्तु कुलजे बुधे)॥८४॥

विविक्तौ (पूतविजनौ)

मूर्च्छितौ (मूढसोच्छ्रयौ)।

(द्वौ चाम्लपरुषौ शुक्तौ

शितौ (धवलमेचकौ)॥ ८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(सत्ये साधौ विद्यमाने प्रशस्ते ऽभ्यर्हिते च) सन् ।
पुरस्कृतः (पूजिते ऽरात्यभियुक्ते ऽग्रतः कृते) ॥ ८६ ॥
निवातौ (आश्रयावातौ शस्त्राभेद्यं च वर्म यत्) ।
(जातोन्नद्धप्रवृद्धाः स्युर्) उच्छ्रिता
उत्थिता (स्त्वमी ॥ ८७ ॥
वृद्धिमत्प्रोद्यतोत्पन्ना)
आदृतौ (सादरार्चितौ) ।

अथ थान्तवर्गः ।

अर्थो (ऽभिधेयो रैवस्तुप्रयोजननिवृत्तिषु) ॥ ८८ ॥
(निपानागमयोस्) तीर्थम् (ऋषिजुष्टजले गुरौ) ।
समर्थ (स्त्रिषु शक्तिष्ठे सम्बन्धार्थे हिते ऽपि च) ॥८९॥
दशमीस्थौ (क्षीणरागवृद्धौ)
वीथी (पदव्यपि) ।
(आस्थानीयत्नयोर्) आस्था
प्रस्थो (ऽस्त्रीसानुमानयोः) ॥९०॥

अथ दान्तवर्गः ।

अभिप्रायवशौ) छन्दाव्
अब्दौ (जीमुतवत्सरौ) ।
अपवादौ (तु निन्दाज्ञे)
दायादौ (सुतबान्धवौ) ॥९१॥
पादा (रश्म्यङ्घ्रितूर्य्यांशाश्)
(चन्द्राग्न्यर्कास् तमोनुदः
निर्वादो (जनवादेऽपि)
शादो (जम्बालशष्पयोः) ॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(आरावे रुदिते त्रातर्य्या) क्रन्दे (दारुणे रणे) ।
(स्यात्) प्रसादो (ऽनुरोधे ऽपि)
सूदः (स्याद्व्यञ्जने ऽपि च) ॥८३॥
(गोष्ठाध्यक्षे ऽपि) गोविन्दो
(हर्षे ऽप्या) मोद (वन्) मदः ।
(प्राधान्ये राजलिङ्गे च वृषाङ्गे) ककुदो (ऽस्त्रियाम्)॥८४॥
(स्त्री) संविज् (ज्ञानसम्भाषा क्रियाकाराजिनामसु)
(धर्मे रहस्यु) पनिषत्
(स्यादृतौ वत्सरे) शरत् ॥८५॥
पदं (व्यवसिति त्राणस्थानलक्ष्माङ्घ्रिवस्तुषु) ।
गोष्पदं (सेविते माने)
(प्रतिष्ठाकृत्यम्) आस्पदम् ॥८६॥
(त्रिष्विष्टमधुरौ) स्वादु
मृदू (चातीक्ष्णकोमलौ) ।
(मूढाल्पापटुनिर्भाग्या) मन्दा (स्युर्)
(द्वौ तु) शारदौ॥८७॥
(प्रत्यग्राप्रतिभौ)
(विद्वत्सुप्रगल्भौ) विशारदौ ।

अथ धान्तवर्गः ।

(व्यामो वटश्च) न्यग्रोधाव्
उत्सेधः (काय उन्नतिः)॥८८॥
(पर्य्याहारश्च मार्गश्च) विवधौ वीवधौ (च तौ) ।
परिधि (र्यज्ञियतरोः शाखायामुपसूर्य्यके) ॥ ८९ ॥
(बन्धकं व्यसनं चेतः पीडाधिष्ठानम्) आधयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्युः समर्थननीवाकनियमाश्च) समाधयः ॥ १०० ॥
(दोषोत्पादे) ऽनुबन्धः (स्यात्प्रकृत्यादिविनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्त्तने) ॥१०१॥
विधु (र्विष्णौ चन्द्रमसि)
(परिच्छेदे बिले) ऽवधिः ।
विधि (र्विधाने दैवे च)
प्रणिधिः (प्रार्थने चरे) ॥ १०२ ॥
बुधवृद्धौ (पण्डिते ऽपि)
स्कन्धः (समुदये ऽपि च) ।
(देशे नदविशेषे ऽब्धौ)सिन्धु (र्ना सरिति स्त्रियाम्)॥१०
विधा (विधौ प्रकारे च)
साधू (रम्ये ऽपि च त्रिषु) ।
वधू (र्जाया स्नुषा स्त्री च)
सुधा (लेपो ऽमृतं स्नुही)॥१०
सन्धा (प्रतिज्ञा मर्य्यादा)
श्रद्धा (सम्प्रत्ययः स्पृहा) ।
मधु (मद्ये पुष्परसे चौद्रे चा)
ऽन्धं (तमस्यपि) ॥ १०
(अतस्त्रिषु)
समुन्नद्धौ (पण्डितंमन्यगर्वितौ ।
ब्रह्मबन्धु (रधिक्षेपे निर्देशे)
(ऽथावलम्बितः ॥ १०
अविदूरो ऽप्य) ऽवष्टब्धः
प्रसिद्धौ (ख्यातभूषितौ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नान्तवर्गः ।

(सूर्य्यवह्नी) चित्रभानू
भानू (रश्मिदिवाकरौ ॥ १०७ ॥
भूतात्मानौ (धातृदेहौ)
(मूर्खनीचौ) पृथग्जनौ ।
ग्रावाणौ (शैलपाषाणौ)
पत्रिणौ (शरपक्षिणौ) ॥ १०८ ॥
(तरुशैलौ) शिखरिणौ
शिखिनौ (वह्निबर्हिणौ) ।
प्रतियत्नाव् (उभौ लिप्सोपग्राहाव्)
(अथ) सादिनौ ॥ १०९ ॥
(द्वौ सारथिहयारोहौ)
वाजिनो (ऽश्वेषु पक्षिणः) ।
(कुले ऽप्य) ऽभिजनो (जन्मभूम्यामप्य)
(ऽथ) हायनाः ॥ ११०
(वर्षार्चिर्व्रीहिभेदाः स्युश्)
(चन्द्राग्न्यर्का) विरोचनाः ।
(केशे ऽपि) वृजिनो
विश्वकर्मा (ऽर्कसुरशिल्पिनोः) ॥ १११ ॥
आत्मा (यत्नोधृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च)
(शक्रघातुकमत्तेभवर्षुकाब्दा) घनाघनाः ॥ ११२ ॥
अभिमानो (ऽर्थादिदर्प्पे ज्ञाने प्रणयहिंसयोः) ।
घनो (मेघे मूर्त्तिगुणे त्रिषु मूर्त्ते निरन्तरे) ॥ ११३ ॥
इनः (सूर्य्ये प्रभौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा (मृगाङ्के क्षत्रिये नृपे।
वाहिन्यौ (नर्त्तकीमत्ते)
(स्रवन्त्यामपि) वाहिनी॥११४॥
ह्रादिन्यौ (वज्रतडितौ)
(वन्दायामपि) कामिनी।
(त्वग्देहयोरपि) तनुः
सूना (ऽधोजिह्विकापि च)॥११५॥
(क्रतुविस्तारयोरस्त्री) वितानं (त्रिषु तुच्छके।
मन्दे)
(ऽथ) केतनं (कृत्ये केतावुपनिमन्त्रणे)॥ ११६॥
(वेदस्तत्त्वं तपो) ब्रह्म
ब्रह्मा (विप्रः प्रजापतिः)।
(उत्साहने च हिंसायां सूचने चापि) गन्धनम्॥११७॥
आतञ्चनं (प्रतीवापजवनाप्यायनार्थकम्)।
व्यञ्जनं (लाञ्छनं श्मश्रु निष्ठानावयवेष्वपि)॥११८॥
(स्यात्) कौलीनं (लोकवादे युद्धे पश्वहिपक्षिणाम्)।
(स्याद्) उद्यानं (निःसरणे वनभेदे प्रयोजने)॥११९॥
(अवकाशे स्थिता) स्थानं
(क्रीडादावपि) देवनम्।
उत्थानं (पौरुषे तन्त्रे सन्निविष्टोद्गमे ऽपि च)॥ १२०॥
व्युत्थानं (प्रतिरोधे च विरोधाचरणे ऽपि च)।
(मारणे मृतसंस्कारे गतौ द्रव्ये ऽर्थदापने॥ १२१॥
निर्वर्त्तनोपकरणानुव्रज्यासु च) साधनम्।
निर्यातनं (वैरशुद्धौ दाने न्यासार्पणे ऽपि च)॥ १२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यसनं (विपदि भ्रंशे दोषे कामजकोपजे ।
पक्ष्मा (ऽक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशे ऽप्यणीयसि) १२३
(तिथिभेदे क्षणे) पर्व

वर्त्म (नेत्रच्छदे ऽध्वनि) ।
(अकार्य्ये गुह्ये) कौपीनं

मैथुनं (सङ्गतौ रतौ) ॥ १२४ ॥
प्रधानं (परमात्माधीः)

प्रज्ञान (बुद्धिचिह्नयोः) ।
प्रसूनं (पुष्पफलयोर्)

निधनं (कुलनाशयोः) ॥१२५॥
क्रन्दने (रोदनाह्वाने)

वर्ष्म (देहप्रमाणयोः) ।
(गृहदेहत्विट्प्रभाव) धामन्य

(ऽथ चतुष्पथे ॥ १२६ ॥
सन्निवेशे च) संस्थानं

लक्ष्म (चिह्नप्रधानयोः) ।
आच्छादने (सम्पिधानमपवारणमित्युभे ॥ १२७ ॥
आराधनं (साधने स्यादवाप्तौ तोषणे ऽपि च) ।
अधिष्ठानं (चक्रपुरप्रभावाध्यासनेष्वपि) ॥ १२८ ॥
रत्नं (स्वजातिश्रेष्ठे ऽपि)

वने (सलिलकानने) ।
तलिनं (विरले स्तोके)

(वाच्यलिङ्गास्तथोत्तरे) ॥ १२९ ॥
समानाः (सत्समैके स्युः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिशुनौ (खलसूचकौ)।
हीनन्यूनाव् (ऊनगर्ह्यौ)
(वेगिशूरौ) तरस्विनौ॥ १३०॥
अभिपन्नो (ऽपराद्धो ऽभिग्रस्तव्यापन्नतावपि)।

अथ पान्तवर्गः।

कलापो (भूषणे वर्हे तूणीरे संहते ऽपि च)॥ १३१॥
(परिच्छदे) परीवापः (पर्युप्तौ सलिलस्थितौ)।
(गोधुग्गोष्ठपती) गोपौ
(हरविष्णू) वृषाकपी॥ १३२॥
वाष्पाव् (उष्माश्रु)
कशिपू (त्वन्नमाच्छादनं द्वयम्)।
तल्पं (शय्याट्टदारेषु)
(स्तम्बे ऽपि) विटपो (ऽस्त्रियाम्)॥१३३॥
प्राप्तरूप स्वरूपा ऽभिरूपा (बुधमनोज्ञयोः।
भेद्यलिङ्गा अमी)
(कूर्मी वीणाभेदश्च कच्छपी)॥१३४॥

अथ फान्तवर्गः।

(रवर्णे पुंसि) रेफः (स्यात्कुत्सिते वाच्यलिङ्गकः)।

अथ बान्तवर्गः।

(अन्तराभवसत्वे ऽश्वे) गन्धर्वो (दिव्यगायने)॥ १३५॥
कम्बु (र्ना वलये शंखे)
द्विजिह्वौ (सर्प्पसूचकौ)।
पूर्वो (ऽन्यलिङ्गः प्रागाह पुम्बहुत्वे ऽपि पूर्वजान्)॥१३६॥

अथ भान्तवर्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुम्भौ (घटेभमूर्द्धांशौ)

डिम्भौ (तु शिशुबालिशौ)।

स्तम्भौ (स्थूणाजडीभावौ)

शम्भू (ब्रह्मत्रिलोचनौ) ॥१३७॥

(कुक्षिभ्रूणार्भका) गर्भाः

विस्रम्भः (प्रणये ऽपि च)।

(स्याद्भेर्य्यां) दुन्दुभिः (पुंसि स्यादक्षे) दुन्दुभिः (स्त्रियाम्)॥१३८॥

(स्यान्महारजनं क्लीबं) कुसुम्भं (करके पुमान्)।

(क्षत्रिये ऽपि च) नाभि (र्ना)

सुरभि (र्गवि च स्त्रियाम्) ॥१३९॥

सभा (संसदि सभ्ये च)

(त्रिष्वध्यक्षे ऽपि) वल्लभः।

अथ मान्तवर्गः।

(किरणप्रग्रहौ) रश्मी

(कपिभेकौ) प्लवङ्गमौ ॥ १४० ॥

(इच्छामनोभवौ) कामौ

(शक्त्युद्योगौ) पराक्रमौ।

धर्माः (पुण्ययमन्यायस्वभावाचारसोमपाः ॥ १४१ ॥

(उपायपूर्व आरम्भ उपधा चाप्यु) पक्रमः।

(वणिक्पथः पुरम्वेदो) निगमो

(नागरो वणिक्) ॥१४२॥

नैगमौ (द्वौ)

(बले) रामो (नीलचारुसिते त्रिषु)।

(शब्दादि पूर्वो वृन्दे ऽपि) ग्रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(क्रान्तौ च) विक्रमः ॥१४३॥
गुल्मा (रुक्स्तम्बसेनाश्च)
जामिः (स्वसृकुलस्त्रियोः)।
(चितिक्षान्त्योः) क्षमा (युक्ते) क्षमं (शक्ते हिते त्रिषु) १४
(त्रिषु) श्यामौ (हरित्कृष्णौ) श्यामा (स्याच्छारिवानि
ललामं (पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु) ॥ १४५॥
सूक्ष्म (मध्यात्मसप्य्)
(आदौ प्रधाने) प्रथम (स्त्रिषु)।
वामौ (वल्गुप्रतीपौ द्वाव्)
अधमौ (न्यूनकुत्सितौ) ॥१४६
(जीर्णं च परिभुक्तं च) यातयाम (मिदं द्वयम्)।

अथ यान्तवर्गः ।

(तुरङ्ग गरुडौ) तार्क्ष्यौ
(निलयापचयौ) क्षयौ ॥ १४७॥
श्वशुर्य्यौ (देवरश्यालौ)
भ्रातृव्या (भ्रातृजद्विषौ)।
पर्जन्यौ (रसदब्देन्द्रौ)
(स्याद्) अर्य्यः (स्वामि वैश्ययोः) ॥१४८
तिष्यः (पुष्ये कलियुगे)
पर्य्यायो (ऽवसरे क्रमे)।
प्रत्ययो (ऽधीनशपथज्ञान विश्वासहेतुषु ॥ १४९॥
रन्ध्रे शब्दे)
(ऽथा) ऽनुशयो (दीर्घद्वेषानुतापयोः।
स्थूलोच्चय (स्त्वसाकल्ये गजानां मध्यमे गतौ) ॥ १५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समयाः (शपथाचारकालसिद्धान्तसम्विदः) ।
(व्यसनान्यशुभं दैवं विपदित्य) ऽनया (स्त्रयः) ॥ १५१॥
अत्ययो (ऽतिक्रमे कृच्छ्रे दोषे दण्डे ऽप्य)
(ऽथापदि ।
युद्धायात्योः) सम्परायः
पूज्य (स्तु श्वशुरे ऽपि च) ॥१५२॥
(पश्चादवस्थायिबलं समवायश्च) सन्नयौ ।
(संघाते सन्निवेशे च) संस्त्रायः
प्रणया (स्त्वमी ॥१५३॥
विस्रम्भ याच्ञा प्रेमाणो)
(विरोधे ऽपि) समुच्छ्रयः ।
विषयो (यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि) ॥ १५४ ॥
(निर्य्यासे ऽपि) कषायो (ऽस्त्री)
(सभायां च) प्रतिश्रयः ।
प्रायो (भूम्न्यन्तगमने)
मन्यु (र्दैन्ये क्रतौ क्रुधि) ॥१५५॥
(रहस्योपस्थयोर्) गुह्यं
सत्यं (शपथतथ्ययोः) ।
वीर्य्यं (बले प्रभावे च)
द्रव्यं (भव्ये गुणाश्रये) ॥१५६॥
धिष्ण्यं (स्थाने गृहे भेऽग्नौ)
भाग्यं (कर्म्म शुभाशुभम्) ।
(कशेरुहेम्नोर्) गाङ्गेयं
विशल्या (दन्तिकापि च) ॥१५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषाकपायी (श्रीगौर्य्योर्)

अभिख्या (नामशोभयोः) ।

(आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ॥१५८॥

उपायः कर्म्म चेष्टा च चिकित्सा च नव) क्रियाः ।

छाया (सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः) ॥१५९॥

कक्ष्या (प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने) ।

कृत्या (क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः) ॥१६०॥

जन्यः (स्याज्जनवादे ऽपि)

जघन्यो (ऽन्त्ये ऽधमे) ऽपि च)

(गर्ह्याधीनौ च) वक्तव्यौ ।

कल्यौ (सज्जनिरामयौ) ॥१६१॥

(आत्मवाननपेतोर्थाद्) अर्थ्यः

पुण्यं (तु चार्व्वपि) ।

रूप्यं (प्रशस्तरूपे (ऽपि)

वदान्यो (वल्गुवागपि) ॥१६२॥

(न्याय्ये ऽपि) मध्यं

सौम्यं (तु सुन्दरे (सोमदैवते) ।

अथ रान्तवर्गः ।

(निवहापसरौ) वारौ)

संस्तरौ (प्रस्तराध्वरौ) ॥ १६३ ॥

गुरू (गीष्पतिपित्राद्यौ)

द्वापरौ (युगसंशयौ) ।

प्रकारौ (भेदसादृश्याव्)

आकाराव् (इङ्गिताकृतौ) ॥१६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंशारू (धान्यशूकेषु)

मरू (धन्वधराधरौ) ।

अद्रयो (द्रुमशैलार्काः)

(स्त्रीस्तनाब्दौ) पयोधरौ ॥१६५॥

(ध्वान्तारिदानवा) वृत्रा

(बलिहस्तांशवः) कराः ।

प्रदरा (भङ्गनारीरुग् बाणा)

अस्त्राः (कचा अपि) ॥१६६॥

(अजातशृङ्गो गौः काले ऽप्यश्मश्रुर्ना च) तूवरः ।

(स्वर्णे ऽपि) राः

परिकरः (पर्य्यङ्कपरिवारयोः ॥ १६७ ॥

(मुक्ता शुद्धौ च) तारः (स्याच्)

क्षारो (वायौ स तु त्रिषु ।

कर्बुरे)

(ऽथ प्रतिज्ञाजिसम्बिदापत्सु) सङ्गरः ॥ १६८ ॥

(वेदभेदे गुप्तिवादे) मन्त्रो

मित्रो (रवावपि) ।

(मखेषु यूपखण्डे ऽपि) स्वरुर्

(गुह्ये ऽप्य) ऽवस्करः ॥ १६९ ॥

आडम्बर (स्तूर्य्यरवे गजेन्द्राणां च गर्ज्जिते) ।

अभिहारो (ऽभियोगे च चौर्य्ये सन्नहने ऽपि च) ॥१७०

(स्याज्जङ्गमे) परीवारः (खड्गकोशे) परिच्छदे) ।

विष्टरो (विटपीदर्भमुष्टिः पीठाद्यमासनं) ॥ १७१ ॥

(द्वारिद्वाःस्थे) प्रतीहारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतीहार्य्य (ऽप्यनन्तरे) ।

(विपुले नकुले विष्णौ) बभ्रुः (स्यात्पिङ्गले त्रिषु) ॥ १७२ ॥

सारो (बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु) ।

दुरोदरो (द्यूतकारे पणे द्यूते) दुरोदरम् ॥ १७३ ॥

(महारण्ये दुर्गपथे) कान्तारः (पुन्नपुंसकम्) ।

मत्सरो (ऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु) ॥ १७४ ॥

(देवाहृते) वरः (श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये) ।

(वंशाङ्कुरे) करीरो (ऽस्त्री तरुभेदे घटे च ना) ॥ १७५ ॥

(ना चमूजघने हस्त सूत्रे) प्रतिसरो (ऽस्त्रियाम्) ।

(यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १७६ ॥

शुकाहिकपिभेकेषु) हरि (र्ना कपिले त्रिषु) ।

शर्करा (कर्परांशे ऽपि)

यात्रा (स्याद्यापने गतौ) ॥ १७७ ॥

इरा (भूवाक्सुरासु स्यात्)

तन्द्री (निद्राप्रमीलयोः) ।

धात्री (स्यादुपमातापि क्षितिरप्यामलक्यपि) ॥ १७८ ॥

क्षुद्रा (व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।

त्रिषु क्रूरे ऽधमे ऽल्पे ऽपि) क्षुद्रौ

मात्रा (परिच्छदे ॥ १७९ ॥

अल्पे च परिमाणे सा) मात्रं (कार्त्स्न्ये ऽवधारणे) ।

(आलेख्याश्चर्य्ययोश्) चित्रं

कलत्रं श्रोणिभार्य्ययोः) ॥ १८० ॥

(योग्यभाजनयोः) पात्रं

पत्रं (वाहनपक्षयोः) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(निर्देशग्रन्थयोः) शास्त्रं

शास्त्रम् (आयुधलोहयोः) ॥१८१॥

(स्यात्जटांशुकयोर्) नेत्रं

चित्रं (पत्नीशरीरयोः)।

(मुखाग्रे क्रोडहलयोः) पोत्रं

गोत्रं (तु नाम्नि च) ॥१८२॥

सत्रम् (आच्छादने यज्ञे सदादाने वने ऽपि च)।

अजिरम् (विषये काये ऽप्य)

ऽम्बरं (व्योम्नि वाससि) ॥१८३॥

चक्रं (राष्ट्रे ऽप्य)

ऽक्षरं (तु मोक्षे ऽपि)

क्षीरम् (अप्सु च)।

(स्वर्णे ऽपि) भूरिचन्द्रौ (द्वौ)

(द्वारमात्रे ऽपि) गोपुरम् ॥१८४॥

(गुहादम्भौ) गह्वरे (द्वे)

(रहो ऽन्तिकम्) उपह्वरे।

(पुरोऽधिकमुपर्य्य) ऽग्राण्य

(आगारे नगरे) पुरम् ॥१८५॥

मन्दिरं (चा)

(ऽथ) राष्ट्रो (ऽस्त्री विषये स्यादुपद्रवे)।

दरो (ऽस्त्रियां भये श्वभ्रे)

वज्रो (ऽस्त्री हीरके पवौ) ॥१८६॥

तन्त्रं (प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे)।

औशीर (श्चामरे दण्डे (ऽप्यौ) शीरं (शयनासने) ॥१८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्करं (करिहस्ताग्रे वाद्यभाण्डमुखे जले ।
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः) ॥ १८८
अन्तरम् (अवकाशावधिपरिधानान्तर्द्धिभेदतादर्थे ।
छिद्रात्मीयविनाबहिरवसरमध्ये ऽन्तरात्मनि च) ॥ १८९
(मुस्ते ऽपि) पिठरं
(राजकशेरुण्यपि) नागरम् ।
शार्वरं (त्वन्धतमसे घातुके भेद्यलिङ्गकः) ॥ १९० ॥
गौरो (ऽरुणे सिते पीते)
(व्रणकार्य्ये ऽप्य) ऽरुष्करः ।
जठरः (कठिने ऽपि स्याद्)
(अधस्तादपि चा) ऽधरः ॥ १९
(अनाकुले ऽपि चै) काग्रो
व्यग्रो (व्यासक्त आकुले) ।
(उपर्य्युदीच्यश्रेष्ठेष्वप्यु) त्तरः (स्याद्)
अनुत्तरः ॥ १९२ ॥
(एषां विपर्य्यये श्रेष्ठे)
(दूरानात्मोत्तमाः) परा
(स्वादुप्रियौ तु) मधुरौ
क्रूरौ (कठिननिर्दयौ) ॥ १९३
उदारो (दातृमहतोर्)
इतर (स्त्वन्यनीचयोः) ।
(मन्दस्वच्छन्दयोः) स्वैरः
शुभ्रम् (उद्दीप्तशुक्लयोः) ॥ १९

इति रान्तवर्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ लान्तवर्गः ।

(चूड़ाकिरीटं केशाश्च संयता) मौलयस् (त्रयः) ।
(द्रुमप्रभेदमातङ्ग काण्डपुष्पाणि) पीलवः ॥ १९५ ॥
(कृतान्तानेहसोः) कालश्
(चतुर्थे ऽपि युगे) कलिः ।
(स्यात्कुरङ्गे ऽपि) कमलः
(प्रावारे ऽपि च) कम्बलः ॥१९६॥
(करोपहारयोः पुंसि) बलिः (प्राण्यङ्गजे स्त्रियाम्) ।
(स्थौल्यसामर्थ्यसैन्येषु) बलं (ना काकसीरिणोः) ॥१९७॥
वातूलः (पुंसि वात्यायामपि वातसहे त्रिषु) ।
(भेद्यलिङ्गः शठे) व्यालः (पुंसि श्वापदसर्पयोः) ॥१९८॥
मलो (ऽस्त्री पापविट्किट्टान्य)
(ऽस्त्री) शूलं (रुगायुधम्)
(शङ्कावपि द्वयोः) कीलः
पालिः (स्त्र्यश्र्यङ्कपंक्तिषु) ॥१९९॥
कला (शिल्पे कालभेदे ऽप्य्)
आली (सख्यावली अपि) ।
(अब्ध्यम्बुविकृतौ) वेला (कालमर्यादयोरपि) ॥२००॥
बहुलाः (कृत्तिकागावो) बहुलो (ऽग्निः शितौ त्रिषु) ।
लीला (विलासक्रिययोर्)
उपला (शर्करापि च) ॥२०१॥
(शोणिते ऽम्भसि) कीलालं
मूलम् (आद्ये शिफाभयोः)
जालं (समूह आनायो गवाक्षक्षारकावपि) ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शीलं (स्वभावे सद्‌वृत्ते)
(सस्ये हेतुकृते) फलम् ।
(छदिर्नेत्ररुजोः क्लीवं समूहे) पटलं (न ना) ॥ २०३ ॥
(अधःस्वरूपयोरस्त्री) तलं
(स्याच्चामिषे) पलम् ।
(और्वानलेऽपि) पातालं
चेलं (वस्त्रेऽधमे त्रिषु) ॥२०४॥
कुकूलं (शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले) ।
(निर्णीते) केवलम् (इति त्रिलिङ्गं त्वेककृत्स्नयोः) २०५
(पर्याप्तिक्षेमपुण्येषु) कुशलं (शिक्षिते त्रिषु)
प्रवालम् (अङ्कुरेऽप्यस्त्री) ।
(त्रिषु) स्थूलं (जडेऽपि च) ॥२०६॥
करालो (दन्तुरे तुङ्गे)
(चारौ दक्षे च) पेशलः ।
(मूर्खेऽर्भकेऽपि) बालः (स्यात्)
लोल (श्चलसतृष्णयोः) ॥२०७॥

अथ वान्तवर्गः ।

दवदावौ (वनारण्यवह्नी)
(जन्महरौ) भवौ ।
(मन्त्री सहायः) सचिवौ
(पतिशाखिनरा) धवाः ॥ २०८ ॥
अवयः (शैलमेषार्काः)
(आज्ञाह्वानाध्वरा) हवाः ।
भावः (सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु) ॥२०९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्यादुत्पादे फले पुष्पे) प्रसवो (गर्भमोचने)।
(अविश्वासे ऽपह्नवे ऽपि निकृतावपि) निह्नवः॥ २१०॥
(उत्सेकामर्षयोरिच्छाप्रसवे मह) उत्सवः।
अनुभावः (प्रभावे स्यात्सतां च मतिनिश्चये)॥ २११॥
(स्याज्जन्महेतुः) प्रभवः (स्थानं चाद्योपलब्धये)।
(शूद्रायां विप्रतनये शस्त्रे) पारशवः (पुमान्)॥ २१२॥
ध्रुवो (भभेदे क्लीवं तु निश्चिते शाश्वते त्रिषु)।
स्वो (ज्ञातावात्मनि) स्वं (त्रिष्वात्मीये) स्वो (ऽस्त्रियां धने) २१३
(स्त्रीकटीवस्त्रबन्धे ऽपि) नीवी (परिपणे ऽपि च)।
शिवा (गौरीफेरवयोर्)
द्वन्द्वं (कलहयुग्मयोः)॥ २१४॥
(द्रव्यासुव्यवसायेषु) सत्त्वम् (अस्त्री तु जन्तुषु)।
क्लीवं (नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे)॥ २१५॥

अथ शान्तवर्गः।

(द्वौ) विशौ (वैश्यमनुजौ)
(द्वौ चराभिमरौ) स्पशौ।
(द्वौ) राशी (पुञ्जमेषाद्यौ)
(द्व) वंशौ (कुलमस्करौ)॥२१६॥
(रहः प्रकाशौ) वीकाशौ
निवेशौ (भृतिभोगयोः)।
(कृतान्ते पुंसि) कीनाशः क्षुद्रकर्षकयोस्त्रिषु)॥ २१७॥
(पदे लक्ष्ये निमित्ते) ऽपदेशः
(स्यात्) कुशम् (अप्सु च)।
दशा (वस्त्रान्तेऽवस्थायां)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशा (तृष्णापि चायता) ॥२१८॥

वशा (स्त्री करिणी च स्याद्)

दृग् (ज्ञाने ज्ञातरि त्रिषु) ।

(स्यात्) कर्कशः (साहसिकः कठोरामसृणावपि) २१९

प्रकाशो (ऽतिप्रसिद्धे ऽपि) ।

(शिशावज्ञे च) वालिशः ।

अथ षान्तवर्गः ।

(सुरमत्स्यराव्) अनिमिषौ

पुरुषाव् (आत्ममानवौ) ॥२२०॥

(काकमत्स्यात्खगौ) ध्वांक्षौ

कक्षौ (तु तृणवीरुधौ) ।

अभीषुः (प्रग्रहे रश्मौ)

प्रैषः (प्रेषणमर्दने) ॥ २२१ ॥

पक्षः (सहायेऽप्य्)

उष्णीषः (शिरोवेष्टकिरीटयोः) ।

(शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे) वृषः ॥ २२२ ॥

कोषो (ऽस्त्री कुट्मले खड्गपिधाने ऽर्थौघदिव्ययोः) ।

(द्यूते ऽक्षे सारिफलके ऽप्य्) आकर्षो

(ऽथा)ऽक्षम् (इन्द्रिये) ॥ २२३ ॥

(ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे) ।

कर्षू (र्वार्त्ता करीषाग्निः) कर्षूः (कुल्याभिधायिनी) ॥२२४॥

(पुम्भावे तत् क्रियायां च) पौरुषं

विषम् (अप्सु, च) ।

(उपदाने ऽप्य्) आमिषं (स्याद्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अपराधे ऽपि) किल्बिषम् ॥ २२५ ॥
(स्याद्वृष्टौ लोकधात्वंशे वत्सरे) वर्षम् (अस्त्रियाम्)
प्रेक्षा (नृत्येक्षणं प्रज्ञा)
भिक्षा (सेवा ऽर्थना भृतिः) ॥२२६॥
त्विट् (शोभा ऽपि)
(त्रिषु परे)
न्यक्षं (कार्त्स्न्यानिकृष्टयोः)।
(प्रत्यक्षे ऽधिकृते) ऽध्यक्षो
रुक्ष (स्त्वप्रेम्न्यचिक्कणे ॥ २२७॥
अथ सान्तवर्गः।
(रविश्वेतच्छदौ) हंसौ
(सूर्यवह्नी) विभावसू।
वत्सौ (तर्णकवर्षौ द्वौ)
(सारङ्गाश्च) दिवौकसः ॥ २२८॥
(शृङ्गारादौ विष वीर्ये गुणे रागे द्रवे) रसः।
(पुंस्य्) उत्तंसा ऽवतंसौ (द्वौ कर्णपूरे ऽपि शेखरे) २२९
(देवभेदे ऽनले रश्मौ) वसू (रत्ने धने) वसु।
(विष्णौ च) वेधाः
(स्त्रीत्वा) शी (शीर्हिताशंसा ऽहिदंष्ट्रयोः) ॥२३०॥
लालसे (प्रार्थनौत्सुक्ये)
हिंसा (चौर्यादिकर्म च)।
प्रसू (रश्वापि)
(भूद्यावौ) रोदस्यौ रोदसी (च ते)॥२३१॥
(ज्वालाभासोर्नपुंस्य) र्चिर्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्योतिर् (भद्योतदृष्टिषु) ।

(पापापराधयोर्) आगः
(खगबाल्यादिनोर्) वयः ॥२३२॥

(तेजः पुरीषयोर्) वर्चो
महस् (तूत्सवतेजसोः) ।

रजो (गुणे स्त्रीपुष्पे च)
(राहौ ध्वान्ते गुणे) तमः ॥२३३॥

छन्दः (पद्ये ऽभिलाषे च)
तपः (कृच्छ्रादिकर्म च) ।

सहो (बलं) सहा (मार्गे)
नभः (खं श्रावणो) नभाः ॥ २३४॥

ओकः (सद्माश्रयश्चौ) काः
पयः (क्षीरं) पयो(ऽम्बु च) ।

ओजा (दीप्तौ बले)
स्रोत (इन्द्रिये निम्नगारये) ॥ २३५॥

तेजः (प्रभावे दीप्तौ च बले शुक्रे ऽप्य)
(ऽतस्त्विषु) ।

विद्वान् (विदंश्च)
बीभत्सो (हिंस्रो ऽप्य्)
(अतिशये त्वमी) ॥२३६

(वृद्धप्रशस्ययोर्) ज्यायान्
कनीयाँस्तु (युवाल्पयोः) ।

वरीयां (स्नूरुवरयोः)
साधीयान (साधुबाढयोः) ॥२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ हान्तवर्गः ।

(दले ऽपि) बर्हं
(निर्बन्धोपरागार्कादयो) ग्रहाः ।
(द्वार्य्यापीड़े क्वाथरसे) निर्यूहो (नागदन्तके) ॥ २३८ ॥
(तुलासूत्रे ऽश्वादिरश्मौ) प्रग्राहः प्रग्रहो (ऽपि च) ।
(पत्नीपरिजनादानमूलशापाः) परिग्रहाः ॥ २३९ ॥
(दारेष्वपि) गृहाः
(श्रोण्यामप्या) रोहो (वरस्त्रियाः) ।
व्यूहो (वृन्दे ऽप्य्)
अहि (र्वृत्रे ऽप्य्)
(अग्नीन्दुकास्) तमोपहाः २४०
(परिच्छदे नृपार्हे ऽर्थे) परिबर्हो
(ऽव्ययाः परे) ।

अथ अव्यय नानार्थवर्गः ।

आङ् (ईषदर्थे ऽभिव्याप्तौ सीमार्थे धातुयोगजे) ।
आ (प्रगृह्यः स्मृतौ वाक्ये ऽप्य्)
आस् (तु स्यात्कोपपीड़योः) ॥ १ ॥
(पापकुत्सेषदर्थे) कु
धिङ् (निर्भर्त्सननिन्दयोः) ।
चा (ऽन्वाचये समाहारेतरेतरसमुच्चये) ॥ २ ॥
स्वस्त्या (शीः क्षेमपुण्यादौ)
(प्रकर्षे लङ्घने ऽप्य) ऽति ।
स्वित् (प्रश्ने च वितर्के च)
तु (स्याद्भेदे ऽवधारणे) ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकृत् (सहैकवारे स्याद्)

आराद् (दूरसमीपयोः) ।

(प्रतीच्यां चरमे) पश्चाद्

उता (प्यर्थविकल्पयोः) ॥ ४ ॥

(पुनः सदार्थयोः) शश्वत्

साक्षात् (प्रत्यक्षतुल्ययोः) ।

(खेदानुकम्पासन्तोषविस्मयामन्त्रणे) बत ॥ ५ ॥

हन्त (हर्षे ऽनुकम्पायां वाक्यारम्भविषादयोः) ।

प्रति (प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः) ॥ ६ ॥

इति (हेतुप्रकरणप्रकर्षादिसमाप्तिषु) ।

(प्राच्यां) पुरस्तात् (प्रथमे पुरार्थे ऽग्रत इत्यपि) ॥ ७ ॥

यावत् तावत् (च साकल्ये ऽवधौ माने ऽवधारणे) ।

(मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्व) ऽथो अथ ॥ ८ ॥

वृथा (निरर्थकाविध्योर्)

नाना (ऽनेकोभयार्थयोः) ।

नु (पृच्छायां विकल्पे च)

(पश्चात्सादृश्ययोर्) अनु ॥ ९ ॥

(प्रश्नावधारणानुज्ञा ऽनुनयामन्त्रणे) ननु ।

(गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्व) ऽपि ॥ १० ॥

(उपमायां विकल्पे) वा

सामि (त्वर्द्धे जुगुप्सने) ।

अमा (सह समीपे च)

कम् (वारिणि च मूर्द्धि च) ॥ ११ ॥

(इवेत्यमर्थयोर्) एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नूनं (तर्के ऽर्थनिश्चये) ।
(तूष्णीमर्थे सुखे) जोषं
किम् (पृच्छायां जुगुप्सने) ॥१२॥
नाम (प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने) ।
अलम् (भूषणपर्याप्तिशक्तिवारणवाचकम्) ॥ १३ ॥
हुम् (वितर्के परिप्रश्ने)
समया (ऽन्तिकमध्ययोः) ।
पुनर् (अप्रथमे भेदे)
निर् (निश्चयनिषेधयोः) ॥ १४ ॥
(स्यात्प्रबन्धे चिरातीते (निकटागामिके) पुरा ।
उरर्यूरी (चो) ररी (च विस्तारे ऽङ्गीकृतौ त्रयम्) ॥१५
(स्वर्गे परे च लोके) स्वर्
(वार्त्तासम्भाव्ययोः) किल ।
(निषेधवाक्यालङ्कारजिज्ञासानुनये) खलु ॥ १६ ॥
(समीपोभयतः शीघ्रसाकल्याभिमुखे) ऽभितः ।
(नामप्रकाशयोः) प्रादुर्
मिथो (ऽन्यो ऽन्यं रहस्यपि) ॥१७॥
तिरो (ऽन्तर्द्धौ तिर्यगर्थे)
हा (विषादशुगर्त्तिषु) ।
अहहे (त्यद्भुते खेदे)
हि (हेताववधारणे) ॥ १८ ॥

अथ अव्ययवर्गः ।

चिराय चिररात्राय चिरस्या (द्या श्चिरार्थकाः) ।
मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत् (समाः) ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रागझटित्यञ्जसा ऽह्नाय सपदि द्राङ् मंक्षु (च द्रुते)।
बलवत् सुष्ठु किमुत स्व ऽत्यतीव (च निर्भरे) ॥ २ ॥
पृथग्विना (ऽन्तरेणर्त्ते) हिरुङ्नाना (च वर्ज्जने)।
यत्तद्यतस्ततो (हेताव्)
(असाकल्ये तु) चिच्चन ॥ ३ ॥
कदाचिज्जातु
सार्द्धं (तु) साकं सत्रा समं सह।
(आनुकूल्यार्थकं) प्राध्वं
(व्यर्थके तु) वृथा मुधा ॥ ४ ॥
आहो उताहो किमुत (विकल्पे) किं किमूत च।
तु हि च स्म ह वै (पादपूरणे)
(पूजने) स्वति ॥ ५ ॥
दिवा (ऽह्नीत्य)
(ऽथ) दोषा (च) नक्तं (च रजनाविति)।
(तिर्य्यगर्थे) साचि तिरो (ऽप्य)
(ऽथ सम्बोधनार्थकाः।
स्युः) प्याट् पाडङ्ग हे हे भोः
समया निकषा हिरुक्।
(अतर्किते तु) सहसा
(स्यात्) पुरः पुरतो ऽग्रतः ॥ ७ ॥
स्वाहा (देवहविर्दाने) श्रौषट् वौषट् वषट् स्वधा।
किञ्चिदीषन्मनाग् (अल्पे)
प्रेत्या ऽमुत्र (भवान्तरे) ॥ ८ ॥
वद्वा यथातथैवैवं (साम्ये)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽहो ही (च विस्मये)।
(मौने तु) तूष्णीं तूष्णीकां
सद्यस् सपदि (तत्क्षणे) ॥९॥
दिष्ट्याऽमुपजोषं (चेत्यानन्दे)
(ऽथा) (ऽन्तरे ऽन्तरा।
अन्तरेण (च मध्ये स्युः)
प्रसह्य (तु हठार्थकम्) ॥ १० ॥
(युक्ते द्वे) साम्प्रतं स्थाने
ऽभीक्ष्णं शश्वद् (अनारते)।
(अभावे) नह्यनो ना (ऽपि)
मास्म मा ऽलं (च वारणे) ॥११॥
(पक्षान्तरे) चेद्यदि (च)
(तत्वे त्व) ऽद्धा ऽञ्जसा (द्वयम्)।
(प्राकाश्ये) प्रादुराविः (स्याद्)
ओमेवं परमं (मते) ॥ १२ ॥
समन्ततस् (तु) परितः सर्वतोविष्वग् (इत्यपि)
(अकामानुमतौ) कामम्।
(अस्तूयोपगमे) ऽस्तु (च) ॥१३॥
ननु च (स्याद्विरोधोक्तौ)
कच्चित् (कामप्रवेदने)।
निःषमन्दुःषमं (गर्ह्ये)
यथास्वं (तु) यथायथम् ॥१४ ॥
मृषा मिथ्या (च वितथे)
यथार्थं (तु) यथायथम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(स्युर्) एवं तु पुनर्वै वे (त्यवधारणवाचकाः) ॥ १५ ॥

प्राग् (अतीतार्थकं)

नूनमवश्यं (निश्चये द्वयम्)।

सम्वद् (वर्षे)

(ऽवरे त्व) ऽर्वाग्

आमेवं

स्वयम् (आत्मना) ॥१६॥

(अल्पे) नीचैः

(महत्युच्)चैः

प्रायो (भूम्नि)

(अद्रुते) शनैः ।

सना (नित्ये)

वहिर् (वाह्ये)

स्मा (ऽतीते)

ऽस्तम् (अदर्शने) ॥१७॥

अस्ति (सत्वे)

(रुषोक्ताव्) ऊम्

उं (प्रश्ने)

(ऽनुनयेत्व) ऽयि ।

हूं (तर्के स्यात्)

उषा (रात्रेरवसाने)

नमो (नतौ) ॥१८॥

(पुनरर्थे) ऽङ्ग

(निन्दायां) दुष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुष्ठु (प्रशंसने)

सायं (साये)

प्रगे प्रातः (प्रभाते)

निकषा (ऽन्तिके) ॥ १९ ॥

परुत्परार्य्यैषमो (ऽब्दे पूर्वे पूर्वतरे यति) ।

अद्य (ऽत्राह्नि)

(ऽथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात्) ॥२०॥

तथा ऽधरा ऽन्या ऽन्यतरेतरात्) पूर्वेद्युर् (आदयः) ।

उभयद्यु (श्चो)भयेद्युः

(परे त्वह्नि) परेद्यवि ॥ २१ ॥

ह्यो (गते)

(ऽनागते ऽह्नि) श्वः

परश्वस् (तत्परे ऽहनि) ।

तदा तदानीं

युगपदेकदा

सर्वदा सदा ॥ २२ ॥

एतर्हि सम्प्रतीदानीमधुना साम्प्रतं (तथा) ।

(दिग्देशकाले पूर्वादौ) प्रागुदक्प्रत्यग् (आदयः) ॥२३॥

अथ लिङ्गादिसङ्ग्रह वर्गः ।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।

अनुक्तैः संग्रहो लिङ्गं सङ्कीर्णवदिहोन्नयेत् ॥ १ ॥

लिङ्गं शेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।

स्त्रियामीदूद्विरामैकाच्

सयोनिप्राणिनाम च ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम्।
अदन्तैर्द्विगुरेकार्थो न च पात्रयुगादिभिः ॥ ३ ॥
तल्वृन्दे येनिकट्यत्रा वैरमैथुनकादिवुन्।
स्त्रीभावादावनिक्तिन्ण्वुन्ण्वच् क्यपौयुजिञङ्यशाः ॥४॥
उणादिषुनिरूरीश्च
ङ्माबुङन्तं चरं स्थिरम्।
तत्क्रीडायां प्रहरणं चेत्सौष्टा पाल्लवा णदिक् ॥ ५ ॥
घञोऽञः साक्रियाख्यां चेद्दाण्डपाता हि फाल्गुनी।
श्यैनम्पाता हि मृगया तैलम्पाता स्वधति दिक् ॥६॥
स्त्रीस्यात्काचिन्मृणाल्यादिर्विवक्षा ऽपचये यदि।
लङ्का शेफालिका टीका धातकी पञ्जिकाढकी ॥ ७ ॥
सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका।
तिन्दकी कणिका भङ्गिः सुरङ्गा सूचि माढयः ॥ ८ ॥
पिच्छाबितण्डाकाकिण्यश्चूर्णिः शाणी द्रुणी दरत्।
सानि कन्या (तथा) सन्दी नाभी राजसभा (ऽपि च)९
झल्लरी चर्चरी पारी होरा लट्वा (च) सिध्मला।
लाक्षा लिक्षा (च)गण्डूषा गृध्रसी चमसी मसी ॥१०॥
पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः।
स्वर्गयागाद्रिमेघाब्धिद्रुकालास्त्रिशरारयः ॥ ११ ॥
करगण्डौष्ठदोर्दण्ड कण्ठकेशनखस्तनाः।
अह्नाहान्ताः
क्लेड्भेदा
रात्रान्ताः प्रागसंख्यकाः ॥ १२॥
कोष्ठाद्याश्च निर्यासा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असन्नन्ता अबाधिताः ।

कशेरु जतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥

क ष ण भ मरोपान्ता यद्यदन्ता अमी अथ ।

प थ न य य स टोपान्ता

गोत्राख्याः

चरणाह्वयाः ॥ १४ ॥

नाम्न्यकर्त्तरि भावे च घञ ज प न ङ ण घाथ्च: ।

ल्युः कर्त्तरीमनिज्भावे को घोः किः प्रादितो ऽन्यतः १५

द्वन्द्वे ऽश्ववडवावश्ववडवा न समाहृते ।

कान्तः सूर्य्येन्दुपर्य्याय पूर्वो ऽयः पूर्वको ऽपि च ॥१६॥

वटकः (श्चा) ऽनुवाक (श्च) रल्लक (श्च) कुटङ्गकः ।

पुङ्खोन्यूङ्खः समुद्ग (श्च) विटपट्टघटाः खटः ॥ १७ ॥

कोट्टारघट्टहट्टा (श्च) पिण्डगोण्डचिपिण्ड (वत्) ।

गडुः करण्डोलगुडोवरण्ड (श्च) किणोघुणः ॥ १८ ॥

दृति सीमन्त हरितोरोमन्योद्गीथबुद्बुदाः ।

कासमर्दो ऽर्बुदः कुन्दस्फेनस्तूपौ (स) यूपकौ ॥ १९ ॥

आतपः (चनिये) नाभि कणप क्षुरकेदराः ।

पूरक्षुरप्रचुक्रा (श्च) गोल हिङ्गुलपुद्गलाः ॥ २० ॥

वेताल मल्लभल्ला (श्च) पुरोडाशो (ऽपि) पट्टिशः ।

कुल्माषोरभस (श्चैव स) कटाहः पतद्ग्रहः ॥ २१ ॥

द्विहीने ऽन्यच्च खारण्यपर्ण श्वभ्रहिमोदकम् ।

शीतोष्णमांसरुधिरमुखाक्षिद्रविणम्बलम् ॥ २२ ॥

फलहेमशुल्वलोह सुखदुःखशुभाशुभम् ।

जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोट्याः शतादिसंख्यान्यावालच्चानियुतं च तत् ।
द्व्यच्कमसिसुसन्नन्तं
यदनान्तमकर्त्तरि ॥ २४ ॥
त्रान्तं सलोपधं शिष्टं
रात्रम्प्राक् संख्ययान्वितम् ।
पात्राद्यन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥
द्वन्द्वैकत्वाव्ययीभावौ
पथः संख्याव्ययात्परः ।
षष्ठ्याश्छायाबहूनाञ्चेद्विच्छायं
संहतौ सभा ॥ २६ ॥
शालार्थापि पराराजा ऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥
उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञं कोपक्रमादि
कन्थोशीनरनामसु ॥ २८ ॥
भावेनण कचिद्भ्यो ऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः ।
पुण्यसुदिनाभ्यां त्वहःपरः ॥ २९ ॥
क्रियाव्ययानां भेदकान्येकत्वे ऽप्य्
उक्थतोटके ।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्मयोजने ॥ ३० ॥
राजसूयं वाजपेयं गद्यपद्ये (कृतौ कवेः) ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥
लोकायतं हरितालं विदलं स्थालवाह्लिकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(पुंनपुंसकयोः) शेषो ऽर्द्धर्चपिण्याककण्टकाः ॥ ३२ ॥
मोदकस्तण्डकष्टङ्कःशाटकः कर्वटो ऽर्बुदः ।
पातको दयोगचरकतमाला ऽमलका नडः ॥ ३३ ॥
कुष्ठं मुण्डं शीधुबुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ।
सङ्गमं शतमाना ऽर्म शम्बला ऽव्ययताण्डवम् ॥ ३४ ॥
कविय कन्दकार्पासं पारा ऽवारं युगन्धरम् ।
यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसो ॥ ३५ ॥
अर्द्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोके ऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥
स्त्रीपुंसयोरपत्यान्ता

द्विचतुःषट्पदोरगाः ।

जातिभेदाः

पुमाख्याश्च स्त्रीयोगः सह

मल्लकः ॥ ३७ ॥

मुनिर्वराटकः स्वातिर्वर्णको जाटलिर्मनुः ।
मूषा सृपाटी कर्कन्धुर्यष्टिः शाटी कटी कुटिः ॥ ३८ ॥
स्त्रीनपुंसयोर्भावक्रिययोः ष्यञ्क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्रं वुञ् प्रागुदाहृतः ॥३९॥
षष्ठ्यन्त प्राक्पदा सेना छायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥ ४० ॥
आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वञ्च त्रिखट्वी च त्रितक्षञ्च त्रितक्ष्यपि ॥ ४१ ॥
(त्रिषु) पात्री पुटी वाटी पेटी कुवलदाडिमौ ।
परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषे ऽपि तत् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थान्ताः प्राद्यलं प्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थो द्विगुः
संख्या सर्वनाम तदन्तकाः ॥ ४३ ॥
वहुव्रीहिरदिङ्म्ना सुन्नेया तदुदाहृतिः ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥
क्तः कर्त्त्र्यथसंज्ञायां कृत्या कर्त्तरि कर्म्मणि ।
अनाद्यन्तास्ते नरक्तादयर्थे नानार्थभेदकाः ॥ ४५ ॥
सत्संज्ञकास्त्रिषु समायुष्मदस्मत्तिङव्ययम् ।
परंविरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यस्तृतीयः काण्डः साङ्ग एव समर्थितः ।

॥ समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाषापरिच्छेदः

सिद्धान्तमुक्तावलीसहितः

श्रीमत्पण्डितराजविश्वनाथपञ्चाननविरचितः ।

गवर्णमेण्टसंस्कृतविद्यालयाध्यापक-
श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण
संस्कृतः ।

कलिकाताराजधान्याम्
काव्यप्रकाशयन्त्रे
मुद्रितः ।

शकाब्दाः १७९३ । इं १८७२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमो गणेशाय ।

भाषापरिच्छेदः ।

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य वीजाय ॥ १ ॥

चूड़ामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः ॥

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्म्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिता भावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनेत्यादि । ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शनादिति चेन्न अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वे ऽदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव हि फलं कल्प्यते। इत्थञ्च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्य्यं वा बोध्यं प्रचुरस्यास्यैव बलवत्तरविघ्ननिराकरणकारणत्वं विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्, न च स्वतःसिद्धविघ्नविरहवता कृतमङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः, विघ्नाशङ्कया तदाचरणात्, तथैव शिष्टाचरणात्। न च तस्य निष्फलत्वे तद्बोधकशिष्टाचारानुमितवेदाप्रामाण्यापत्तिरिति वाच्यं सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलन्तु विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादि। क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्य्यजनकत्वात्। इत्थञ्च नास्तिकादिकृतग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः। संसारेति संसार एव महीरुहो वृक्षस्तस्य बीजाय एतेन ईश्वरे प्रमाणमपि दर्शितं भवति तथाहि यथा घटादिकार्य्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः। न च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः ॥ २ ॥

शरीराजन्यत्वेन कर्त्तजन्यत्वसाधकेन सत्प्रतिपच इति वाच्यम् अप्रयोजकत्वात् मम तु कर्टत्वेन कार्य्यत्वेन कार्य्यकारणभाव एव अनुकूलतर्कः "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता" इत्यादय आगमा अप्यनुनन्धेयाः ॥ १ ॥

पदार्थानामुद्देशमाह । द्रव्यं गुणा इत्यादि । सप्तमस्याभावत्वकथनादेव षसां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः एते च पदार्था वैशेषिकप्रसिद्धा नैयायिकानामप्यविरुद्धाः प्रतिपादितञ्चैवमेव भाष्ये अत एव उपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्ययोरतिरिक्तपदार्थत्वमाशङ्कितम् । ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् यथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसरणेन च जन्यत इति कल्प्यते, एवं सादृश्यमप्यतिरिक्तः पदार्थः तद्धि न षट्पदार्थेष्वन्तर्भवति सामान्येऽपि सत्त्वात् यथा गोत्वं नित्यं तथा अश्वत्वमपीति सादृश्यप्रतीतेः नाप्यभावः सत्त्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वकल्पनेन सामञ्जस्ये अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् । न चोत्तेजके सति मणि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनौ मनः।
द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥
स्पर्शः संख्यापरिमितिः पृथक्त्वञ्च ततः परम्।
संयोगश्च विभागश्च परत्वञ्चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् उत्तेजकाभाव-विशिष्टमण्यभावसामान्याभावस्य हेतुत्वात्। सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयो धर्म्मवत्त्वं यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ॥ २ ॥

द्रव्याणि विभजते। क्षित्यबिति एतानि नव द्रव्याणि इत्यर्थः। ननु द्रव्यत्वजातौ किम्मानं? न हि तत्र प्रत्यक्षं प्रमाणं घृततेजःप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न कार्य्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया च तत्सिद्धेरिति ननु दशमं द्रव्यन्तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्म्मवत्त्वाच्च द्रव्यत्वं तच्च गन्धशून्यत्वात् न पृथिवी नीलरूपवत्त्वाच्च न जलादिकं तत्-प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणम् इति चेन्न आवश्यक-तेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूप-वत्ताप्रतीतिस्तु भ्रमरूपा, कर्म्मवत्त्वप्रतीतिरपि आलोकापसारणौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥ ६॥
भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते॥ ७॥
सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥ ८॥

पाधिकी भ्रान्तिरेव, तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवञ्च स्यात्। स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते॥

गुणान् विभजते। अथ गुणा इति। एते गुणाश्चतुर्विंशतिसंख्यकाः कणादेन कण्ठतः, चशब्देन च दर्शिताः। तत्र गुणत्वादिकजातिसिद्धिरग्रे वक्ष्यते॥ ३॥४॥५॥

कर्म्माणि विभजते। उत्क्षेपणमिति कर्म्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि। नन्वत्र भ्रमणादिकमपि पञ्चकर्म्माधिकतया कुतो नोक्तमत आह भ्रमणमित्यादि॥ ६॥७॥

सामान्यं निरूपयति। सामान्यमिति तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वम् अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तम् अनेकेति नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथाचोक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परभिन्ना च या जातिः सैवाऽपरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते
व्यापकत्वात् परापि स्याद्व्याप्यत्वादपरापि च॥९॥
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः ॥ १० ॥

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥

एकव्यक्तिकत्वादाकाशत्वं न जातिः, तुल्यव्यक्तिकत्वात् घटत्वं कलसत्वं न जातिद्वयं, सङ्कीर्णत्वात् भूतत्वं मूर्त्तत्वं न जातिः, अनवस्थाभयात् सामान्यत्वं न जातिः, विशेषस्य व्यावृत्तस्वभावस्य रूपहानिः स्यात् अतो विशेषत्वं न जातिः, समवायसम्बन्धाभावात् समवायो न जातिः ॥ ८ ॥

द्रव्यादीति । परत्वम् अधिकदेशवृत्तित्वम्, अपरत्वम् अल्पदेशवृत्तित्वम्। सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम्, एतद्बोधनायैव द्रव्यादित्रिकवृत्तिरित्युक्तं तदपेक्षया चान्यासां जातीनामपरत्वम् । परभिन्ना सत्ताभिन्ना व्यापकत्वादिति पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात् द्रव्यत्वादेः परत्वं, सत्तापेक्षया व्याप्यत्वात् अल्पदेशवृत्तित्वाच्च द्रव्यत्वस्यापरत्वं, तथाच धर्म्मद्वयसमावेशादुभयमविरुद्धम् ॥ ९॥ ॥

विशेषं निरूपयति । अन्त्य इति अन्ते अवसाने वर्त्तत इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः एकमात्रवृत्तिरिति फलितार्थः घटादीनां द्व्यणुकपर्य्यन्तानां तत्तदवयवभेदात् पर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ॥ ११ ॥

स्परं भेदः परमाणूनां परस्परभेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥ १० ॥

समवायं दर्शयति। घटादीनामिति अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः, समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणन्तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमाने संयोगादिवाधात् समवायसिद्धिः। न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तरं वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् इत्यञ्च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥ १२॥ ॥

अभावं विभजते। अभावस्त्विति अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्। संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अन्योन्याभावस्यैकविधत्वात् तद्विभागाभावात् संसर्गाभावं विभजते। प्रागभाव इति। संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम्, अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं, विनाश्यभावत्वं प्रागभावत्वं, जन्याभावत्वं ध्वंसत्वं, नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम्। यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतञ्च तत्र घटकालस्य सम्बन्धाघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्र उत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचीनमतं श्यामघटे रक्तो नास्तीति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसञ्चावगाहते न तु तदत्यन्ताभावम्। नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्त्तत इति प्राहुः। नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनन्ताधिकरणात्मकत्वकल्पनामपेक्ष्यातिरिक्तकल्पनाया एव लघीयस्त्वात् एवञ्च आधाराधेयभावोऽप्युपपद्यते। एवञ्च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते अन्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १३ ॥
द्रव्यादयः पञ्च भावा अनेके समवायिनः।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥ १४॥

तत्तदधिकरणानां तत्तदिन्द्रियाणामग्राह्यत्वादप्रत्यक्षत्वं स्यात्। एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तम् अप्रत्यक्षत्वापत्तेः ॥ १२ ॥

इदानीं पदार्थानां साधर्म्यं वैधर्म्यञ्च वक्तुं प्रक्रमते सप्तानामित्यादि। समानो धर्म्मो येषां ते सधर्म्माणः तेषां भावः साधर्म्यं समानो धर्म्म इति फलितार्थः। एवं विरुद्धो धर्म्मो येषां ते विधर्म्माणः तेषां भावः वैधर्म्यं विरुद्धो धर्म्म इति फलितार्थः। ज्ञेयत्वं ज्ञानविषयता सा च सर्व्वत्रैवास्ति ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात् एवम् अभिधेयत्वप्रमेयत्वादिकं बोध्यम् ॥ १३ ॥

द्रव्येति द्रव्यगुणकर्म्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वञ्च। यद्यप्यनेकत्वम् अभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यं तथाच अनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितार्थः तेन घटादौ प्रत्येकं नाव्याप्तिः। समवायित्वं समवायसम्बन्धेन सम्बन्धित्वं न तु समवायवत्त्वं सामान्यादावभावात् तथाच समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितार्थः तेन नित्यद्रव्येषु नाव्याप्तिः। सत्तावन्त इति द्रव्यगुणकर्म्मणां सत्तावत्त्वमित्यर्थः। गुणादिरिति यद्यपि गुण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यपरिहीनास्तु सर्व्वे जात्यादयो मताः ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥ १५ ॥

क्रियाशून्यत्वमाद्यत्वे घटादावतिव्याप्तं क्रियाशून्यत्वञ्च गगनादावतिव्याप्तं तथापि गुणवद्वृत्तिधर्म्मवत्त्वं कर्म्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः नहि घटत्वादिकं द्रव्यत्वं वा गुणवद्वृत्ति कर्म्मवद्वृत्ति वा किन्तु गुणत्वादिकम् । तथा आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः ॥ यद्वा गुणवद्वृत्तित्वे सति कर्म्मवद्वृत्तित्वे सति वा सत्ताव्याप्यजातिशून्यभावत्वं विवक्षितं गुणकर्म्मणोरव्याप्तिवारणाय गुणवद्वृत्ति कर्म्मवद्वृत्तीति वा। पुनस्तत्रैवाव्याप्तिवारणाय सत्ताव्याप्येति। व्याप्तिश्च भेदगर्भा निवेशिता इत्यतो न दोषः द्रव्यगुणान्यतरत्वमादाय तत्रैवाव्याप्तिवारणाय जातीति अभावेऽतिव्याप्तिवारणाय भावत्वमिति गुणवद्वृत्ति सत्ताव्याप्यजातिर्द्रव्यत्वं, तच्छून्यत्वं पञ्चानामस्त्येव ॥१४॥

सामान्येति। सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमाण्डल्येति पारिमाण्डल्यम् अणुपरिमाणं, कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं न तु कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न सम्भवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववत् अणुजन्यस्याणुतरत्वप्रसङ्गात् एवं परममहत्परिमाणम् अतीन्द्रियसामान्यं विशेषश्चेति बोध्यम्। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानसामान्यं न प्रत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यथासिद्धिशून्यस्य नियता पूर्ब्बवर्त्तिता ।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्त्तितम् ॥ १६ ॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥
यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकं तत् ।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥

सक्तिः ज्ञायमानं लिङ्गं नानुमितिकारणम् इत्यभिप्रायेण । मानस-प्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् महत्परिमाणं कालादेर्बोध्यं तस्यापि न कारणत्वमित्याचार्य्याणामाशय इत्यन्ये.तन्न ज्ञानातिरिक्तं प्रति कारणताया एव आचार्य्यैरुक्तत्वात् ॥ १५ ॥

ननु कारणत्वं किम् ? अत आह अन्यथेति तस्य, कारणत्वस्य तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगानां पटेऽसमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात्, तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्-कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम्, आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येन सह पूर्व्वभावः कारणमादाय वा यस्य ।
अन्यं प्रति पूर्व्वभावे ज्ञाते यत्पूर्व्वभावविज्ञानम् ॥१९॥
जनकं प्रति पूर्व्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्व्वभाविनः ॥२०॥

सामान्यलक्षणे देयमेव अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, तथाच क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितार्थः । इत्थञ्च कार्य्यैकार्थ्य-कारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायि-कारणमिति सामान्यलक्षणं पर्य्यवसन्नम् आभ्यां समवायि-कारणासमवायिकारणाभ्यां भिन्नं कारणं तृतीयं निमित्तकारण-मित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥

इदानीमन्यथासिद्धत्वमेव कियतां ? पदार्थानां तदाह येन इत्यादिना । यत् कार्य्यं प्रति कारणस्य पूर्व्ववर्त्तिता येन रूपेण गृह्यते तत् कार्य्यं प्रति तद्रूपमन्यथासिद्धमिति भावः, यथा घटं प्रति दण्डत्वमिति । द्वितीयमन्यथासिद्धमाह कारणमिति यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किन्तु स्वकारणमादायैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥

अन्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दण्डरूपम्। तृतीयमाह अन्यं प्रतीति अन्यं प्रति पूर्ब्ववर्त्तित्वं गृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत् कार्य्यं प्रत्यन्यथासिद्धत्वं यथा घटादिकं प्रत्याकाशस्य, आकाशस्य हि घटादिकं प्रति आकाशत्वेन कारणत्वं स्यात् आकाशत्वं च शब्दसमवायिकारणत्वम्, अतः शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्। शब्दाश्रयत्वेन कारणत्वे काऽन्यथासिद्धि? रिति चेत् पञ्चमीति गृहाण। अथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदक? मिति चेत् कवत्वादिकं विशेषपदार्थो वेति। चतुर्थमन्यथासिद्धमाह जनकं प्रतीति यत्-कार्य्यजनकं प्रति पूर्ब्ववर्त्तित्वं गृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत् कार्य्यं प्रत्यन्यथासिद्धत्वं यथा कुलालपितुर्घटं प्रति, तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः, कुलालत्वेन जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात्। पञ्चममन्यथासिद्धमाह अतिरिक्तमिति नियतावश्यकपूर्वभाविनः अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः। अत एव प्रत्यक्षे महत्त्व कारणमनेकद्रव्यवत्त्वमन्यथासिद्धं तत्र हि महत्त्वमवश्यं क्लृप्तं

(२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ २२ ॥
समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥
अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

तेनानेकद्रव्यवत्त्वमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकम्? इति वाच्यं महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ २१॥

रासभादिरिति यद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ब्बवर्त्तित्वमस्ति तत्रापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः । एतेष्विति एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात् तथा हि दण्डादिभिरवश्यक्लृप्तनियतपूर्ब्बवर्त्तिभिरेव कार्य्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकम् ? इति वाच्यं दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात् एवमन्येषामप्यनेन चरितार्थत्वसम्भवात् ॥ २२ ॥

गुणकर्म्मेति असमवायिकारणत्वं गुणकर्म्मभिन्नानां वैधर्म्यं न तु गुणकर्म्मणोः साधर्म्यम् इत्यत्रापि तात्पर्य्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः तेन ज्ञानादीनामपि असमवायिकारणत्वविरहेऽपि न क्षतिः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता ॥ २४ ॥
क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥
कालखात्मदिशां सर्व्वगतत्वं परमं महत् ।

अन्यत्रेति नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्म्यमित्यर्थः आश्रितत्वन्तु समवायादिसम्बन्धेन वृत्तिमत्त्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः कालिकसम्बन्धान्यसम्बन्धेन तेषामवृत्तित्वमिति परमार्थः तेन समवायेनावृत्तावपि न क्षतिः ॥ इदानीं द्रव्यस्यैव विशिष्य साधर्म्म्यं वक्तुमारभते । क्षित्यादीनामिति ॥ २४ ॥

क्षितिर्जलमिति पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वञ्च साधर्म्म्यम् । न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । मूर्त्तत्वम् अपकृष्टपरिमाणवत्त्वं, तच्च तेषामेव । गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्, पूर्व्ववत् कर्म्मवत्त्वं, कर्म्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वञ्च बोध्यम् ॥ २५ ॥

कालेति । कालाकाशात्मदिशां सर्व्वगतत्वं सर्व्वमूर्त्तसंयोगित्वं परममहत्त्वञ्च । परममहत्त्वं जातिविशेषः अपकर्षाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥
द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥ २७ ॥

अयपरिमाणत्वं वा । क्षित्यादीति पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् तच्च वहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् तद्वति आत्मनि नातिप्रसङ्गः, न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्यापि स्वरूपयोग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । अथ वा आत्मवृत्तिविशेषगुणवत्त्वं तत्त्वम । चत्वारीति पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥ २६ ॥

द्रव्यारम्भ इति पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं न च द्रव्यानारम्भके घटादावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आकाशशरीरिणामिति आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वम् आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्, क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुविशेषगुणादीनां स्वोत्तरवर्त्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि, ज्ञानादिकं हि आत्मनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः॥ २८॥

विभौ शरीराद्यवच्छेदेनोत्पद्यते घटाद्यवच्छेदेन तदभावोऽस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्यञ्चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वञ्चार्थः पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीति अतोऽव्याप्यवृत्तीत्युक्तम् पृथिव्यादावव्याप्यवृत्तिसंयोगादिरस्तीति अतो विशेषगुणेत्युक्तम्। न च रूपादीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं चतुर्थक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य विवक्षितत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयन्तु किमपि ज्ञानादिकं न तिष्ठति, रूपत्वादिकन्तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्त्तत इति व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात् जन्येत्युक्तम्। यद्याकाशजीवात्मनोः साधर्म्यम्, तदा जन्येति न देयं द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाच्च। चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमात्, द्वित्वादीनामपि तथात्वात् तद्वारणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यं, द्वेषत्वादिकमादायात्मनि लक्षणसमन्वयात्॥ २७॥

रूपेति पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वञ्चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मान? मिति वाच्यं तत्रापि तेजस्त्वेन रूपानुमानात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥ २९॥

एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृततैलप्रभृतिषु, पृथिवीषु, जलेषु, द्रुतसुवर्णादौ-तेजसि च द्रवत्वसत्त्वात् तत्र च पृथिवीत्वादिमत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः। न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम् अतिव्याप्तञ्च रूपादाविति वाच्यं चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति। गुरुणी इति गुरुत्ववत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानाञ्च रसादिमत्त्वे किं मान?मिति वाच्यं तत्रापि पृथिवीत्वादिना तदनुमानात्। द्वयोरिति पृथिवीतेजसोरित्यर्थः। न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ २८॥

आत्मान इति पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति ज्ञेयत्वादिकं विहाय इति बोध्यं तत् तु न कस्यापि वैधर्म्यं? केवलान्वयित्वात्॥ २९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः ।
अष्टौ स्पर्शादयो रूपं द्रवो वेगश्च तेजसि ॥ ३० ॥
स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥
स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादि षट्कं संख्यादि पञ्चकं भावना तथा ॥ ३२॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥ ३३ ॥
संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।

ते च संख्यादयः पञ्च खे आकाशे ॥३०॥३१॥३२॥३३॥३४॥

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति तत्र क्षितिरित्यादिना। गन्धहेतुरिति गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्। तथाहि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । न च पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यं तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते?। भस्मनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः॥ ३५॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः।

हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति, यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टञ्चैतत् खण्डपटे महापटध्वंसजन्ये। इत्थञ्च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यस्य पाषाणस्यापि पृथिवीत्वं तथा च तस्यापि गन्धवत्त्वे बाधकाभावः। नानारूपेति शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते न तु जलादौ तत्र शुक्लस्यैव सत्त्वात् पृथिव्यान्तु एकस्मिन्नपि धर्म्मिणि पाकवशेन नानारूपसम्भवात् न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिः, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात्। वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य, रूपान्तरस्य च सत्त्वात् न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः। षड्विध इति मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव जले च मधुर एव रसः अत्रापि पूर्व्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः। गन्धस्त्विति द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगन्धवत्त्वं लक्षणं द्विविधस्य व्यर्थत्वात्। द्वैविध्यञ्च सौरभासौरभभेदेन बोध्यम्॥ ३५॥

स्पर्श इति तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायोरपि वर्त्तत इत्युक्तम् पाकज इति। इत्थञ्च पृथिव्याः स्पर्शा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥३६॥ ॥
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी।

ऽनुष्णाशीतताज्ञापनार्थं तदुक्तम्। वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम् अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः। नित्येति सा पृथिवी द्विविधा नित्या अनित्या च इत्यर्थः। अनुलक्षणा परमाणुलक्षणा पृथिवी नित्या ॥ ३६ ॥

तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वोऽप्यनित्य इत्यर्थः। सैव अनित्या पृथिव्येव अवयववतीत्यर्थः। ननु अवयविनि किं मानं परमाणुपुञ्जैरेवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षं न स्यादिति वाच्यम् एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वम्। न च एकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः, मैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्य अपि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात् न च तदानीम् अदृश्यपरमाणुपुञ्जात् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वात् न प्रत्यक्षत्वे विरोध इति वाच्यम् अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरूष्मादिसन्ततौ कदाचिद् दृश्यत्वप्रसङ्गात्। न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेः दृश्यदहनोत्पत्तिरिति वाच्यं तत्र तदन्तःपातिभिः दृश्यदहना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा च त्रिधा भवेद्देहमिन्द्रियं विषयास्तथा ॥ ३७ ॥

वयवः स्थूलदहनोत्पत्तेरुपगमात् । न च अदृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति ? वाच्यम् । यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे परन्तु महत्त्वोद्भूतरूपादिकारण-समुदायवशात् दृश्यत्वं तथा च त्रसरेणोर्म्महत्त्वात् प्रत्यक्षं न तु द्व्यणुकादेस्तदभावात् न हि तन्मतेऽपीदं सम्भवति परमाणौ महत्त्वाभावात् इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः । अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे त्वसमवेतभावकार्य्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्ति इति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवा महदवयवत्त्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकम् अप-कृष्टमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यम् अनवस्थाभयेन तद-सिद्धेः ॥ ३६ ॥ ॥

सा च त्रिधेति सा कार्य्यरूपा पृथिवी त्रिविधा शरीरेन्द्रिय-विषयभेदादित्यर्थः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम्।

तत्र देहमुदाहरति योनिजादीति योनिजमयोनिजञ्चेत्यर्थः। योनिजमपि जरायुजमण्डजञ्च, जरायुजं मानुषादीनाम्, अण्डजं सर्पादीनाम्, अयोनिजं स्वेदजोद्भिदादिकम्। स्वेदजाः कृमिदंशाद्याः उद्भिदस्तरुगुल्माद्याः। नारकिणां शरीरमपि अयोनिजम्। न च मानुषादि शरीराणां पार्थिवत्वे किं मान? मिति वाच्यं गन्धादिमत्त्वस्यैव प्रमाणत्वात् न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यं तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यं क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। एतेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्। शरीरत्वन्तु न जातिः पृथिवीत्वादिना साङ्कर्य्यात् किन्तु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टावत्त्वान्नाव्याप्तिः। न च वृक्षादीनां शरीरत्वे किं मान? मिति वाच्यम् आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मान? मिति चेत् भग्नक्षतसंरोहणादिना तदनुमानात्। यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम् एतादृशे प्रमाणाभावात्। अथ वा चेष्टावदन्त्यावयविमात्रवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तत्, मानुषत्वचैत्रत्वजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥ ३८ ॥
वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।

कथं लक्षणसमन्वयः? तत्र सिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इन्द्रियमिति घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथ ? मिति चेत् इत्थं घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैवव्यञ्जकत्वात् कुङ्कुमगन्धादिव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवशरावगन्धव्यञ्जकजलेनानैकान्तमिति वाच्यं तस्य शक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सति इति विशेषणात् । विषय इति उपभोगसाधनं विषयः सर्व्वमेव हि कार्य्यजातम् अदृष्टाधीनं यत् कार्य्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्पराया वा जनयत्येव। न हि वीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डं सर्व्वमेव विषयो भवति शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३८ ॥

जलं निरूपयति वर्णः शुक्ल इति स्नेहसमवायिकारणताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छेदकतया जलत्वं जातिः सिध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्य्यतावच्छेदकं, तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणोर्जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदकतया जन्यजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपवत्त्वमेव दर्शयितुमुक्तं वर्णः शुक्ल इति वस्तुस्थितिमात्रं न तु शुक्लरूपवत्त्वं लक्षणम् अथ वा नैमित्तिकद्रवत्ववद्वृत्ति-रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। रसस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः। तिक्तावृत्तिमधुरवृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् ननु शुक्लरूपवत्त्वमेवेति कुतः कालिन्दीजलादौ नीलोपलब्धेरिति चेन्न नीलजनकतावकच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपासम्भवात् कालिन्दीजले नीलप्रतीतिः स्वाश्रयोपाधिकी अत एव वियति विक्षेपे धवलिमोपलब्धेः अथ जले माधुर्य्यें किं? मानं, न हि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते न च नारिकेलजलादौ माधुर्य्यमुपलभ्यत एवेति वाच्यं तस्याश्रयोपाधिकत्वात् अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् न च हरीतक्यामेव जलोष्णसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यं कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकं, जम्बीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥
नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥ ४० ॥

रसादौ तु आश्रयौपाधिकी तथा प्रतीतिः एवं जन्यशीतस्पर्श-जनकतावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यं घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्त्तिशीततरसलिलस्य, तेजःसंयोगात्तु जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासम्भवात् ॥३८॥

स्नेहस्तत्रेति घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम् । द्रव्यत्वमिति सांसिद्धिकद्रवत्वं जातिविशेषः प्रत्यक्षसिद्धस्तदव-च्छिन्नजनकत्वावच्छेदकमपि तदेवेति भावः । तैलादावपि जलस्य द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूलनमिति वक्ष्यति ॥ ३९ ॥

प्रथमवदिति पृथिव्या इवेत्यर्थः तथाहि जलत्वं द्विविधं नित्यमनित्यञ्च परमाणुरूपं नित्यं द्व्यणुकादिकं सर्व्वमनित्यम् अवयवसमवेतञ्च, अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् किन्तु पृथिवीतोयतो यो विशेषस्तमाह किन्त्विति अयोनिज-मिति अयोनिजमेवेत्यर्थः । रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् शक्तुरसाभिव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभि-चारवारणाय द्रव्यत्वं देयम् । विषयं दर्शयति सिन्धुहिमादि-रिति सिन्धुः समुद्रः हिमं तुषारः आदिपदात् सरित्कासार-करकादिः सर्वो ग्राह्यः । न च हिमकरकयोः कठिनत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शउष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।
नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्व्ववत् ॥ ४१ ॥

पार्थिवत्वमिति वाच्यम् ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यम् इति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः । अदृष्टविशेषेण वा द्रवत्वनिरोधात् करकादीनां काठिन्यप्रत्ययस्य भ्रान्तत्वात् ॥ ४० ॥

तेजोनिरूपयति । स्पर्श उष्ण इत्यादिना । उष्णत्व स्पर्शनिष्ठोजातिविशेषः प्रत्यक्षसिद्धम् इत्यञ्च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यं तत्रापि उष्णत्वस्य सत्त्वात् किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः । रूपमित्यादि वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लत्वाग्रहः । ननु तद्रूपाग्रहे धर्म्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरूपेणापि धर्म्मिणोग्रहसम्भवात् शङ्खस्येव पित्तपीतिम्ना । वह्नेस्तु शुक्लं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये नमित्तिकमिति सुवर्णादिरूपे तेजसि तत्सत्त्वात् । न च नैमित्तिकद्रवत्ववत्त्वं न लक्षणं दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यं पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात् पूर्व्ववदिति जलस्येवेत्यर्थः तथाहि तत् द्विविधं नित्यमनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्रियं नयनं वह्निस्वर्णादिर्विषयोमतः ॥ ४१॥ ॥

त्यञ्च नित्यं परमाणुरूपं तदन्यदनित्यम् अवयवि तच्च त्रिधा शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेवेत्यर्थः तच्च सूर्य्यलोकादौ प्रसिद्धम् ॥ ४१ ॥

अत्र योविशेषस्तमाह इन्द्रियमिति चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादाद्यं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्रभायादृष्टान्तत्वसम्भवादाद्यं परकीयं न देयं चक्षुःसन्निकर्ष व्यभिचारवारणाय द्रव्यत्वं देयम् । विषयं दर्शयति वह्नीति ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यवच्छिन्नजन्यद्रवत्वात् यन्नैवं तन्नैवं तथा पृथिवी न चाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसीपङ्कोदकवत् तस्याद्रवत्वात्। अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि रूपापरावृत्तिदर्शनात् तत्प्रतिबन्धकं विजातीयं द्रवत्वं कल्प्यते तथाहि अग्निसंयोगे पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः अत्यन्तमग्निसंयोगेऽपि पूर्व्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् जलमध्यस्थपीतपटवत् तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ॥ ४१॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः ॥ ४२ ॥
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।
पूर्व्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥
प्राणादिस्तु महावायुपर्य्यन्तोविषयो मतः ॥ ४३॥ ॥

वायुं निरूपयति । अपाकज इति अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तम् अपाकज इति अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तम् अनुष्णाशीत इति तेन वायवीयो विजातीयः स्पर्शोदर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः । एषवायुः स्पर्शादिलिङ्गकः । वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते विजातीयस्पर्शेन, विलक्षणशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पेन च वायोरनुमानात् यथा च वायोर्न प्रत्यक्षं तथाग्रे वच्यते। पूर्व्ववदिति वायुर्द्विविधः नित्योऽनित्यश्च परमाणुरूपोनित्यस्तदन्योऽनित्यः समवेतश्च सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् तत्र शरीरमयोनिजं पिशाचादीनां, परन्तु जलीय तैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगसाधनत्वं जलादीनां प्राधान्याज्जलीयत्वमिति अत्र योविशेषस्तमाह देहव्यापीति शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवत् । विषयं दर्शयति प्राणादिरिति यद्यपि अनित्यो वायुश्चतुर्विधः तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे तथापि संक्षेपादत्र त्रैविध्यमुक्तं प्राणस्त्वेक एव हृदादिनानास्थानवशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशस्य तु विज्ञेयः शब्दोवैशेषिकोगुणः ॥ ४४ ॥
इन्द्रियन्तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः।

न्मुखनिर्गमादिनानाक्रियावशाच्च नाना संज्ञा लभत इति॥ ४२॥ ४३ ॥ ४३॥ ॥

आकाशं निरूपयति। आकाशस्येति आकाशकालदिशामकैकव्यक्तित्वात् आकाशत्वादिकं न जातिः किन्तु आकाशत्वं शब्दाश्रयत्वम्। वैशेषिक इति कथनन्तु विशेषगुणान्तरव्यवच्छेदाय एतेन प्रमाणमपि दर्शितं तथाहि शब्दो विशेषगुणः चक्षुर्ग्रहणायोग्यवहिरिन्द्रियग्राह्यजातिमत्त्वात्, स्पर्शवत् शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवत् इत्यनुमाने शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्व्वकप्रत्यक्षत्वात्, सुखवत् पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्व्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दोन दिक्कालमनोगुणः विशेषगुणत्वात्, नात्मविशेषगुणः वहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्यत्र शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति। न च वायवयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्व्वकः शब्द उत्पाद्यतामिति वाच्यम् अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् तत्र शरीरस्य विषयस्य चाभावात् ॥ ४४ ॥

इन्द्रियं दर्शयति इन्द्रियमिति। नन्वाकाशं लाघवादेकं सि[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्यानां जनकः कालोजगतामाश्रयोमतः॥ ४५ ॥
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः॥ ४५॥ ॥

श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यादतआह एकः सन्नपीत्यादि। आकाशएक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः॥ ४४ ॥॥

कालं निरूपयति जन्यानामिति तत्र प्रमाणं दर्शयितुमाह जगतामिति तथाहि इदानीं घटइत्यादिप्रतीतिः सूर्य्यपरिस्पन्दादिकं यदि विषयीकरोति तदा सूर्य्यपरिस्पन्दादिना घटादेः सम्बन्धोवाच्यः स च संयोगादिर्न सम्भवतीति कालएव तत्सम्बन्धघटकः कल्प्यते इत्यत्र तस्याश्रयत्वमपि सम्यक्। प्रमाणान्तरं दर्शयति परापरत्वेति परत्वापरत्वबुद्धेरसाधारणं निमित्तं कालएव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयोलाघवादतिरिक्तः कल्प्यतइति भावः। नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदोन स्यादतआह क्षणादिरिति कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म्म, पूर्व्वसंयोगावच्छिन्नविभागोवा पूर्व्वसंयोगावच्छिन्नउत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म्म वा। नचोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं कर्म्मान्तरसत्त्वादिति महाप्रलये क्षणादिव्यवहारोयद्यपि, तदानायत्या ध्वंसेनोपपादनीयः दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति॥ ४५ ॥ ४५॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥
उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्। ४६॥
आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७॥

दिशं निरूपयति दूरान्तिकेति दूरत्वम् अन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यं तद्बुद्धेरसाधारणं वीजं दिगेव दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक् सिध्यतीति भावः। नन्वेकैव दिक् यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामित्यत आह उपाधीति यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची उदयगिरिव्यवहिता च प्रतीची एवं तत्पुरुषीयसुमेरुसन्निहिता दिगुदीची तद्व्यवहिता त्ववाची "सर्व्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित" इति नियमात् ॥ ४६॥४६ ॥

आत्मानं निरूपयति आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति ईश्वरेऽपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात् परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादिति वदन्ति। इन्द्रियादीति इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः। यद्यप्यात्मनि "अहं जाने अहं सुखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः?॥ ४८॥

स्वप्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणं दर्शयति करणमिति कुठारादीनां छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्त्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्त्ता कल्प्यते॥ ४७॥

ननु शरीरस्यैव कर्त्तृत्वमस्तु अत आह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्व्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उपपद्यत इति वाच्यम् अनन्तसंस्कारकल्पने गौरवात् एवं शरीरस्य चैतन्ये बालकस्य स्तनपानादौ प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनतास्मारकाभावात् मन्मते जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मान्तरानुभूतमन्यदपि स्मर्य्यतामिति वाच्यम् उद्बोधकाभावात् अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते इत्यञ्च संस्कारस्थानादितया आत्मनोऽपि अनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं सिध्यतीति बोध्यं ननु चक्षुरादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ॥४८॥ ॥

ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह तथात्वमिति चैतन्यमित्यर्थः उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव, कथमिति ? पूर्व्वं चक्षुषा साक्षात्कृतानाञ्चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितुरभावात् अन्यदृष्टस्य अन्येन स्मरणासम्भवात्. अनुभवस्मरणयोः सामानाधिकरण्येन कार्य्यकारणभावादिति भावः ॥ ४८ ॥

ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यात् अत आह मनोऽपीति न तथा न चेतनं ज्ञानादीति मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः यथा मनसोऽणुत्वं तथा वक्ष्यते।

नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वं ज्ञानसुखादिकन्तु तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्व्वपूर्व्वविज्ञानस्योत्तरविज्ञाने हेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव मृगमदवासनायावसनइव पूर्व्वपूर्व्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न तस्य जगद्विषयत्वे सार्व्वज्ञ्यापत्तेः यत् किञ्चिद्विषयत्वे विनिगमनाभावात् सुषुप्तावपि विषयावभासप्रसङ्गः। तदानीं निराकारा चित्सन्ततिरनुवर्त्तत इति, चेन्न तस्य स्वप्रकाशत्वे प्रमाणाभावत् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टापत्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन, नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतोविज्ञानस्याविशेषात्, अपोहरूपो नीलत्वादिर्विज्ञानधर्म्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् इतरथा विरोधस्यैव दुरुपपन्नत्वात् न च वासनासंक्रमः सम्भवति मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात् न च उपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात् उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् उत्तरविज्ञानस्यैव उत्पादकत्वे तदानन्त्यप्रसङ्गः, क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च, एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं गौरवादतिशये मानाभावाच्च वीजादावपि सहकारिसमवधानादेवोपपत्तेः कुर्व्वद्रूपत्वाकल्पनाच्च। अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा "अविनाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतेरिति चेन्न तस्य विषयत्वासम्भवस्य दर्शितत्वात् निर्व्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्याप्यननुभवात् अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धं सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदोऽन्यथा बन्धमोक्षानुपपत्तेः योऽपीश्वराभेदबोधकोवेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावने च यतितव्यमिति वदति। अतएव सर्व्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव आत्मनि समर्पिता इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, भेदस्य नित्यत्वे नाशायोगात् भेदनाशेऽपि व्यक्तिद्वयं स्यास्यत्येव न च द्वित्वमपि नश्यतीति वाच्यं तत्र निर्द्धर्म्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदिति वत् द्वित्वाभावेऽपि द्वयात्मकौ ताविति सुवचत्वात् मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यतां प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इति वदुभयं नैकमित्यस्य सर्व्वजनसिद्धत्वात् योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखादिना साम्यं प्रतिपादयति संपदाधिक्ये, पुरोहितोऽयं राजा संवृत्त, इतिवत् अतएव "निरञ्जनः परमं साम्यमुपैतीति" श्रूयते। ईश्वरो न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्व्वज्ञः" इत्यनुरोधात् आनन्दम् इत्यस्यापि आनन्दवदित्यर्थः अर्श आदित्वान्मत्वर्थीयाच्प्रत्ययात्, अन्यथा पुंलिङ्गत्वापत्तेः आनन्दोऽपि दुःखाभावे उपचर्य्यते भाराद्यपगमे सुखी संवृत्तोऽहमितिवत् दुखाभावेन सुखित्वप्रत्ययात् अस्तु वा तस्मिन्नानन्दो नत्वसौ आन्दमित्यत्र मत्वर्थीयप्रत्ययविरोधात्। "आनन्दं ब्रह्मणो विद्वान् बिभेति कदाचन" इत्यत्र भेदस्य स्पष्टत्वाच्चेति संक्षेपः एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥

कल्पनम्। बुद्धिश्च प्रकृतेः प्रथमः परिणामः। सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च। भेदाग्रहात् ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारावेशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा अपि बुद्धेरेव। कृतिसामानाधिकरण्येन प्रतीतेः।

न च बुद्धिश्चेतनापरिणामित्वादिति सांख्य मतमपास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यांशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्ब्बमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्। तत् किं प्रकृत्यादिकल्पनेन। न च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।
अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः॥ ५०॥

"प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते॥"

इत्यनेन विरोध इति वाच्यं। प्रकृतेरदृष्टस्य। गुणैरदृष्टजन्यैर्गुणैः इच्छादिभिः। कर्त्ताहं कर्त्ताहमेव। इत्यस्य तदर्थत्वात् "तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः।

धर्म्माधर्म्माश्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्म्मणां देहान्तरेण भोगानुपपत्तेः। विशेषगुणयोगत इति। योग्यविशेषगुणसम्बन्धेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्यादि प्रतीतेः॥ ४९॥

प्रवृत्तीति अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते। प्रवृत्तिरत्र चेष्टा। ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात्। चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः। तत्र दृष्टान्तमाह। रथेति यद्यपि रथकर्म्मचेष्टा न भवति तथापि तेन कर्म्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्म्मणा परात्मापीति भावः।

अहङ्करास्येति अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति। मन इति मनोभिन्नेन्द्रियजन्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥ ५१॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।

प्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्॥ ५०॥

विभुरिति। विभुत्वं परममहत्त्वं तच्च पूर्व्वोक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति बुद्धिसुखदुःखेच्छादिचतुर्दश गुणाः पूर्व्वोक्ता वेदितव्याः। अत्रैव प्रसङ्गाद् बुद्धेः कतिपयप्रपञ्चं दर्शयति। बुद्धिस्त्विति द्वैविध्यं व्युत्पादयति। अनुभूतिरिति अनुभूतिश्चतुर्विधेति। एतासाञ्चतसृणां करणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि॥ ५१॥

प्रत्यक्षमिति इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्व्वमेव ज्ञानं तथापि इन्द्रियत्वेन रूपेण इन्द्रियाणां यत्र ज्ञाने कारणत्वं तत्प्रत्यक्षमिति विवक्षितम्। ईश्वरप्रत्यक्षन्तु न लक्ष्यम् इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यं जन्यज्ञानाव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात्। अथ वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। इदं लक्षणम् ईश्वरप्रत्यक्षसाधारणम् इत्यनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य च हेतुत्वान्न तत्र तत्रातिव्याप्तिः। परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥५३॥

हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः । न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यं तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः । एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः । पदज्ञानकरणकं ज्ञानं शाब्दबोधः । वस्तुतो यत्किञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यत्किञ्चित् प्रत्यक्षव्यक्तिमादाय तद्वृत्तिजातिमत्त्वम् अनुमितित्वम् । एवं यत्किञ्चित् प्रत्यक्षादिमादाय तद्व्यक्तिवृत्तित्वे सति यत्किञ्चिदनुमितिव्यक्तिमादाय तदवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति। घ्राणजादीति घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौतं मानसमिति षड्विधं प्रत्यक्षम् । नचेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम् । जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् ॥ ५२ ॥

घ्राणस्येति । गोचर इति ग्राह्य इत्यर्थः । गन्धत्वादिरिति आदिपदात् सुरभित्वासुरभित्वपरिग्रहः । गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा । गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम् । तथा रस इति रसत्वादिसहित इत्यर्थः । गन्धो रसश्च उद्भूतो बोध्यः । तथा शब्दत्वादिसहितः ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ५४
क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्।
गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः॥ ५५॥
उद्भूतस्पर्शवद्‌द्रव्यं गोचरः सोऽपि च त्वचः।

उद्भूतरूपमिति ग्रीष्मोष्मादावनुद्भूतरूपमिति न चाक्षुषं प्रत्यक्षम्। तद्वन्ति उद्भूतरूपवन्ति॥ ५४॥

योग्येति पृथक्त्वादिकमपि योग्यवृत्तितया ग्राह्यम्। तादृशं योग्यवृत्तिमित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह गृह्णातीति आलोकसंयोग उद्भूतरूपञ्च चाक्षुषप्रत्यक्षं प्रति कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन कारणत्वम्। द्रव्यसमवेतप्रत्यक्षं प्रति स्वाश्रयसमवायसम्बन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति॥ ५५॥

उद्भूतस्पर्शवद्‌द्रव्यं गोचरस्त्वचो गोचरः। सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः। रूपान्यदिति रूपभिन्नं रूपत्वादिभिन्नञ्च चक्षुषो यत् योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम्। तथाच पृथक्त्वादिसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एवं क्रिया एवं जातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इति। अत्रापि त्वगिन्द्रियजन्येऽपि रूपं द्रव्यप्रत्यक्षे कारणं तथाच वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति। नवीनास्तु वहिर्द्रव्यप्रत्यक्षे रूपं न कारणं प्रमाणाभावात् किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥ ५६ ॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।

स्पर्शः कारणम् अन्वयव्यतिरेकात्। वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किङ्कारणमिति चेत् न किञ्चिदात्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गादिष्टापत्तिरिति चेत् स्पर्श एव लाघवात् कारणमस्तु प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरित्येव किं न स्यात्। तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वात् वायोरपि प्रत्यक्षं भवत्येव। वहिर्द्रव्यप्रत्यक्षमात्रे तु न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकत्वं गृह्यत एव क्वचित् द्वित्वादिकमपि क्वचित् संख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥५६॥

त्वचो योगो मनसा ज्ञानकारणमिति त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा। नाद्यः अनुभवसामग्र्यभावात्तथाहि। चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव न मानसप्रत्यक्षं ज्ञानाद्यभावे च नात्मनोऽपि न प्रत्यक्षमिति। व्याप्तिज्ञानाभावात् नानुमितिः सादृश्यज्ञानाभावात् नोपमितिः पदज्ञानाभावात् न शाब्दबोधः इत्यनुभवसामग्र्यभावात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥५७॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।

नानुभवः। उद्बोधकाभावाच्च न स्मरणम्। नैवं सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षप्रसङ्गात्, तदतीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव जायत इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले स्पार्शनप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिवन्धादेकमपि वा न स्यादिति। अत्र केचित् पूर्ब्बोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिवन्धकत्वमनुभवानुरोधात् कल्प्यते इति। अन्ये तु सुषुप्त्यनुरोधात् चर्म्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति। मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिरिति मनोजन्यप्रत्यक्षविषय इत्यर्थः। मतिर्ज्ञानम्। कृतिः प्रयत्नः। एवं सुखत्वादिकमपि मनोग्राह्यम्। एवमात्मापि मनोग्राह्यः। किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्ब्बमुक्तत्वात् अत्र नोक्तः। ॥ ५७ ॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यत इति। चक्षुःसंयोगाद्यनन्तरं घट इत्याकारं घटत्वादिविशिष्टं ज्ञानं न सम्भवति पूर्ब्बं विशेषणस्य घटत्वादिर्ज्ञानाभावात्। विशिष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८ ॥

बुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घट-घटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकात्मकं तच्च न प्रत्यक्षं तथा हि विषयानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्यक्षात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वं यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञानकारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं न सम्भवति। घटत्वाद्यप्रकारकं घटादिविशिष्टज्ञानं न सम्भवति जात्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्म्मप्रकारकत्वनियमात्। महत्त्वम्। षड्विधे हेतुरिति द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणं द्रव्यसमवेतानां जातिगुणकर्म्मणां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणत्वकर्म्मत्वरूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। इन्द्रियमिति अत्रापि षड्विध इति अनुषज्यते। इन्द्रियत्वन्तु न जातिः। पृथिवीत्वादिना साङ्कर्य्यप्रसङ्गात्। किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वात् शब्देतरेति विशेषगुणस्य रूपादेश्चक्षुषि सत्त्वात् उद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥ ५९
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
विशेषणतया तद्वदभावानां ग्रहो भवेत् ॥ ६१ ॥

सङ्करात् । न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादिना चाक्षुषादौ जनकतानुपपत्तेः । किन्तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वम् । तच्च संयोगादावपि । तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादेरस्त्यतो विशेषेति कालादिवारणाय विशेष्यदलम् । इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वात् इन्द्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाद्याश्रयस्य कालादेश्च वारणाय मनःपदं ज्ञानकरणमित्यपि तद्वारणाय । करणमिति असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् ॥ ५८ ॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विध इति व्यापारः सन्निकर्षः षड्विधं सन्निकर्षमुदाहरणद्वारा दर्शयति द्रव्यग्रह इति द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षम् इन्द्रियसंयुक्तसमवायजन्यम् । एवमग्रेऽपि । वस्तुतस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः द्रव्यसमवेतसमवेतचाक्षुषं प्रति संयुक्तसमवेतसमवायः। एवमन्यत्रापि विशिष्यैव कार्य्यकारणभावः परन्तु परमाणुनीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वञ्च चक्षुषा कथं न गृह्यते तत्र परम्परया उद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च विद्यमानत्वात्। तथा हि नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्त्तते। तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्त्तते रूपसम्बन्धस्तूभयमादायैव वर्त्तते एवं पृथिवीत्वे घटादिकमादाय महत्त्वसम्बन्धो बोध्यः। एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम्। इत्यञ्च परमाणुनीलादौ न नीलत्वादिग्रहः। परमाणुचक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्त्वादिचाक्षुषं तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात्। एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्तु वाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुसंयोगे विशेषणं देयम् एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः। द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः कारणम्। अत्रापि महत्त्वावच्छिन्नत्वम् उद्भूतस्पर्शावच्छिन्नत्वञ्च पूर्व्ववदेव बोध्यम्। एवं गन्धप्रत्यक्षे घ्राण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।

संयुक्तसमवायः । गन्धसमवेतस्य घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम् । एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः । रससमवेतस्य रासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम् । शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः । शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकं प्रत्यक्षम् इन्द्रियसंयोगादिकं विनापि भवति एवमात्मनः प्रत्यक्षे मनःसंयोगः । आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः । आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम् । अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसम्बद्धविशेषणता हेतुः । वैशेषिकमते तु न समवायः प्रत्यक्षः अत्र यद्यपि विशेषणता नानाविधा तथा हि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया । शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया । कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया । एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया । एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यं तथापि विशेषणतात्वरूपेणैकैवसा गण्यते अन्यथा षोढ़ासन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति ॥ ५९ ॥ ६० ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६२ ॥
अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।

यदि स्यादुपलभ्येत इति अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथाहि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणं तत्रापि योग्यताप्यपेक्षिता। सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा। तदर्थस्तु प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य स उपलम्भाभावोऽभावप्रत्यक्षे हेतुः। तथा हि यत्रालोकसंयोगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात् तर्हि उपलभ्येत इत्यापादयितुं शक्यते। तत्र घटाभावादिप्रत्यक्षं भवति अन्धकारे तु नापादयितुं शक्यत इति। तेन घटाभावादेरन्धकारे चाक्षुषप्रत्यक्षं न स्यार्शनप्रत्यक्षन्तु भवत्येव। आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः। तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात्। वायौ रूपाभावः। पाषाणे सौरभाभावः। गुडे तिक्ताभावः। श्रोत्रे शब्दाभावः। आत्मनि सुखाभावः। एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता। अतस्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव॥ ६२ ॥

प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा। ततः सिषाधयिषा। तत्र पक्षतासम्पत्तये सिषाधयिषाविरहविशिष्टत्वविशेषणस्यावश्यकत्वादिति। अत्रेदं बोध्यं यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृश-सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किञ्चिज् ज्ञानं जायतामितीच्छायामपि नानुमितिः। वह्निव्याप्यधूमवान् पर्व्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षादिभिन्नं वह्निज्ञानं जायतामितीच्छायान्तु भवत्येव। एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनोमीतीच्छायामपि नानुमितिः। सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्य तत्तदनुमितिप्रतिबन्धिका वक्तव्या। तेन पर्व्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्वेऽप्यनुमितेर्न विरोधः परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्। पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि। इदन्तु बोध्यम्। अयं पुरुषो न वेति संशयानन्तरं यत्र पुरुषत्वव्याप्यकरादिमानयम् इति ज्ञानं तत्रासत्यामनुमित्सायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धिका। एवं परामर्शानन्तरं विनापि प्रत्यक्षेच्छां पक्षादिप्रत्यक्षानुत्पत्तेः। प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययोपदिष्टश्च हेत्वाभासास्तु पञ्चधा॥ ७१॥

प्रसङ्गसङ्गत्या हेत्वाभासान् विभजते। अनैकान्त इत्यादि। तल्लक्षणन्तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः। यद्विषयकत्वञ्च यादृशविशिष्टविषयकत्वं बोध्यम्। तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि तत्र पर्व्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषाः। न च वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्व्वत इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् तत्र वह्न्यभावव्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम्। इष्टापत्तेः। अन्यथा बाधभ्रमस्यापि नित्यदोषत्वापत्तेः। तस्मात् तत्र वह्न्यभावव्याप्यपाषाणमयत्ववान् इति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं भ्रमादनुमितिप्रतिबन्धमात्रम्। हेतुस्तु न दुष्ट इति। इत्यञ्च साध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वत्ता च हेतौ येन केनापि सम्बन्धेनेति नव्याः। परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्। सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा। तद्वत्त्वं हेतोर्ज्ञानरूपसम्बन्धेन। न चैवं वह्निमान् धूमादित्यादौ बाधभ्रमे पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम्। तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात्। अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्। तत्र बाधितव्यवहाराभावादित्याहुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यः साधारणस्तु स्यात् स्यादसाधारणो मतः ।
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ॥ ७२ ॥

अनुमितिविरोधित्वञ्च अनुमितितत्कारणान्यतरविरोधित्वम् तेन एकहेतौ व्यभिचारग्रहे हेत्वन्तरेणानुमित्युत्पत्तेस्तद्भावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति संक्षेपः । यादृशपक्षसाध्यहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम् । पञ्चकथनन्तु तत् सम्भवस्थलाभिप्रायेण । एवं साधारणाद्यन्यतमत्वम् अनैकान्तिकत्वम् ॥ ७१ ॥

आद्यः साधारण इत्यादि । साधारणः साध्यवदन्यवृत्तिहेतुः । तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते । असाधारणः साध्यासमानाधिकरणो हेतुः । तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते । यथा शब्दो नित्यः शब्दत्वादित्यादौ स चासाधारण्यम् । शब्दोऽनित्यः शब्दत्वादित्यादौ असाधारण्यभ्रमः । अन्ये तु सपक्षावृत्तिरसाधारणः । सपक्षञ्च निश्चितसाध्यवान् । इत्यञ्च शब्दोऽनित्यः शब्दत्वादित्यादौ पक्षे यदा साध्यनिश्चयस्तदा नासाधारण्यं तत्र हेतुनिश्चयादिति वदन्ति । अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यकादिः । तेन च व्यतिरेकव्याप्तिग्रहप्रतिबन्धः क्रियते । विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी । अयञ्च साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः । सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः । अत्र तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुरेवेति विशेषः । साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः । सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः । अगृहीता प्रामाण्यकसाध्यव्याप्यवत्त्वेनोपस्थितिकालीनसाध्याभावव्याप्यवत्त्वेनोपस्थितिविषयस्तथा इत्यन्ये। अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम् । अत्र केचित् यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते । यथा च सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने पित्तादिदोषे पीतः शङ्ख इति धीर्जायते एवं कोटिद्वयव्याप्यवत्तादर्शने कोटिद्वयप्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः। फलबलेन चाधिकसमबलभावः कल्प्यत इति वदन्ति । तन्न। तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभावविशेषशाब्दबोधादेरनुदयात् । लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता । लाघवात् । न तूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता । गौरवात् । तथा च प्रतिबन्धकसत्त्वात् कथमनुमितिः । न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात् संशयो नान्यथाऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धत्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः। यत्र च काञ्चनमयः पर्व्वतो वह्निमानिति साध्यते तत्र पर्व्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्व्वते परामर्शप्रतिबन्धः फलम्।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्॥

साध्यासिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्यतावच्छेदकाभावः। तथा च काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्।

एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः। यथा च काञ्चनमयधूमादित्यादौ हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात् तत्तद्धेतुकव्याप्तिज्ञानादेरभावः फलम्। एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वं हेतुतानवच्छेदकमिति व्याप्यत्वासिद्धिरित्यपि वदन्ति।

बाधस्तु पक्षे साध्याभावादिः। एतस्यानुमितिप्रतिबन्धः फलम्। तद्धर्म्मिकतदभावनिश्चयो लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्म्मिकतज्ज्ञानमात्रे विरोधीति न तु तत्र संशयसाधारणं पक्षेसाध्यसंसृष्टत्वज्ञानमनुमितिकारणम् तद्विरोधितया बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्। पृथिव्यामितरभेद एतादृशानुमित्यनापत्तेः। पूर्व्वं पक्षे साध्यसंसृष्टत्वज्ञानाभावात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः ।

अप्रसिद्धसाध्यकानुमित्यपलापापत्तेः साध्यसंशयं विनानुमित्युत्पत्तेश्च । एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकम् । प्रमाणाभावाद् गौरवाच्च । अन्यथा सत्प्रतिपक्षादपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः । किन्तु भ्रमत्वज्ञानानास्कन्दितायबाधादिबुद्धेः प्रतिबन्धकता । तत्र भ्रमत्वशङ्काविघटने प्रामाण्यज्ञानं क्वचिदुपयुज्यते । न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम् । बाधज्ञानव्यभिचारज्ञानादेर्भेदात् । किञ्च यदा परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिञ्चित्करत्वाद् बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम् । एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्वज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् । न च घटे गन्धवत्त्वात् कथं बाध इति वाच्यम् । पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति । सत्प्रतिपक्षतद्व्याप्यभिन्नो यो यो हेत्वाभासव्याप्यः स तन्मध्य एवान्तर्भवति । अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् बाधव्याप्यसत्प्रतिपक्षभिन्न एव । स्वतन्त्रेच्छेन मुनिना पृथगुपादानात् । सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रकटितोऽर्थः ॥ ७२ ॥

यः सपक्षे विपक्षे च भवेत् स साधारणस्तु स इति । सपक्षविपक्षवृत्तिः साधारण इत्यर्थः । सपक्षः साध्यवान् । विपक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥७३॥
तथैवानुपसंहारी केवलान्वयिपक्षकः।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥७४॥

साध्याभाववान् विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम्। वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्। विरुद्धस्य साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्।

यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मत इति। सपक्षविपक्षव्यावृत्त इत्यर्थः। सपक्षः साध्यवत्तया निश्चितः। विपक्षः साध्यशून्यतया निश्चितः। शब्दो नित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वसन्देहस्तदा सपक्षत्वं विपक्षत्वञ्च घटत्वादीनामेव तद्व्यावृत्तञ्च शब्दत्वमिति तदा तदसाधारणम्। यदा तु शब्दे नित्यत्वनिश्चयः तदा नासाधारणः। इदञ्च प्राचां मतेन। नवीनमतं पूर्ब्बमुक्तम् ॥ ७३ ॥

केवलान्वयिपक्षक इति। केवलान्वयिधर्म्मावच्छिन्नपक्षक इत्यर्थः। सर्व्वमभिधेयं प्रमेयत्वादित्यादौ सर्व्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः। इदन्तु न सम्यक्। पक्षैकदेशे घटसहचारग्रहेऽपि क्षतेरभावात्। अस्तु वा सहचाराग्रहस्तावतापि अज्ञानरूपासिद्धिरेव न तु हेत्वाभासत्वं तस्य तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम्। यः साध्यवतीति। एवकारेण साध्यवत्तावच्छेदेन हेत्वभावो बोधितः। तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।
विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षिता ॥ ७७ ॥
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

असिद्धिं विभजते । आश्रयासिद्धिरित्यादि ॥ ७५ ॥

पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः । नीलधूमादिक इति । नीलधूमत्वं गुरुतया न हेतुतावच्छेदकम् । समानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसंग्रहाय समानाधिकरणेति ॥ ७६ ॥

विरुद्धयोरिति । कपिसंयोगतदभाववद्व्याप्यवत्त्वपरामर्शेऽपि न सत्प्रतिपक्षितत्वमत उक्तम् । विरुद्धयोरिति । तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७७ ॥

साध्यशून्य इति । पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यम् ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥७९॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।

उपमितिं व्युत्पादयति। ग्रामीणस्येति। यत्रारण्यकेन केनचिद् ग्रामीणं प्रत्युक्तं गोसदृशो गवयपदवाच्य इति पश्चाच्च ग्रामीणेन क्वचिदरण्ये गवयो दृष्टस्तत्र गोसादृश्यज्ञानं यत तत् उपमितिकरणम् ॥ ७९ ॥

तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारः। तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं जायते तदुपमितिः। न त्वयं गवयपदवाच्य इत्युपमितिः। गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥८०॥

शाब्दबोधप्रकारं दर्शयति। पदज्ञानन्त्विति। न तु ज्ञायमानं पदं करणम्। पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात्। पदार्थ धीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्बन्धेन आकाशस्मरणं जायते। आकाशस्यापि शाब्दबोधापत्तेः। वृत्तिः शक्तिलक्षणान्यतरः सम्बन्धः। अत्रैव शक्तिज्ञानस्योपयोगः। पूर्व्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेनस्मरणानुपपत्तेः। पदज्ञानस्य सम्बन्धिज्ञानविधयाऽर्थस्मारकत्वम्। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। साचास्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा। आधुनिके नाम्नि शक्तिरस्त्येव। एकादशेऽहनि पिता नाम कुर्य्यात् इतीश्वरेच्छायाः सत्त्वात्। आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव। तेन आधुनिकसङ्केतेऽपि शक्तिरस्तीति वदन्ति। शक्तिग्रहस्य व्याकरणादितः। तथा हि।

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित् तु सति बाधके त्यज्यतेऽपि। यथा वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्तुश्चैत्रस्याभेदान्वयः। तत्र गौरवान्न जन्यते किन्तु कृतौ शक्तिग्रहो लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते। न च कर्त्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम्। कर्त्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् संख्याभिधानयोग्यस्य कर्म्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः कर्म्मत्वादीत्यस्य विशेषणत्वतात्पर्य्याविषयत्वमर्थः। तेन चैत्र इव गच्छतीत्यादौ न चैत्रे संख्यान्वयः। यत्र कर्म्मादौ न विशेषणत्वतात्पर्य्यं तद्वारणाय प्रथमान्तेति। यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः। तेन चैत्र इव गच्छतीत्यत्र चैत्रादेर्वारणम्। स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम्। तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणम्। एवं व्यापारेऽपि न शक्तिर्गौरवात्। रथो गच्छतीत्यादौ स्वव्यापारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्रयत्वे वा लक्षणा। जानातीत्यादौ तु आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा। उपमानाद्यथा शक्तिग्रहस्तथोक्तम्।

एवं कोषादपि शक्तिग्रहः। सति बाधके क्वचित् त्यज्यते। यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोषेण व्युत्पादिता तथापि लाघवान्नीलादौ शक्तिः। नीलादिविशिष्टे लक्षणेति।

एवमाप्तवाक्यादपि। यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकादिशक्तिग्रहः।

एवं व्यवहारादपि। यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्। तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतः। तदवधार्य्य पार्श्वस्थो बालो घटानयनरूपं कार्य्यं घटमानयेति शब्दप्रयोज्यमवधारयति। ततश्च घटमपसारय गामानय इत्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्य्यान्वितघटादौ शक्तिं गृह्णाति। इत्यञ्च भूतले नीलो घट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्य्यान्वितघटादिबोधे सामर्थ्यावधारणात्। कार्य्यताबोधं प्रति च लिङादीनां सामर्थ्यात् तदभावान्न शाब्दबोध इत्यपि। केचित्। तन्न। प्रथमतः कार्य्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव चैत्र पुत्रस्ते जातः कन्या ते गर्भिणी जाता इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया तंशब्दमवधारयति। तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च व्यभिचारात् कार्य्यान्विते न शक्तिः न च तत्र ते. पश्येत्यादि शब्दान्तरमध्याहार्य्यम् मानाभावात् चैत्रपुत्रस्ते जातो मृत- स्येत्यादौ तदभावाच्च। इत्थञ्च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति।

एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्य्याणां प्रयोगः कङ्गौ च म्लेच्छा- नाम्। तत्र हि यथान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति।

वसन्ते सर्व्वशस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥

इति वाक्यशेषात् दीर्घशूके शक्तिर्निर्णीयते। कङ्गौ तु शक्तिभ्रमात्प्रयोगः। नानाशक्तिकल्पने गौरवात्। हरिपदादौ तु विनिगमकाभावान्नानाशक्तिकल्पनम्। एवं विवरणादपि शक्तिग्रहः। विवरणन्तु तत्समानार्थपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलसोऽस्तीत्यनेन विवरणाद्घटपदस्य कलशे शक्तिग्रहः। एव पचतीत्यस्य पाकं करोतीत्यनेन विवरणादा- ख्यातस्य यत्नार्थकत्वं कल्प्यते।

एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः। यथा इह सह- कारतरौ मधुरं पिको रौतीत्यादौ. पिकपदस्य शक्तिग्र- इति।

तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानन्त्याच्च व्यक्तिं विना च जातिमानस्यासम्भवाद्व्यक्तेरपि भानमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गवयादिपदज्ञानान्तु शक्तिधीरुपमाफलम्॥ ८०॥
पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।

केचित्। तन्न। शक्तिं विना व्यक्तिभानानुपपत्तेः। न च व्यक्तौ लक्षणा। अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्। न च व्यक्तिशक्तावानन्त्यम्। सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्। न चाननुगमः। गोत्वादेरेवानुगमकत्वात्। किञ्च गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात्। समानप्रकारत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्। गोत्वन्तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्। तथा च गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात् तवैव गौरवम्। तस्मात् तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति।

शक्तं पदन्तु क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्। यत्रावयवार्थ एव बुध्यते तद्यौगिकम्। यथा पाचकादिपदम्।

यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्। यथा गोमण्डपघटादिपदम्।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥८१॥

लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः।

रूढम्। यथा पङ्कजादिपदम्। तथा हि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति। समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलावयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्। रूढिज्ञानस्य केवलयौगिकार्थज्ञानप्रतिबन्धकत्वादिति प्राञ्चः।

वस्तुतस्तु समुदायशक्त्योपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयी भवति। सान्निध्यात्। यत्र रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः। यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्य्यज्ञानं पद्मत्वस्य च बाधस्तत्रावयवशक्तिमात्रेण निर्व्वाह इत्यप्याहुः।

यत्र तु स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्या च पद्मत्वेन रूपेण बोधः। यदि तु स्थलपङ्कजं विजातीयमेव तदा लक्षणैव।

यत्रावयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम्। यथोद्भिदादिपदम्। तत्र हि ऊर्द्ध्वभेदनकर्त्ता तरुगुल्मादिरपि बुध्यते यागविशेषोऽपीति ॥ ८१ ॥

लक्षणा शक्यसम्बन्ध इत्यादि। गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्व्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः। सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसत्तियोग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते ॥८२॥

च शक्यसम्बन्धः। तथा हि प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणम्। ततः शाब्दबोधः। परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्। यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात्। तेन यष्टिप्रवेशे भोजनतात्पर्य्यानुपपत्त्या यष्टिधरे लक्षणा। एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा। सर्व्वतो दधिरक्षायास्तात्पर्य्यविषयत्वात्। एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन लक्षणा। इयमेवाजहत्स्वार्था लक्षणेत्युच्यते। एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्। यदि चान्वयापनुपपत्तिर्लक्षणाबीजं स्यात् तदा क्वचिद्गङ्गापदस्य तीरे क्वचिद्घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात्। इदन्तु बोध्यं शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा। तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु एवंक्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्। तत्प्रकारकशब्दार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम्।

यत्र तु शक्यार्थस्य स्वाश्रयपदवाच्यत्वरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते। यथा द्विरेफादिपदे रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते। भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र लक्षितलक्षणा। किन्तु लाक्षणिकं पदं नानुभावकम्। लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम्। शक्ति-लक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणादिति प्राञ्चः। नवीनास्तु तदप्यनु-भावकमेव। पदार्थोपस्थितिस्तु द्वारम्। अन्यथा तुल्ययुक्त्या शक्तस्यापि पदस्याननुभावकत्वापत्तेरित्याहुः। वाक्ये तु शक्तेर-भावाच्छक्यसम्बन्धरूपा लक्षणाऽपि नास्ति। यत्र गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरा-पदार्थस्य नद्या सहाभेदेनान्वयः। क्वचिदेकदेशान्वयस्य स्वी-कृतत्वात्। यदि तत्रैकदेशान्वयोऽपि न स्वीक्रियते तदा नदी-पदस्यगभीरनदीतीरे लक्षणा। गभीरापदं तात्पर्य्यग्राहकम्।

बहुव्रीहावप्येवम्। तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोस्वामिनि लक्षणा। गवि चित्रा-भेदान्वयः। यदि त्वेकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोस्वामिनि लक्षणा। चित्रापदं तात्पर्य्यग्राहकम्।

एवमारूढवानरो वृक्ष इत्यत्र वानरपदे वानरारोहण-कर्म्मणि लक्षणा। आरूढपदञ्च तात्पर्य्यग्राहकम्। एव-मन्यत्रापि।

तत्पुरुषे तु पूर्व्वपदे लक्षणा। तथा हि राजपुरुषादिपदे राजपदार्थेन पुरुषादिपदार्थस्य साक्षान्नान्वयः। निपाताति-रिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्। अन्यथा राजा पुरुष इत्यत्रापि तथान्वयबोधः स्यात्। पटो न घट इत्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटपटाभ्यां नञः साक्षादेवान्वयात् निपातातिरिक्तेति। नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाङ्गेदेनेति। न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्। अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्मात् राजपदादौ राजसम्बन्धिनि लक्षणा। तस्य च पुरुषेण सहाभेदान्वयः।

द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थ-द्वित्वप्रकारे बुध्यते तत्र न लक्षणा। न च साहित्ये लक्षणेति वाच्यम्। साहित्यशून्ययोरपि द्वन्द्वदर्शनात्। न च एकक्रिया-न्वयित्वरूपं साहित्यमस्तीति वाच्यम्। क्रियाभेदे धवखदिरौ छिन्धीत्यादिदर्शनात्। साहित्यस्याननुभवाच्च। तस्मात् साहि-त्यादिकं नार्थः। अत एव राजपुरोहितौ सायुज्यकामौ यजे-यातामित्यत्र लक्षणाभावात् द्वन्द्व आश्रीयते। किन्तु वास्तवो भेदो यत्र तत्र द्वन्द्वः। न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्। तत्र नीलपदस्य नीलत्वं घटपदस्य घटत्वमर्थः। अभेद इत्यस्याश्रयाभेद इत्यर्थात्।

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा। पूर्व्वपदं तात्पर्य्यग्राहकम्। न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयः अपेक्षाबुद्धिविशेषरूपस्य वादनासम्भवादिति वाच्यम्। स्वाश्रयवृत्तित्वरूपसम्बन्धेन तदन्वयात्। एवं पञ्च-पूलीत्यादावपि। परे तु अहिनकुलमित्यादौ अहिर्नकुलश्च बुध्यते। प्रत्येकमेकत्वान्वयः। समाहारसंज्ञा च यत्र एकत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणं सन्निधानन्तु पदस्यासत्तिरुच्यते।

नपुंसकत्वं प्राणितूर्य्येत्यादिसूत्रेणोक्तं तत्रैव। अन्यत्रैकवचनमप्राप्तिमिति वदन्ति।

कर्म्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसम्बन्धेन नीलपदार्थे उत्पलपदार्थे प्रकारः। तत्र न च लक्षणा। अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः। लक्षणापत्तेः। किन्तु कर्म्मधारयो लक्षणाभावात्। न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकारात् याजनासम्भव इति वाच्यम्। निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनात्। लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या कल्पनायाः फलमुखगौरवतयाऽदोषत्वादिति। उपकुम्भम् अर्द्धपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा पूर्व्वपदार्थप्रधानतया चान्वयबोध इति। इत्यञ्च समासे न क्वापि शक्तिः। पदशक्त्यैव निर्व्वाहादिति। पितरौ श्वशुरौ इत्यादौ पितृपदे जनकदम्पत्योः श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा। एवमन्यत्रापि। घटा इत्यादौ न लक्षणा। घटत्वेन रूपेण नानाघटस्थितिसम्भवात्।

आसत्तिर्य्योग्यतेत्यादि। आसत्तिज्ञानं योग्यताज्ञानम् आकाङ्क्षाज्ञानं तात्पर्य्यज्ञानञ्च शाब्दबोधे कारणम्॥ ८२॥

तत्रासत्तिपदार्थमाह। सन्निधानन्त्विति। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारणम्। तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ॥ ८३॥

नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः । आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः । ननु यत्र छत्री कुण्डली वाससी देवदत्त इत्युक्तं तत्रोत्तरपदस्मरणेन पूर्व्वपदस्मरणस्य नाशात् । अव्यवधानेन उत्तरपदस्मरणासम्भव इति चेन्न । प्रत्येकपदसंस्कारैश्चरमं तावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः । नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णकपदस्मरणम् । परन्तु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायात् तावत्पदार्थानां क्रियाकर्म्मभावेनान्वयबोधरूपः शाब्दबोधो भवतीति केचित् । अपरे तु ।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्यप्याहुः । एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति । इदन्तु बोध्यम् । यत्र द्वारमित्युक्तं तत्र पिधेहीति पदस्य ज्ञानादेव बोधः । न तु पिधानादिरूपार्थज्ञानात् । पदजन्यपदार्थोपस्थितेस्तच्छाब्दबोधे हेतुत्वात् । किञ्च क्रियाकर्म्मपदानां तेन तेनैव सह साकाङ्क्षत्वम् । तेन क्रियापदं विना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्पदेन विना यस्याननुभावकता भवेत् ।

कथं शाब्दबोधः स्यात् । तथा पुष्पेभ्य इत्यादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः ।

योग्यतां निर्व्वक्ति । पदार्थ इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्व्वत्र न सम्भवति वाक्यार्थस्यापूर्व्वत्वादिति चेन्न । तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् ।

नव्यास्तु योग्यताया ज्ञानं न शाब्दज्ञाने कारणम् । वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धात् न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रति प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति ॥ ८३ ॥

आकाङ्क्षां निर्व्वक्ति । यत्पदेनेत्यादि । येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा इत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा । वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थम् । परन्तु घटकर्म्मताबोधं प्रति घटपदोत्तरद्वितीयाकाङ्क्षाज्ञानं कारणम् । तेन घटकर्म्मत्वमानयनं कृतिरित्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम्॥८४

न शाब्दबोधः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यताम् इत्यादौ तु पुरुषेण सह राजपदस्य तात्पर्य्यग्रहाभावात् न तेन सहान्वयः।

तात्पर्य्यं निर्व्वक्ति वक्तुरिच्छेति। यदि तात्पर्य्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात्। तात्पर्य्यज्ञान-जनकत्वेन तेषामनुगमे तु तात्पर्य्यज्ञानमेव लाघवात् कारण-मस्तु। इत्थञ्च वेदस्थलेऽपि तात्पर्य्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राध्यापकतात्पर्य्यज्ञानं कारणमिति वाच्यम् सर्गादावध्यापका-भावात्। न च प्रलय एव नास्तीति कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात्। इत्थञ्च शुकवाक्येऽपि ईश्वरीय-तात्पर्य्यज्ञानं कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य्यस्य ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्-पर्य्यज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्क्कैरर्थाव-धारणमित्याहुः।

पूर्व्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभव-प्रकारा दर्शिताः सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्व्वा-नुभवः करणम्। अत्र केचित् अनुभवत्वेन न करणत्वं किन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षात्कारे सुखादीनां करणं मन उच्यते ।

ज्ञानत्वेन। अन्यथा स्मरणानन्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्व्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुस्तन्न। यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणन्तु मा भूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः। न च पुनः पुनः स्मरणात् दृढतर संस्कारानुपपत्तिः झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्। न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम् विशेषधर्म्मेणाव्यभिचारात् ज्ञाने सामान्यधर्म्मेणान्यथासिद्धत्वात्। कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्। न चान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयात् व्यभिचारसंशय इति वाच्यम्। अनन्तसंस्कारतन्नाशकल्पनापत्त्या चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् ॥ ८४ ॥

इदानीं क्रमप्राप्तं मनो निरूपयति साक्षात्कार इति। एतेन मनसि प्रमाणं दर्शितम्। तथा हि सुखसाक्षात्कारः सकरणको जन्यसाक्षात्कारत्वात् चाक्षुषवत् इत्यनुमानेन करणस्य मनसः सिद्धिः। न चैवं दुःखादिसाक्षात्काराणामपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥८५॥
अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।

करणान्तराणि स्युरिति वाच्यम्। लाघवादेकस्यैव तादृशसकलसाक्षात्कारकरणतया सिद्धेः। एवं दुःखादीनामसमवायिकारणसंयोगाश्रयतया मनःसिद्धिर्बोद्धव्या।

मनसोऽणुत्वे प्रमाणमाह अयौगपद्यादिति। ज्ञानानां चाक्षुषरासनादीनां यौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम्। तत्र नानेन्द्रियाणां सत्यपि विषयसन्निकर्षे यत्सम्बन्धादेकेन्द्रियेण ज्ञानमुत्पद्यते तदसम्बन्धादपि त्वगादिभिः परैर्ज्ञानं नोत्पद्यते। तन्मनोविभुत्वे च असन्निधानं न सम्भवतीति न विभु मनः। न च तदानीमदृष्टविशेषोद्बोधविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम्। तथा सति चक्षुरादीनामपि कल्पनाऽनापत्तेः। न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजाञ्च कथमेकदा नानेन्द्रियज्ञानमिति वाच्यम् मनसोऽतिलाघवात् त्वरया नानेन्द्रियसम्बन्धात् नानाज्ञानोत्पत्तेः। उत्पलशतपत्रभेदादिवत् यौगपद्यप्रत्ययस्य तु भ्रान्तत्वात्। न च मनसः सङ्कोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यम् नानावयवतन्नाशादिकल्पने गौरवात् लाघवात् निरवयवस्यैव मनसः कल्पनादिति सङ्क्षेपः।

इति सिद्धान्तमुक्तावल्यां द्रव्यपदार्थव्याख्या समाप्ता ॥ ८५ ॥

द्रव्यं निरूप्य गुणं निरूपयति अथेत्यादिना। गुणत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम्॥ ८६॥
द्रवो गुरुत्वं स्नेहश्च वेगो मूर्त्तगुणा अमी।
धर्म्माधर्म्मौ भावना च शब्दो बुद्ध्यादयोऽपि च॥८७॥

जातौ किं मानमिति चेत्। इदम्। द्रव्यकर्म्मभिन्नसामान्यवत्तिया कारणता सा किञ्चिद्धर्म्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात्। न हि रूपत्वादिकं सत्ता वा तत्रावच्छेदिका न्यूनातिरिक्तदेशवृत्तित्वात्। अतस्तत्तुविंशत्यनुगतं वाच्यं तदेव गुणत्वमिति सिद्धम्। द्रव्याश्रिता इति। यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्म्मादावतिव्याप्तेस्तथापि द्रव्यत्वव्यापकतावच्छेदकसत्तान्यजातिमत्त्वं तदर्थः। भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति कर्म्मत्वं द्रव्यत्वं वा न द्रव्यत्वव्यापकतावच्छेदकम् गगनादौ द्रव्यकर्म्मणोरभावात्। द्रव्यत्वसामान्यत्वादिकं न जातिरिति तद्व्युदासः। निर्गुणा इति। यद्यपि निर्गुणत्वं कर्म्मादावपि तथापि सामान्यवत्त्वे कर्म्मान्यत्वे च सति निर्गुणत्वं बोध्यम्। जात्यादीनां न सामान्यवत्त्वं कर्म्मणो न कर्म्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः। निष्क्रियेति स्वरूपकथनं न तु लक्षणम्। गगनादावतिव्याप्तेः॥ ८६॥

मूर्त्तगुणा इति। वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः अमूर्त्तेषु न वर्त्तन्त इत्यर्थः। लक्षणन्तु तावदन्यान्यत्वम्। एवमग्रेऽपि॥ ८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेऽमूर्त्तगुणाः सर्व्वे विद्वद्भिः परिकीर्त्तिताः ।
संख्यादिश्च विभागान्त उभयेषां गुणो मतः ॥८८॥
संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥८९॥
अतः शेषा गुणाः सर्व्वे मता एकैकवृत्तयः ।
बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९०॥
अदृष्टभावना शब्दा अमी वैशेषिका गुणाः ।
संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥९१॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः ।
संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥९२॥

उभयेषामिति । मूर्त्तामूर्त्तगुणा इत्यर्थः ॥ ८८ ॥

अनेकाश्रिता इति । संयोगद्वित्वादीनि द्विवृत्तीनि । त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

अतः शेषा इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः । द्रवो द्रवत्वम् ॥ ९० ॥

वैशेषिका इति । विशेषा एव वैशेषिकाः स्वार्थे ठक् विशेषगुणा इत्यर्थः । संख्यादिरिति । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः ॥ ९१ ॥ ९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
वाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥ ९३ ॥
अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः ॥ ९४ ॥
अपाकजास्तु स्पर्शान्ता द्रवत्वञ्च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।
संयोगश्च विभागश्च वेगश्चैते तु कर्म्मजाः ॥ ९६ ॥
स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।

द्वीन्द्रियेति । चक्षुषा त्वचाऽपि ग्रहणयोग्यत्वात् । वाह्येति । रूपादीनां चक्षुरादिग्राह्यत्वात् ॥ ९३ ॥

विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मभावनाशब्दा इत्यर्थः । अकारणेति । कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते । बुद्ध्यादयस्तु न तादृशाः । आत्मादेः कारणाभावात् । पाकजरूपादीनां कारणगुणपूर्व्वकत्वाभावात् अपाकजेत्युक्तम् ॥ ९४ ॥ ९५ ॥ ९६ ॥

स्पर्शान्ता इति । स्पर्शोऽत्रानुष्णो ग्राह्यः । एकपृथक्त्वेत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयात् एकत्वं पृथक्त्वञ्च ग्राह्यम् । पृथक्पदेन चैकपृथक्त्वं विवक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवेदसमवायित्वमथ वैशेषिके गुणे ॥ ९७ ॥
आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः ।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा* ॥ ९८ ॥
द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥

भवेदसमवायित्वमिति। घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम्। एवं शब्दस्यापि द्वितीयशब्दं प्रति ॥ ९७ ॥

निमित्तत्वमिति। बुद्ध्यादीनां इच्छादिनिमित्तत्वादिति भावः ॥ ९८ ॥

द्विधैव कारणत्वमिति। असमवायिकारणत्वं निमित्तकारणत्वञ्च। तथा हि उष्णस्पर्श उष्णस्पर्शस्यासमवायी पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतनयोरसमवायि प्रतिघाते निमित्तम्। वेगो वेगस्पन्दनयोरसमवायी अभिघाते निमित्तम्। द्रवत्वं द्रवत्वस्पन्दनयोरसमवायि संग्रहे निमित्तम्। भेरीदण्डयोगः शब्दे निमित्तम्। भेर्य्याकाशसंयोगोऽसमवायी वंशदलद्वयविभागः शब्दे निमित्तम्। वंशदलाकाशविभागोऽसमवायीति। प्रादेशिकोऽव्याप्यवृत्तिः ॥ ९९ ॥

*परापरत्वद्वित्वादिद्विपृथक्त्वादिके पुनः ॥ इत्यनाकरोऽयं पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा ॥ १०० ॥

चक्षुरिति । रूपत्वजातिः प्रत्यक्षसिद्धा । रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेत् । मास्तु रूपशब्दप्रयोगस्तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव । रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दोल्लेखिनी प्रतीतिरस्त्येव । एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम् । न चैकैका एव नीलरूपादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिर्न जातिरिति वाच्यम् । नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात् । अन्यथा एकनीलनाशे जगदनीलमापद्येत । न च नीलरक्तादिसमवाययोरेव विनाशोत्पादविषयकोऽसौ प्रत्यय इति वाच्यम् । प्रतीत्या समवायानुल्लेखात् । न च स एवायं नील इति प्रत्ययाल्लाघवाच्चैक्यमिति वाच्यम् । प्रत्ययस्य तज्जातीयविषयकत्वात् । सैवेयं गुर्ज्जरीतिवल्लाघवं प्रत्यक्षबाधितम् । अन्यथा घटादीनामप्यैक्यप्रसङ्गात् । उत्पादविनाशशब्दबुद्धेः समवायावलम्बनत्वापत्तेरिति । एतेन रसादिकं व्याख्यातम् । चक्षुर्ग्राह्यमिति । चक्षुर्ग्राह्यविशेषगुण इत्यर्थः । एवमग्रेऽपि । द्रव्यादेरिति । उपलम्भकं उपलब्धिकारणम् ।

इदमेव विवृणोति । चक्षुष इति । द्रव्यगुणकर्म्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् । शुक्लादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमनेकधेति। तद्रूपं शुक्लनीलपीतरक्तकर्बुरादिभेदादनेकप्रकारकं भवति। ननु कर्बुरं किमतिरिक्तरूपं भवति?। इत्थं, नीलपीताद्यारब्धोऽवयवी न तावन्नीनरूपः अप्रत्यक्षप्रसङ्गात्। नापि व्याप्यवृत्तिनीलादिकमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात्। तस्मात् नानाजातीयरूपैरवयविनि विजातीयं चित्रमारभ्यते। अत एवैकं चित्रमित्यनुभवोऽपि। नानारूपकल्पने तु गौरवात्। इत्थञ्च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनात् अवयविनि न पीताद्युत्पत्तिः। एतेन स्पर्शो व्याख्यातः। रसादिकमपि नाव्याप्यवृत्ति किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः। तत्र रसनया अवयवरस एव गृह्यते रसनेन्द्रियादीनां द्रव्यग्रहसामर्थ्याभावात् अवयविनो नीरसत्वेऽपि क्षतेरभावात्। नव्यास्तु तत्राव्याप्यवृत्त्येव नानारूपम्। नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात्। अत एव।

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥

इत्यादिशास्त्रमप्युपपद्यते। न च व्याप्याव्याप्यवृत्तिजातीययोर्द्वयोर्विरोधः मानाभावात्। न च लाघवादेकं रूपम्। अनुभवविरोधात्। अन्यथा घटादेरपि लाघवादैक्यं स्यादिति। एतेन स्पर्शादिकं व्याख्यातमिति वदन्ति॥ १००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।
रसस्तु रसनाग्राह्यो मधुरादिरनेकधा॥ १०१॥
सहकारी रसज्ञाया नित्यतादि च पूर्व्ववत्।
घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः॥ १०२॥
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः॥ १०३॥

जलादीति। जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं पृथिवीपरमाणुरूपन्तु न नित्यम् पाकेन रूपान्तरोत्पत्तेः। न हि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते। न हि रक्तकपालस्य कपालिका नीलावयवा भवति। एवंक्रमेण परमाणावपि पाकसिद्धिः।

अन्यज्जलतेजःपरमाणुरूपभिन्नं रूपं सहेतुकं जन्यम्। रसं निरूपयति। रसस्त्विति॥ १०१॥

सहकारीति। रासनज्ञाने रसः कारणमित्यर्थः। पूर्व्ववदिति। जलपरमाणौ रसो नित्योऽन्यः सर्व्वोऽपि रसोऽनित्य इत्यर्थः। गन्धं निरूपयति। घ्राणग्राह्य इति। उपकारको घ्राणजन्यज्ञाने कारणमित्यर्थः। अन्यो गन्धः सर्व्वोऽनित्य एव॥ १०२॥

स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः॥ १०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः।
काठिन्यादिः क्षिताववेव नित्यतादि च पूर्व्ववत् ॥१०४॥
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्।

अनुष्णाशीत इति। पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः। जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्व्ववदिति। जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः ॥१०४॥

एतेषामिति। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते। नीरे सौरभमौष्ण्यञ्च अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि मध्ये परमाणावेव पाक इति वैशेषिका वदन्ति। तेषामयमाशयः। अवयविनाऽवष्टब्धेष्ववयविषु पाको न सम्भवति। परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्म्महावयविपर्य्यन्तमुत्पत्तिः। तेजसामतिशयितवेगवशात् पूर्व्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र संयोगविभागयोरनपेक्षकारणं कर्म्म इति वैशेषिकसूत्रम्। स्वोत्तरवृत्तिभावान्तरानपेक्षत्वं तस्यार्थः। अन्यथा कर्म्मणोऽप्युत्तरसंयोगजनने पूर्व्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति। तत्र विभागजविभागानङ्गीकारे नव क्षणाः। तदङ्गीकारेऽपि विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्म्मत्वं स्यात्। तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दश क्षणाः। अथ द्रव्यनाशविशिष्टं कालमवयवं वापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः। तथा हि वह्निसंयोगात् परमाणौ कर्म्म। ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। ततः परमाणौ श्यामादिनाशः। ततो रक्ताद्युत्पत्तिः। ततो द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्व्वसंयोगनाशः। तत आरम्भकसंयोगः। ततो द्व्यणुकोत्पत्तिः। ततो रक्ताद्युत्पत्तिः। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियाऽस्त्विति चेत्। न। अग्निसंयुक्ते परमाणौ यत् कर्म्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्म्मवति कर्म्मानुत्पत्तेः। निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेत्। न। पूर्व्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात्। इति नव क्षणाः। अथ दश क्षणाः। सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभागेन विभागजनने सति स्यात्। तथा हि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ क्रिया। ततो विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशविभागजविभागौ। ततः श्यामनाशपूर्ब्बसंयोगनाशौ। ततो रक्तोत्पत्त्युत्तरसंयोगौ। ततो वह्निनोदनजन्यपरमाणुकर्म्मणो नाशः। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्ब्बसंयोगनाशः। तत आरम्भकसंयोगः। ततो द्व्यणुकोत्पत्तिः। ततो रक्ताद्युत्पत्तिः। अथैकादश क्षणाः। वह्निसंयोगात् परमाणौ कर्म्म। ततो विभागः। ततो द्रव्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागः। ततः पूर्ब्बसंयोगनाशः। तत उत्तरसंयोगः। ततः परमाणुकर्म्मनाशः। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्ब्बसंयोगनाशः। ततो द्रव्यारम्भकसंयोगः। ततो द्व्यणुकम्। ततो रक्तादि। मध्यमशब्दवदेकस्मादग्निसंयोगान्न रूपनाशरक्तोत्पादौ। तावत्कालमेकस्याग्नेरस्थिरत्वात्। किञ्च यद्युत्पादको नाशकस्तदा नष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात्। नाशकश्चेदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्तता न स्यात्। एवं परमाण्वन्तरे कर्म्मचिन्तनात् पञ्चमादिक्षणेऽपि गुणोत्पत्तिः। तथा हि एकत्र परमाणौ कर्म्म। ततो विभागः। तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्म्मणी। ततस्तु द्व्यणुकनाशः। परमाण्वन्तरकर्म्मजस्य विभाग इत्येकः कालः। ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रापि परमाणौ स्यात् पाको वैशेषिके नये ॥१०५॥
नैयायिकानान्तु नये द्व्यणुकादावपीष्यते ।
गणनव्यवहारे तु हेतुः संख्याऽभिधीयते ॥१०६ ॥

श्यामादिनाशः । विभागाच्च पूर्व्वसंयोगनाश इत्येकः कालः। ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगश्चेत्येकः कालः । अथ द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिरिति पञ्च क्षणाः । द्रव्यनाशसमकालं परमाण्वन्तरे कर्म्मचिन्तनात् षष्ठे गुणोत्पत्तिः। तथा हि परमाणुकर्म्मणा परमाण्वन्तरविभागः। तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्म्मणी। अथ श्यामनाशः परमाण्वन्तरकर्म्मजश्च विभागः। ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्व्वसंयोगनाशश्च। ततः परमाण्वन्तरसंयोगः । ततो द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिरिति। एवं श्यामनाशक्षणे परमाण्वन्तरे कर्म्मचिन्तनात् सप्त क्षणाः। रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्म्मचिन्तनात् अष्टक्षणाः इति ॥ १०५ ॥

नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। वैशेषिकमतेऽनन्तावयवतन्नाशकल्पने गौरवात्। इत्यञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति। संख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः॥ १०७॥
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः॥ १०८॥

निरूपयितुमाह। गणनेति। गणनव्यवहारासाधारणकारणं संख्येत्यर्थः॥ १०६॥

नित्येष्विति। नित्येषु परमाण्वादिषु एकत्वं नित्यम्। अनित्ये घटादौ एकत्वमनित्यमित्यर्थः। द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः॥ १०७॥

अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। अपेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानान्तरं न त्रिक्षणमात्रस्थायियोग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्थायित्वं कल्प्यते। अन्यथा निर्व्विकल्पकाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षम् तदानीं विषयाभावात्। विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते ।
परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ १०९ ॥

अपेक्षाबुद्धेर्नाशकं कल्प्यते । न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम् कालान्तरे द्वित्वप्रत्यक्षाभावात् । अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशस्तन्नाशक इति कल्पनात् । अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते । न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्विति वाच्यम् । लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात् । अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम् । सर्गादिकालीनपरमाण्वादा-वीश्वरीयापेक्षा-बुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ १०८ ॥

अपेक्षाबुद्धिः केत्यत आह । अनेकेति । अयमेक इत्याकारिका इत्यर्थः । इदन्तु बोध्यं यत्रानियतैकत्वज्ञानं तत्र द्वित्वादिभिन्ना बहुत्वसंख्योत्पद्यते । यथा सेनावनादाविति कन्दलीकारः । आचार्य्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते । तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिः । सेनादौ चोत्पन्ने त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् । इत्यञ्च इतो बहुलेयं सेनेति प्रतीतिरुपपद्यते । बहुत्वस्य संख्यान्तरत्वे तत्तारतम्याभावादित्यवधेयम् । परिमाणं निरूपयति । परिमाणमिति । परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥११०॥
संख्यातः परिमाणाच्च प्रचयादपि जायते।
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥१११॥
परिमाणं घटादौ तु परिमाणजमुच्यते।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥११२॥

तच्चतुर्विधं अणु महद् दीर्घं ह्रस्वञ्च। तत् परिमाणम्। नित्यमित्यत्र परिमाणमित्यनुषज्यते ॥ ११० ॥

जायत इत्यत्रापि परिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्व्वेणान्वितम्। तथा चानित्यं परिमाणं सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः। तत्र सङ्ख्याजन्यमुदाहरति। द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणम् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्। द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टम्। त्रसरेणुपरिमाणन्तु न सजातीयम्। अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥ १११ ॥

परिमाणजन्यमुदाहरति। परिमाणं घटादाविति। परिमाणजं कपालादिपरिमाणजन्यम्। प्रचयजन्यमुदाहर्त्तुं प्रचयं निर्व्वक्ति। प्रचय इति ॥ ११२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः।

नाश इति। अर्थात् परिमाणस्य। न चावयवनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् "परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्रसरेणुकनाशः" एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापवदितुमशक्यत्वात्। शरीरादाववयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः। न च पटाविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यम् तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात्। किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात्। तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्। तस्मात् तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत्। न च पूर्वतन्तव एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव पटान्तरमारभतामिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात्। एकदा नानाद्रव्यस्य तत्रानुपलम्भबाधितत्वाच्च पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ॥११३॥
अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते।
अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥११४॥
अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः।
कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्म्मजः ॥११५॥

पृथक्त्वंसकारणं निरूपयति। सङ्ख्यावदिति। पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वम्। तन्नित्यतादिकं सङ्ख्यावत्। यथा हि नित्येषु एकत्वं नित्यम् अनित्येऽनित्यम् अनित्यमेकत्वम् आश्रयद्वितीयक्षणेनोत्पद्यते, आश्रयनाशान्नश्यति, तथैकपृथक्त्वमपि। द्वित्वादिवद् द्विपृथक्त्वादिकमपीत्यर्थः। नन्वयमस्मात् पृथग् इत्यादावन्योन्याभावो भासते तत् कथं पृथक्त्वं गुणान्तरं स्वीक्रियते। न चास्तु पृथक्त्वं न त्वन्योन्याभाव इति वाच्यम्। रूपं न घट इति प्रतीत्यनापत्तेः ॥ ११३ ॥

न हि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति न वा घटे घटावधिकपृथक्त्वमस्ति येन परम्परासम्बन्धः कल्प्य इत्यत आह। अन्योन्याभावत इति। विलक्षणेति। ननु शब्दवैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेत्। न। विनार्थभेदं घटात् पृथग् इतिवद् घटो नेत्यत्रापि पञ्चमी स्यात्। तस्माद् यदर्थकयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति ॥ ११४ ॥

संयोगं निरूपयति। अप्राप्तयोरिति। तं विभजते। कीर्त्तित इति। एष संयोगः ॥ ११५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः।
आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः ॥११६॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः ॥११७॥
तृतीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः।
अभिघातो नोदनञ्च शब्दहेतुरिहादिमः ॥ ११८ ॥
शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत्।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवोऽपरः ॥ ११९ ॥
विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्।

सन्निपातः संयोगो द्वितीय उभयकर्म्मजः। तृतीय इति संयोगज इत्यर्थः। तृतीयः स्यादिति पूर्व्वेणान्वितम्॥११६॥११७

आदिमः अभिघातः। द्वितीयो नोदनाख्यः संयोग इति। विभक्तप्रत्ययकारणं विभागं निरूपयति। विभाग इति। एककर्म्मेति। उदाहरणन्तु श्येनशैलविभागादिकं पूर्व्ववद् बोध्यम् ॥ ११८ ॥ ११९ ॥

तृतीयो विभागजः कारणमात्रविभागजन्यः कारणा-कारणविभागजन्यश्चेति। आद्यस्तावत्। यत्र कपाले कर्म्म ततः कपालद्वयविभागः। ततो घटारम्भकसंयोगनाशः। ततो घटनाशः। ततस्तेन कपालविभागेन सकर्म्मणा कपालस्य देशान्तरविभागो जन्यते। ततो देशान्तरसंयोगनाशः। तत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥
परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम्।
दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥१२१

उत्तरदेशसंयोगः। ततः कर्म्मनाश इति। न च तेन कर्म्म-णैव कथं देशान्तरविभागो न जन्यत इति वाच्यम् एकस्य कर्म्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भक-संयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विक-सत्कमलकुड्मलभङ्गप्रसङ्गात्। तस्माद्यदीदमनारम्भकसंयोग-प्रतिद्वन्द्विविभागं जनयेत् तदाऽऽरम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत्। न च कारणविभागेनैव द्रव्यनाशात् पूर्व्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम् आरम्भकसंयोग-प्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भ-वात्। यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणम् व्यधिकरणत्वात् शरीरे तु क्रिया नास्ति अव-यविकर्म्मणो यावदवयवकर्म्मनियतत्वात्। अतस्तत्र कारणा-कारणविभागेन कार्य्याकार्य्यविभागो जन्यत इति। अत एव विभागो गुणान्तरम्। अन्यथा शरीरे विभक्तप्रत्ययो न स्यात्। अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति ॥ १२० ॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति। पर-त्वञ्चेति ॥ १२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥ १२३ ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥१२४॥
अपेक्षाबुद्धिनाशेन नाशस्त्वेषामुदाहृतः ।
बुद्धेः प्रकारः प्रागेव प्रायशोऽपि निरूपितः ॥१२५॥

दैशिकपरत्वं बहुतरसूर्य्यसंयोगान्तरितत्वज्ञानादुत्पद्यते। एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रावधित्वार्थं द्वितीयापेक्षा। यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः। पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२२ ॥

तयोर्दैशिकपरत्वापरत्वयोः । असमवायी असमवायिकारणम् । तदाश्रये दैशिकपरत्वापरत्वाश्रये । दिवाकरेति ॥

अत्र परत्वं अपरत्वञ्च कालिकं ग्राह्यम् । यस्य सूर्य्यपरिस्पन्दापेक्षया यस्य सूर्य्यपरिस्पन्दोऽधिकः स ज्येष्ठः। यस्य न्यूनः स कनिष्ठः। कालिकपरत्वापरत्वे जन्यद्रव्य एव। अत्र कालिकपरत्वापरत्वयोः ॥ १२३ ॥ १२४ ॥

एषां कालिकदैशिकपरत्वापरत्वानाम् । क्रमप्राप्तां बुद्धिं निरूपयितुमाह । बुद्धेरिति ॥ १२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते॥ १२६॥
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः॥ १२७॥
आद्यो देहे ह्यात्मबुद्धिः शङ्खादौ पीततामतिः।
भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते॥ १२८॥
किंस्विन्नरो वा स्थाणुर्व्वेत्यादिबुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥ १२९॥
स संशयो मतिर्या स्यादेकत्राभावभावयोः।

अप्रमां विभजते। तच्छून्य इति। तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः। तत्प्रपञ्चः अप्रमाप्रपञ्चः॥ १२६॥ १२७॥

आद्य इति। विपर्य्यास इत्यर्थः। शरीरादौ यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम्। एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति॥ १२८॥

किंस्विदिति। किंस्विदिति वितर्के। निश्चयस्य लक्षणमाह। तदभावेति। तदभावाप्रकारकत्वे सति तत्प्रकारकं ज्ञानं निश्चयः॥ १२९॥

संशयं लक्षयति। स संशय इति। एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। साधारणेति। उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयकारणम्। यथा उच्चैस्तरत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधारणादिधर्म्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।

स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे । एवम् असाधारणज्ञानं कारणम् । यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे । विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम् । शब्दव्याप्तिज्ञानादीनाम् निश्चयमात्रजनकत्वस्वाभाव्यात् । किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते । संशयस्तु मानस एवेति । एवं ज्ञाने प्रामाण्यसंशयाद् विषयसंशय इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु संशये धर्म्मिज्ञानं धर्म्मीन्द्रियसन्निकर्षो वा कारणमिति ॥१३०॥

दोष इति । अप्रमां प्रति दोषः जनक कारणम् । प्रमां प्रति गुणः कारणम् । तत्रापि पित्तादिरूपा दोषा अननुगताः । तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्त्विति वाच्यम् पीतः शङ्ख इतिज्ञानस्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात् । विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानम् अतः पित्तादिदोषाभावानां कारणत्वमवश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥१३१॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥१३२॥
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा।
गुणः स्याद् भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥

वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च। तत्र दोषाः के इत्याकाङ्क्षायामाह। पित्तेति। क्वचित् पित्तादिभ्रमे पित्तं दोषः। क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः। क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः ॥ १३१ ॥

अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति। प्रत्यक्षे त्विति। प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण इति। एवमग्रेऽप्यूह्यः।

प्रमां निरूपयति। भ्रमभिन्नमिति ॥१३२॥१३३ ॥१३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम् ॥१३५
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ।
प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः ॥ १३६ ॥

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह। अथ वेति। तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः। इदन्तु बोध्यम्। येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः। एवं सति निर्व्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावात् अत आह। न प्रमेति। ननु वृक्षे कपिसंयोगज्ञानं भ्रमः स्यात् प्रमा च स्यादिति चेत्। न। प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। न च वृक्षे संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। लक्षणस्याननुगमात् लक्षणाननुगमेऽपि न क्षतिः ॥ १३५ ॥

प्रमात्वमिति। मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति। भट्टानां मते ज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्व्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानवित्तिवेद्यो विषयः। तन्मतं दूषयति। न स्वतो ग्राह्यमिति। संशयेति। यदि ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्यात् तदाऽभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। तत्र हि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न ज्ञातं तदा धर्म्मिज्ञानाभावात् कथं संशयः। तस्माज्ज्ञानप्रामाण्यमनुमेयम्। तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वाद् यन्नैवं तन्नैवं यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवम् इदं जलज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात्। न च हेतुज्ञानं कथं जातमिति वाच्यम्। पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात्। तत्प्रकारकत्वावच्छिन्नतद्वद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात्। न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् इदंज्ञानप्रमात्वस्य स्वतो ग्राह्यत्वात्। न च प्रकारभेदेन प्रामाण्यभेदाद् घटत्ववति घटत्वप्रकारादेः कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतो ग्राह्यत्वात्। घटस्य च पूर्व्वमुपस्थितत्वाद् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः। व्यवसायपरन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रामाण्यं न गृह्यते। तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपपत्तेः। किञ्चाभ्यासदशायां तृतीयानुव्यवसायादिना प्रामाण्यस्य स्वत एव ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशयानुरोधात्। अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलमुखी कारणमुखी वा नानवस्थेति चेन्न अगृहीताप्रामाण्यग्राहकस्यैव निश्चयरूपत्वात्। यत्र च प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षया यावदाशङ्कं प्रामाण्यानुमितिरिष्यत एव सर्व्वत्र तु न संशयः क्वचित् कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसञ्चारादिति सङ्क्षेपः। ननु सर्व्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्वे विशेषणं व्यर्थम्। न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमस्याभावादिति वाच्यम्। तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्। सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम्। अस्तु वा तत्रापि भेदाग्रह एव कारणमिति। न वाऽन्यथाख्यातिः सम्भवति। रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात्। न च संवादिप्रवृत्तौ तत् कारणं विसंवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यम् लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्। इत्थञ्च रङ्गे रजतत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे तर्कः क्वचित् शङ्कानिवर्त्तकः॥ १३७॥

विशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः। फलमुखगौरवस्यादोषत्वात्। किञ्च यद् रङ्गरजतयोरिमे रजते इति ज्ञानं जातं तत्र न कारणबाधोऽपि। अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्ति-निवृत्ती स्याताम्। रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहेऽन्यथा-ख्यातिभयात्। त्वन्मते रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदा-ग्रहस्य च सत्त्वात्। दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्ग-भेदाग्रहस्य च सत्त्वात्। किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहाद अनुमितिर्निर्बाधा। यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूम-ज्ञानमनुमित्यनुरोधादापत्तितम्। इत्थम् अन्यथा ख्यातौ प्रत्यक्षमेव प्रमाणम्। रङ्गं रजततया जानामीत्यनुभवादिति सङ्क्षेपः॥ १३६॥

पूर्व्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति। व्यभिचारस्येति। व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः। व्यभिचारग्रहस्य व्याप्तिग्रहप्रतिबन्धकत्वात् तदभावः कारणम्। अन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता। भूयोदर्शनन्तु न कारणम्। व्यभिचारास्फूर्त्तौ सकृ-द्दर्शनेऽपि क्वचिद् व्याप्तिग्रहात्। क्वचिद् व्यभिचारशङ्कावि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।

धूमवद्वारा भूयोदर्शनमुपयुज्यते। यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षबाधकतर्कोऽपेक्षितः। तथापि वह्नि-विरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति तदा सा वह्नि-धूमयोः कार्य्यकारणभावस्य प्रतिसन्धानान्निवर्त्तते। यद्ययं वह्निमान् न स्यात् तदा धूमवान् न स्यात्। कारणं विना कार्य्यानुपपत्तेः। यदि क्वचित् कारणं विनापि भविष्यति अहे-तुक एव वा भविष्यतीति तत्राशङ्का भवति तदा सा व्याघाताद-पसरणीया। यदि कारणं विना कार्य्यं स्यात् तदा धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य नियमत उपादानं तत्रैव न स्यादिति। यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदि-दमुक्तं तर्कः क्वचित् शङ्कानिवर्त्तक इति ॥ १३७ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति। साध्यस्येति। साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमता-व्यापक इत्यर्थः। ननु स श्यामो मित्रातनयत्वाद् इत्यत्र शाक-पाकजत्वं नोपाधिः स्यात्। तस्य साध्यव्यापकत्वाभावात्। श्यामत्वस्य घटादावपि सत्त्वात्। एवं वायुः प्रत्यक्षः स्पर्शा-श्रयत्वाद् इत्यत्र उद्भूतरूपवत्त्वं नोपाधिः स्यात्। प्रत्यक्षत्वस्या-त्मादिषु सत्त्वात् तत्र रूपाभावात्। एवं ध्वंसो विनाशी जन्य-त्वाद् इत्यत्र भावत्वं नोपाधिः स्याद् विनाशित्वस्य प्रागभावे सत्त्वात्। तत्र च भावत्वाभावादिति चेन्न। यद्धर्मावच्छिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥
सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥ १३९ ॥
व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ।

साध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थतात्पर्यात् । मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वम् । एवं वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वं वहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकञ्च । एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वम् । सद्धेतौ तु एतादृशो धर्म्मो नास्ति यदवच्छिन्नस्यसाध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य व्यापकं किञ्चित् स्यात् । व्यभिचारिणि तु अन्तत उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधिशून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेः सम्भवतीति ॥ १३८ ॥

अत एव लक्ष्यमपि रूपमेतदनुसारेण दर्शयति । सर्वे इति । स्वसाध्येति । स्वम् उपाधिः स्वञ्च साध्यञ्च स्वसाध्ये तयोर्व्यभिचारिता इत्यर्थः ॥ १३९ ॥

उपाधेर्दूषकतावीजमाह । व्यभिचारस्येति । उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् उपाधेः प्रयोजनमित्यर्थः । तथाहि यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनोपाधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते ॥ १४० ॥

व्यभिचारेण साध्यव्यभिचारानुमानम्। यथा धूमवान् वह्ने-रित्यादौ वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वाद् इति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात्। यत्र तु किञ्चि-द्धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्मवति उपाधिव्यभि-चारेण साध्यव्यभिचारानुमानम्। यथा मश्यामो मित्रातनय-त्वादित्यत्र मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाक-पाकजत्वव्यभिचारित्वादिति। बाधानुन्नीतपक्षेतरत्वन्तु साध्य-व्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च नोपाधिः। बाधोन्नीतन्तु पक्षेतरत्वम् उपाधिर्भवत्येव यत्र वह्निरनुष्णः कृतकत्वाद् इत्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः। यत्र साध्यव्यापकत्वादिकं सन्दिह्यते स सन्दिग्धोपाधिः। पक्षे-तरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानु-रोधादिति। केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम्। तथा हि अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववद् आर्द्रे-न्धनाभावाद् इति सत्प्रतिपक्षसम्भवात्। इत्थञ्च साधनव्यापको-ऽपि क्वचिदुपाधिः। यथा करका पृथिवी कठिनसंयोगवत्त्वा-दित्यादौ अनुष्णाशीतस्पर्शवत्त्वम्। न चात्र स्वरूपसदुपाधि-रेव दूषणमिति वाच्यम्। सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात्। अत्र च साध्यव्यापकपक्षावृत्तिरुपाधिरिति वदन्ति। शब्दोप-मानयोरिति ॥ १४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमानगतार्थत्वादिति वैशेषिकं मतम् ।
तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥१४१॥
द्वैविध्यन्तु भवेद् व्याप्तेरन्वयव्यतिरेकतः ।

वैशेषिकाणां मते प्रत्यक्षमनुमानञ्च प्रमाणं शब्दोपमानयोरनुमानविधयैव प्रामाण्यम् । तथा हि दण्डेन गामभ्याजेत्यादिपदानि वैदिकपदानि वा तात्पर्य्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्व्वकानि आकाङ्क्षादिमत्पदकदम्बत्वाद् घटमानयेतिपदकदम्बवत् । यद्वा एते पदार्था मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात् तादृशपदार्थवत् । दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति । एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् । यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् । यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वाद् इत्यनुमानेन पक्षधर्म्मताबलाद् गवयत्वप्रवृत्तिनिमित्तकत्वं भासते तन्मतं दूषयति । तन्न सम्यगिति । विना व्याप्तिज्ञानं शब्दादितो बोधस्यानुभविकत्वात् । न हि सर्व्वत्र शब्दश्रवणाद्यनन्तरं व्याप्तिज्ञाने मानसस्तीति । किञ्च सर्व्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्व्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियत इति ॥ १४१ ॥

द्वैविध्यमिति । अनुमानं हि त्रिविधं केवलान्वयिकेवल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते ॥ १४२ ॥
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ।
अर्थापत्तेस्तु नैवेह प्रमाणान्तरतेष्यते ॥ १४३ ॥

व्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षः केवलान्वयी। यथा ज्ञेयम् अभिधेयादित्यादौ । तत्र हि सर्व्वस्यैव ज्ञेयत्वाद् विपक्षासत्त्वम् । ननु सर्व्वेषां धर्म्माणां व्यावृत्तत्वात् केवलान्वय्यसिद्धिरिति चेन्न । व्यावृत्तत्वस्य सर्व्वसाधारणे तस्यैव केवलान्वयित्वात् । किञ्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् । तच्च गगनाभावादौ प्रसिद्धम् । असत्सपक्षः केवलव्यतिरेकी । यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ । तत्र हि जलादित्रयोदशभेदस्य पूर्ब्बमनिश्चिततया निश्चितसाध्यवतः सपक्षस्याभाव इति । सत्सपक्षविपक्षोऽन्वयव्यतिरेकी । यथा वह्निमान् धूमादित्यादौ । तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति ॥ १४२ ॥

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्व्वक्ति । साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेद् इति । साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम् । येन सम्बन्धेन यत्र येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्म्मावच्छिन्नाभाववत्ताज्ञानाद् यत्सम्बन्धेन यद्धर्म्मावच्छिन्नस्य व्याप्यता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्म्मावच्छिन्नाभावस्य सिद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यञ्च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिध्यति। यत्र तु तादात्म्यसम्बन्धेनेतरव्यापकता गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति। स एवान्योन्याभावः। एवं यत्र संयोगसम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति। अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम्। केचित् तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानं कारणम्। यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते। साध्यप्रसिद्धिस्तु घटादावेव ज्ञायतां पश्चात् पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति।

अर्थापत्तेस्त्विति। अर्थापत्तिं प्रमाणान्तरं मन्यन्ते केचन। तथा हि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वञ्च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वान्यथानुपपत्त्या बहिःसत्त्वं कल्प्यते तदनुमानेन गतार्थत्वान्नेष्यते। तथा हि जीवित्वस्य बहिःसत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतम्। तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिःसत्त्वमनुमितौ भासते। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिध्यति। दिवाभोजनबाधे रात्रिभोजनं सिध्यति। अभावप्रत्यक्षस्यानुभविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम्। किञ्चानुपलम्भस्याज्ञानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ।
सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते ॥ १४४ ॥
अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् ।
निर्दुःखत्वे सुखे चेच्छातज्ज्ञानादेव जायते ॥१४५॥
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ।
चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्॥१४६॥

हेतुत्वे ज्ञानाकरणकत्वात् प्रत्यक्षत्वम् । ज्ञानस्य हेतुत्वे तु तत्राप्यनुपलक्षान्तरापेक्षेत्यनवस्था । चेष्टापि प्रमाणान्तरं न । तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्तर्भावात् । यत्र तु व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति॥१४३॥

सुखं निरूपयति । सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यत इति । काम्यमभिलाषविषयः । धर्म्मेति धर्म्मत्वेन सुखत्वेन कार्य्यकारणभाव इत्यर्थः ॥ १४४ ॥

दुःखन्निरूपयति । अधर्म्मेति । अधर्म्मत्वेन दुःखत्वेन कार्य्यकारणभाव इत्यर्थः । प्रतिकूलमिति दुःखत्वज्ञानादेव सर्व्वेषां स्वाभाविकविद्वेष इत्यर्थः । इच्छां निरूपयति । निर्दुःखत्व इति ॥ १४५ ॥

इच्छा हि फलविषयिणी उपायविषयिणी च । फलन्तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अत एव स्वतः पुरुषार्थः सम्भवति । यज्ज्ञानं सत् स्ववृत्तितये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ।
बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका ॥ १४७ ॥
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ।
द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम् ॥ १४८ ॥

ष्यते स स्वतः पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः । उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम् । चिकीर्षेति । कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा । पाकं कृत्वा साधयामीति तदनुभवात् ॥ १४६ ॥

चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्च कारणम् । अत एव वृष्ट्यां कृतिसाध्यताभावान्न चिकीर्षा । बलवदिति । बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकम् । अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा । बलवद्द्वेषः प्रतिबन्धक इत्यन्ये ॥ १४७ ॥

कस्यचिन्मत इति । बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः । कृतिसाध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् कस्यचिन्मत इत्यस्वरसो दर्शितः । द्वेषं निरूपयति । द्विष्टसाधनतेति । दुःखोपायविषयकं द्वेषं प्रति द्विष्टसाधनताज्ञानं कारणमित्यर्थः । बलवदिष्टसाधन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् ॥ १४९ ॥
चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥ १५० ॥

ताज्ज्ञानञ्च प्रतिबन्धकम् । तेन नान्तरीयकदुःखजनके पाकादौ न द्वेषः ॥ १४८ ॥

यत्नं निरूपयति । प्रवृत्तिश्चेति । प्रवृत्तिनिवृत्तिजीवनयोनियत्नवेदात् प्रयत्नस्त्रिविध इत्यर्थः ॥ १४९ ॥

चिकीर्षेत्यादि । मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः । कृतिसाध्यताज्ञानादिवद् बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकात् प्रवृत्तौ कारणमित्यपि वदन्ति । कार्य्यताज्ञानं प्रवर्त्तकमिति गुरवः । तथा हि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति । सा च कृतिसाध्यताज्ञानसाध्या । इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा । तत्र कृतिसाध्यत्वं प्रकारस्तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः । न त्विष्टसाधनताज्ञानं तत्र हेतुः । कृत्यसाध्येऽपि प्रवृत्त्यापत्तेः । कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न । तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात् । न च द्वयोरपि हेतुत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौरवात्। ननु तन्मतेऽपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्य्यताज्ञानसत्त्वादिति चेन्न। स्वविशेषण-वत्ताप्रतिसन्धानजन्यकार्य्यताज्ञानस्य प्रवर्त्तकत्वात्। काम्ये हि यागपाकादौ कामना स्वविशेषणम्। ततश्च बलवदनिष्टाननु-बन्धिकाम्यसाधनताज्ञानेन कार्य्यताज्ञानम्। ततः प्रवृत्तिः। तृप्तश्च भोजने न प्रवर्त्तते। तदानीं कामनायाः पुरुषविशेषण-त्वाभावात्। नित्ये च शौचादिकं पुरुषविशेषणम्। तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात् तत्र प्रवृत्तेः। ननु तद-पेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयककार्य्य-ताज्ञानमेव हेतुरस्तु बलवदनिष्टाननुबन्धित्वञ्च दुष्टोत्पत्ति-नान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्विष्टविषयदुःखा-जनकत्वं वेति चेन्न। इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुम-शक्यत्वात्। साध्यत्वसाधनत्वयोर्विरोधाद् असिद्धस्य तु साध्यत्वं सिद्धस्य च साधनत्वम्। न च एकमेकेनैकदा सिद्धमसिद्धञ्च ज्ञायते। तस्मात् कालभेदादुभयं ज्ञायते। मैवम्। लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात्। न च साध्यत्वसाधनत्वयोर्विरोधः। यदा कदा-चित् साध्यत्वसाधनत्वयोरविरोधात्। एकदा साध्यत्व-साधनत्वयोस्तथाज्ञानात्। नवीनास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकमनागतेष्टस्य ज्ञातुमशक्यत्वात्। किन्तु यादृ-शस्य पुंसः कृतिसाध्यं यदिष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्त्तते तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसन्धाय पाके प्रवर्त्तत इत्याहुस्तन्न। स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना सम्भोगादौ च तदभावात्। इदन्तु बोध्यम्। तदानीमिष्टसाधनत्वादिज्ञानं प्रवर्त्तकम्। तेन भावियौवराज्ये बालस्य न प्रवृत्तिः तदानीं कृतिसाध्यत्वाज्ञानात्। एवं तृप्तो भोजने न प्रवर्त्तते। तदानीमिष्टसाधनत्वाज्ञानात्। प्रवर्त्तते च रोगदूषितचित्तो विषादिभक्षणे तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात्। न चास्तिकस्यागम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम्। उत्कटरागादिना नरकसाधनताधीनिरोधनात्। वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्तौ। किन्त्विष्टसाधनताज्ञानादिच्छामात्रम्। कृतिश्च प्रवृत्तिरूपा बोध्या। तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः। इत्थञ्च प्रवर्त्तकत्वानुरोधाद्विधेरपि तावानर्थः। इत्थञ्च विश्वजिता यजेत इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते। नन्वहरहः सन्ध्यामुपासीतेत्यादौ इष्टानुत्पत्तेः प्रवृत्तिः कथम्। न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम्। तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः। कामनाभावेऽकरणापत्तेश्च। इत्थञ्च फलश्रुतिस्तत्रार्थवादमात्रमिति चेन्न। ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव भरणीश्राद्धे काम्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात्। न च कामनाभावेऽकरणापत्तिः। त्रिकालस्तवपाठादाविव कामना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वज्ञावस्यैव कल्पनात् । ननु वेदबोधितकार्य्यताज्ञानात् प्रवृत्तिः सम्भवतीति चेन्न। इष्टसाधनत्वमज्ञाय तादृशकार्य्यताज्ञानसहस्रेणापि प्रवृत्तेरसम्भवात् । यदपि पण्डापूर्व्वफलमिति तदपि न । कामनाभावेऽकरणापत्तेस्तौल्यात् । कामनाकल्पने त्वार्थवादिकफलमेव रात्रिसत्रन्यायात् कल्प्यतामन्यथा प्रवृत्त्यनुपपत्तेः । तेन ।

चयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते ॥

एवम् ।

सन्ध्यामुपासते ये तु सततं शंसितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥

एवम् ।

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ।

इत्यादिकमेव फलमस्तु । न च पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यम् । गयाश्राद्धादाविव उद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य क्वचित् कल्पनात् । अत एवोक्तं शास्त्रदर्शितफलमनुष्ठातरीत्युत्सर्ग इति । पितॄणां मुक्तत्वे तु स्वस्य स्वर्गफलं यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकल्पनात् । पण्डापूर्व्वार्थप्रवृत्तिस्तु न सम्भवति । न हि तत्सुखदुःखाभाववत् स्वतः पुरुषार्थः, न वा तत्साधनम् । प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत् । इत्थम् यथा हि नित्यकृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यवायाभावस्य सत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणतया दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति। ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थान्वयः। इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न। तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वञ्च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते। अथवा बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः। तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति। ननु श्येनेनाभिचरन् यजेतेत्यत्र कथं बलवदनिष्टाननुबन्धित्वमर्थः। श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्। न च वैधत्वान्निषेध इति वाच्यम्। अभिचारे प्रायश्चित्तोपदेशात्। न च मरणानुकूलव्यापारमात्रं यदि हिंसा तदा खङ्गकारस्य कूपकर्त्तुश्च हिंसकत्वापत्तिर्गललग्नान्नभक्षणजन्यमरणे स्वात्मवधित्वापत्तिश्चेति वाच्यम्। मरणोद्देश्यकत्वस्यापि विशेषणत्वात्। अत एव सप्तमीतैलाभ्यङ्गस्य न हिंसात्वम्। अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न। श्येनवारणायादृष्टाद्वारकत्वेन विशेषणात्। अत एव काशीमरणाद्यर्थकृतशिवपूजादेरपि न हिंसात्वम्। न च साक्षान्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा किन्तु तज्जन्यापूर्व्वमिति वाच्यम्। खङ्गाघातेन ब्राह्मणे व्रणपाकपरम्परया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृते हिंसात्वानापत्तेः। केचित् तु श्येनस्य हिंसाफलं न तु मरणम्। श्येनजन्यखड्गघातादिरूपा हिंसा अभिचारपदार्थः। तस्य च पापजनकत्वम्। अतः श्येनस्य वैधत्वात् पापाजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्त्तन्ते। आचार्य्यास्तु आप्ताभिप्रायो विध्यर्थः। पाकं कुर्य्याद् इत्यादौ आज्ञानिरूप्येच्छावाचित्वाल्लिङ्गात्स्वेच्छावाचित्वं लाघवात्। एवञ्च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्यतयाऽभीष्ट इत्यर्थः। तत आप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्त्तते। कलञ्जभक्षणादौ तदभावान्न प्रवर्त्तते। यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधेरेव तावद्गर्भ इव श्रुतिः कुमार्य्याः पुंयोगे मानम्। न च कर्त्तृस्मरणं बाधकम्। कपिलकणादादिकमारभ्याद्यपर्य्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्। अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः। तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेऽपि छन्दांसि जज्ञिरे तस्मादित्यादिकर्त्तृस्मरणमस्त्येव। एवं प्रति मन्वन्तरं चैषा श्रुतिरन्या विधीयत इत्यपि द्रष्टव्यम्।

स्वयम्भुरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाः॥

इति वेदस्य स्तुतिमात्रम्। न च पौरुषेयत्वेभ्रमादिसम्भवादप्रामाण्यं स्यादिति वाच्यम्। नित्यसर्व्वज्ञत्वेन निर्दोषत्वात्। अत एव पुरुषान्तरभ्रमादिसम्भवान्न कपिलादेः कर्तृत्वं वेदस्य। किञ्च वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात् सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति। उपादानस्येति। उपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टसाधनता धियः ।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ॥१५१॥
शरीरे प्राणसञ्चारकारणं परिकीर्त्तितम् * ।
अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् ॥१५२॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।
तदेवासमवायि स्यात् पतनाख्ये तु कर्म्मणि ॥१५३॥

दानस्य समवायिकारणस्याध्यक्षं प्रत्यक्षं प्रवृत्तौ कारणमिति ॥ १५० ॥

द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकादवधारितमिति भावः । यत्न इति । जीवनयोनियत्नो यावज्जीवनमनुवर्त्तते । स चातीन्द्रियः ॥ १५१ ॥

तत्र प्रमाणमाह । शरीरे प्राणसञ्चारकारणं परिकीर्त्तितमिति । प्राणसञ्चारो हि अधिकः श्वासादिः प्रयत्नसाध्यः । इत्थञ्च प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिप्रयत्नः । गुरुत्वं निरूपयति । अतीन्द्रियमिति ॥ १५२ ॥

अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यम् । नित्ये परमाणौ नित्यम् । गुरुत्वमित्यनुवर्त्तते । तद्गुरुत्वम् असमवायि असमवायिकारणम् । पतने आद्यपतने इत्यर्थः ॥१५३ ॥

---

* तत्प्रकीर्त्तितमिति पाठान्तरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सांसिद्धिकद्रवत्वं स्यान्नैमित्तिकमथापरम् ।
सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः ॥१५४ ॥
परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ॥ १५५ ॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ।
स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ ॥ १५६ ॥

द्रवत्वन्निरूपयति । सांसिद्धिकमिति । द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्चेति । द्वितीयं नैमित्तिकं परमाणाविति ॥ १५४ ॥

जलपरमाणौ द्रवत्वं नित्यम् । अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यम् । कुत्रचित्तेजसि कुत्रचित् पृथिव्याञ्च नैमित्तिकं द्रवत्वम् । तत्र को वा नैमित्तिकस्तद्दर्शयति । नैमित्तिकमिति । वह्नीतिपदन्तेजोऽर्थकम् । तथा च तेजःसंयोगाग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां वर्त्तत इत्यर्थः ॥ १५५ ॥

द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तदिति । हेतुरिति असमवायिकारणमित्यर्थः । सङ्ग्रहे सक्तुकादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्धव्यम् । तेन द्रुतसुवर्णादीनां न संग्रहः । स्नेहं निरूपयति । जले इति । जल एवेत्यर्थः । असौ स्नेहः ॥ १५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता।
संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने ॥ १५७॥
मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचित्।
स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि ॥ १५८॥

ननु पृथिव्यामपि तैले स्नेह उपलभ्यते। न चासौ जलीयः। तथा सति दहनप्रातिकूल्यं स्यादत आह। तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलतेति। तत्प्रकर्षात् स्नेहप्रकर्षात्। तैले उपलभ्यमानस्नेहोऽपि जलीय एव। तस्य प्रकृष्टत्वादग्नेरानुकूल्यम्। अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः। संस्कारन्निरूपयति। संस्कारेति। वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविध इत्यर्थः ॥ १५७ ॥

मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचिदिति। कर्म्मजवेगजभेदाद्वेगो द्विविध इत्यर्थः। शरादौ हि नोदनजनितेन कर्म्मणा वेगो जन्यते। तेन च पूर्व्वकर्म्मनाशादुत्तरं कर्म्म। एवमग्रेऽपि। विना च वेगं कर्म्मणः कर्म्मप्रतिबन्धकत्वात् पूर्व्वकर्म्मनाश उत्तरकर्म्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः। स्थितिस्थापक इति। आकृष्टशाखादीनां कपित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्। केचिदिति। चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः ॥ १५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्।
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः॥ १५९॥
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्।
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते॥ १६०॥

असौ स्थितिस्थापकः। क्वचिद् आकृष्टशाखादौ। भावनाख्य इति॥ १५९॥

तस्य संस्कारस्य। उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम्। तत्संशयात् संस्कारानुत्पत्तेर्निश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादिस्थले न स्मरणं इत्यञ्च संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्त्विति चेन्न। विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किञ्च उपेक्षास्थले संस्कारकल्पनाया गुरुत्वात् संस्कारं प्रति चोपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात्। तत्र प्रमाणं दर्शयति। स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते इति। असौ संस्कारः स्मरणं प्रत्यभिज्ञानञ्च जनयति। अतः संस्कारः कल्प्यते। विना व्यापारं पूर्व्वानुभवस्य स्मरणादिजननासामर्थ्यात्। स्वस्वव्यापारान्यतराभावे कारणत्वासम्भवात्। न च प्रत्यभिज्ञां प्रति तत्तासंस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्। अप्रयोजकत्वात्। परे तु अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म्माधर्म्मावदृष्टं स्याद्धर्म्मः स्वर्गादिसाधनम्।
गङ्गास्नानादियागादिव्यापारः परिकीर्त्तितः॥ १६१॥
कर्म्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः।

त्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः॥ १६०॥

अदृष्टं निरूपयति। धर्म्माधर्म्माविति। स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनाञ्च साधनं धर्म्म इत्यर्थः। तत्र प्रमाणं दर्शयितुमाह। यागादीति। यागादिव्यापारतया हि धर्म्मः कल्प्यते। अन्यथा यागादीनां चिरं विनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात् तदुक्तमाचार्य्यैः।

चिरध्वस्तं फलायालं न कर्म्मातिशयं विना इति॥

ननु यागध्वंस एव व्यापारः स्यात् न च प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वम्। सर्व्वत्र तथात्वे मानाभावात्। न च त्वन्मते फलानन्त्यं मन्मते चरमफलस्यापूर्ब्बनाशकत्वान्न तथात्वमिति वाच्यम्। कालविशेषस्य सहकारित्वाद् इत्यत आह। गङ्गास्नानेति। गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्ब्बं कल्प्यते लाघवादिति भावः॥ १६१॥

ननु ध्वंसोऽपि न व्यापारोऽस्तु। न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम्। अनन्यथासिद्धनियत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधर्म्मो नरकादीनां हेतुर्निन्दितकर्म्मजः ॥ १६२ ॥
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ।
इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ॥ १६३ ॥

पूर्व्ववर्त्तित्वस्य तत्रापि सत्त्वात् । अव्यवहितपूर्व्ववर्त्तित्वं हि चक्षुःसंयोगादेः कारणत्वं न तु सर्व्वत्र कार्य्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वमित्यत आह । कर्म्मनाशाजलस्पर्शादिना नाशस्त्वसौ मत इति । यदि हि अपूर्व्वं न स्यात् तदा कर्म्मनाशाजलस्पर्शादिना नाश्यत्वं धर्म्मस्य न स्यात् । न हि तेन यागादिनाशः प्रतिबन्धो वा कर्त्तुं शक्यते । तस्य पूर्व्वमेव वृत्तत्वादिति । एतेन देवताप्रीतिरेव फलमित्यपास्तम् । गङ्गास्नानादौ सर्व्वत्र देवताप्रीतेरसम्भवात् । देवातायाश्चेतनत्वेऽपि तत्प्रीतेरनुद्देश्यत्वात् । प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भवात् । जन्यसुखादेस्तत्राभावात् । तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते । अधर्म्मो नरकादीनां हेतुर्निन्दितकर्म्मज इति । नरकदुःखादिसकलदुःखानां नारकिशरीरादीनाञ्च साधनमधर्म्म इत्यर्थः ॥१६२॥

प्रमाणमाह । प्रायश्चित्तादिनाश्योऽसौ । जीववृत्ती त्विमौ गुणाविति । यदि ह्यधर्म्मो न स्यात् तदा प्रायश्चित्तादिनाश्यत्वं न स्यात् । न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते । तस्य पूर्व्वविनष्टत्वादिति भावः । जीवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।

ईश्वरस्य धर्म्माधर्म्माभावादिति भावः। इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यत इति। इमौ धर्म्माधर्म्मौ। वासनेति। अतो ज्ञानिना कृते सुकृतदुष्कृतकर्म्मणी न फलायालमिति भावः। ज्ञानादपीत्यपिना भोगपरिग्रहः। ननु तत्त्वज्ञानस्य कथं धर्म्माधर्म्मनाशकत्वम्। नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति वचनविरोधात्। इत्यश्च तत्त्वज्ञानिना झटिति कायव्यूहेन सकलकर्म्मणां भोगेन क्षय इति चेन्न। तत्र भोगस्य वेदबोधितनाशकोपलक्षितत्वात्। कथमन्यथा प्रायश्चित्तादिना कर्म्मणां नाशः। तदुक्तम्। ज्ञानाग्निः सर्व्वकर्म्माणीत्यादिना। श्रूयते च। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे इति। ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्यात् ज्ञानेन च सर्व्वेषां कर्म्मणां नाशादिति चेन्न। प्रारब्धेतरकर्म्मणामेव नाशात्। तत्तच्छरीरभोगजनकं हि यत्कर्म्म तत् प्रारब्धं तदभिप्रायमेव नाभुक्तमिति वचनमिति॥ १६३॥

शब्दं निरूपयति। शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः। कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः॥ सर्व्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते इति। नभोवृत्तिराकाशसमवेतः। दूरस्थशब्दस्याग्रहणादाह। श्रोत्रेति। ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह। वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तितेति। आद्यशब्दस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ॥ १६४ ॥
सर्व्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते।
वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता ॥ १६५ ॥
कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते।
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ॥१६६॥
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते।

वहिर्दशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते। तेन चापरस्तद्व्यापकः। एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति ॥१६३॥ १६४ ॥

कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते इति। आद्यशब्दाद् दशदिक्षु दशशब्दा उत्पद्यन्ते। ततश्चान्ये दशशब्दा उत्पद्यन्त इति भावः। अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मते इति। ननु शब्दस्य नित्यत्वादुत्पत्तिः कथमत आह। उत्पन्नः को विनष्टः क इति बुद्धेरनित्यतेति। शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः ॥ १६६ ॥

ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम्। इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपा चेत्यत आह। सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते। तदेवौषधमित्यादौ सजातीयेऽपि दर्शनादिति। तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु तद्व्यक्त्यभेदो विषयः। उक्तप्रतीतिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ॥१६७॥

इति श्रीमहामहोपाध्याय-विद्यानिवासभट्टाचार्य्यसुत-श्रीयुतविश्वनाथ-पञ्चाननभट्टाचार्य्यविरचितो भाषापरिच्छेदः समाप्तः ॥

रोधात्। इत्यञ्च द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति । ननु सजातीयत्वं सोऽयमितिप्रत्यभिज्ञायां भासते इति कुत्र दृष्टमित्यत आह। तदेवेति। यदौषधं मया कृतं तदेवान्येनापि कृतमित्यादिदर्शनादिति भावः ॥ १६७ ॥

इति श्रीमहामहोपाध्याय-विद्यानिवासभट्टाचार्य्यपुत्र-श्रीयुतविश्वनाथ-पञ्चाननभट्टाचार्य्यविरचिता सिद्धान्तमुक्तावली संपूर्णा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायदर्शनस्य सूचीपत्रम्।

	पृष्ठाङ्कः	पङ्क्त्यङ्कः।
मोक्षरूपशास्त्रप्रयोजनकथनम् पदार्थानामुद्देशश्च,	२	१
तत्त्वज्ञानाधीनक्रममुक्तिसूत्रम्,	४	२५
प्रमाणलक्षणं तद्विभागश्च,	६	१५
प्रत्यक्षलक्षणम्	७	११
अनुमानस्य लक्षणम् विभागश्च,	८	२५
उपमानलक्षणम्	९	२३
शब्दलक्षणम्,	१०	६
शब्दस्य विभागः,	१०	११
प्रमेयस्य लक्षणम् विभागश्च,	१०	१७
आत्मनिरूपणम्,	११	९
शरीरनिरूपणम्,	१२	२
इन्द्रियविभागः	१२	८
भूतविभागः,	१२	१७
अर्थस्य विभागः,	१२	२१
बुद्धिलक्षणम्,	१३	६
मनोनिरूपणम्,	१३	७
प्रवृत्तिलक्षणं तद्विभागश्च,	१३	१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

bhashy

न्यायदर्शनस्य सूचीपत्रम् ।

	पृष्ठाङ्कः	पङ्क्त्यङ्कः ।
दोषलक्षणम्,	१२	१८
प्रेत्यभावलक्षणम्,	१४	१
फललक्षणम्,	१४	८
दुःखलक्षणम्,	१४	१४
अपवर्गलक्षणम्,	१४	१६
संशयस्य लक्षणं विभागश्च,	१६	१९
प्रयोजनलक्षणम्,	१७	२०
दृष्टान्तलक्षणम्,	१७	२४
सिद्धान्तलक्षणम्,	१८	८
सिद्धान्तविभागः,	१८	१२
सर्व्वतन्त्रसिद्धान्तलक्षणम्,	१८	१६
प्रतितन्त्रसिद्धान्तलक्षणम्,	१८	२०
अधिकरणसिद्धान्तलक्षणम्	१९	२
अभ्युपगमसिद्धान्तलक्षणम्,	१९	११
अवयवविभागः,	१९	१७
प्रतिज्ञालक्षणम्,	२०	६
हेतुलक्षणम्,	२०	१२
व्यतिरेकिहेतुलक्षणम्,	२०	१७
उदाहरणलक्षणम्,	२०	२०
व्यतिरेक्युदाहरणलक्षणम्,	२१	३०
उपनयलक्षणम्,	२१	२४
निगमनलक्षणम्,	२२	८
तर्कनिरूपणम्,	२३	१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
निर्णयनिरूपणम्,	२४	१६
वादलक्षणम्,	२५	१६
जल्पलक्षणम्,	२६	१५
वितण्डालक्षणम्,	२७	८
हेत्वाभासविभागः,	२७	१६
सव्यभिचारलक्षणम्,	२७	१८
विरुद्धलक्षणम्,	२८	६
प्रकरणसमलक्षणम्,	२८	१७
साध्यसमलक्षणम्,	२६	४
अतीतकाललक्षणम्,	२६	११
छललक्षणम्,	३०	३
छलविभागः	३०	६
वाक्छललक्षणम्,	३०	६
सामान्यच्छलनिरूपणम्,	३१	७
उपचारच्छललक्षणम्,	३२	३
छलपूर्व्वपक्षः,	३२	१६
तत्समाधानम्,	३२	२०
जातिलक्षणम्,	३३	६
निग्रहस्थानलक्षणम्,	३३	१२
प्रथमाध्यायसमाप्तिः	३३	२४
संशयपूर्व्वपक्षः,	३४	३
संशयसिद्धान्तः,	३५	८
प्रमाणपूर्व्वपक्षः,	३७	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
तत्समाधानम्,	३८	२२
समाधानान्तरम्,	३९	१५
पूर्व्वपक्षान्तरम्,	४१	६
तत्समाधानम्,	४१	१६
प्रत्यक्षलक्षणाक्षेपः,	४२	१२
तत्समाधानम्,	४२	१८
आक्षेपान्तरम्,	४२	२२
समाधानान्तरम्,	४४	५
मनःसिद्धौ युक्तिः	४४	८
प्रत्यक्षसिद्धान्तसूत्रम्,	४५	१
सन्निकर्षाहेतुत्वशङ्का,	४५	८
तत्समाधानम्,	४५	१६
प्रत्यक्षस्यानुमितित्वशङ्का,	४६	५
तत्समाधानम्,	४६	१८
अवयविपूर्व्वपक्षसूत्रम्,	४७	२४
तत्समाधानम्,	४८	१
अवयवसिद्धान्तसूत्रम्,	४८	२०
अनुमानपूर्व्वपक्षसूत्रम्,	५१	८
तत्समाधानम्,	५२	१५
वर्त्तमानाक्षेपः,	५२	१
तत्समाधानम्,	५३	२
उपमानपूर्व्वपक्षसूत्रम्,	५४	१
तत्समाधानम्,	५४	६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	पं०
उपमानस्यानुमानान्तर्भावमतम्,	५४	१२
तत्खण्डनम्,	५५	१
शब्दपूर्वपक्षसूत्रम्,	५५	४
तत्समाधानम्,	५५	१७
वेदप्रामाण्याक्षेपः,	५७	१४
तत्सिद्धान्तः	५८	१
वेदवाक्यविभागः,	५९	२
विधिलक्षणम्;	५९	६
अर्थवादविभागः,	५९	९
अनुवादलक्षणम्,	५९	२३
वेदप्रामाण्ये युक्तिः,	६१	१
प्रमाणचतुष्ट्वाक्षेपः,	६२	११
तत्समाधानम्,	६३	१
शब्दानित्यसाधनम्,	६५	२०
शब्दपरिणामसंशयः,	७४	१७
शब्दविकारनिराकरणम्,	७५	१७
शब्दविकारव्यवहारः,	७६	४
पदनिरूपणम्,	७७	२०
पदार्थसंशयः,	८०	११
केवलव्यक्तिशक्तिखण्डनम्,	८१	१
केवलाकृतिशक्तिमतखण्डनम्,	८१	२०
केवलजातिशक्तिखण्डनम्	८२	१०
पदार्थनिरूपणम्,	८२	१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	पं०
व्यक्तिलक्षणम्,	८२	२१
आकृतिलक्षणम्,	८२	१
जातिलक्षणम्,	८२	८
द्वितीयाध्यायसमाप्तिः	८२	१२
प्रमेयपरीक्षारम्भः,	८३	१५
तत्रापि इन्द्रियचैतन्यवाददूषणम्;	८४	१
शरीरात्मवाददूषणम्,	८५	१४
आक्षेपान्तरम्;	८६	१
तत्समाधानम्;	८६	६
चक्षुरद्वैतप्रकरणम्,	८७	४
तत्खण्डनम्,	८७	७
मनस आत्मत्वशङ्का,	८६	१८
तत्खण्डनम्;	८६	२३
आत्मनित्यत्वप्रतिपादनम्,	६०	२१
शरीरस्यैकभौतिकत्वकथनम्,	६४	१
पार्थिवत्वे युक्त्यन्तरकथनम्;	६४	१५
इन्द्रियभौतिकत्वपरीक्षणम्;	६४	२२
इन्द्रियनानात्वपरीक्षणम्,	१००	१३
अर्थपरीक्षणम्;	१०४	२२
बुद्धेरनित्यतासंशयः;	१०८	१६
बुद्धिनित्यतावादिसाङ्ख्यमतम्;	१०६	६
तत्खण्डनम्;	१०६	१४
साङ्ख्यमतान्तरदूषणम्;	११०	७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
अयुगपदुत्पन्नज्ञानव्युत्पादनादि,	११०	२२
क्षणिकत्वादिसौगतशङ्काकथनम्;	११२	५
सौगतशङ्कासमाधानम्;	११२	१६
सौगतमते साङ्कर्यदूषणम्;	११३	१६
तन्निराकरणादि;	११३	२२
बुद्धेरात्मगुणत्वप्रकरणम्;	११४	२५
बुद्धेरुत्पन्नापवर्गित्वकथनम्	१२४	२६
बुद्धौ शरीरगुणत्वाभावस्य विशिष्यकथनम्;	१२७	१३
मनःपरीक्षाप्रकरणम्;	१२८	४
शरीरस्य तत्तत्पुरुषादृष्टनिष्पाद्यताप्रकरणम्	१३०	१५
तृतीयाध्यायसमाप्तिः	१३६	८
प्रवृत्तिपरीक्षा,	१३६	१२
दोषपरीक्षणम्,	१३६	१५
दोषाणां पक्षत्रयकथनम्,	१३७	१
प्रेत्यभावसिद्धान्तः,	१३८	१४
उत्पत्तिप्रकारप्रदर्शनम्	१३८	२१
शून्यतोपादानप्रकरणम्;	१३८	३६
ब्रह्मपरिणामवादः,	१४०	२०
आकस्मिकत्वनिराकरणप्रकरणम्,	१४१	१८
प्रकरण सर्व्वानित्यत्वनिराकरणप्रकरणम्,	१४२	८
सर्व्वनित्यत्वनिराकरणम्	१४३	४
सर्व्वपृथक्त्वनिराकरणप्रकरणम्,	१४४	१६
सर्व्वशून्यतानिराकरणप्रकरणम्,	१४५	१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
सर्व्वैकान्तवादनिराकरणप्रकरणम्,	१४७	१५
फलपरीक्षाप्रकरणम्,	१४८	७
दुःखपरीक्षा,	१५०	१२
अपवर्गपरीक्षाप्रकरणम्,	१५२	४
तत्त्वज्ञानोत्पत्तिप्रकरणम्,	१५८	४
अवयविप्रकरणम्,	१५९	६
निरवयवप्रकरणम्	१६२	११
वाह्यार्थभङ्गनिराकरणप्रकरणम्	१६४	२०
तत्त्वज्ञानविवृद्धिप्रकरणम्,	१६८	९
चतुर्थाध्यायसमाप्तिः,	१७१	३
जातिविभागसूत्रम्	१७१	६
साधर्म्म्यवैधर्म्म्यसमलक्षणम्	१७१	१०
साधर्म्म्यसमादेरसदुत्तरत्वे वीजम्;	१७१	१७
जातिषट्कनिरूपणम्,	१७२	२५
जातिषट्कासदुत्तरत्ववीजम्,	१७३	१५
प्राप्त्यप्राप्तिसमनिरूपणम्,	१७३	२२
तयोरसदुत्तरत्वे वीजम्	१७४	५
प्रसङ्गप्रतिदृष्टान्तसमनिरूपणम्	१७४	१०
प्रसङ्गसमोत्तरकथनम्,	१७४	१९
प्रतिदृष्टान्तसमोत्तरकथनम्,	१७५	५
अनुत्पत्तिसमलक्षणम्,	१७५	९
तस्योत्तरम्,	१७५	१४
संशयसमनिरूपणम्	१७५	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
तस्योत्तरम्,	१७६	१
प्रकरणसमनिरूपणम्,	१७६	१०
प्रकरणसमोत्तरम्,	१७६	१७
अहेतुसमप्रकरणम्	१७७	१
अर्थापत्तिसमप्रकरणम्,	१७७	१५
अविशेषसमप्रकरणम्,	१७८	६
उपपत्तिसमप्रकरणम्,	१७८	२४
उपलब्धिसमप्रकरणम्,	१७९	११
अनुपलब्धिसमप्रकरणम्,	१७९	२३
अनित्यसमप्रकरणम्,	१८१	१
नित्यसमप्रकरणम्,	१८१	१९
कार्य्यसमप्रकरणम्,	१८२	११
कथाभासप्रकरणम्,	१८२	१६
निग्रहस्थानविभागः,	१८३	१४
प्रतिज्ञाहानिलक्षणम्,	१८६	२
प्रतिज्ञान्तरलक्षणम्,	१८६	११
प्रतिज्ञाविरोलक्षणम्,	१८६	२३
प्रतिज्ञासन्न्यासलक्षणम्,	१८७	५
हेत्वन्तरलक्षणम्,	१८७	१०
अर्थान्तरलक्षणम्,	१८८	१
निरर्थकलक्षणम्,	१८८	८
अविज्ञातार्थलक्षणम्,	१८८	१३
अपार्थकलक्षणम्,	१८९	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
सर्वैकान्तवादनिराकरणप्रकरणम्	१४७	१५
फलपरीक्षाप्रकरणम्,	१४८	७
दुःखपरीक्षा,	१५०	१३
अपवर्गपरीक्षाप्रकरणम्,	१५२	४
तत्त्वज्ञानोत्पत्तिप्रकरणम्,	१५८	४
अवयविप्रकरणम्,	१५९	६
निरवयवप्रकरणम्	१६२	११
बाह्यार्थभङ्गनिराकरणप्रकरणम्	१६४	२०
तत्त्वज्ञानविवृद्धिप्रकरणम्,	१६८	९
चतुर्थाध्यायसमाप्तिः,	१७१	३
जातिविभागसूत्रम्	१७१	६
साधर्म्यवैधर्म्यसमलक्षणम्	१७१	१०
साधर्म्यसमादेरसदुत्तरत्वे बीजम्;	१७१	१७
जातिषट्कनिरूपणम्,	१७२	२५
जातिषट्कासदुत्तरत्वबीजम्,	१७३	१५
प्राप्त्यप्राप्तिसमनिरूपणम्,	१७३	२३
तयोरसदुत्तरत्वे बीजम्	१७४	५
प्रसङ्गप्रतिदृष्टान्तसमनिरूपणम्	१७४	१०
प्रसङ्गसमोत्तरकथनम्,	१७४	१९
प्रतिदृष्टान्तसमोत्तरकथनम्,	१७५	५
अनुत्पत्तिसमलक्षणम्,	१७५	९
तस्योत्तरम्,	१७५	१४
संशयसमनिरूपणम्	१७५	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	प०
तस्योत्तरम्,	१७६	३
प्रकरणसमनिरूपणम्,	१७६	१०
प्रकरणसमोत्तरम्,	१७६	१७
अहेतुसमप्रकरणम्	१७७	१
अर्थापत्तिसमप्रकरणम्,	१७७	१५
अविशेषसमप्रकरणम्,	१७८	६
उपपत्तिसमप्रकरणम्,	१७८	२४
उपलब्धिसमप्रकरणम्,	१७९	११
अनुपलब्धिसमप्रकरणम्,	१७९	२३
अनित्यसमप्रकरणम्,	१८१	१
नित्यसमप्रकरणम्,	१८१	१९
कार्य्यसमप्रकरणम्,	१८२	११
कथाभासप्रकरणम्,	१८२	१६
निग्रहस्थानविभागः,	१८३	२४
प्रतिज्ञाहानिलक्षणम्,	१८६	३
प्रतिज्ञान्तरलक्षणम्,	१८६	११
प्रतिज्ञाविरोलक्षणम्,	१८६	२३
प्रतिज्ञासन्न्यासलक्षणम्,	१८७	५
हेत्वन्तरलक्षणम्,	१८७	१०
अर्थान्तरलक्षणम्,	१८८	१
निरर्थकलक्षणम्,	१८८	९
अविज्ञातार्थलक्षणम्,	१८८	१२
अपार्थकलक्षणम्,	१८९	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृ०	पं०
अप्राप्तकाललक्षणम्,	१८९	१
न्यूनलक्षणम्,	१८९	४
अधिकलक्षणम्,	१८९	७
पुनरुक्तलक्षणम्,	१८९	१०
अननुभाषणलक्षणम्,	१८९	२०
अज्ञानलक्षणम्,	१९०	४
अप्रतिभालक्षणम्,	१९०	८
विक्षेपलक्षणम्,	१९०	११
मतानुज्ञालक्षणम्,	१९०	१५
पर्य्यनुयोज्यानुयोगलक्षणम्,	१९०	२०
निरनुयोज्यानुयोगलक्षणम्,	१९१	४
अपसिद्धान्तलक्षणम्,	१९१	८
हेत्वाभासलक्षणम्,	१९२	१
पञ्चमाध्यायसमाप्तिः,	१९२	६

समाप्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायदर्शनवात्स्यायनभाष्यम्।

सूत्रम् ॐ नमः प्रमाणाय।

भाष्यम् प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्। प्रमाणमन्तरेण नार्थप्रतिपत्तिः। नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः। समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुः दुःखं दुःखहेतुश्च, सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः प्राणभृद्भेदस्यापरिसङ्ख्येयत्वात्। अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति, कस्मात् अन्यतमापायेऽर्थस्यानुपपत्तेः। तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता। स येनार्थं प्रमिणोति तत् प्रमाणम्। योऽर्थः प्रतीयते तत् प्रमेयम्। यदर्थविज्ञानं सा प्रमितिः। चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते। किं पुनस्तत्त्वम्। सतश्च सद्भावोऽसतश्चासद्भावः। सत्सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वम् भवति, असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वम् भवति। कथमुत्तरस्य प्रमाणेनोपलब्धिरिति सत्यप्युपलभ्यमाने तदनुपलब्धेः प्रदीपवत्, यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति। यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति। एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यत् इदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति। सच्च खलु षोडशधा व्यूढमुपदेक्ष्यते तासां खल्वासां सद्विधानाम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥१॥

निर्द्देशे यथावचनं विग्रहः। चार्थे द्वन्द्वः समासः। प्रमाणादीनान्तत्त्वमिति शैषिकी षष्ठी, तत्त्वस्य ज्ञानम् निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ, एतावन्तो विद्यमानार्थाः। एषामविपरीतज्ञानार्थमिहोपदेशः, सोऽयमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः, आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः। तच्चैतदुत्तरसूत्रेणानूद्यत इति। हेयं तस्य निर्वर्त्तकं हानमात्यन्तिकं तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छति। तत्र संशयादीनां पृथग्वचनमनर्थकम् संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति, सत्यमेतत् इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या। तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः। तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते। तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते, किन्तर्हि संशयितेऽर्थे; यथोक्तं "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति," विमर्शः संशयः। पक्षप्रतिपक्षौ न्यायप्रवृत्तिः। अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः प्रमेयेऽन्तर्भवन्नेवमर्थम्पृथगुच्यते। अथ प्रयोजनम्। येन प्रयुक्तः प्रवर्त्तते तत् प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः, तदाश्रयश्च न्यायः प्रवर्त्तते, कः पुनरयं न्यायः। प्रमाणैरर्थपरीक्षणं न्यायः प्रत्यक्षागमाश्रितमनुमानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्। यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते वितण्डया प्रवर्त्तमानो वैतण्डिकः। सप्रयोजनमनुयुक्तो यदि प्रतिपद्यते सोऽस्य पक्षः सोऽस्य सिद्धान्त इति वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते नायं लौकिको न परीक्षक इत्यापद्यते। अथापि परपक्षप्रतिषेधज्ञापनं प्रयोजनं ब्रवीति, एतदपि तादृगेव। यो ज्ञापयति यो जानाति यच्च ज्ञाप्यते एतच्च प्रतिपद्यते यदि तदा वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति। वाक्यसमूहश्च स्थापनाहीनो वितण्डा, तस्य यद्यभिधेयं प्रपिपद्यते सोऽस्य पक्षः स्थापनीयो भवति। अथ न प्रतिपद्यते प्रलापमात्रमनर्थकं भवति वितण्डात्वं निवर्त्तत इति। अथ दृष्टान्तः + प्रत्यक्षविषयोऽर्थः। यत्र लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते स च प्रमेयं तस्य पृथग्वचनञ्च तदाश्रयावनुमानागमौ। तस्मिन् सति स्यातामनुमानागमावसति च न स्याताम्। तदाश्रया च न्यायप्रवृत्तिः। दृष्टान्तविरोधेन च परपक्षप्रतिषेधो वचनीयो भवति दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति, नास्तिकश्च दृष्टान्तमभ्युपगच्छन्नास्तिकत्वं जहाति अनभ्युपगच्छन् किं साधनः परमुपालभेतेति निरुक्तेन दृष्टान्तेन शक्यमभिधातुम् "साध्यसाधर्म्यात् तद्धर्म्मभावी दृष्टान्त उदाहरणं तद्विपरीताद्विपरीतमिति" अस्त्ययमित्यनुज्ञायमानोऽर्थः सिद्धान्तः, स च प्रमेयं, तस्य पृथग्वचनम्, सत्सु सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति, साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते। तेषु प्रमाणसमवाय आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षं, उपनयनमुपमानम्, सर्व्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति सोऽयं परमो न्याय इति एतेन वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति तदाश्रया च तत्त्वव्यवस्था। ते चैतेऽवयवाः शब्दविशेषाः सन्तः प्रमेयेऽन्तर्भूता एवमर्थम् पृथगुच्यन्त इति। तर्को न प्रमाणसङ्गृहीतो न प्रमाणान्तरम् प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्पते, तस्योदाहरणं किमिदं जन्म कृतकेन हेतुना निवर्त्त्यते घाहोस्विदकृतकेन अथाकस्मिकमिति एवमविज्ञ.तेऽर्थे कारणोप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्त्या जहः प्रवर्त्तते, यदि कृतकेन हेतुना निवर्त्त्यते हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः। अथाकृतकेन हेतुना ततो हेतूच्छेदस्याशक्यत्वादनुपपन्नोऽयं जन्मोच्छेदः। अथाकस्मिकमतोऽकस्मान्निवर्त्त्यमानं न पुनर्निर्वर्त्स्यतीति निवृत्तिकारणं नोपपद्यते तेन जन्मानुच्छेद इति। एतस्मिंस्तर्कविषये कर्म्मनिमित्तं जन्मेति प्रमाणानि वर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्वज्ञानविषयस्य विभागात्तत्त्वज्ञानाय कल्प्यते तर्क इति। सोऽयमित्थम् भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वाऽर्थस्य भवतीत्येवमर्थम्पृथगुच्यते प्रमेयान्तर्भूतोऽपीति, निर्णयस्तत्त्वज्ञानम् प्रमाणानां फलम्, तदवसानो वादः, तस्य पालनार्थं जल्पवितण्डे, तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थम् पृथगुद्दिष्ट इति। वादः खलुः नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम्, उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति तद्विशेषौ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम्। निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति, जल्पवितण्डयोस्तु निग्रहस्थानानीति छलजातिनिग्रहस्थानानाम् पृथगुपदेश उपलक्षणार्थं इति। उपलक्षितानां स्ववाक्ये परिवर्जनम्। छलजातिनिग्रहस्थानानाम् परवाक्ये पर्य्यनुयोगः। जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयञ्च सुकरः प्रयोग इति। सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना "प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम्। आश्रयः सर्व्वधर्म्माणां विद्योद्देशे प्रकीर्त्तिता" तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम्। इहत्वध्यात्मविद्यायामात्मादितत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिः। तत् खलु निःश्रेयसं किन्तत्त्वज्ञानानन्तरमेव भवति नेत्युच्यते किन्तर्हि तत्त्वज्ञानात्॥ १॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रात्माद्यपवर्गपर्य्यन्तप्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्त्तते आ-
त्मनि–तावन्नास्तीति अनात्मन्यात्मेति दुःखे सुखमिति अनित्ये नित्य-
मिति अत्राणे त्राणमिति सभये निर्भयमिति जुगुप्सितेऽभिमतमिति
हातव्येऽप्रतिहातव्यमिति, प्रवृत्तौ–नास्ति कर्म्म, नास्ति कर्म्म-फलमिति
दोषेषु–नायं दोषनिमित्तः संसार इति प्रेत्यभावे–नास्ति जन्तुर्जीवो वा
सत्त्व आत्मा वा यः प्रेयात् प्रेत्य च भवेदिति। अनिमित्तं जन्म। अनि-
मित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावोऽनन्तश्चेति नैमित्तिकः सन्न
कर्म्मनिमित्तः प्रेत्यभाव इति। देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिस-
न्धानाभ्यां निरात्मकः प्रेत्यभाव इति। अपवर्गो भीष्मः। स खल्वयं सर्व्व-
कार्य्योपरमः सर्व्वविप्रयोगेऽपवर्गे बहु च भद्रकं लुप्यत इति कथं बुद्धि-
मान् सर्व्वसुखोच्छेदमचैतन्यममुमपवर्गं रोचयेदिति। एतस्मान्मिथ्या-
ज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासूयेर्ष्यामा-
यालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसा-
स्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि मनसा
परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति सेयं पापात्मिका प्रवृत्तिरधर्माय।
अथ शुभा–शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं
प्रियं स्वाध्यायञ्चेति। मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्माय। अत्र
प्रवृत्ति साधनौ धर्म्माधर्म्मौ प्रवृत्तिशब्देनोक्तौ। यथाऽन्नसाधनाः प्राणाः।
"अन्नं वै प्राणिनः प्राणा इति"। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः
कारणम्, जन्म पुनः शरीरेन्द्रिय-बुद्धीनां निकायविशिष्टः प्रादुर्भावः।
तस्मिन् सति दुःखम्, तत्पुनः प्रतिकूलवेदनीयम् बाधना पीडा ताप
इति। इमे मिथ्याज्ञानादयो दुःखान्ता धर्म्मा अविच्छेदेनैव प्रवर्त्तमानाः
संसार इति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये
दोषा अपयन्ति दोषापाये प्रवृत्तिरपैति प्रवृत्त्यपाये जन्मापैति जन्मा-
पाये दुःखमपैति दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेयसमिति। तत्त्व-
ज्ञानन्तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम्, आत्मनि तावदस्तीति
अनात्मन्यनात्मेति एवं दुःखेऽनित्येऽत्राणे सभये जुगुप्सिते हातव्ये च यथा-
विषयं वेदितव्यम्, प्रवृत्तौ अस्ति कर्म्म अस्ति कर्म्मफलमिति दोषेषु दोष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्त्या जन्म: प्रवर्त्तते, यदि कृतकेन हेतुना निवर्त्त्यते हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः। अथाकृतकेन हेतुना ततो हेतूच्छेदस्याशक्यत्वादनुपपन्नोऽयं जन्मोच्छेदः। अथाकस्मिकमतोऽकस्मान्निवर्त्त्यमानं न पुनर्निर्वत्स्यतीति निवृत्तिकारणं नोपपद्यते तेन जन्मानुच्छेद इति। एतस्मिंस्तर्कविषये कर्म्मनिमित्तं जन्मेति प्रमाणानि वर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्वज्ञानविषयस्य विभागात्तत्त्वज्ञानाय कल्प्यते तर्क इति। सोऽयमित्यम् भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वाऽर्थस्य भवतीत्येवमर्थम्पृथगुच्यते प्रमेयान्तर्भूतोऽपीति, निर्णयस्तत्त्वज्ञानम् प्रमाणानां फलम्, तदवसानो वादः, तस्य पालनार्थं जल्पवितण्डे, तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थम् पृथगुद्दिष्ट इति। वादः खलुः नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो वाक्यसमूहः पृथगुद्दिष्ट-उपलक्षणार्थम्, उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति तद्विशेषौ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम्। निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति, जल्पवितण्डयोस्तु निग्रहस्थानानीति छलजातिनिग्रहस्थानानाम् पृथगुपदेश-उपलक्षणार्थ इति। उपलक्षितानां स्ववाक्ये परिवर्जनम्। छलजातिनिग्रहस्थानानाम् परवाक्ये पर्य्यनुयोगः। जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयञ्च सुकरः प्रयोग इति। सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना "प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम्। आश्रयः सर्व्वधर्म्माणां विद्योद्देशे प्रकीर्त्तिता" तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम्। इहत्वध्यात्मविद्यायामात्मादितत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिः। तत् खलु निःश्रेयसं किन्तत्त्वज्ञानानन्तरमेव भवति नेत्युच्यते किन्तर्हि तत्त्वज्ञानात्॥ १॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रात्माद्यपवर्गपर्य्यन्तप्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्त्तते आत्मनि—तावन्नास्तीति अनात्मन्यात्मेति दुःखे सुखमिति अनित्ये नित्यमिति अत्राणे त्राणमिति सभये निर्भयमिति जुगुप्सितेऽभिमतमिति हातव्येऽप्रतिहातव्यमिति, प्रवृत्तौ—नास्ति कर्म्म, नास्ति कर्म्म-फलमिति दोषेषु—नायं दोषनिमित्तः संसार इति प्रेत्यभावे—नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा यः प्रेयात् प्रेत्यच भवेदिति। अनिमित्तं जन्म। अनिमित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावोऽनन्तश्चेति नैमित्तिकः सन्न कर्म्मनिमित्तः प्रेत्यभाव इति। देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति। अपवर्गो भीष्मः। स खल्वयं सर्व्वकार्य्योपरमः सर्व्वविप्रयोगेऽपवर्गे बहु च भद्रकं लुप्यत इति कथं बुद्धिमान् सर्व्वसुखोच्छेदमचैतन्यममुमपवर्गं रोचयेदिति। एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासूयेर्ष्यामायालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति सेयं पापात्मिका प्रवृत्तिरधर्माय। अथ शुभा—शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति। मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्म्माय। अत्र प्रवृत्ति साधनौ धर्म्माधर्म्मौ प्रवृत्तिशब्देनोक्तौ। यथाऽन्नसाधनाः प्राणाः। "अन्नं वै प्राणिनः प्राणा इति"। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्, जन्म पुनः शरीरेन्द्रिय-बुद्धीनां निकायविशिष्टः प्रादुर्भावः। तस्मिन् सति दुःखम्, तत्पुनः प्रतिकूलवेदनीयम् बाधना पीडा ताप इति। इमे मिथ्याज्ञानादयो दुःखान्ता धर्म्मा अविच्छेदेनैव प्रवर्त्तमानाः संसार इति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयन्ति दोषापाये प्रवृत्तिरपैति प्रवृत्त्यपाये जन्मापैति जन्मापाये दुःखमपैति दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेयसमिति। तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम्, आत्मनि तावदस्तीति अनात्मन्यनात्मेति एवं दुःखेऽनित्येऽत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम्, प्रवृत्तौ अस्ति कर्म्म अस्ति कर्म्मफलमिति दोषेषु दोष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमित्तोऽयं संसार इति। प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्त्व आत्मा-वा यः प्रेत्य भवेदिति। निमित्तवज्जन्म निमित्तवान् जन्मोपरम-इत्यनादिः प्रेत्यभावोऽपवर्गान्त-इति नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्तत इति। अपवर्गः शान्तः खल्वयं सर्व्वविप्रयोगः सर्व्वोपरमोऽपवर्गः। बहु च कृच्छ्रं घोरं पापकं लुप्यत इति कथ बुद्धिमान् सर्व्वदुःखोच्छेदं सर्व्वदुःखासंविदपवर्गं न रोचयेदिति। तद्यथा मधुविषसंपृक्तान्नमना-देयमिति एवं सुखं दुःखानुषक्तमनादेयमिति। त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः। उद्देशो लक्षणं परीक्षा चेति, तत्र नामधेयेन पदार्थमात्र-स्याभिधानमुद्देशः, तत्रोद्दिष्टस्याऽतत्त्वव्यवच्छेदको धर्म्मो लक्षणम् लक्षि-तस्य यथा लक्षणमुपपद्यते नवेति प्रमाणैरवधारणं परीक्षा, तत्रोद्दि-ष्टस्य प्रविभक्तस्य लक्षणमुच्यते यथा प्रमाणानां प्रमेयस्य च, उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य वचनविघातोऽर्थविकल्पोपपत्त्या छलम् तत् त्रिविधमिति अथोद्दिष्टस्य विभागवचनम्॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि॥ ३॥

अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानं तदा हानोपा-दानोपेक्षाबुद्धयः फलम्। अनुमानम्। मितेन लिङ्गेनार्थस्य पश्चान्मान-मनुमानम्। उपमानं सारूप्यज्ञानम् यथा गौरेवं गवय इति, सारूप्यन्तु सामान्ययोगः। शब्दः शब्द्यतेऽनेनार्थ इत्यभिधीयते ज्ञाप्यते उपलब्धि-साधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद्बोद्धव्यम्, प्रमीयते-ऽनेनेति करणार्थाभिधानो हि प्रमाणशब्द स्तद्विशेषसमाख्या या अपि तथैव व्याख्यानम्। किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते अथ प्रमेयं व्यवतिष्ठन्त इत्युभयथा दर्शनम्। अस्त्यात्मेत्याप्तोपदेशात् प्रतीयते तत्रा-नुमानमिच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति। प्रत्यक्षं युञ्जा-नस्य योगसमाधिजमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति, अग्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राप्तोपदेशात् प्रतीयते अत्राग्निरिति, प्रत्यासीदता धूमदर्शनेनानुमीयते।
प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते, व्यवस्था पुनरग्निहोत्रं जुहुयात्
स्वर्गकाम इति। लौकिकस्य स्वर्गे न लिङ्गदर्शनं न प्रत्यक्षम्। स्तनयित्नु-
शब्दे श्रूयमाणे शब्दहेतोरनुमानम् तत्र न प्रत्यक्षं नागमः, पाणौ प्रत्यक्षत
उपलभ्यमाने नानुमानं नागम इति। सा चेयं प्रमितिः प्रत्यक्षपरा,
जिज्ञासितमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते।
लिङ्गदर्शनानुमितञ्च प्रत्यक्षतो दिदृक्षते, प्रत्यक्षत उपलब्धेऽर्थे जिज्ञासा
निवर्त्तते। पूर्वोक्तमुदाहरणम् अग्निरिति प्रमातुः प्रमातव्येऽर्थे प्रमा-
णानां सङ्करोऽभि संप्लवः। असङ्करो व्यवस्थेति अथ विभक्तानां लक्षण-
वचनमिति॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकम् प्रत्यक्षम्॥ ४॥

इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम्। न तर्ही-
दानीमिदं भवति आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति,
नेदं कारणावधारणमेतावत् प्रत्यक्षे कारणमिति किन्तु विशिष्टकारण-
वचनमिति यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते, यत्तु समानमनु-
मानादिज्ञानस्य न तन्निवर्त्तत इति। मनसस्तर्हीन्द्रियेण संयोगो वक्तव्यः।
भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त इति याव-
दर्थं वै नामधेयशब्दास्तैरर्थसंप्रत्ययः अर्थसम्प्रत्ययाच्च व्यवहारः। तत्रेदमि-
न्द्रियार्थसन्निकर्षादुत्पन्नमर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति, रूप-
रसशब्दाश्च विषयनामधेयम्। तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते
रसइति जानीते नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दम् प्रसज्यते अत-
आह अव्यपदेश्यमिति। यदिदमनुपयुक्ते शब्दार्थसम्बन्धेऽर्थज्ञानं तन्नामधे-
यशब्देन व्यपदिश्यते, गृहीतेऽपि च शब्दार्थसम्बन्धेऽस्यायं शब्दो नाम-
धेयमिति यदा तु सोऽर्थो गृह्यते तदा तत् पूर्वस्मादर्थज्ञानान्न विशिष्यते
तदर्थविज्ञानं तादृगेव भवति तस्य त्वर्थज्ञानस्यान्यः समाख्याशब्दो नास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येन प्रतीयमानो व्यवहाराय कल्प्येत न चाप्रतीयमानेन व्यवहारः। तस्माज्ज्ञेयस्यार्थस्य संज्ञाशब्देनेतिकरणयुक्तेन निर्दिश्यते रूपमिति ज्ञानं रस इति ज्ञानमिति तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते व्यवहारकाले तु व्याप्रियते, तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति। ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते तच्च प्रत्यक्षम् प्रसज्यत इत्यत आह अव्यभिचारीति यदतस्मिंस्तदिति तद्व्यभिचारि, यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति। दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा, रेणुरिति वा वदेत् तदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानम् प्रत्यक्ष मप्रसज्यत इत्यत आह व्यवसायात्मकमिति, तच्चैतन्मन्तव्यम् आत्ममनःसन्निकर्षजमेवानवधारणज्ञानमिति। चक्षुषा ह्ययमर्थं पश्यन्नावधारयति तथाचेन्द्रियेणोपलब्धमर्थं मनसोपलभते एवमिन्द्रियेणानवधारयन् मनसा नावधारयति यच्चैतदिन्द्रियानवधारणपूर्व्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयो नपूर्वमिति सर्व्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः पश्चात् मनसाऽनुव्यवसायः उपहतेन्द्रियाणामनुव्यवसायाऽभावादिति। आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यम् अनिन्द्रियार्थसन्निकर्षजं हि तदिति, इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात्। भौतिकानीन्द्रियाणि नियतविषयाणि। सगुणानाञ्चैषामिन्द्रियभाव इति। मनस्त्वभौतिकं सर्वविषयञ्च नास्य सगुणस्येन्द्रियभाव इति सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्याम इति। मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति। तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः॥ व्याख्यातम् प्रत्यक्षम्॥

अथ तत्पूर्व्वकं त्रिविधमनुमानम् पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च ॥ ५ ॥

तत्पूर्व्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनम् लिङ्गदर्शनञ्चाभिसम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यते लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते । पूर्ववदिति यत्र कारणेन कार्यमनुमीयते । यथा मेघोन्नत्या भविष्यति वृष्टिरिति । शेषवत्तत् यत्र कार्येण कारणमनुमीयते पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति, सामान्यतो दृष्टं व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति तथाचादित्यस्य तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति । अथ वा पूर्ववदिति यत्र यथा पूर्वं प्रत्यक्षभूतयोरन्यतरदर्शनेनान्यतरस्याप्रत्यक्षस्यानुमानम् । यथा धूमेनाग्निरिति । शेषवन्नाम परिशेषः स च प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः यथा सदनित्यमित्येवमादिना द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो निर्भक्तस्य शब्दस्य तस्मिन् द्रव्यकर्मगुणसंशये न द्रव्यमेकद्रव्यत्वात् न कर्म शब्दान्तरहेतुत्वात् यस्तु शिष्यते सोऽयमिति शब्दस्य गुणत्वप्रतिपत्तिः । सामान्यतो दृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते यथेच्छादिभिरात्मा इच्छादयो गुणाः गुणाश्च द्रव्यसंस्थानाः तद्यदेषां स्थानं स आत्मेति विभागवचनादेतत् त्रिविधमितिसिद्धे त्रिविधवचनम् महतो महाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः तथाचायमित्थम्भूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छले शब्दादिषु च बहुलं समाचारः शास्त्रे इति सद्विषयञ्च प्रत्यक्षं सदसद्विषयञ्चानुमानम्, कस्मात् त्रैकाल्यग्रहणात् त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते भविष्यतीत्यनुमीयते भवतीति चाभूदिति च असच्च खल्वतीतमनागतञ्चेति । अथोपमानम् ॥

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ६ ॥

प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति । यथा गौरेवं गवय इति, किं पुनरत्रोपमानेन क्रियते यदा खल्वयं गवासमानधर्मं प्रतिपद्यते तदा प्रत्यक्षतस्तमर्थं प्रतिपद्यत इति समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्याह । यथा गौरेवं गवय इत्युपमाने प्रयुक्ते गवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानधर्ममर्थमिन्द्रियार्थसन्निकर्षादुपलभमानोऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति। यथा मुद्गस्तथा मुद्गपर्णी यथामाषस्तथा माषपर्णीत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानस्तामोषधीं भैषज्यायाहरति एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति। अथ शब्दः॥

आप्तोपदेशः शब्दः॥ ७॥

आप्तः खलु साक्षात् कृतधर्म्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा साक्षात्करणमर्थस्याप्तिस्तया प्रवर्त्तत इत्याप्तः ऋष्यार्यम्लेच्छानां समानं लक्षणम्। तथा च सर्व्वेषां व्यवहाराः प्रवर्त्तन्त इति। एवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्प्यन्ते नातोऽन्यथेति॥

स द्विविधो दृष्टाऽदृष्टार्थत्वात्॥ ८॥

यस्येह दृश्यतेऽर्थः स दृष्टार्थः यस्यामुत्र प्रतीयते सोऽदृष्टार्थः एवमृषिलौकिकवाक्यानां विभाग इति। किमर्थं पुनरिदमुच्यते स न मन्येत दृष्टार्थ एवाप्तोपदेशः प्रमाणम् अर्थस्यावधारणादिति। अदृष्टार्थोऽपि प्रमाणमर्थस्यानुमानादिति। किं पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति तदुच्यते॥

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्॥ ९॥

तत्रात्मा सर्वस्य द्रष्टा, सर्व्वस्य भोक्ता, सर्व्वज्ञः, सर्व्वानुभावी, तस्य भोगायतनं शरीरम्। भोगसाधनानीन्द्रियाणि भोक्तव्या इन्द्रियार्थाः भोगो बुद्धिः। सर्व्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्व्वविषयमन्तःकरणं मनः शरीरेन्द्रियार्थबुद्धिसुखवेदनानां निर्वृत्तिकारणम्, प्रवृत्तिर्दोषाश्च नास्य, इदं शरीरमपूर्व्वमनुत्तरञ्च, पूर्व्वशरीराणामादिर्नास्ति उत्तरेषामपवर्गोऽन्त इति प्रेत्यभावः। ससाधनसुखदुःखोपभोगः फलम्। दुःखमिति नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्, किन्तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मन एवेदम्, सुखसाधनस्य दुःखानुषङ्गाद्दुःखेनाविप्रयोगाद्विविधबा-धनायोगाद्दुःखमितिसमाधिभावनमुपदिश्यते, समाहितो भावयति, भावयन्निर्विद्यते, निर्विण्णस्य वैराग्यम्, विरक्तस्यापवर्ग इति जन्ममरण-प्रबन्धोच्छेदः सर्व्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्यगुणकर्म्मसा-मान्यविशेषसमवायाः प्रमेयम् तद्भेदेन चाऽपरिसङ्ख्येयम्। अस्य तु तत्त्व-ज्ञानादपवर्गः मिथ्याज्ञानात् संसार इत्यत एतदुपदिष्टं विशेषेणेति। तत्रात्मा तावत् प्रत्यक्षतो न गृह्यते स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति नेत्युच्यते अनुमानाच्च प्रतिपत्तव्य इति कथम्॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्ग-मिति॥ १०॥

यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान् तज्जातीय-मेवार्थं पश्यन्नुपादातुमिच्छति सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धा-नाद्दुःखहेतौ द्वेषः यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थ-म्पश्यन्नादातुम् प्रयतते सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रति-सन्धातारमन्तरेण न स्यात् नियतविषये बुद्धिभेदमात्रे न सम्भवति देहा-न्तरवदिति एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखस्मृत्या चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते सुखदुःखे वेदयते पूर्व्वो-क्तएव हेतुः, बुभुत्समानः खल्वयं विमृशति किंस्विदिति विमृशन् जानीते इदमिति तदिदं ज्ञानं बुभुत्साविमर्शाभ्यामभिन्नकर्त्तृकं गृह्य-माणमात्मलिङ्गम् पूर्व्वोक्तएव हेतुरिति। तत्र देहान्तरवदिति विभज्यते। यथाऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयन्ते तथैकदेहविषया अपि न प्रतिसन्धीयेरन् अविशेषात्, सो ऽयमेकसत्त्वस्य समाचारः स्वयं दृष्टस्य स्मरणं नान्यदृष्टस्येति एवं खलु नानासत्त्वानां समाचारोऽन्यदृष्टमन्ये न स्मरन्तीति। तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमिति एवमुपपन्नमस्त्यात्मेति। तस्य भोगाधिष्ठानम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥

कथं चेष्टाश्रयः। ईप्सितं जिहासितं वाऽर्थमधिकृत्येप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा सा यत्र वर्त्तते तच्छरीरम्। कथमिन्द्रियाश्रयः। यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु वर्त्तन्ते स एषामाश्रयस्तच्छरीरम्, कथमर्थाश्रयः यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरमिति। भोगसाधनानि पुनः ॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १२ ॥

जिघ्रत्यनेनेति घ्राणं गन्धं गृह्णातीति, रसयत्यनेनेति रसनं रसं गृह्णातीति। चष्टेऽनेनेति चक्षु रूपं पश्यतीति, स्पृशत्यनेनेति स्पर्शनम् त्वक्स्थानमिन्द्रियं त्वक् तदुपचारः स्थानादिति। शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति एवं समाख्यानिर्वचनसामर्थ्याद्बोध्यम् स्वविषयग्रहणलक्षणानीन्द्रियाणीति। भूतेभ्य इति नानाप्रकृतीनामेषां सतां विषयनियमो नैकप्रकृतीनां सति च विषय नियमे स्वविषयग्रहणलक्षणत्वं भवतीति। कानि पुनरिन्द्रियकारणानि ॥

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ ॥ १३ ॥

संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां सुवचं कार्य्यम्भविष्यतीति। इमे तु खलु ॥

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १४ ॥

पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति। अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः चेतनस्याकर्त्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाणक इवेदमाह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥

नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हति तद्धि चेतनं स्यात् एकश्चायं चेतनो देहेन्द्रियसङ्घातव्यतिरिक्त इति प्रमेयलक्षणार्थस्याऽपि वाक्यस्यान्यार्थप्रकाशनसुपपत्तिसामर्थ्यादिति। स्मृत्यनुमानागमसंशय-प्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि तेषु सत्स्वियमपि ॥

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥

अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति युगपच्च खलु घ्राणादीनां गन्धादीनाञ्च सन्निकर्षेषु सत्सु युगपज्ज्ञानानि नोत्पद्यन्ते तेनानुमीयते अस्ति तत्तदिन्द्रियसंयोगि सहकारिनिमित्तान्त-रमव्यापि यस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यत इति मनःसंयो-गानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञाना-नीति। क्रमप्राप्ता तु ॥

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ॥ १७ ॥

मनोऽत्र बुद्धिरित्यभिप्रेतं, बुध्यतेऽनेनेति बुद्धिः, सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः, तदेतत् कृतभाष्यं द्वितीयसूत्र इति ॥

प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥

प्रवर्त्तना प्रवृत्तिहेतुत्वम् ज्ञातारं हि रागादयः प्रवर्त्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति प्रत्यात्मवेदनीया ह्येमे दोषाः कस्मात् लक्षणतो निर्दिश्यन्त इति कर्मलक्षणाः खलु रक्तद्विष्टमूढाः रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा भजते, तथा द्विष्ट-स्तथा मूढ इति दोषा रागद्वेषमोहा इत्युच्यमाने बहुनोक्तं भवतीति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥

उत्पन्नस्य क्वचित् सत्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। उत्पन्नस्य सम्बद्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः, पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः पुनरित्यभ्यासाभिधानम्। यत्र क्वचित् प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत्प्रैति यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति॥

प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥

सुखदुःखसंवेदनं फलम् सुखविपाकं कर्म दुःखविपाकञ्च तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वम्भवति तदेतत् फलमुपात्तमुपात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वाऽस्ति न खल्वयं फलस्य हानोपादानस्रोतसोह्यते लोक इति। अथैतदेव॥

बाधनालक्षणं दुःखमिति ॥ २१ ॥

बाधना पीडा ताप इति। तयानुविद्धमनुषक्तमविनिर्भागेन वर्त्तमानं दुःखयोगाद्दुःखमिति सोऽयं सर्वं दुःखेनानुविद्धं इदमिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते निर्विण्णो विरज्यते विरक्तो विमुच्यते यत्र तु निष्ठा सोऽयं यत्र तु पर्य्यवसानम्॥

तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥

तेन दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्गः कथमुपात्तस्य जन्मनो हानमन्यस्य चानुपादानम् एतामवस्थामपर्य्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः दभयमजरममृत्युपदं ब्रह्मक्षेमप्राप्तिरिति। नित्यं सुखमात्मनो महत्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यन्तं विमुक्तः सुखी भवतीति केचिन्मन्यन्ते तेषां प्रमाणाभावादनुपपत्तिः, न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्ववन्मोक्षेऽभिव्यज्यत इति नित्यस्याभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यक्तिः संवेदनं ज्ञानमिति तस्य हेतुर्वाच्यो यतस्तदुपपद्यत इति, सुखव-
न्नित्यमिति चेत् संसारस्थस्य मुक्तेनाऽविशेषः यथा मुक्तः सुखेन तत्
संवेदनेन च सन्नित्येनोपपन्नस्तथा संसारस्थोऽपि प्रसज्यत इति । उभयस्य
नित्यत्वात् अभ्यनुज्ञाने च धर्म्माधर्म्मफलेन साहचर्य्यं यौगपद्यं गृह्येत
यदिदमुत्पत्तिस्थानेषु धर्म्माधर्म्मफलं सुखं दुःखं वा संवेद्यते पर्य्यायेण तस्य
च नित्यं स्वसंवेदनस्य च सह भावो यौगपद्यं गृह्येत न सुखाभावो नाऽ-
नभिव्यक्तिरस्ति उभयस्य नित्यत्वात् अनित्यत्वे हेतुवचनम् । अथ मोक्षे
नित्यस्य सुखस्य संवेदनमनित्यं यत उत्पद्यते स हेतुर्वाच्यः आत्ममनःसंयो-
गस्य निमित्तान्तरसहितस्य हेतुत्वम् । आत्ममनःसंयोगो हेतुरिति चेत्
एवमपि तस्य सहकारिनिमित्तान्तरं वचनीयमिति धर्मस्य कारणवचनम्
यदि धर्मो निमित्तान्तरं तस्य हेतुर्वाच्यो यत उत्पद्यत इति योगसमाधिजस्य
कार्य्यावसायविरोधात् प्रलये संवेदनानिवृत्तिः, यदि योगसमाधिजो
धर्मो हेतुस्तस्य कार्य्यावसायविरोधात् प्रक्षये संवेदनमत्यन्तं निवर्त्तयति
असंवेदने चाविद्यमानाविशेषः यदि धर्मक्षयात् संवेदनोपरमो नित्यं
सुखं न संवेद्यत इति किं विद्यमानं न संवेद्यते अथाविद्यमानमिति
नानुमानं विशिष्टेऽस्तीति अप्रक्षयश्च धर्मस्य निरनुमानमुत्पत्तिधर्मकत्वात्
योगसमाधिजो धर्मो न क्षीयते इति नास्त्यनुमानमुत्पत्तिधर्मकमनित्य-
मिति विपर्य्ययस्य त्वनुमानम् यस्य तु संवेदनोपरमो नास्ति तेन संवेदनेन
हेतुर्नित्य इत्यनुमेयम् । नित्ये च मुक्तसंसारस्थयोरविशेष इत्युक्तम्
यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च संवेदनस्य तूपरमो नास्ति कारणस्य
नित्यत्वात् तथा संसारस्थस्यापीति एवञ्च सति धर्म्माधर्म्मफलेन सुखदुःख-
संवेदनेन साहचर्य्यं गृह्येतेति । शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति
चेत् न शरीरादीनामुपभोगार्थत्वात् विपर्य्ययस्य चाननुमानात् । स्यान्-
मतं संसारावस्थशरीरादिसम्बन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकस्तेना-
विशेषो नास्तीति, एतच्चायुक्तम् शरीरादय उपभोगार्थास्ते भोगप्रतिबन्धं
करिष्यन्तीत्यनुपपन्नम् न चास्त्यनुमानमशरीरस्यात्मनो भोगः कश्चिदस्तीति,
इष्टाधिगमार्था प्रवृत्तिरिति चेत् न अनिष्टोपरमार्थत्वात् इष्टाधिगमार्थो
मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणामिति नेष्टमनिष्टेनाननुविद्धं सम्भवतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टमप्यनिष्टं सम्पद्यते अनिष्टहानाय घटमान इष्टमपि जहाति विवेकहानस्याशक्यत्वादिति दृष्टातिक्रमश्च देहादिषु तुल्यः यथा दृष्टमनित्यं सुखं परित्यज्य नित्यं सुखं कामयते एवं देहेन्द्रियबुद्धिरनित्या दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः, साधीयश्चैवं मुक्तस्य चैकात्म्यं कल्पितम्भवतीति, उपपत्तिविरुद्धमिति चेत् समानम्। देहादीनां नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति समानं सुखस्यापि नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति, आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमेऽपि सत्यविरोधः यद्यपि कश्चिदागमः स्यान्मुक्तस्यात्यन्तिकं सुखमिति सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते। दृष्टो हि दुःखाभावे सुखशब्दप्रयोगो बहुलं लोक इति, नित्यसुखरागस्याप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाज्ञानात् यद्ययं मोक्षे नित्यं सुखमभिव्यज्यत इति नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तुमर्हतीति बन्धनसमाज्ञातो हि रागः न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यत इति प्रहीणनित्यसुखरागस्याप्रतिकूलत्वम् अथास्य नित्यसुखरागः प्रहीयते तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवति यद्येवं मुक्तस्य नित्यं सुखं भवति अथापि न भवति नास्योभयोः पक्षयो मोक्षाधिगमो विकल्प्यत इति। स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते ॥

समानानेकधर्म्मोपपत्ते र्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ २३ ॥

समानधर्म्मोपपत्ते र्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानं धर्म्ममारोहपरिणाहौ पश्यन् पूर्व्वदृष्टञ्च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरन्नावधारयति तदनवधारणं ज्ञानं संशयः समानमनयो र्धर्म्ममुपलभे विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्त्तिका वर्त्तते, तेन विशेषापेक्षो विमर्शः संशयः। अनेकधर्म्मोपपत्तेरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानजातीयमसमानजातीयञ्चानेकम् तस्यानेकस्य धर्म्मोपपत्ते र्विशेष-स्योभयथा दृष्टत्वात् समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्था विशेष्यन्ते। गन्धवत्त्वात् पृथिवी अवादिभ्यो विशिष्यते गुणकर्म्मभ्यश्च, अस्ति च शब्दे विभागजत्वं विशेषः, तस्मिन् द्रव्यं गुणः कर्म्म वेति सन्देहः विशेषस्योभयथा दृष्टत्वात् किं द्रव्यस्य सतो गुणकर्म्मभ्यो विशेष आहोस्विद्गुणस्य सत इति अथ कर्म्मणः सत इति विशेषापेक्षा अन्यतमस्य व्यवस्थापकं धर्म्मन्नोपलभे इति बुद्धिरिति। विप्रतिपत्तेरिति व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति अस्त्यात्मेत्येकं दर्शनम् नास्त्यात्मेत्यपरम्, न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति। उपलब्ध्यव्यवस्थातः खल्वपि सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु वाऽविद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथासदिति संशयो भवति। अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चानुत्पन्नं विरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उतासदिति संशयो भवति विशेषापेक्षा पूर्व्ववत्, पूर्व्वः समानोऽनेकश्च धर्म्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे, एतावता विशेषेण पुनर्वचनम्, समानधर्म्माधिगमात् समानधर्म्मोपपत्ते र्विशेषस्मृत्यपेक्षो विमर्श इति, स्थानवतां लक्षणवचनमिति समानम्॥

यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम् ॥२४॥

यमर्थमाप्तव्यं हातव्यं वाऽध्यवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनन्तद्वेदितव्यम्, प्रवृत्तिहेतुत्वा-दिममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः, एवं व्यवसीयमानोऽर्थोऽधिक्रियत इति॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥

लोकसाम्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति, यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति। दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति। अवयवेषु चोदाहरणाय कल्पत इति। अथ सिद्धान्तः। इदमित्यम्भूतञ्चेत्यभ्यनुज्ञायमानमर्थजातं सिद्धं सिद्धस्य संस्थितिः सिद्धान्तः। संस्थितिरित्यम्भावव्यवस्था, धर्म्मनियमः। स खल्वयम् ॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥२६॥

तन्त्रार्थसंस्थितिस्तन्त्रसंस्थितिः। तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेशः शास्त्रम्। अधिकरणानुषक्तार्था संस्थितिरधिकरणसंस्थितिः। अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः। तन्त्रभेदात्तु खलु स चतुर्व्विधः ॥

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

तत्रैताश्चतस्रः संस्थितयोऽर्थान्तरभूताः, तासाम् ॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥

यथा घ्राणादीनीन्द्रियाणि गन्धादय इन्द्रियार्थाः पृथिव्यादीनि भूतानि प्रमाणैरर्थस्य ग्रहणमिति ॥

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥

यथा नासत आत्मलाभः न सत आत्महानं निरतिशयाश्चेतनाः देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति सांख्यानाम्, पुरुष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्म्मनिमित्तो भूतसर्गः, कर्म्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते, उत्पन्नं निरुध्यते इति, योगानाम् ॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ ३० ॥

यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते न तैर्विना सोऽर्थः सिध्यति तेऽर्था यदधिष्ठानाः सोऽधिकरणसिद्धान्तः यथा देहेन्द्रियव्यतिरिक्तो ज्ञाता, दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति। अत्रानुषङ्गिणोऽर्था इन्द्रियनानात्वं नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि गन्धादिगुणव्यतिरिक्तं द्रव्यं गुणाधिकरणं नियतविषयाश्चेतना इति पूर्व्वार्थसिद्धावेतेऽर्थाः सिद्ध्यन्ति न तैर्विना सोऽर्थः सम्भवतीति ॥

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

यत्र किञ्चिदर्थजातमभ्युपगम्यते अस्तु द्रव्यं शब्दः, स तु नित्योऽथानित्य इति द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्त्तत इति। अथावयवाः।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः॥ ॥ ३२ ॥

दशावयवानेके नैयायिका वाक्ये सञ्चक्षते। जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति ते कस्मान्नोच्यन्त इति तत्राप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्त्तिका जिज्ञासा अप्रतीयमानमर्थं कस्माज्जिज्ञासते तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये वा,उपेक्षिष्ये वेति तावता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते सा खल्वियमसाधनमर्थस्येति, जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्म्मोपसङ्घातात् तत्त्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाने प्रत्यासन्नः व्याहतयोर्हि धर्म्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति स पृथगुपदिष्टोऽप्यसाधनमर्थस्येति, प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि सा शक्यप्राप्तिर्न साधकस्य वाक्यस्य भागेन युज्यते प्रतिज्ञादिवदिति प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति, संशयव्युदासः प्रतिपक्षोपवर्णनम् तत्प्रतिषेधेन तत्त्वज्ञानाभ्यनुज्ञानार्थं न त्वयं साधकवाक्यैकदेश इति प्रकरणे तु जिज्ञासादयः समर्थाः अवधारणीयार्थोपकारा अर्थसाधकाभावात्तु प्रतिज्ञादयः साधकवाक्यस्य भागः एकदेशा अवयवा इति। तेषां तु यथाविभक्तानाम् ॥

साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनम् प्रतिज्ञा साध्यनिर्द्देशः अनित्यः शब्द इति ॥

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥३४॥

उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधनं प्रज्ञापनम् हेतुः साध्ये प्रतिसन्धाय धर्म्ममुदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः उत्पत्तिधर्म्मकत्वादिति उत्पत्तिधर्म्मकमनित्यं दृष्टमिति। किमेतावद्धेतुलक्षणमिति नेत्युच्यते किन्तर्हि ॥

तथा वैधर्म्यात् ॥ ३५ ॥

उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः कथम् अनित्यः शब्द उत्पत्तिधर्म्मकत्वात् अनुत्पत्तिधर्म्मकं नित्यं यथात्मादि द्रव्यमिति ॥

साध्यसाधर्म्यात् तद्धर्म्मभावी दृष्टान्त उदाहरणम् ॥ ३६ ॥

साध्येन साधर्म्यं समानधर्म्मता साध्यसाधर्म्यात् कारणात् तद्धर्म्मभावी दृष्टान्त इति तस्य धर्म्मस्तद्धर्म्मः तस्य साध्यस्य साध्यञ्च द्विविधम् धर्म्मिविशिष्टो वा धर्म्मः शब्दस्यानित्यत्वम्। धर्म्मविशिष्टो वा धर्म्मी अनित्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्द इति, इहोत्तरत्नद्वयेन गृह्यत इति कस्मात् पृथग्धर्मवचनात्। तस्य धर्मस्तद्धर्मस्तस्य भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावी भवति स चोदाहरणमिष्यते तत्र यदुत्पद्यते तदुत्पत्तिधर्मकम् तच्च भूत्वा न भवति आत्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्मकत्वं साधनमनित्यत्वं साध्यं सोऽयमेकस्मिन् द्वयोर्धर्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाह्रियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्॥

तद्विपर्य्ययाद्वा विपरीतम्॥ ३७॥

दृष्टान्त उदाहरणमिति प्रकृतं साध्यवैधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति अनित्यःशब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यमात्मादि सोऽयमात्मादि दृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावी योऽसौ साध्यस्य धर्मोऽनित्यत्वं स तस्मिन् भवतीति। अत्रात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्याभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्य्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति साधर्म्योक्तस्य हेतोः साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणम् पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोति उत्तरस्मिन् दृष्टान्ते ययो धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये अनुमिनोतीति, तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासाः तदिदं हेतूदाहरणयोः सामर्थ्यम्परमसूक्ष्मं दुःखबोधं पण्डितरूपवेदनीयमिति॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः॥ ३८॥

उदाहरणापेक्ष उदाहरणतन्त्रः उदाहरणवशः, वशः सामर्थ्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थम्, साध्यसाधर्म्ययुक्ते उदाहरणे स्थाल्यादिद्रव्यमुत्पत्तिधर्म्मकमनित्यं दृष्टम् तथा शब्द उत्पत्तिधर्म्मक इति साध्यस्य शब्दस्योत्पत्तिधर्म्मकत्वमुपसंह्रियते, साध्यवैधर्म्ययुक्ते पुनरुदाहरणे आत्मादिद्रव्यमनुत्पत्तिधर्म्मकं नित्यं दृष्टं न च तथा शब्द इति अनुत्पत्तिधर्म्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्म्मकत्वमुपसंह्रियते तदिदमुपसंहारद्वैतमुदाहरणद्वैताद्भवति उपसंह्रियतेऽनेनेति चोपसंहारो वेदितव्य इति। द्विविधस्य पुनर्हेतोर्द्विविधस्य चोदाहरणस्योपसंहारद्वैते च समानम्॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३९ ॥

साधर्म्योक्ते वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम्, निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम् निगम्यन्ते समर्थ्यन्ते सम्बध्यन्ते, तत्र साधर्म्योक्ते तावद्धेतौ वाक्यमनित्यः शब्दः इति प्रतिज्ञा, उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम्, तथाचोत्पत्तिधर्मकः शब्द इत्युपनयः, तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम्, वैधर्म्योक्तेऽपि अनित्यः शब्द, उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकमात्मादिद्रव्यं नित्यं दृष्टम्, न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति, अवयवसमुदाये च वाक्ये सम्भूय इतरेतराभिसम्बन्धात् प्रमाणान्यर्थं साधयन्तीति, सम्भवस्तावच्छब्दविषया प्रतिज्ञा आप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसन्धानादनृषेश्च स्वातन्त्र्यानुपपत्तेः अनुमाने हेतुः उदाहरणे संदृश्यप्रतिपत्तेः, तच्चोदाहरणं भाष्ये व्याख्यातम् प्रत्यक्षविषयमुदाहरणम् दृष्टेनादृष्टसिद्धेः। उपमानमुपनयः तथेत्युपसंहारात् न च तथेत्युपमानधर्मप्रतिषेधे विपरीतधर्मोपसंहारसिद्धेः, सर्वेषामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शनं निगमनमिति। इतरेतराभिसम्बन्धोऽप्यसत्यां प्रतिज्ञायामनाश्रया हेत्वादयो न प्रवर्त्तेरन्, असति हेतौ कस्य साधनभावः प्रदर्श्यते उदाहरणे साध्ये च कस्योप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहारः स्यात् कस्य चापदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनं स्यादिति, असत्युदाहरणे केन साधर्म्यं वैधर्म्यं वा साध्यसाधनमुपादीयेत कस्य वा साधर्म्यवशादुपसंहारः प्रवर्त्तेत, उपनयनञ्चान्तरेण साध्येऽनुपसंहृतः साधको धर्मो नार्थं साधयेत्, निगमनाभावे वानभिव्यक्तसम्बन्धानां प्रतिज्ञादीनामेकार्थेन प्रवर्त्तनं तथेति प्रतिपादनं कस्येति। अथावयवार्थः साध्यस्य धर्मस्य धर्मिणा सम्बन्धोपादानं प्रतिज्ञार्थः। उदाहरणेन समानस्य विपरीतस्य वा धर्मस्य साधकभाववचनं हेत्वर्थः, धर्मयोः साध्यसाधनभावप्रदर्शनमेकत्वोदाहरणार्थः। साधनभूतस्य धर्मस्य साध्येन धर्मेण सामानाधिकरण्योपपादनमुपनयार्थः। उदाहरणस्थयो-धर्मयोः साध्यसाधनभावोपपत्तौ साध्ये विपरीतप्रसङ्गप्रतिषेधार्थन्निगमनम्। न चैतस्यां हेतूदाहरणपरिशुद्धौ सत्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिनिग्रहस्थानबहुत्वं प्रक्रमते, अव्यवस्थाप्य खलु साध्यसाधनभावमुदाहरणे जातिवादी प्रत्यवतिष्ठते व्यवस्थिते तु खलु धर्मयोः साध्यसाधनभावे दृष्टान्तस्थे गृह्यमाणे साधनभूतस्य धर्मस्य हेतुत्वेनोपमानं न साधर्म्यमात्रस्य न वैधर्म्यमात्रस्य वेति। अत ऊर्द्ध्वं तर्को लक्षणीय इति अथेदमुच्यते ॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ४० ॥

अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते जानीयेममर्थमिति, अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति किंस्विदित्यमाहोस्विन्नेत्थमिति विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति, कारणोपपत्त्या स्यादेवमेतन्नेतरदिति तत्र निदर्शनम् योऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तन्तु भो जानीयेति जिज्ञासा, स किमुत्पत्तिधर्मकोऽनुत्पत्तिधर्मक इति विमर्शः, विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति, यद्ययमनुत्पत्तिधर्मकस्ततः स्वकृतस्य कर्मणः फल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुभवति ज्ञाता, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणमुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति स्यातां संसारापवर्गौ, उत्पत्तिधर्मके ज्ञातरि पुनर्न स्याताम्, उत्पन्नः खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलमुत्पन्नश्च भूत्वा न भवतीति तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति, तदेवमेकस्यानेकशरीरयोगः शरीरादिवियोगश्चात्यन्तं न स्यादिति। यत्र कारणमनुपपद्यमानं पश्यति तत्रानुजानाति, सोऽयमेवं लक्षण ऊहस्तर्क इत्युच्यते। कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति अनव- धारणात् अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या न त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति। कथं तत्त्वज्ञानार्थ इति, तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणादूहाद्भावितात् प्रसन्नादनन्तरप्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यत इत्येव तत्त्वज्ञानार्थ इति। सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो वादे उपदिष्ट इत्यविज्ञाततत्त्वमनुजानातीति यथा सोऽर्थो भवति तस्य यथाभावस्तत्त्वमविपर्ययो याथातथ्यम्। एतस्मिंश्च तर्क विषये।

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४१ ॥

स्थापना साधनं, प्रतिषेध उपालम्भः, तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्येते, तयोरन्यतरस्य निवृत्तिरेकतरस्यावस्थानम् अवश्यम्भावि, यस्यावस्थानं तस्यावधारणं निर्णयः। नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति एको हि प्रतिज्ञातमर्थं हेतुतः स्थापयति प्रतिषिद्धं चोद्धरतीति द्वितीयस्य द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुश्चोद्ध्रियते स निवर्त्तते तस्य निवृत्तौ योऽवतिष्ठते तेनार्थावधारणं निर्णय इति उभाभ्यामेवार्थावधारणमित्याह, कया युक्त्या एकस्य सम्भवो द्वितीयस्यासम्भवः तावेतौ सम्भवासम्भवौ विमर्शं सह निवर्त्तयतः, उभयसम्भवे उभयासम्भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वनिवृत्तो विजयं इति । विमृश्येति विमर्शं कृत्वा, सोऽयं विमर्शः पक्षप्रतिपक्षाभावद्योत्यं न्यायं प्रवर्त्तयतोत्युपादीयत इति, एतच्च विरुद्धयोरेकधर्मिस्थयोर्बोद्धव्यं, यत्र तु धर्मिसामान्यगतौ विरुद्धौ धर्मौ हेतुतः सम्भवतः तत्र समुच्चयहेतुतोऽर्थस्य तत्त्वाभावोपपत्तेः, यथा क्रियावद्द्रव्यमिति लक्षणवचने यस्य द्रव्यस्य क्रियायोगो हेतुतः सम्भवति तत् क्रियावत् यस्य न सम्भवति तदक्रियमिति, एकधर्मिस्थयोश्च विरुद्धयोरयुगपद्भाविनोः कालविकल्पः यथा तदेव द्रव्यं क्रियायुक्तं क्रियावत् अनुत्पन्नोपरतक्रियं पुनरक्रियमिति । न चायं निर्णये नियमो विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति किन्त्विन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षेऽर्थावधारणं निर्णय इतिपरीक्षाविषये तु विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः शास्त्रे वादे च विमर्शवर्जम् ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाऽध्यायस्य
प्रथममाह्निकम् ।

तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति तासाम् ।

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥४२॥

एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावादस्त्यात्मा नास्त्यात्मेति, नानाधिकरणौ विरुद्धौ न पक्षप्रतिपक्षौ यथा नित्य आत्मा अनित्या बुद्धिरिति, परिग्रहोऽभ्युपगमव्यवस्था, सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भः प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति, साधनं स्थापना, उपालम्भः प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षेधः, तौ साधनोपालम्भौ उभयोरपि पक्षयोर्व्यतिषक्तावनुबद्धौ च यावदेको निवृत्त एकतरो व्यवस्थित इति निवृत्तस्योपालम्भो व्यवस्थितस्य साधनमिति जल्पे निग्रहस्थानविनियोगत्वादेतत्प्रतिषेधः, प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम्, सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति हेत्वाभासस्य निग्रहस्थानस्याभ्यनुज्ञावादे पञ्चावयवोपपन्न इति, हीनमन्यतमेनाप्यवयवेन न्यूनम् हेतूदाहरणाधिकमधिकमिति चैतयोरभ्यनुज्ञानार्थमिति अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम्। अन्यथोभावपि पक्षौ स्थापनाहेतुना प्रवृत्तौ वाद इति स्यात्। अन्तरेणाप्यवयवसम्बन्धम् प्रमाणान्यर्थं साधयन्तीति दृष्टम् तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति। छलजातिनिग्रस्थानसाधनोपालम्भो जल्प इति वचनाद्विनिग्रहो जल्प इति मा विज्ञायि। छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्पः प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायीत्येवमर्थं पृथक् प्रमाणतर्कग्रहणमिति।

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ ४३ ॥

यथोक्तोपपन्न इति प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः। छलजातिनिग्रहस्थानसाधनोपालम्भ इति। छलजातिनिग्रहस्थानैः साधनमुपालम्भश्चास्मिन् क्रियत इति। एवंविशेषणो जल्पः न खलु वै छलजातिनिग्रहस्थानैः साधनं कस्यचिदर्थस्य सम्भवति प्रतिषेधार्थं चैषां सामान्यलक्षणे च श्रूयते वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति। विशेषलक्षणेष्वपि यथास्वमिति न चैतद्विजानीयात् प्रतिषेधार्थतयैवार्थं साधयन्तीति। छलजातिनिग्रहस्थानोपालम्भ इत्येवमप्युच्यमाने विज्ञायत एतदिति। प्रमाणैः साधनोपालम्भयोश्छलजातीनामङ्गभावो रक्षणार्थत्वात् न तु स्वतन्त्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधनभावः। यत् तत्प्रमाणैरर्थस्य साधनं तत्र छलजातिनिग्रहस्थानानामङ्गभावो रक्षणार्थत्वात्, तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षयन्ति। तथा चोक्तम्। "तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे वीजप्ररोहरक्षणार्थं कण्टकशाखावरणवदिति"। यश्चासौ प्रमाणैः प्रतिपक्षस्योपालम्भस्तस्य चैतानि प्रयुज्यमानानि प्रतिषेधविघातात्सहकारीणि भवन्ति तदेवमङ्गीभूतानां छलादीनामुपादानम् जल्पे न स्वतन्त्राणां साधनभावः। उपालम्भे तु स्वातन्त्र्यमप्यस्तीति।

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ४४ ॥

स जल्पो वितण्डा भवति, किं विशेषणः प्रतिपक्षस्थापनया हीनः, यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ पक्षप्रतिपक्षावित्युक्तौ तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्तत इति। अस्तु तर्हि स प्रतिपक्षहीनो वितण्डा यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्षः न त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति तस्माद्यथान्यासमेवास्त्विति हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमाना स्त इमे॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४५ ॥

तेषाम्॥

अनैकान्तिकः सव्यभिचारः ॥ ४६ ॥

व्यभिचार एकत्राव्यवस्था सह व्यभिचारेण वर्तत इति सव्यभिचारः, निदर्शनम् नित्यः शब्दोऽस्पर्शत्वात् स्पर्शवान् कुम्भोऽनित्यो दृष्टो न च तथा स्पर्शवान् शब्दस्तस्मादस्पर्शत्वान्नित्य शब्द इति दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ दृश्येते स्पर्शवांश्चाणुर्नित्यश्चेति। आत्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति। अस्पर्श-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादिति हेतुर्नित्यत्वं व्यभिचरति अस्पर्शा बुद्धिरनित्या चेति, एवं द्विविधेऽपि दृष्टान्ते व्यभिचारात् साध्यसाधनभावो नास्तीति लक्षणाभावादहेतुरिति। नित्यत्वमप्येकोऽन्तः। अनित्यत्वमप्येकोऽन्तः, एकस्मिन्नन्ते विद्यत इति ऐकान्तिकः। विपर्य्ययादनैकान्तिकः उभयान्तव्यापकत्वादिति॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः॥ ४७॥

तं विरुणद्धीति तद्विरोधी अभ्युपेतं सिद्धान्तं व्याहन्तीति यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधादपेतोऽप्यस्ति विनाशप्रतिषेधात् न नित्यो विकार उपपद्यते इत्येव हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथम् व्यक्तिरात्मलाभः अपायः प्रच्युतिः यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यद्व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभात्प्रच्युतेरुपपत्तिः। यदात्मलाभात्प्रच्यवते तदनित्यं दृष्टं यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं चात्मलाभात् प्रच्युतिरिति विरुद्धावेतौ न सह सम्भवत इति सोऽयं हेतुर्यत्सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति॥

यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः॥ ४८॥

विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणम्, तस्य चिन्ता विमर्शात्प्रभृति प्राङ्निर्णयाद्यत् समीक्षणं सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्त्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते प्रज्ञापनं तु अनित्यः शब्दो नित्यधर्मानुपलब्धेरित्यनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टं स्थाल्यादि, यत्र समानो धर्मः संशयकारणं हेतुत्वेनोपादीयते स संशयसमः सव्यभिचार एव। या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिस्स सा प्रकरणं प्रवर्त्तयति, वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धम्। विपर्य्यये हि प्रकरणनिवृत्तेः यदि नित्यधर्मशब्दे गृह्यते न स्यात् प्रकरणम् यदि वा अनित्यधर्मो गृह्येत एवमपि निवर्त्तेत प्रकरणम् सोऽयं हेतुरुभौ पक्षौ प्रवर्त्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥ ४९ ॥

द्रव्यं छायेति साध्यम्, गतिमत्वादिति हेतुः साध्येनाविशिष्टः साधनीयत्वात्साध्यसमः, अयमप्यसिद्धत्वात् साध्यवत्प्रज्ञापयितव्यः, साध्यं तावदेतत् किं पुरुषवच्छायापि गच्छति आहोस्विदावरकद्रव्ये संसर्पति आवरणसन्तानादसन्निधिसन्तानोऽयं तेजसो गृह्यत इति सर्पता खलु द्रव्येण ज्ञानद्योयस्तेजोभाग आव्रियते तस्य तस्यासन्निधिरेवावच्छिन्नो गृह्यत इति। आवरणन्तु प्राप्तिप्रतिषेधः॥

कालात्ययापदिष्टः कालातीतः ॥ ५० ॥

कालात्ययेन युक्तो यस्यार्थस्यैकदेशोऽपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत इत्युच्यते। निदर्शनम्। नित्यःशब्दः संयोगव्यङ्ग्यत्वात् रूपवत् प्रागूर्द्ध्वञ्च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते तथा च शब्दोऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा तस्मात् संयोगव्यङ्ग्यत्वान्नित्यःशब्द इत्ययमहेतुः कालात्ययापदेशात् व्यञ्जकस्य संयोगस्य कालं न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति सति प्रदीपघटसंयोगे रूपस्य ग्रहणं भवति न निवृत्ते संयोगे रूपं गृह्यते, निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दः श्रूयते। विभागकाले सेयं शब्दव्यक्तिः संयोगकालमत्येतीति न संयोगनिमित्ता भवति। कस्मात्कारणाभावाद्धि कार्य्याभाव इति। एवमुदाहरणसाधर्म्यस्याभावादसाधनमयं हेतुर्हेत्वाभास इति। अवयवविपर्य्यासवचनं न सूत्रार्थः, कस्मात्, "यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः। अर्थतो ह्यसमर्थानामानन्तर्य्यमकारणम्" इत्येतद्वचनाद्विपर्य्यासेनोक्तो हेतुरुदाहरणसाधर्म्यात् तथा वैधर्म्यात्साधनं हेतुलक्षणं न जहाति। अजहद्धेतुलक्षणं न हेत्वाभासो भवतीति अवयवविपर्य्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्ववचनमप्राप्तकालमिति निग्रहस्थानमुक्तं तदेवेदं पुनरुच्यत इति अतस्तन्न सूत्रार्थः। अथ छलम्॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम्॥५१॥

न सामान्यलक्षणे छलं शक्यमुदाहर्त्तुम् विभागे तूदाहरणानि। विभागश्च॥

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्चेति॥५२॥

तेषाम्॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्॥५३॥

नवकम्बलोऽयं माणवक इति प्रयोगः। अत्र नवः कम्बलोऽस्येति वक्तुरभिप्रायः। विग्रहे तु विशेषो न समासे, तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं नव कम्बला अस्येति तावदभिहितं भवतीति कल्पयति कल्पयित्वा चासम्भवेन प्रतिषेधति एकोऽस्य कम्बलः कुतो नव कम्बला इति। तदिदं सामान्यशब्दे वाचि छलं वाक्छलमिति। अस्य प्रत्यवस्थानम् सामान्यशब्दस्यानेकार्थत्वेऽन्यतराभिधानकल्पनायां विशेषवचनम्। नवकम्बल इत्यनेकार्थस्याभिधानं नवः कम्बलोऽस्य नवकम्बला अस्येति। एतस्मिन् प्रयुक्ते येयं कल्पना नव कम्बला अस्येत्येतद्भवताभिहितं तच्च न सम्भवतीति। एतस्यामन्यतराभिधानकल्पनायां विशेषो वक्तव्यः। यस्माद्विशेषोऽर्थविशेषेषु विज्ञायते। अयमर्थोऽनेनाभिहित इति, स च विशेषो नास्ति तस्मान्मिथ्याभियोगमात्रमेतदिति। प्रसिद्धश्च लोके शब्दार्थसम्बन्धोऽभिधानाभिधेयनियमनियोगः। अस्याभिधानस्यायमर्थोऽभिधेय इति समानः सामान्यशब्दस्य विशेषो विशिष्टशब्दस्य प्रयुक्तपूर्वाश्चेमे शब्दा अर्थे प्रयुज्यन्ते नाप्रयुक्तपूर्व्वाः, प्रयोगश्चार्थसम्प्रत्ययार्थः, अर्थप्रत्ययाच्च व्यवहार इति। तत्रैवमर्थगत्यर्थे शब्दप्रयोगे सामर्थ्यात्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यशब्दस्य प्रयोगनियमः। अजां ग्रामं नय सर्पिराहर ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते सामर्थ्याद्यत्रार्थक्रियादेशना सम्भवति तत्र प्रवर्त्तन्ते नार्थसामान्ये क्रियादेशनाऽसम्भवात्। एवमयं सामान्यशब्दो नवकम्बल इति योऽर्थः सम्भवति नव कम्बलोऽस्येति तत्र प्रवर्त्तते यस्तु न सम्भवति नव कम्बला अस्येति तत्र न प्रवर्त्तते सेऽयमनुपपद्यमानार्थकल्पनया परवाक्योपालम्भस्तेन कल्पत इति॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्॥ ५४॥

अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह सम्भवति हि ब्राह्मणे विद्याचरणसम्पत् इत्यस्य वचनस्य विघातोऽर्थविकल्पोपपत्त्याऽसम्भूतार्थकल्पनया क्रियते यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति व्रात्येऽपि सम्भवेत्, व्रात्योऽपि ब्राह्मणः सेऽप्यस्तु विद्याचरणसम्पन्न इति। यद्विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम्। यथा ब्राह्मणत्वं विद्याचरणसम्पदं क्वचिदाप्नोति क्वचिदत्येति सामान्यलक्षणं छलं सामान्यच्छलमिति। अस्य च प्रत्यवस्थानमविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वात् वाक्यस्य, तदत्रासम्भूतार्थकल्पनानुपपत्तिः। यथा सम्भवन्त्यस्मिन् क्षेत्रे शालय इति। अनिराकृतमविवक्षितञ्च वीजजन्म, प्रवृत्तिविषयस्तु क्षेत्रं प्रशस्यते सोऽयं क्षेत्रानुवादो नास्मिन् शालयो विधीयन्त इति। वीजात्तु शालिनिर्वृत्तिः सती न विवक्षता एवं सम्भवति ब्राह्मणे विद्याचरणसम्पदिति सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः। न चात्र हेतुर्विवक्षितः। विषयानुवादस्त्वयं प्रशंसार्थत्वाद्वाक्यस्य, सति ब्राह्मणत्वे सम्पद्धेतुः समर्थ इति विषयञ्च प्रशंसता वाक्येन यथा हेतुतः फलनिर्वृत्तिर्न प्रत्याख्यायते तदेवं सति वचनविघातोऽसम्भूतार्थकल्पनया नोपपद्यत इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म्मविकल्पनिर्द्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ५५ ॥

अभिधानस्य धर्मो यथार्थप्रयोगः। धर्मविकल्पोऽन्यत्र दृष्टस्यान्यत्रप्रयोगः। तस्य निर्देशे धर्मविकल्पनिर्देशे। यथा मञ्चाः क्रोशन्तीति अर्थसद्भावेन प्रतिषेधः मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः क्रोशन्ति, का पुनरत्रार्थविकल्पोपपत्तिः अन्यथा प्रयुक्तस्यान्यथार्थकल्पनम् भक्त्या प्रयोगे प्राधान्येन कल्पनम्, उपचारविषयं छलमुपचारच्छलमुपचारो नीतार्थः सहचरणादिनिमित्तेनाऽतद्भावे तद्वदभिधानमुपचार इति। अत्र समाधिः प्रसिद्धाप्रसिद्धे प्रयोगे वक्तुर्यथाभिप्रायं शब्दार्थयोरनुज्ञा प्रतिषेधो वा न छन्दतः प्रधानभूतस्य शब्दस्य भाक्तस्य च गुणभूतस्य प्रयोग उभयोर्लोकसिद्धः। सिद्धे प्रयोगे यथा वक्तुरभिप्रायस्तथा शब्दार्थावनुज्ञेयौ प्रतिषेध्यौ वा न छन्दतः। यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते यथा भूतस्याभ्यनुज्ञा प्रतिषेधो वा न छन्दतः। अथ गुणभूतं तदा गुणभूतस्य, यत्र तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति स्वमनीषया प्रतिषेधोऽसौ भवति न परोपालम्भ इति॥

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ ५६

न वाक्छलादुपचारच्छलं भिद्यते तस्याप्यर्थान्तरकल्पनाया अविशेषात्, इहापि स्थान्यर्थो गुणशब्दः, प्रधानशब्दः स्थानार्थ इति कल्पयित्वा प्रतिषिध्यत इति॥

न तदर्थान्तरभावात् ॥ ५७ ॥

न वाक्छलमेवोपचारच्छलं तस्यार्थसद्भावप्रतिषेधस्यार्थान्तरभावात्। कुतः अर्थान्तरकल्पनातोऽन्यार्थान्तरसद्भावकल्पना अन्यार्थसद्भावप्रतिषेध इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥५८॥

छलस्य द्वित्वमभ्यनुज्ञाय त्रित्वं प्रतिषिध्यते किञ्चित्साधर्म्यात् यथा चायं हेतुस्त्रित्वं प्रतिषेधति तथा द्वित्वमप्यनुज्ञातं प्रतिषेधति, विद्यते हि किञ्चित्साधर्म्यं द्वयोरपीति, अथ द्वित्वं किञ्चित्साधर्म्यान्न निवर्त्तते त्रित्वमपि न निवर्त्स्यतीति । अत ऊर्द्ध्वम् ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥५९॥

प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते सा जातिः स च प्रसङ्गः साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणसाधर्म्येण प्रत्यवस्थानम् । उदाहरणवैधर्म्यात् साध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम् । प्रत्यनीकभावाज्जायमानोऽर्थो जातिरिति ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥६०॥

विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः । विप्रतिपद्यमानः पराजयं प्राप्नोति, निग्रहस्थानं खलु पराजयप्राप्तिः । अप्रतिपत्तिस्त्वारम्भविषये न प्रारम्भः । परेण स्थापितं वा न प्रतिषेधति प्रतिषेधं वा नोद्धरति, असमासाच्च नैत एव निग्रहस्थाने इति । किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयोरभेदोऽथ सिद्धान्तवद्भेद इत्यत आह ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ ६१ ॥

तस्य साधर्म्यवैधर्म्याभ्याम् प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वम् । तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम्, नानाकल्पो विकल्पः, विविधो वा कल्पो विकल्पः । तत्राननुभाषणमज्ञानमप्रतिभा विक्षेपोमतानुज्ञा पर्य्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानम् शेषस्तु विप्रतिपत्तिरिति । इमे प्रमाणादयः पदार्था उद्दिष्टा यथोद्देशं लक्षिता यथालक्षणं परीक्षिष्यन्त इति त्रिविधस्य शास्त्रस्य प्रवृत्तिर्वेदितव्येति ॥ ० ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं प्रथमोऽध्यायः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत ऊर्द्ध्वं प्रमाणादिपरीक्षा सा च विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इत्यग्रे विमर्श एव परीक्ष्यते ॥

समानानेकधर्म्माध्यवसायादन्यतरधर्म्माध्यवसायाद्वा न संशयः ॥ १ ॥

समानस्य धर्मस्याध्यवसायात् संशयो न धर्ममात्रात्। अथवा समानमनयोर्द्धर्ममुपलभत इति धर्मधर्मिग्रहणे संशयाभाव इति। अथवा समानधर्म्माध्यवसायादर्थान्तरभूते धर्मिणि संशयोऽनुपपन्न इति न जातु रूपस्यार्थान्तरभूतस्याध्यवसायादर्थान्तरभूते स्पर्शे संशय इति। अथवा नाध्यवसायादर्थावधारणादनवधारणज्ञानं संशय उपपद्यते कार्यकारणयोः सारूप्याभावादिति। एतेनानेकधर्म्माध्यवसायादिति व्याख्यातम्। अन्यतरधर्म्माध्यवसायाच्च संशयो न भवति। ततो ह्यन्यतरावधारणमेवेति॥

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः। किं तर्हि विप्रतिपत्तिमुपलभमानस्य संशयः। एवमव्यवस्थायामपीति। अथवास्त्यात्मेत्येके, नास्त्यात्मेत्यपरे मन्यन्त इत्युपलब्धेः कथं संशयः स्यादिति। अथोपलब्धिरव्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागो नाध्यवसिते संशयो नोपपद्यत इति ॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

याञ्च विप्रतिपत्तिं भवान् संशयहेतुं मन्यते सा सम्प्रतिपत्तिः। सा हि द्वयोः प्रत्यनीकधर्मविषया तत्र यदि विप्रतिपत्तेः संशयः सम्प्रतिपत्तेरेव संशय इति ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥४॥

न संशयः। यदि तावदियमव्यवस्था आत्मन्येव व्यवस्थिता व्यवस्था-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादव्यवस्था न भवतीत्यनुपपन्नः संशयः, अथाव्यवस्थात्मनि न व्यवस्थिता, एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति ॥

तथाऽत्यन्तसंशयस्तद्धर्म्मसातत्योपपत्तेः ॥ ५ ॥

येन कल्पेन भवान् समानधर्म्मोपपत्तेः संशय इति मन्यते तेन खल्वत्यन्तसंशयः प्रसज्यते समानधर्म्मोपपत्तेरनुच्छेदात् संशयानुच्छेदः नायमतद्धर्म्मा धर्म्मी विमृश्यमाणो गृह्यते सततन्तु तद्धर्म्मा भवतीति अस्य प्रतिषेधप्रपञ्चस्य संक्षेपेणोद्धारः ॥

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

संशयानुपपत्तिः संशयानुच्छेदश्च न प्रसज्यते, कथम्, यत्तावत्समानधर्म्माध्यवसायः संशयहेतुर्न समानधर्म्ममात्रमिति । एवमेतत्, कस्मादेवं नोच्यत इति विशेषापेक्ष इति वचनात् सिद्धेः । विशेषस्यापेक्षाकाङ्क्षा, सा चानुपलभ्यमाने विशेषे समर्था न चोक्तं समानधर्म्मापेक्ष इति समाने च धर्म्मे कथमाकाङ्क्षा न भवेत् यद्ययं प्रत्यक्षः स्यात् । एतेन सामर्थ्येन विज्ञायते समानधर्म्माध्यवसायादिति उपपत्तिवचनाद्वा समानधर्म्मोपपत्तेरित्युच्यते न चान्यासद्भावसंवेदनादृते समानधर्म्मोपपत्तिरस्ति । अनुपलभ्यमानसद्भावो हि समानो धर्म्मो विद्यमानवद्भवतीति । विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानम् । यथा लोके धूमेनाग्निरनुमीयते इत्युक्ते धूमदर्शनेनाग्निरनुमीयत इति ज्ञायते कथं दृष्ट्वा हि धूममग्निमनुमिनोति नादृष्ट्वा, न च वाक्ये दर्शनशब्दः श्रूयते अनुजानाति च वाक्यस्यार्थप्रत्यायकत्वम्, तेन मन्यामहे विषयशब्देन विषयिणः प्रत्ययस्याभिधानम् बोद्धाऽनुजानाति एवमिहापि समानधर्म्मशब्देन समानधर्म्माध्यवसायमाहेति । यथोक्त्वा समानमनयोर्धर्म्ममुपलभत इति । धर्म्मधर्म्मिग्रहणे संशयाभाव इति । पूर्व्वदृष्टविषयमेतत् । यावहमर्थौ पूर्व्वमद्राक्षन्तयोः समानं धर्म्ममुपलभे विशेषं न पश्यामि येनान्यतरमवधारयेयमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति, न चैतत्समानधर्म्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्त्तत इति यच्चोक्तम् नार्थान्तराध्यवसायादन्यत्र संशय इति यो ह्यर्थान्तराध्यवसायमात्रं संशयहेतुमुपाददीत स एवं वाच्य इति। यत्पुनरेतत्कार्य्यकारणयोः सारूप्याभावादिति कारणस्य भावाभावयोः कार्य्यस्य भावाभावौ कार्य्यकारणयोः सारूप्यम् यस्योत्पादाद्यदुत्पद्यते यस्य चानुत्पादाद्यन्नोत्पद्यते तत्कारणं कार्य्यमितरदित्येतत्सारूप्यम्, अस्ति च संशयकारणे संशये चैतदिति, एतेनानेकधर्म्माध्यवसायादिति प्रतिषेधः परिहृत इति यत्पुनरेतदुक्तं विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च न संशय इति। पृथक् प्रवादयोर्व्याहतमर्थमुपलभे विशेषञ्च न जानामि नोपलभे येनान्यतरमवधारयेयम्। तत् कोऽत्र विशेषः स्याद्येनैकतरमवधारयेयमिति। संशयो विप्रतिपत्तिजनितोऽयं न शक्यो विप्रतिपत्तिसम्प्रतिपत्तिमात्रेण निवर्त्तयितुमिति। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थाकृते संशये वेदितव्यमिति। यत् पुनरेतत् विप्रतिपत्तौ च सम्प्रतिपत्तेरिति विप्रतिपत्तिशब्दस्य योऽर्थः तदध्यवसायो विशेषापेक्षः संशयहेतुस्तस्य च समाख्यान्तरेण न निवृत्तिः समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायश्च विशेषापेक्षः संशयहेतुः न चास्य सम्प्रतिपत्तिशब्दे समाख्यान्तरे योज्यमाने संशयहेतुत्वं निवर्त्तते। तदिदमकृतबुद्धिसम्मोहनमिति। यत्पुनरव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति संशयहेतोरर्थस्याप्रतिषेधादव्यवस्थाऽभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दान्तरकल्पना व्यर्था शब्दान्तरकल्पना, अव्यवस्था खलु व्यवस्था न भवत्यव्यवस्थात्मनि व्यवस्थितत्वादिति नानयोरुपलब्ध्यनुपलब्ध्योः सदसद्विषयत्वं विशेषापेक्षं संशयहेतुर्न भवतीति प्रतिषिध्यते यावता चाव्यवस्थात्मनि व्यवस्थिता न तावतात्मानं जहाति तावता ह्यनुज्ञाता भवत्यव्यवस्था। एवमियं क्रियमाणापि शब्दान्तरकल्पना नार्थान्तरं साधयतीति। यत्पुनरेतत्तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेरिति नायं समानधर्म्मादिभ्य एव संशयः किन्तर्हि तत्तद्विषयाध्यवसायाद्विशेषस्मृतिसहितादित्यतो नात्यन्तसंशय इति अन्यतरधर्म्माध्यवसायाद्वा न संशय इति तत्र युक्तम् विशेषापेक्षो विमर्शः संशय इति वचनात् विशेषश्चान्यतरधर्म्मो न च तस्मिन्नध्यवसीयमाने विशेषापेक्षा सम्भवतीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥७॥

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा तत्र तत्रैवं संशये परेण प्रतिषिद्धे समाधिर्वाच्य इति । अतः सर्वपरीक्षाव्यापित्वात्प्रथमं संशयः परीक्षित इति अथ प्रमाणपरीक्षा ॥

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥८॥

प्रत्यक्षादीनां प्रमाणत्वं नास्ति त्रैकाल्यासिद्धेः पूर्वापरसहभावानुपपत्तेरिति । अस्य सामान्यवचनस्यार्थविभागः ॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात्प्रत्यक्षोत्पत्तिः ॥ ९ ॥

गन्धादिविषयं ज्ञानं प्रत्यक्षं तद्यदि पूर्वम्, पश्चाद्गन्धादीनां सिद्धिः, नेदं गन्धादिसन्निकर्षादुत्पद्यत इति ॥

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १०॥

असति प्रमाणे केन प्रमीयमाणोऽर्थः प्रमेयः स्यात् प्रमाणेन खलु प्रमीयमाणोऽर्थः प्रमेयमित्येतत्सिध्यति ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

यदि प्रमाणं प्रमेयञ्च युगपद्भवतः । एवमपि गन्धादिष्विन्द्रियार्थेषु ज्ञानानि प्रत्यर्थनियतानि युगपत्सम्भवन्तीति ज्ञानानां प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावः । या इमा बुद्धयः क्रमेणार्थेषु प्रवर्त्तन्ते तासां क्रमवृत्तित्वं न सम्भवतीति, व्याघातश्च युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गमिति, एतावांश्च प्रमाणप्रमेययोः सद्भावविषयः स चानुपपन्न इति तस्मात् प्रत्यक्षादीनां प्रमाणत्वं न सम्भवतीति, अस्य समाधिः उपलब्धिहेतोरुपलब्धिविषयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चार्थस्य पूर्वापरसहभावानियमाद्यथा दर्शनं विभागवचनम् क्वचिदुपलब्धिहेतुः पूर्वं पश्चादुपलब्धिविषयः। यथादित्यस्य प्रकाशः उत्पद्यमानानां क्वचित्पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः, यथावस्थितानां प्रदीपः क्वचिदुपलब्धिहेतुरुपलब्धिविषयश्च सह सम्भवतः, यथा धूमेनाग्नेर्ग्रहणमिति, उपलब्धिहेतुश्च प्रमाणम्, प्रमेयन्तूपलब्धिविषयः एवं प्रमाणप्रमेययोः पूर्वापरसहभावेऽनियते यथाऽर्थो दृश्यते तथा विभज्य वचनीय इति। तत्रैकान्तेन प्रतिषेधानुपपत्तिः सामान्येन खलु विभज्य प्रतिषेध उक्त इति समाख्याहेतोस्त्रैकाल्ययोगात् तथाभूता समाख्या, यत् पुनरिदं पश्चात् सिद्धे च प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमिति विज्ञायत इति। प्रमाणमित्येतस्याः समाख्याया उपलब्धिहेतुत्वं निमित्तं तस्य त्रैकाल्ययोगः, उपलब्धिमकार्षीदुपलब्धिं करोति उपलब्धिं करिष्यतीति समाख्याहेतोस्त्रैकाल्ययोगात् समाख्या तथाभूता, प्रमितोऽनेनार्थः प्रमीयते प्रमास्यते इति प्रमाणम्, प्रमितं प्रमीयते प्रमास्यत इति च प्रमेयम्। एवं सति भविष्यत्यस्मिन् हेतुत उपलब्धिः, प्रमास्यतेऽयमर्थः, प्रमेयमिदमित्येतत् सर्वं भवतीति, त्रैकाल्यानभ्यनुज्ञाने च व्यवहारानुपपत्तिः। यश्चैवं नाभ्यनुजानीयात् तस्य पाचकमानय पक्ष्यति, लावकमानय लविष्यतीति व्यवहारो नोपपद्यत इति॥ प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्येवमादिवाक्यम् प्रमाणप्रतिषेधः। तत्रायं प्रष्टव्यः। अथानेन प्रतिषेधेन भवता किं क्रियत इति, किं सम्भवो निवर्त्त्यते अथासम्भवो ज्ञाप्यत इति, तद्यदि सम्भवो निवर्त्त्यते सति सम्भवे प्रत्यक्षादीनां प्रतिषेधानुपपत्तिः अथासम्भवो ज्ञाप्यते प्रमाणलक्षणं प्राप्तस्तर्हि प्रतिषेधः प्रमाणासम्भवस्योपलब्धिहेतुत्वादिति। किञ्चातः॥

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः॥१२॥

अस्य तु विभागः पूर्वं हि प्रतिषेधसिद्धावसति प्रतिषेध्ये किमनेन प्रतिषिध्यते, पश्चात् सिद्धौ प्रतिषेध्यासिद्धिः प्रतिषेधाभावादिति युगपत्सिद्धौ प्रतिषेधसिद्ध्यभ्यनुज्ञानादनर्थकः प्रतिषेधः इति। प्रतिषेधलक्षणे च वाक्येऽनुपपद्यमाने सिद्धं प्रत्यक्षादीनां प्रामाण्यमिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३॥

कथम् त्रैकाल्यासिद्धेरित्यस्य हेतोर्यद्युदाहरणमुपादीयते हेत्वर्थस्य साधकत्वं दृष्टान्ते दर्शयितव्यमिति न च तर्हि प्रत्यक्षादीनामप्रामाण्यम्। अथ प्रत्यक्षादीनामप्रामाण्यमुपादीयमानमप्युदाहरणं नार्थं साधयिष्यतीति सोऽयं सर्वप्रमाणैर्व्याहतो हेतुरहेतुः। सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति, वाक्यार्थो ह्यस्य सिद्धान्तः स च वाक्यार्थः प्रत्यक्षादीनि नार्थं साधयन्तीति। इदञ्चावयवानामुपादानमर्थस्य साधनायेति। अथ नोपादीयते अप्रदर्शितहेत्वर्थस्य दृष्टान्तेन साधकत्वमिति निषेधो नोपपद्यते हेतुत्वासिद्धेरिति॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥१४॥

प्रतिषेधलक्षणे स्ववाक्ये तेषामवयवाश्रितानां प्रत्यक्षादीनामप्रामाण्येऽभ्यनुज्ञायमाने परवाक्येऽप्यवयवाश्रितानां प्रामाण्यं प्रसज्यते अविशेषादिति। एवञ्च न सर्वाणि प्रमाणानि प्रतिषिध्यन्त इति। विप्रतिषेध इति वीत्ययमुपसर्गः सम्प्रतिपत्त्यर्थे न व्याघातेऽर्थाभावादिति॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ॥ १५ ॥

किमर्थं पुनरिदमुच्यते, पूर्वोक्तनिबन्धनार्थं यत्तावत् पूर्वोक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद्यथादर्शनं विभागवचनमिति। तदितः समुत्थानं यथा विज्ञायेत। अनियमदर्शी खल्वयमृषिर्नियमेन प्रतिषेधं प्रत्याचष्टे, त्रैकाल्यस्य चायुक्तः प्रतिषेध इति। तत्रैकां विधामुदाहरति। शब्दादातोद्यसिद्धिवदिति यथा पश्चात् सिद्धेन शब्देन पूर्वसिद्धमातोद्यमनुमीयते साध्यञ्चातोद्यं साधनञ्च शब्दः। अन्तर्हिते ह्यातोद्ये स्वनतोऽनुमानं भवतीति। वीणा वाद्यते वेणुः पूर्यत इति स्वनविशेषेण आतोद्यविशेषं प्रतिपद्यते। तथा पूर्वसिद्धमुपलब्धिहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुना प्रतिपद्यतइति। निदर्शनार्थत्वाच्चास्य शेषयोर्विधयोर्यथोक्तमुदाहरणं वेदितव्यमिति। कस्मात् पुनरिह तन्नोच्यते पूर्वोक्तमुपपाद्यत इति सर्वथा तावदयमर्थः प्रकाशयितव्यः सह इह वा प्रकाश्येत तत्र वा न कश्चिद्विशेष इति यदा चोपलब्धिविषयः कस्यचिदुपलब्धिसाधनं भवति तदा प्रमाणं प्रमेयमिति चैकोऽर्थोऽभिधीयते। अस्यार्थस्यावद्योतनार्थमिदमुच्यते॥

प्रमेयता च तुलाप्रामाण्यवत् ॥ १६ ॥

गुरुत्वपरिमाणज्ञानसाधनं तुला प्रमाणं, ज्ञानविषयो गुरुद्रव्यं सुवर्णादि प्रमेयम्। यदा तु सुवर्णादिना तुलान्तरं व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ सुवर्णादि प्रमाणम्, तुलान्तरं प्रमेयमिति एवमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः। आत्मा तावदुपलब्धिविषयत्वात् प्रमेये परिपठितः। उपलब्धौ स्वातन्त्र्यात् प्रमाता। बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्, उपलब्धिविषयत्वात्तु प्रमेयम्, उभयाभावात्तु प्रमितिः। एवमर्थविशेषे समाख्या समावेशो योज्यः। तथा च कारकशब्दा निमित्तवशात् समावेशेन वर्त्तन्त इति। वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्त्ता, वृक्षं पश्यतीति दर्शनेनाप्तुमिष्यमाणतमत्वात् कर्म, वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्। वृक्षायोदकमासिञ्चतीत्यासिच्यमानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम्, वृक्षात् पर्णम्पततीति ध्रुवमपायेऽपादानमित्यपादानम्। वृक्षे वयांसि सन्तीत्याधारेऽधिकरणमित्यधिकरणम्। एवञ्च सति न द्रव्यमात्रं कारकं न क्रियामात्रं किं तर्हि क्रियासाधनं क्रियाविशेषयुक्तं कारकम्। यत् क्रियासाधनं स्वतन्त्रः स कर्त्ता न द्रव्यमात्रं न क्रियामात्रम्। क्रियया ह्याप्तुमिष्यमाणतमं कर्म न द्रव्यमात्रं न क्रियामात्रम्। एवं साधकतमादिष्वपि, एवञ्च कारकार्थान्वाख्यानं यथैवोपपत्तित एवं लक्षणतः कारकान्वाख्यानमपि न द्रव्यमात्रेण न क्रियया वा, किं तर्हि क्रियासाधने क्रियाविशेषे युक्त इति कारकशब्दश्चायं प्रमाणं प्रमेयमिति स च कारकधर्मं न हातुमर्हति अस्ति च भोः कारकशब्दानां निमित्तवशात् समावेशः। प्रत्यक्षादीनि च प्रमाणानि उपलब्धिहेतुत्वात्, प्रमेयञ्चोपलब्धिविषयत्वात्, संवेद्यानि च प्रत्यक्षादीनि प्रत्यक्षेणोपलभे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमानेनोपलभे उपमानेनोपलभे आगमेनोपलभे प्रत्यक्षं मे ज्ञानमानु-मानिकं मे ज्ञानमौपमानिकं मे ज्ञानमागमिकं मे ज्ञानमिति ज्ञानविशेषा गृह्यन्ते, लक्षणतश्च ज्ञाप्यमानानि ज्ञायन्ते विशेषेण इन्द्रियार्थसन्निकर्षोत्-पन्नं ज्ञानमित्येवमादिना, सेयमुपलब्धिः प्रत्यक्षादिविषया किं प्रमाणान्त-रतोऽथान्तरेण प्रमाणान्तरमसाधनेति कश्चात विशेषः ।

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धि-प्रसङ्गः ॥ १७ ॥

यदि प्रत्यक्षादीनि प्रमाणेन नोपलभ्यन्ते । येन प्रमाणेनोपलभ्यन्ते तत्प्रमाणान्तरसद्भावः प्रसज्यत इति । अनवस्थामाह तस्याप्यन्यतरस्या-प्यन्येनेति नचानवस्था शक्यानुज्ञातमनुपपत्तेरिति । अस्तु तर्हि प्रमाणा-न्तरमन्तरेण निःसाधनेति ।

तद्विनिवृत्तेर्वा प्रमाणान्तरसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥

यदि प्रत्यक्षाद्युपलब्धौ प्रमाणान्तरं निवर्त्तते आत्माद्युपलब्धावपि प्रमाणान्तरं निवर्त्स्यत्यविशेषात् । एवञ्च सर्वप्रमाणविलोप इत्यत आह ।

न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥

यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वाद्दृश्यदर्शने प्रमाणम्, स च प्रत्य-क्षान्तरेण चक्षुषः सन्निकर्षेण गृह्यते । प्रदीपभावाभावयो र्दर्शनस्य तथा भावाद्दर्शनहेतुरनुमीयते । तमसि प्रदीपमुपादधीथा इत्याप्तोपदेशेनापि प्रतिपद्यते । एवं प्रत्यक्षादीनां यथादर्शनं प्रत्यक्षादिभिरेवोपलब्धिः । अर्थाः प्रत्यक्षतो गृ-इन्द्रियाणि तावत् स्वविषयग्रहणेनैवानुमीयन्ते। अर्थाः प्रत्यक्षतो गृ-ह्यन्ते, इन्द्रियार्थसन्निकर्षस्तु आवरणेन लिङ्गेनानुमीयते, इन्द्रियार्थसन्नि-कर्षोत्पन्नं ज्ञानमात्ममनसोः संयोगविशेषादात्मसमवायाच्च सुखादिवद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्यन्ते। एवं प्रमाणविशेषो विभज्य वचनीयः। यथा च दृश्यः सन् प्रदीपप्रकाशो दृश्यान्तराणां दर्शनहेतुरिति दृश्यदर्शनव्यवस्थां लभते। एवं प्रमेयं सत् किञ्चिदर्थजातमुपलब्धिहेतुत्वात् प्रमाणप्रमेयव्यवस्थां लभते, सेयं प्रत्यक्षादिभिरेव प्रत्यक्षादीनां यथादर्शनमुपलब्धिर्न प्रमाणान्तरतो न च प्रमाणमन्तरेण निःसाधनेति, तेनैव तस्य ग्रहणमिति चेत् नार्थभेदस्य लक्षणसामान्यात् प्रत्यक्षादीनाम् प्रत्यक्षादिभिरेव ग्रहणमित्युक्तम्। अन्येन ह्यन्यस्य ग्रहणं दृष्टमिति नार्थभेदस्य लक्षणसामान्यात् प्रत्यक्षलक्षणेनानेकोऽर्थः सङ्गृहीतः। तत्र केनचित् कस्यचिद्ग्रहणमित्यदोषः। एवमनुमानादिष्वपीति, यथोद्धृतेनोदकेनाशयस्थस्य ग्रहणमिति ज्ञातृमनसोश्च दर्शनात्। अहं सुखी अहं दुःखी चेति तेनैव ज्ञाता तस्यैव ग्रहणं दृश्यते, युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति च तेनैव मनसा तस्यैवानुमानं दृश्यते, ज्ञातृज्ञेयस्य चाभेदो ग्रहणस्य ग्राह्यस्य चाभेद इति। निमित्तभेदोऽत्रेति चेत् समानम्, न निमित्तान्तरेण विना ज्ञाताऽऽत्मानं जानीते न च निमित्तान्तरेण विना मनसा मनो गृह्यत इति समानमेतत्, प्रत्यक्षादिभिः प्रत्यक्षादीनां ग्रहणमित्यत्राप्यर्थभेदो न गृह्यत इति। प्रत्यक्षादीनाञ्चाविषयस्यानुपपत्तेः। यदि स्यात् किञ्चिदर्थजातं प्रत्यक्षादीनामविषयः। यत् प्रत्यक्षादिभिर्न शक्यं ग्रहीतुं तस्य ग्रहणाय प्रमाणान्तरमुपादीयेत। तत्तु न शक्यं केनचिदुपपादयितुमिति। प्रत्यक्षादीनां यथादर्शनमेवेदं सच्चासच्च सर्वं विषय इति केचित्तु दृष्टान्तमपरिगृहीतं हेतुना विशेषहेतुमन्तरेण साध्यसाधनायोपाददते। यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते, तथा प्रमाणानि प्रमाणान्तरमन्तरेण गृह्यन्त इति। स चायं किञ्चिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः। यथा चायं प्रसङ्गोऽनिवृत्तिदर्शनात् प्रमाणसाधनायोपादीयते, एवं प्रमेयसाधनायाप्युपादेयो विशेषहेतुत्वात् यथा स्थाल्यादिरूपग्रहणे प्रदीपप्रकाशः प्रमेयसाधनायोपादीयते। एवं प्रमाणसाधनायाप्युपादेयो विशेषहेत्वभावात् सोऽयं विशेषहेतुपरिग्रहमन्तरेण दृष्टान्त एकस्मिन् पक्षे उपादेयो न प्रतिपक्ष इत्यनेकान्तः। एकस्मिंश्च पक्षे दृष्टान्त इत्यनेकान्तो विशेषहेत्वभावादिति। विशेषहेतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिग्रहे सति उपसंहाराभ्यनुज्ञानादप्रतिषेधः। विशेषहेत्वपरिग्रहे-तस्तु दृष्टान्त एकस्मिन् पक्षे उपसंह्रियमाणो न शक्यो ज्ञातुम्। एवञ्च सत्यनेकान्त इत्ययं प्रतिषेधो न भवति। प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति चेत् न संविद्विषयनिमित्तानामुपलब्ध्या व्यवहारोपपत्तेः। प्रत्यक्षेणार्थमुपलभे अनुमानेनार्थमुपलभे उपमानेनार्थमुपलभे आगमेनार्थमुपलभ इति। प्रत्यक्षं मे ज्ञानमानुमानिकं मे ज्ञानमौपमानिकं मे ज्ञानमागमिकं मे ज्ञानमिति संविन्निमित्तञ्चोपलभमानस्य धर्म्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च व्यवहार उपपद्यते, सोऽयं तावत्येव निवर्त्तते, न चास्ति व्यवहारान्तरमनवस्था साधनीयम्, येन प्रयुक्तोऽनवस्थामुपाददीतेति। सामान्येन प्रमाणानि परीक्ष्य विशेषेण परीक्ष्यन्ते तत्र।

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्॥ २०॥

आत्ममनःसन्निकर्षो हि कारणान्तरं नोक्तमिति। न चासंयुक्ते द्रव्ये संयोगजन्यस्य गुणस्योत्पत्तिरिति ज्ञानोत्पत्तिदर्शनादात्ममनःसन्निकर्षः कारणम्, मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षोऽपि कारणम्। तदिदं सूत्रं पुरस्तात् कृतभाष्यम्:

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः॥२१

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते प्रत्यक्षम् इन्द्रियार्थसन्निकर्षाभाववदिति, सति चेन्द्रियार्थसन्निकर्षे ज्ञानोत्पत्तिदर्शनात् कारणभावं ब्रुवते।

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः॥ २२॥

दिगादिषु सत्सु ज्ञानभावात्तान्यपि कारणानीति। अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादिसन्निधेरवर्जनीयत्वात्। यदाप्यकारणं दिगादीनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानोत्पत्तौ तदापि सत्सु दिगादिषु ज्ञानेन भवितव्यम्, न हि दिगादीनां सन्निधिः शक्यः परिवर्जयितुमिति तत्र कारणभावे हेतुवचनम् एतस्माद्धेतोर्दिगादीनि ज्ञानकारणानीति। आत्ममनःसन्निकर्षस्तर्ह्युपसङ्ख्येय इति तत्रेदमुच्यते।

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

ज्ञानमात्मनो लिङ्गं तद्गुणत्वात् न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरस्तीति।

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

अनवरोध इति वर्त्तते, युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यमाने सिध्यत्येव मनःसन्निकर्षापेक्ष इन्द्रियार्थसन्निकर्षो ज्ञानकारणमिति प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य शब्देन वचनम्, प्रत्यक्षानुमानोपमानशब्दानां निमित्तमात्ममनः सन्निकर्षः प्रत्यक्षस्यैवेन्द्रियार्थसन्निकर्ष इत्यसमानोऽसमानत्वात्तस्य ग्रहणं सुप्तव्यासक्तमनसाञ्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणं नात्ममनसोः सन्निकर्षस्येति। एकदा खल्वयं प्रबोधकालं प्रणिधाय सुप्तः प्रणिधानवशात् प्रबुध्यते। यदा तु तीव्रौ ध्वनिस्पर्शौ प्रबोधकारणम्भवतस्तदा प्रसुप्तस्येन्द्रियार्थसन्निकर्षनिमित्तं प्रबोधज्ञानमुत्पद्यते, तत्र न ज्ञातुर्मनसश्च सन्निकर्षस्य प्राधान्यं भवति, किन्तर्हीन्द्रियार्थयोः सन्निकर्षस्य, न ह्यात्मा जिज्ञासमानः प्रयत्नेन मनस्तदा प्रेरयतीति एकदा खल्वयं विषयान्तरासक्तमनाः सङ्कल्पवशाद्विषयान्तरं जिज्ञासमानः प्रयत्नप्रेरितेन मनसेन्द्रियं संयोज्य तत्तद्विषयान्तरं जानीते। यदा तु खल्वस्य निःसङ्कल्पस्य निर्जिज्ञासस्य च व्यासक्तमनसो वाह्यविषयोपनिपातनाज्ज्ञानमुत्पद्यते तदेन्द्रियार्थसन्निकर्षस्य प्राधान्यम् न ह्यत्रासौ जिज्ञासमानः प्रयत्नेन मनः प्रेरयतीति प्राधान्याच्चेन्द्रियार्थसन्निकर्षस्य ग्रहणं कार्य्यं, गुणत्वात्, नात्ममनसोः सन्निकर्षस्येति। प्राधान्ये च हेत्वन्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २५ ॥

तैरिन्द्रियैरर्थैश्च व्यपदिश्यन्ते ज्ञानविशेषाः, कथम्, घ्राणेन जिघ्रति, चक्षुषा पश्यतिः रसनया रसयतीति, घ्राणविज्ञानं, चक्षुर्विज्ञानं, रसनाविज्ञानमिति, गन्धविज्ञानं, रूपविज्ञानं, रसविज्ञानमिति च इन्द्रियविषयविशेषाच्च पञ्चधा बुद्धिर्भवति, अतः प्राधान्यमिन्द्रियार्थसन्निकर्षस्येति । यदुक्तमिन्द्रियार्थसन्निकर्षग्रहणं कार्य्यन्नात्ममनसोः सन्निकर्षस्येति कस्मात् सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षस्य ज्ञाननिमित्तत्वादिति, सोऽयम् ॥

व्याहतत्वादहेतुः ॥ २६ ॥

यदि तावत् क्वचिदात्ममनसोः सन्निकर्षस्य ज्ञानकारणत्वं नेष्यते तदा युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गमिति व्याहन्येत तदानीं मनसः सन्निकर्ष मिन्द्रियार्थसन्निकर्षोऽपेक्षते, मनःसंयोगानपेक्षायाञ्च युगपज्ज्ञानोत्पत्तिप्रसङ्गः । अथ माभूद्व्याघात इति सर्व्वविज्ञानानामात्ममनसोः सन्निकर्षः कारणमिष्यते तदवस्थमेवेदं भवति ज्ञानकारणत्वादात्ममनसोः सन्निकर्षस्य ग्रहणं कार्य्यमिति ॥

नार्थविशेषप्राबल्यात् ॥ २७ ॥

नास्ति व्याघातः नह्यात्ममनःसन्निकर्षस्य ज्ञानकारणत्वं व्यभिचरति, इन्द्रियार्थसन्निकर्षस्य प्राधान्यमुपादीयते अर्थविशेषप्राबल्याद्धि सुप्तव्यासक्तमनसां ज्ञानोत्पत्तिरेकदा भवति, अर्थविशेषः कश्चिदेवेन्द्रियार्थः तस्य प्राबल्यं तीव्रतापटुते तच्चार्थविशेषप्राबल्यमिन्द्रियार्थसन्निकर्षविषयं नात्ममनसोः सन्निकर्षविषयं, तस्मादिन्द्रियार्थसन्निकर्षः प्रधानमिति, असति प्रणिधाने सङ्कल्पे चासति सुप्तव्यासक्तमनसां यदिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं तत्र मनःसंयोगोऽपि कारणमिति मनसि क्रिया कारणं वाच्यमिति यथैव ज्ञातुः खल्वयमिच्छाजनितः प्रयत्नो मनसः प्रेरक आत्मगुण एवमात्मनि गुणान्तरं सर्व्वस्य साधकं प्रवृत्तिदोषजनितमस्ति येन प्रेरितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम इन्द्रियेण सम्बध्यते तेन ह्यग्रेर्यमा मनसि संयोगाभावाज्ज्ञानानुत्पत्तौ सर्व्वार्थतास्य निवर्त्तते, एषितव्यञ्चास्य गुणान्तरस्य द्रव्यगुणकर्म्मकारणकत्वं अन्यथा हि चतुर्विधानामणूनां भूतसूक्ष्माणां मनसाञ्च ततोऽन्यस्य क्रियाहेतोरसम्भवात् शरीरेन्द्रियविषयाणामनुत्पत्तिप्रसङ्गः॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः॥ २८॥

यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं वृक्ष इत्येतत् किल प्रत्यक्षं तत् खल्वनुमानमेव, कस्मात्, एकदेशग्रहणात् वृक्षस्योपलब्धेरर्वाग्भागमयं गृहीत्वा वृक्षमुपलभते नचैकदेशो वृक्षः। तत्र यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव तद्भवति॥ २८॥ किं पुनर्गृह्यमाणादेकदेशादर्थान्तरमनुमेयं मन्यसे अवयवसमूहपक्षे अवयवान्तराणि द्रव्योत्पत्तिपक्षे तानि, चावयवी चेति अवयवसमूहपक्षे तावत् एकदेशग्रहणाद्वृक्षबुद्धेरभावः नागृह्यमाणमेकदेशान्तरं वृक्षोगृह्यमाणैकदेशवदिति, अथैकदेशग्रहणादेशान्तरानुमाने समुदायप्रतिसन्धानात् तत्र वृक्षबुद्धिः न तर्हि वृक्षबुद्धिरनुमानमेवं सति भवितुमर्हतीति। द्रव्यान्तरोत्पत्तिपक्षे नावयव्यनुमेयः। अस्यैकदेशसम्बन्धस्याग्रहणात् ग्रहणे चाविशेषादनुमेयत्वाभावः। तस्माद्वृक्षबुद्धिरनुमानं न भवति। एकदेशग्रहणमाश्रित्य प्रत्यक्षस्यानुमानत्वमुपपाद्यते तच्च॥

न प्रत्यक्षेण यावत्तावदप्युपलम्भात्॥ २९॥

न प्रत्यक्षमनुमानं कस्मात् प्रत्यक्षेणैवोपलम्भात् यत्तदेकदेशग्रहणमाश्रीयते प्रत्यक्षेणासावुपलम्भः न चोपलम्भो निर्विषयोऽस्ति यावच्चार्थजातन्तस्य विषयस्तावदभ्यनुज्ञायमानं प्रत्यक्षव्यवस्थापकम्भवति। किं पुनस्ततोऽन्यदर्थजातमवयवी समुदायो वा न चैकदेशग्रहणमनुमानं भावयितुं शक्यं हेत्वभावादिति। अन्यथापि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गस्तत्पूर्व्वकत्वात्, प्रत्यक्षपूर्व्वकमनुमानं, सम्बद्धावग्निधूमौ प्रत्यक्षतो दृष्टवतो धूमप्रत्यक्षदर्शनादग्नावनुमानम्भवति यत्र च सम्बद्धयोर्लिङ्गलिङ्गिनोः प्रत्यक्षं यच्च लिङ्गमात्रप्रत्यक्षग्रहणं नैतदन्तरेणानुमानस्य प्रवृत्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रस्ति न चैतदनुमानमिन्द्रियार्थसन्निकर्षजत्वात् न चानुमेयस्येन्द्रियेण सन्निकर्षादनुमानम्भवति सोऽयम् प्रत्यक्षानुमानयोर्लक्षणभेदो महानाश्रयितव्य इति॥

न चैकदेशोपलब्धिरवयविसद्भावात्॥ ३०॥

न चैकदेशोपलब्धिमात्रं किं तर्ह्येकदेशोपलब्धिस्तत्सहचरितावयव्युपलब्धिश्च, कस्मात् अवयविसद्भावात् अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्योपलब्धिकारणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्नेति। अकृत्स्नग्रहणादिति चेत् न कारणतोऽन्यस्यैकदेशस्याभावात् न चावयवाः कृत्स्ना: गृह्यन्ते अवयवैरेवावयवान्तरव्यवधानात् नावयवी कृत्स्नो गृह्यत इति नायं गृह्यमाणेष्ववयवेषु परिसमाप्त इति, सेयमेकदेशोपपलब्धिरनिवृत्तेति कृत्स्नमिति वै खल्वशेषतायां सत्याम्भवति, अकृत्स्नमिति शेषे सति, तच्चैतदवयवेषु बहुष्वस्ति। अव्यवधाने ग्रहणात् व्यवधाने चाग्रहणादिति। अङ्गत्तु भवान् पृष्टो व्याचष्टां गृह्यमाणस्यावयविन: किमगृहीतं मन्यसे येनैकदेशोपलब्धि: स्यादिति न ह्यस्य कारणेभ्योऽन्ये एकदेशा भवन्तीति तत्रावयववृत्तं नोपपद्यत इति इदं तस्य वृत्तम्,येषामिन्द्रियार्थसन्निकर्षाद्ग्रहणमवयवानां व्यवधानादग्रहणं तै: सह गृह्यते येषामवयवानां व्यवधानादग्रहणं तै: सह न गृह्यते न चैतत्कृतोऽस्ति भेद इति समुदायोऽप्यशेषता वा समुदायो वृक्ष: स्यात् तत्प्राप्तिर्वा उभयथाग्रहणभाव:। मूलस्कन्धशाखापलाशादीनामशेषता वा समुदायो वृक्ष इति स्यात् प्राप्तिर्वा समुदायिनामिति उभयथा समुदायभूतस्य वृक्षस्य ग्रहणं नोपपद्यत इति अवयवैस्तावदवयवान्तरस्य व्यवधानादशेषग्रहणं नोपपद्यते प्राप्तिग्रहणमपि नोपपद्यते प्राप्तिमतामग्रहणात् सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तौ कल्पते न समुदायमात्र इति।

साध्यत्वादवयविनि सन्देह:॥ ३१॥

यदुक्तमवयविसद्भावात् प्राप्तिमतामयमहेतु: साध्यत्वात् साध्यन्तावदेतत्कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति अनुपादितमेतत्, एवञ्च सति विप्रतिपत्तिमात्रम्भवति विप्रतिपत्तेश्चावयविनि संशय इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३२ ॥

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते किं तत्सर्वम् द्रव्यगुणकर्मसामान्यविशेषसमवायाः। कथं कृत्वा परमाणुसमवस्थानं तावद्दर्शनविषयो भवतीत्यतीन्द्रियत्वादणूनां द्रव्यान्तरञ्चावयविभूतं दर्शनविषयस्तास्वेमे द्रव्यादयो गृह्यन्ते तेन निरधिष्ठाना न गृह्येरन्, गृह्यन्ते तु कुम्भोऽयं श्याम एको महान् संयुक्तः स्पन्दते अस्ति मृण्मयश्चेति, सन्ति चेमे गुणादयो धर्म्मा इति तेन सर्वस्य ग्रहणात् पश्यामोऽस्ति द्रव्यान्तरभूतोऽवयवीति।

धारणाकर्षणोपपत्तेश्च ॥ ३३ ॥

अवयव्यर्थान्तरभूत इति संग्रहकारिते वै धारणाकर्षणे संग्रहो नाम संयोगसहचरितं गुणान्तरम्। स्नेहद्रव्यत्वकारितमपां संयोगादामे कुम्भे अग्निसङ्गात् पक्वे यदि त्ववयविकारिते अभविष्यताम् पांशुराशिप्रभृतिष्वप्यज्ञास्येतां द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जतुसंगृहीतेष्वपि नाभविष्यतामिति। अथावयविनं प्रत्याचक्षाणको माभूत् प्रत्यक्षलोप इत्यणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकमिदं द्रव्यमित्येकबुद्धेर्विषयं पर्यनुयोज्यः किमेकबुद्धिरभिन्नार्थविषया, आहो नानार्थविषयेति। अभिन्नार्थविषयेति चेत् अर्थान्तरानुज्ञानादवयविसिद्धिः, नानार्थविषयेति चेत् भिन्नेष्वेकदर्शनानुपपत्तिः। अनेकस्मिन्नेक इति व्याहता बुद्धिर्न दृश्यत इति।

सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३४ ॥

यथा सेनाङ्गेषु वनाङ्गेषु च दूरादगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिः, एवं परमाणुषु सञ्चितेष्वगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिरिति, यथाऽगृह्यमाणपृथक्त्वानां खलु सेनावनाङ्गानामारात् कारणान्तरतः पृथक्त्वस्याग्रहणम्, यथाऽगृह्यमाणजातीनां पलाश इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या खदिर इति वा नाराज्जातिग्रहणम्भवति, गृह्यमाणप्रसन्दानान्ना-रात् सन्द्यग्रहणम्, गृह्यमाणे चार्थजाते पृथक्त्वस्याग्रहणादेकमिति भाक्तः प्रत्ययो भवति, न त्वणूनां गृह्यमाणपृथक्त्वानां कारणतः पृथक्त्वस्या-ग्रहणात् भाक्त एकप्रत्ययोऽतीन्द्रियत्वादणूनामिति। इदमेव च परी-क्ष्यते किमेकप्रत्ययोऽणुसञ्चयविषय आहोस्विन्नेति। अणुसञ्चय एव सेना-वनाङ्गानि न च परीक्ष्यमाणमुदाहरणमिति युक्तम्, साध्यत्वादिति, दृष्टमिति चेन्न तद्विषयस्य परीक्ष्योपपत्तेः। यदपि मन्यते दृष्टमिदं सेनाव-नाङ्गानां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणं न च दृष्टं शक्यं प्रत्या-ख्यातुमिति, तथा नैवं तद्विषयस्य परीक्ष्योपपत्तेः। दर्शनविषयएवायं परीक्ष्यते योऽयमेकमिति प्रत्ययो दृश्यते स परीक्ष्यते किं द्रव्यान्तरविषयो वाऽथाणुसञ्चयविषय इत्यत्र दर्शनमन्यतरस्य साधकं न भवति नानाभावे चाणूनां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम्। अतस्मिंस्तदिति प्र-त्ययो यथा स्थाणौ पुरुष इति ततः किमतस्मिंस्तदिति प्रत्ययस्य प्रधाना-पेक्षितत्वात् प्रधानसिद्धिः, स्थाणौ पुरुषइति प्रत्ययस्य किं प्रधानम्, योऽसौ पुरुषे पुरुषप्रत्ययस्तस्मिन् सति पुरुषसामान्यग्रहणात् स्थाणौ पुरुषोऽयमिति, एवं नानाभूतेष्वेकमिति प्रामाण्यग्रहणात् प्रधाने सति भवितुमर्हति। प्रधानञ्च सर्वस्याग्रहणादिति नोपपद्यते, तस्मादभिन्न एवायमभेदप्रत्यय एकमिति, इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत् न विशेषहेत्वभावात् दृष्टान्ताव्यवस्था, श्रोत्रादिविषयेषु शब्दादिष्व-भिन्नेष्वेकप्रत्ययः प्रधानमनेकस्मिन्नेकप्रत्ययस्येति। एवञ्च सति दृष्टान्तोपा-दानं न व्यवतिष्ठते, विशेषहेत्वभावात्, अणुषु सञ्चितेषु एकप्रत्ययः किम-तस्मिंस्तत्प्रत्ययः स्थाणौ पुरुषप्रत्ययवत्, अथार्थस्य तथाभावात् तस्मिंस्त-दिति प्रत्ययो यथा शब्दस्यैकत्वादेकः शब्द इति। विशेषहेतुपरिग्रह-मन्तरेण दृष्टान्तौ संशयमापादयत इति, कुम्भवत् सञ्चयमात्रं गन्धादयो-ऽपीत्यनुदाहरणं गन्धादय इति, एवं परिमाणसंयोगस्पन्दजातिविशेष-प्रत्ययानप्यनुयोक्ष्याम्यस्तेषु चैवं प्रसङ्ग इति। एकत्वबुद्धिस्तस्मिंस्तदिति प्रत्यय इति विशेषहेतुर्महदिति प्रत्ययेन सामानाधिकरण्यात् एकमिदं महच्चेति एकविषयौ प्रत्ययौ समानाधिकरणौ भवतः तेन विज्ञायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यन्महत् तदेकमिति॥ अणुसमूहातिशयग्रहणं महत्प्रत्यय इति चेत् सोऽयममहत्स्वणुषु महत्प्रत्ययो ऽतस्मिंस्तदिति प्रत्ययो भवतीति, किञ्चातः अतस्मिंस्तदितिप्रत्ययस्य प्रधानापेक्षितत्वात् प्रधानसिद्धिरिति भवितव्यं महत्येव महत्प्रत्ययेनेति। अणुशब्दो महानिति च व्यवसायात् प्रधान-सिद्धिरिति चेत् न मन्दतीव्रताग्रहणमियत्तानवधारणात् यथा द्रव्येऽणुः शब्दोऽल्पो मन्द इत्येतस्य ग्रहणम्, महान् शब्दः पटुतीव्र इत्येतस्य ग्रह-णम्। कस्मात् इयत्तानवधारणात् न ह्ययं महान् शब्द इति व्यवस्य-न्नियानयमित्यवधारयति। यथा वदरामलकबिल्वादीनि संयुक्ते इमे इति च द्वित्वसमानाश्रयं प्राप्तिग्रहणम्, द्वौ समुदायावाश्रयः संयोगस्येति चेत् कोऽयं समुदायः। प्राप्तिरनेकस्याऽनेका वा प्राप्तिरेकस्य समुदाय इति चेत् प्राप्तेरग्रहणं प्राप्ताश्रितायाः संयुक्ते इमे वस्तुनी इति नात्र द्वे प्राप्ती संयुक्ते गृह्येते, अनेकसमूहः समुदाय इति चेन्न द्वित्वेन समानाधि-करणस्य ग्रहणात् द्वाविमौ संयुक्तावर्थाविति ग्रहणे सति नानेकसमु-दायाश्रयः संयोगो गृह्यते न च द्वयोरण्वोर्ग्रहणमस्ति तस्मान्महती द्वित्वाश्रयभूते द्रव्यसंयोगस्य स्थानमिति प्रत्यासत्तिः प्रतीघात तावता संयोगो नार्थान्तरमिति चेत् नार्थान्तरहेतुत्वात् संयोगस्य शब्दरूपादि-स्पन्दानां हेतुः संयोगो न च द्रव्ययोर्गुणान्तरोपजननमन्तरेण शब्दे रूपादिषु स्पर्शे च कारणत्वं गृह्यते तस्माद्गुणान्तरं प्रत्ययविषयश्चार्थान्तरं तत्प्रतिषेधो वा कुण्डली गुरुरकुण्डलश्छात्र इति संयोगबुद्धेश्च यद्यर्थान्तरं न विषयः अर्थान्तरप्रतिषेधस्तर्हि विषयस्तत्र प्रतिषिध्यमानवचनं संयुक्ते द्रव्ये इति यदर्थान्तरमन्यत्र दृष्टमिह प्रतिषिध्यते तद्वक्तव्यमिति द्वयोर्महतो-राश्रितस्य ग्रहणान्नाण्वाश्रय इति जातिविशेषस्य प्रत्ययानुवृत्तिलि-ङ्गस्याप्रत्याख्यानम् प्रत्याख्याने वा प्रत्ययव्यवस्थानुपपत्तिः। व्यधिकर-णस्यानभिव्यक्तेरधिकरणवचनम्, अणुसमवस्थानम् विषय इति चेत्, प्राप्ताप्राप्तसामर्थ्यवचनम्। किमप्राप्ते अणुसमवस्थाने तदाश्रयो जाति-विशेषो गृह्यते अथ प्राप्ते इति, अप्राप्ते ग्रहणमिति चेत् व्यवहित-स्याथसमानस्थानस्याप्युपलब्धिप्रसङ्गः, अव्यवहितेऽणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्येत, प्राप्ते ग्रहणमिति चेत्, मध्यपरभागयोरप्राप्तत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिव्यक्तिः, यावत् प्राप्तम्भवति तावत्यभिव्यक्तिरिति चेत् तावतोऽधिकरणत्वमणुसमवस्थानस्य यावति प्राप्ते जातिविशेषो गृह्यते तावदस्याधिकरणमिति प्राप्तम्भवति, तत्रैकसमुदाये प्रतीयमानेऽर्थभेदः। एवञ्च सति योऽयमणुसमुदायो वृक्ष इति प्रतीयते तत्र वृक्षबहुत्वं प्रतीयेत। यत्र यत्र ह्यणुसमुदायस्य भागे वृक्षत्वं गृह्यते स स वृक्ष इति। तस्मात् समुदिताणुसमवस्थानस्यार्थान्तरस्य जातिविशेषस्याभिव्यक्तिविषयत्वादवयव्यर्थान्तरभूत इति। परीक्षितं प्रत्यक्षम्। अनुमानमिदानीं परीक्ष्यते।

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३५ ॥

अप्रमाणमिति। एकदाप्यर्थस्य न प्रतिपादकमिति। रोधादपि नदी पूर्णा गृह्यते तदा चोपरिष्टाद्वृष्टो देव इति मिथ्यानुमानम्। नीडोपघातादपि पिपीलिकाण्डसञ्चारो भवति तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति। पुरुषोऽपि मयूरवाशितमनुकरोति तदापि शब्दसादृश्यान्मिथ्यानुमानम्भवति॥

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥३६॥

नायमनुमानव्यभिचारः अननुमाने तु खल्वयमनुमानाभिमानः, कथं, नाविशिष्टो लिङ्गं भवितुमर्हतीति। पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफलपर्णकाष्ठादिवहनञ्चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमिनोति नोदकवृद्धिमात्रेण। पिपीलिकाप्रायस्याण्डसञ्चारे भविष्यति वृष्टिरित्यनुमीयते न काश्चिदिति। नेदं मयूरवाशितं तत्सदृशोऽयं शब्द इति विशेषापरिज्ञानान्मिथ्यानुमानमिति यस्तु सदृशात् विशिष्टाच्छब्दाद्विशिष्टं मयूरवाशितं गृह्णाति तस्य विशिष्टोऽर्थो गृह्यमाणो लिङ्गं यथा सर्पादीनामिति, सोऽयमनुमातुरपराधो नानुमानस्य योऽर्थविशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति। त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तमत्र च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ ३७ ॥

वृन्तात् प्रच्युतस्य फलस्य भूमौ प्रत्यासीदतो यदूर्द्धं स पतितोऽध्वा तत्संयुक्तः कालः, पतितकालः, योऽधस्तात् स पतितव्योऽध्वा तत् संयुक्तः कालः पतितव्यकालः नेदानीं तृतीयोऽध्वा वर्त्तते यत्र पततीति वर्त्तमानः कालो गृह्येत, तस्माद्वर्त्तमानः कालो न विद्यते इति ॥

तयोरप्यभावो वर्त्तमानाभावे तदपेक्षत्वात् ॥३८॥

नाध्वव्यङ्ग्यः कालः, किन्तर्हि क्रियाव्यङ्ग्यः पततीति यदा पतनक्रिया व्युपरता भवति स कालः पतितकालः, यदोत्पत्स्यते स पतितव्यकालः। यदा द्रव्ये वर्त्तमाने क्रिया गृह्यते स वर्त्तमानः कालः। यदि चायं द्रव्ये वर्त्तमानं पतनं न गृह्णाति कस्योपरममुत्पत्स्यमानतां वा प्रतिपद्यते पतितः काल इति भूता क्रिया, पतितव्यः काल इति चोत्पत्स्यमाना क्रिया, उभयोः कालयोः क्रियाहीनं द्रव्यमधःपततीति क्रियासम्बद्धम् सोऽयं क्रियाद्रव्ययोः सम्बन्धं गृह्णाति वर्त्तमानः कालस्तदाश्रयौ चेतरौ कालौ तदभावे न स्यातामिति। अथापि ॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥३९॥

यद्यतीतानागतावितरेतरापेक्षौ सिद्ध्येताम्, प्रतिपद्येमहि वर्त्तमानविलोपम्। नातीतापेक्षाऽनागतसिद्धिः। नाप्यनागतापेक्षा अतीतसिद्धिः कया युक्त्या केन कल्पेनातीतः कथमतीतानागतयोरिति तन्नोपपद्यते विशेषहेत्वभावात्। दृष्टान्तवत् प्रतिदृष्टान्तोऽपि प्रसज्यते। यथा रूपस्पर्शौ गन्धरसौ नेतरेतरापेक्षौ सिद्ध्येते एवमतीतानागताविति नेतरेतरापेक्षा कस्यचित् सिद्धिरिति। यस्मादेकाभावेऽन्यतराभावादुभयाभावः। यद्येकस्यान्यतरापेक्षासिद्धिरेकस्येदानीं किमपेक्षा यद्यन्यतरस्यैकापेक्षा सिद्धिरेकस्येदानीं किमपेक्षा एवमेकस्याभावेऽन्यतरन्न सिद्ध्यतीत्युभयाभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसज्यते। अर्थसद्भावव्यङ्ग्यश्चायं वर्त्तमानः कालः विद्यते द्रव्यं विद्यते गुणः विद्यते कर्मेति। यस्य चायं नास्ति तस्य ॥

वर्त्तमानाभावे सर्वाग्रहणम्प्रत्यक्षानुपपत्तेः ॥४०॥

प्रत्यक्षमिन्द्रियार्थसन्निकर्षजम् न चाविद्यमानमसदिन्द्रियेण सन्निकृष्यते, न चायं विद्यमानं सत् किञ्चिदनुजानाति प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षज्ञानं सर्वन्नोपपद्यते प्रत्यक्षानुपपत्तौ च तत्पूर्वकत्वात् अनुमानागमयोरनुपपत्तिः। सर्वप्रमाणविलोपे सर्वग्रहणं न भवतीति। उभयथा च वर्त्तमानः कालो गृह्यते क्वचिदर्थसद्भावव्यङ्ग्यः यथा द्रव्ये द्रव्यमिति, क्वचित् क्रियासन्तानव्यङ्ग्यः। यथा पचति छिनत्तीति, नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाभ्यासश्च नानाविधा चैकार्था क्रिया पचतीति स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनमेधोपसर्पणमग्न्यभिज्वालनं दर्वीघट्टनं मण्डस्रावणमधोऽवतारणमिति। छिनत्तीति क्रियाभ्यास उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते। यच्चेदं पच्यमानं छिद्यमानञ्च तत्क्रियमाणं तस्मिन् क्रियमाणे ॥

कृतताकर्त्तव्यतोपपत्तेस्तूभयथाग्रहणम् ॥४१॥

क्रियासन्तानोऽनारब्धश्चिकीर्षितोऽनागतः कालः पक्ष्यतीति। प्रयोजनावसानः क्रियासन्तानोपरमोऽतीतः कालोऽपाक्षीदिति। आरब्धक्रियासन्तानो वर्त्तमानः कालः पचतीति। तत्र या उपरता सा कृतता, या चिकीर्षिता सा कर्त्तव्यता, या विद्यमाना सा क्रियमाणा। तदेवं क्रियासन्तानस्थस्त्रैकाल्यसमाहारः पचति पच्यत इति वर्त्तमानग्रहणेन गृह्यन्ते क्रियासन्तानस्य ह्यत्राविच्छेदो विधीयते नारम्भो नोपरम इति सोऽयमुभयथा वर्त्तमानो गृह्यते। अपवृक्तो व्यपवृक्तश्च। अतीतानागताभ्यां स्थितिव्यङ्ग्यो विद्यते द्रव्यमिति क्रियासन्तानविच्छेदाभिधायी च त्रैकाल्यान्वितः पचति छिनत्तीति अन्यश्च प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायां तदभिधायी बहुप्रकारो लोकेषु उत्प्रेक्षितव्यः तस्मादस्ति वर्त्तमानः काल इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥४२॥

अत्यन्तसाधर्म्यादुपमानं न सिद्ध्यति, न चैवं भवति यथा गौरेवं गौरिति, प्रायः साधर्म्यादुपमानं न सिद्ध्यति, नहि भवति यथानड्वानेवं महिष इति, एकदेशसाधर्म्यादुपमानं न सिद्ध्यति, नहि सर्वेण सर्वमुपमीयत इति ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४३ ॥

न साध्यस्य कृत्स्नप्रायत्वभावमाश्रित्योपमानं प्रवर्त्तते, किन्तर्हि प्रसिद्धसाधर्म्यात् साध्यसाधनभावमाश्रित्य प्रवर्त्तते, यत्र चैतदस्ति न तत्रोपमानं प्रतिषेद्धुं शक्यम्, तस्माद्यथोक्तदोषो नोपपद्यत इति । अस्तु तर्ह्युपमानमनुमानम् ॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४४ ॥

यथा धूमेन प्रत्यक्षेणाप्रत्यक्षस्य वह्नेर्ग्रहणमनुमानमेवं गवा प्रत्यक्षेणाप्रत्यक्षस्य गवयस्य ग्रहणमिति नेदमनुमानाद्विशिष्यते । विशिष्यत इत्याह, कया युक्त्या ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ॥ ४५ ॥

यदा ह्ययमुपयुक्तोपमानो गोदर्शी गवयसमानमर्थं पश्यति, तदाऽयं गवय इत्यस्य संज्ञाशब्दस्य व्यवस्थां प्रतिपद्यते, न चैवमनुमानमिति परार्थं चोपमानम् यस्य ह्युपमानमप्रसिद्धं तदर्थं प्रसिद्धोभयेन क्रियत इति परार्थमुपमानमिति चेत् न स्वयमध्यवसायात् भवति च भोः स्वयमध्यवसायः यथा गौरेवं गवय इति । नाध्यवसायः प्रतिषिध्यते उपमाने तु तन्न भवति प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् न च यस्योभयं प्रसिद्धं तं प्रति साध्यसाधनभावो विद्यत इति । अथापि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४६ ॥

तथेति समानधर्मोपसंहारादुपमानं सिध्यति नानुमानम्। अयन्तयोर्विशेष इति ॥

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥४७॥

शब्दोऽनुमानं न प्रमाणान्तरम्, कस्मात् शब्दार्थस्यानुमेयत्वात्, कथमनुमेयत्वम्, प्रत्यक्षतोऽनुपलब्धेः यथाऽनुपलभ्यमानो लिङ्गी मितेन लिङ्गेन पश्चान्मीयत इति अनुमानम् एवं मितेन शब्देन पश्चान्मीयतेऽर्थोऽयमनुपलभ्यमान इत्यनुमानं शब्दः। इतश्चानुमानं शब्दः ॥

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ४८ ॥

प्रमाणान्तरभावे द्विप्रवृत्तिरुपलब्धिरन्यथा ह्युपलब्धिरनुमाने चान्यथोपमाने, तद्व्याख्यानम् शब्दानुमानयोस्तूपलब्धिरद्विप्रवृत्तिर्यथानुमाने प्रवर्त्तते तथा शब्देऽपि विशेषाभावादनुमानं शब्द इति॥

सम्बन्धाच्च ॥ ४९ ॥

शब्दोऽनुमानमिति वर्त्तते, सम्बद्धयोश्च शब्दार्थयोः सम्बन्धप्रसिद्धौ शब्दोपलब्धेरर्थग्रहणम्। यथा सम्बद्धयोर्लिङ्गलिङ्गिनोः सम्बन्धप्रतीतौ लिङ्गोपलब्धौ लिङ्गिग्रहणमिति। यत्तावदर्थस्यानुमेयत्वादिति तन्न ॥

आप्तोपदेशसामर्थ्याच्छब्दार्थसम्प्रत्ययः ॥ ५० ॥

स्वर्गः अप्सरस उत्तराः कुरवः सप्तद्वीपाः समुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः, किन्तर्हि आप्तैरयमुक्तः शब्द इत्यतः सम्प्रत्ययः। विपर्ययेण सम्प्रत्ययाभावात्। न त्वेवमनुमानमिति। यत् पुनरुपलब्धेरद्विप्रवृत्तित्वादिति, अयमेव शब्दानुमानयोरुपलब्धेः प्रवृत्तिभेदः। तत्र विशेषे सत्यहेतुर्विशेषाभावादिति। यत्पुनरिदं सम्ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याच्चेति अस्ति शब्दार्थयोः सम्बन्धोऽनुज्ञातः अस्ति च प्रतिषिद्धः। अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः कस्मात्॥

प्रमाणतोऽनुपलब्धेः॥ ५१॥

प्रत्यक्षतस्तावच्छब्दार्थप्राप्ते नोपलब्धिरतीन्द्रियत्वात् येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तोऽर्थो न गृह्यते। अस्ति चातीन्द्रियविषयभूतोऽप्यर्थः समानेन चेन्द्रियेण गृह्यमाणयोः प्राप्तिर्गृह्यत इति प्राप्तिलक्षणे च गृह्यमाणे शब्दार्थयोः शब्दान्तिके वार्थः स्यात्, अर्थान्तिके वा शब्दः स्यात्, उभयं वोभयत्र। अथ खल्वयम्॥

पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः॥५२॥

स्थानकरणाभावादिति चार्थः। न चायमनुमानतोऽप्युपलभ्यते शब्दान्तिकेऽर्थ इति। एकस्मिन् पक्षेऽप्यस्य स्थानकरणोच्चारणीयः शब्दस्तदन्तिकेऽर्थ इति। अन्नाग्न्यसि शब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन्, न च गृह्यन्ते। अग्रहणान्नानुमेयः प्राप्तिलक्षणः सम्बन्धः अर्थान्तिके शब्द इति। स्थानकरणासम्भवादनुच्चारणम्, स्थानं कण्ठादयः, करणं प्रयत्नविशेषः। तस्यार्थान्तिकेऽनुपपत्तिरिति उभयप्रतिषेधाच्च नोभयम्। तस्मान्न शब्देनार्थः प्राप्त इति॥

शब्दार्थव्यवस्थानादप्रतिषेधः॥ ५३॥

शब्दार्थप्रत्ययस्य व्यवस्थादर्शनादनुमीयतेऽस्ति शब्दार्थसम्बन्धो व्यवस्थाकारणम्। असम्बन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्गः। तस्मादप्रतिषेधः सम्बन्धस्येति। अत्र समाधिः॥

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य॥ ५४॥

न सम्बन्धकारितं शब्दार्थव्यवस्थानं किन्तर्हि समयकारितं यत्तद्वोचाम। अस्येदमितिषष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थयोः सम्बन्ध इति समयं तदवोचामेति । कः पुनरयं समयः । अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेयनियमनियोगः । तस्मिन्नुपयुक्ते शब्दादर्थसम्प्रत्ययो भवति । विपर्य्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः, सम्बन्धवादिनापि चायमवर्ज्जनीय इति । प्रयुज्यमानग्रहणाच्च समयोपयोगो लौकिकानाम्, समयपालनार्थं चेदपदलक्षणया वाचोऽन्वाख्यानं व्याकरणवाक्यलक्षणया वाचोऽर्थो लक्षणम् । पदसमूहो वाक्यमर्थपरिसमाप्ताविति । तदेवं प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्यार्थजुषोऽप्यनुमानहेतुर्न भवतीति ॥

जातिविशेषे चानियमात् ॥ ५५ ॥

सामयिकः शब्दादर्थसम्प्रत्ययो न स्वाभाविकः । ऋष्यार्य्यम्लेच्छानां यथाकामं शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्त्तते, स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्यात् । यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे व्यभिचरतीति ॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥५६॥

पुत्रकामेष्टिहवनाभ्यासेषु तस्येतिशब्दविशेषमेवाधिकुरुते भगवान्दृषिः । शब्दस्य प्रमाणत्वं न सम्भवति, कस्मादनृतदोषात् । पुत्रकामेष्टौ पुत्रकामः पुत्रेष्ट्या यजेतेति, नेष्टौ संस्थितायां पुत्रजन्म दृश्यते । दृष्टार्थस्य वाक्यस्यानृतत्वात् अदृष्टार्थमपि वाक्यमग्निहोत्रं जुहुयात् स्वर्गकाम इत्याद्यनृतमिति ज्ञायते । विहितव्याघातदोषाच्च हवने "उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्यम्" इति विधाय विहितं व्याहन्ति "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति श्यावशबलौ वास्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति" । व्याघाताच्चान्यतरन्मिथ्येति । पुनरुक्तदोषाच्च अभ्यासे देश्यमाने "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति पुनरुक्तदोषो भवति । पुनरुक्तञ्च प्रमत्तवाक्यमिति तस्मादप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न कर्म्मकर्तृसाधनवैगुण्यात् ॥ ५७ ॥

नानृतदोषः पुत्रकामेष्टौ, कस्मात्, कर्म्मकर्तृसाधनवैगुण्यात् इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति इष्टिः करणं साधनम् पितरौ कर्त्तारौ संयोगः कर्म्म त्रयाणां गुणयोगात् पुत्रजन्म वैगुण्याद्विपर्य्ययः। इष्ट्याश्रयं तावत्कर्म्मवैगुण्यम् समीहाभ्रेषः कर्तृवैगुण्यम् अविद्वान् प्रयोक्ता कपूयाचरणश्च। साधनवैगुण्यं हविरसंस्कृतमुपहतमिति। मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति। दक्षिणा दुरागता हीना निन्दिता चेति। अथोपजनाश्रयं कर्मवैगुण्यम् मिथ्यासम्प्रयोगः। कर्तृवैगुण्यम् योनिव्यापादो बीजोपघातश्चेति। साधनवैगुण्यम् इष्टावभिहितम् लोके चाग्निकामो दारुणी मथ्नीयादिति विधिवाक्यम्, तत्र कर्मवैगुण्यम् मिथ्याभिमन्थनम्, कर्तृवैगुण्यम् प्रज्ञाप्रयत्नगतः प्रमादः, साधनवैगुण्यम् आर्द्रं सुषिरं दार्विति, तत्र फलं न निष्पद्यत इति नानृतदोषः। गुणयोगेन फलनिष्पत्तिदर्शनात् न चेदं लौकिकाद्भिद्यते पुत्रकामः पुत्रेष्ट्या यजेतेति॥

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५८ ॥

न व्याघातो हवन इत्यनुवर्त्तते योऽभ्युपगतं हवनकालम्भिनत्ति ततोऽन्यत्र जुहोति तत्रायमभ्युपगतकालभेदे दोष उच्यते श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति तदिदं विधिभ्रंशे निन्दावचनमिति॥

अनुवादोपपत्तेश्च ॥ ५९ ॥

पुनरुक्तदोषोऽभ्यासे नेति प्रकृतम्। अनर्थकोऽभ्यासः पुनरुक्तः अर्थवानभ्यासोऽनुवादः योऽयमभ्यासस्त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यनुवाद उपपद्यते अर्थवत्त्वात्। त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्चदशत्वं सामिधेनीनाम्भवति। तथाच मन्त्राभिवादः। इदमहं भ्रातृव्यं पञ्चदशावरेण वाग्वज्रेण बाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति पञ्चदशसामिधेनीर्वज्रं मन्त्रोऽभिवदति तदभ्यासमन्तरेण न स्यादिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यविभागस्य चार्थग्रहणात् ॥ ६० ॥

प्रमाणं शब्दो यथा लोके विभागश्च ब्राह्मणवाक्यानां त्रिविधः ॥

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६१ ॥

त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि विधिवचनानि अर्थवाद-वचनान्यनुवादवचनानीति तत्र ॥

विधिर्विधायकः ॥ ६२ ॥

यद्वाक्यं विधायकं चोदकं स विधिः। विधिस्तु नियोगोऽनुज्ञा वा यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६३ ॥

विधेः फलवादलक्षणा या प्रशंसा सा स्तुतिः सम्प्रत्ययार्थं स्तूयमानं श्रद्दधीतेति प्रवर्त्तिका च फलश्रवणात् प्रवर्त्तते। सर्व्वजिता वै देवाः सर्वमजयन् सर्व्वस्याप्त्यै सर्व्वस्य जित्यै सर्व्वमेवैतेनाप्नोति सर्व्वं जयतीत्येवमादिः। अनिष्टफलवादो निन्दा वर्ज्जनार्थं निन्दितं न समाचरेदिति। स एष वा प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते गर्त्ते पतत्ययमेवैतज्जीर्य्यते वा इत्येवमादि। अन्यकर्तृकस्य व्याहतस्य विधेर्वादः परकृतिः। हुत्वावपामेवाग्रेऽभिधारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्य्यवः पृषदाज्यमेवाग्रेऽभिधारयन्ति। अग्नेः प्राणाः पृषदाज्यं स्तोममित्येवमभिदधतीत्येवमादि। ऐतिह्यसमाचरितो विधिः पुराकल्प इति। तस्माद्वा एतेन ब्राह्मणा हविः पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामह इत्येवमादिः। कथं परकृतिपुराकल्पौ अर्थवादाविति। स्तुतिनिन्दावाक्येनाभिसम्बन्धाद्विध्याश्रयस्य कस्य कस्यचिदर्थस्य द्योतनादर्थवाद इति॥

विधिविहितस्यानुवचनमनुवादः ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विध्यनुवचनञ्चानुवादो विहितानुवचनञ्च, पूर्वः शब्दानुवादोऽपरोऽर्थानुवादः। यथा पुनरुक्तं द्विविधमेवमनुवादोऽपि। किमर्थं पुनर्विहितमनूद्यते, अधिकारार्थम्, विहितमधिकृत्य स्तुतिर्बोध्यते निन्दा वा विधिशेषो वाभिधीयते। विहितानन्तरार्थोऽपि चानुवादो भवति। एवमन्यदप्युत्प्रेक्षणीयम्। लोकेऽपि च विधिरर्थवादोऽनुवाद इति च त्रिविधं वाक्यम्। ओदनं पचेदिति विधिवाक्यम्। अर्थवादवाक्यमायुर्वर्चो बलं सुखं प्रतिभानञ्चान्ने प्रतिष्ठितम्। अनुवादः पचतु पचतु भवानित्यभ्यासः क्षिप्रं पच्यतामिति वा, अङ्ग पच्यतामित्यध्येषणार्थम्। पच्यतामेवेति वाऽवधारणार्थम्। यथा लौकिके वाक्ये विभागेनार्थग्रहणात् प्रमाणत्वमेवं वेदवाक्यानामपि विभागेनार्थग्रहणात् प्रमाणत्वं भवितुमर्हतीति॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः॥६५

पुनरुक्तमसाधु, साधुरनुवाद इति अयं विशेषो नोपपद्यते। कस्मात् उभयत्र हि प्रतीतार्थः शब्दोऽभ्यस्यते चरितार्थस्य शब्दस्याभ्यासादुभयमसाध्विति॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः॥६६॥

नानुवादपुनरुक्तयोरविशेषः। कस्मात्। अर्थवदभ्यासस्यानुवादभावात् समानेऽभ्यासे पुनरुक्तमनर्थकम्। अर्थवानभ्यासोऽनुवादः। शीघ्रतरगमनोपदेशवत्। शीघ्रं शीघ्रं गम्यतां शीघ्रतरं गम्यतामिति क्रियातिशयोऽभ्यासेनैवोच्यते। उदाहरणार्थञ्चेदम् एवमन्योऽप्यभ्यासः। पचति पचतीति क्रियानुपरमः। ग्रामो ग्रामो रमणीय इति व्याप्तिः। परिपरि त्रिगर्त्तेभ्यो वृष्टो देव इति परिवर्जनम्, अध्यधि कुड्यं निषण्णमिति सामीप्यम्। तिक्तं तिक्तमिति प्रकारः। एवमनुवादस्य स्तुतिनिन्दाशेषविधिष्वधिकारार्थता विहितार्थता चेति। किं पुनः प्रतिषेधहेतूद्धाराद्देव शब्दस्य प्रमाणत्वं न सिद्ध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६७ ॥

किं पुनरायुर्वेदस्य प्रामाण्यं यदायुर्वेदेनोपदिश्यते इदं कृत्वेष्टमधिगच्छति इदं वर्ज्जयित्वाऽनिष्टं जहाति तस्यानुष्ठीयमानस्य तथाभावः सत्यार्थताऽविपर्य्ययः, मन्त्रपदानाञ्च विषभूताऽशनिप्रतिषेधार्थानां प्रयोगेऽर्थस्य तथाभावः एतत्प्रामाण्यं किं कृतमेतत्। आप्तप्रामाण्यकृतम्। किं पुनराप्तानां प्रामाण्यम् साक्षात्कृतधर्मता भूतदया यथाभूतार्थचिख्यापयिषेति। आप्ताः खलु साक्षात्कृतधर्माणः इदं हातव्यमयमस्य हानिहेतुरिदमस्याधिगन्तव्यमयमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते। तेषां खलु वै प्राणभृतां स्वयमनवबुध्यमानानां नान्यदुपदेशादवबोधकारणमस्ति, न चानबबोधे समीहा वर्जनं वा, नवाऽकृत्वा स्वस्तिभावः, नाप्यस्यान्य उपकारकोऽप्यस्ति। हन्त वयमेभ्यो यथादर्शनं यथाभूतमुपदिशाम स्त इमे श्रुत्वा प्रतिपद्यमाना हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्तीति। एवमाप्तोपदेशः एतेन त्रिविधेनाप्तप्रामाण्येन परिगृहीतोऽनुष्ठीयमानोऽर्थस्य साधको भवति। एवमाप्तोपदेशः प्रमाणमेवमाप्ताः प्रमाणम्। दृष्टार्थेनाप्तोपदेशेनायुर्वेदेनाऽदृष्टार्थो वेदभागोऽनुमातव्यः प्रमाणमिति आप्तप्रामाण्यस्य हेतोः समानत्वादिति, अस्यापि चैकदेशो ग्रामकामो यजेतेत्येवमादिर्दृष्टार्थस्तेनानुमातव्यमिति। लोके च भूयानुपदेशाश्रयो व्यवहारः। लौकिकस्याप्युपदेष्टुरुपदेष्टव्यार्थ ज्ञानपरानुजिघृक्षया यथाभूतार्थचिख्यापयिषया च प्रामाण्यम्। तत्परिग्रहादाप्तोपदेशः प्रमाणमिति द्रष्टृप्रवक्तृसामान्याच्चानुमानम्। य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवायुर्वेदप्रभृतीनामित्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यमिति। नित्यत्वाद्वेदवाक्यानां प्रमाणत्वे तत्प्रामाण्यमाप्तप्रामाण्यादित्ययुक्तम् शब्दस्य वाचकत्वादर्थप्रतिपत्तौ प्रमाणत्वं न नित्यत्वात् नित्यत्वे हि सर्व्वस्य सर्व्वेण वचनाच्छब्दार्थव्यवस्थानुपपत्तिः। नानित्यत्वे वाचकत्वमिति चेत् न लौकिकेष्वदर्शनात्, तेऽपि नित्या इति चेत् न अनाप्तोपदेशादर्थविसंवादो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽनुपपन्नः। नित्यत्वाद्धि शब्दः प्रमाणमिति अनित्यः स इति चेत् अविशेषवचनम् अनाप्तोपदेशो लौकिको न नित्य इति कारणं वाच्यमिति। यथानियोगञ्चार्थस्य प्रत्यायनान्नामधेयशब्दानां लोके प्रामाण्यम् नित्यत्वात्प्रामाण्यानुपपत्तिः। यत्रार्थे नामधेयशब्दो नियुज्यते लोके तस्य नियोगसामर्थ्यात् प्रत्यायको भवति न नित्यत्वात् मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वम् आप्तप्रमाण्याञ्च प्रामाण्यम् लौकिकेषु शब्देषु चैतत् समानमिति॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्याद्यमाह्निकम्॥

अयथार्थः प्रमाणोद्देश इति मत्वाह।

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्॥१॥

न चत्वार्य्येव प्रमाणानि, किन्तर्हि, ऐतिह्यमर्थापत्तिः सम्भवोऽभाव इत्येतान्यपि प्रमाणानि, इति ह्येचुरित्यनिर्द्दिष्टप्रवक्तृकम्प्रवादपारम्पर्य्यमैतिह्यम्, अर्थादापत्तिरर्थापत्तिः आपत्तिः प्राप्तिः प्रसङ्गः। यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः। यथा मेघेष्वसत्सु वृष्टिर्न भवतीति किमत्र प्रसज्यते सत्सु भवतीति। सम्भवो नाम अविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम्। यथा द्रोणस्य सत्ताग्रहणादाढकस्य सत्ताग्रहणम् आढकस्य सत्ताग्रहणात्प्रस्थस्येति। अभावो विरोधी अभूतं भूतस्य, अविद्यमानं वर्षकर्म विद्यमानस्य वाय्वभ्रसंयोगस्य प्रतिपादकम् विधारके हि वाय्वभ्रसंयोगे गुरुत्वादपां पतनकर्म न भवतीति। सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणि प्रमाणान्तरञ्च मन्यमानेन प्रतिषेधः उच्यते सोऽयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥

अनुपपन्नः प्रतिषेधः कथम् आप्तोपदेशः शब्द इति न च शब्दलक्षणमैतिह्याद्व्यावर्त्तते सोऽयं भेदः सामान्यात् संगृह्यत इति । प्रत्यक्षेणाप्रत्यक्षस्य सम्बद्धस्य प्रतिपत्तिरनुमानम्, तथा चार्थापत्तिसम्भवाभावाः, वाक्यार्थसम्प्रत्ययेनानभिहितस्यार्थस्य प्रत्यनीकभावाद्ग्रहणमर्थापत्तिरनुमानमेव,अविनाभाववृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेनेतरस्य ग्रहणं सम्भवः । तदप्यनुमानमेव । अस्मिन् सतीदं नोपपद्यत इति विरोधित्वे प्रसिद्धे कार्य्यानुत्पत्त्या कारणस्य प्रतिबन्धकमनुमीयते सोऽयं यथार्थ एव प्रमाणोद्देश इति सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम् । अत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते तथाहीयम् ॥

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥

असत्सु मेघेषु वृष्टिर्न भवतीति सत्सु भवतीत्येतदर्थादापद्यते सत्स्वपि चैकदा न भवति सेयमर्थापत्तिरप्रमाणमिति । नानैकान्तिकत्वमर्थापत्तेः ॥

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

असति कारणे कार्य्यं नोत्पद्यते इति वाक्यात् प्रत्यनीकभूतोऽर्थः सति कारणे कार्य्यमुत्पद्यत इत्यर्थादापद्यते अभावस्य हि भावः प्रत्यनीक इति । सोऽयं कार्य्योत्पादः सति कारणेऽर्थादापद्यमानो न कारणस्य सत्तां व्यभिचरति न खल्वसति कारणे कार्य्यमुत्पद्यते तस्मान्नानैकान्तिकी यत्तु सति कारणे निमित्तप्रतिबन्धात् कार्य्यं नोत्पद्यत इति कारणधर्म्मोऽसौ न त्वर्थापत्तेः प्रमेयं किन्तर्ह्यस्याः प्रमेयम् सति कारणे कार्य्यमुत्पद्यत इति योऽसौ कार्य्योत्पादः कारणस्य सत्तां न व्यभिचरति एतदस्याः प्रमेयम् । एवन्तु सति अनर्थापत्तावर्थापत्त्यभिमानं कृत्वा प्रतिषेध उच्यत इति । दृष्टस्य कारणधर्म्मो न शक्यः प्रत्याख्यातुमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥ ५ ॥

अर्थापत्तिर्न प्रमाणमनैकान्तिकत्वादिति वाक्यम् प्रतिषेधः तेनानेनार्थापत्तेः प्रमाणत्वं प्रतिषिध्यते न सद्भावः एवमनैकान्तिको भवति अनैकान्तिकत्वादप्रमाणेनानेन न कश्चिदर्थः प्रतिषिध्यते इति । अथ मन्यसे नियतविषयेष्वर्थेषु स्वविषये व्यभिचारो भवति न च प्रतिषेधस्यासद्भावो विषयः एवन्तर्हि ॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

अर्थापत्तेरपि कार्य्योत्पादेन कारणसत्ताया अव्यभिचारो विषयः न च कारणधर्म्मो निमित्तप्रतिबन्धात् कार्य्यानुत्पादत्वमिति। अभावस्य तर्हि प्रमाणभावाभ्यनुज्ञा नोपपद्यते कथमिति ॥

नाभावप्रामाण्यम्प्रमेयासिद्धेः ॥ ७ ॥

अभावस्य भूयसि प्रमेये लोकसिद्धे वैजात्यादुच्यते नाभावप्रामाण्यम् प्रमेयासिद्धेरिति अथाऽयमर्थबहुत्वादर्थैकदेश उदाह्रियते ॥

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥ ८ ॥

तस्याभावस्य सिध्यति प्रमेयम्, कथम् लक्षितेषु वाससु अनुपादेयेषु उपादेयानामलक्षितानां लक्षणलक्षितत्वात् लक्षणाभावेन लक्षितत्वादिति । उभयसन्निधावलक्षितानि वासांस्यानयेति प्रयुक्तो येषु वाससु लक्षणानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यते प्रतिपद्य चानयति प्रतिपत्तिहेतुश्च प्रमाणमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥९॥

यत्र भूत्वा किञ्चिन्न भवति तत्र तस्याभावः उपपद्यते । अलक्षितेषु च वासःसु लक्षणानि भूत्वा न भवन्ति तस्मात् तेषु लक्षणाभावोऽनुपपन्न इति नान्यलक्षणोपपत्तेः यथायमन्येषु वासःसु लक्षणानामुपपत्तिम्पश्यति नैवमलक्षितेषु सोऽयं लक्षणाभावं पश्यमभावेनार्थम्प्रतिपद्यते इति॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

तेषु वासःसु लक्षितेषु सिद्धिर्विद्यमानता येषां भवति न तेषामभावो लक्षणानाम्, यानि च लक्षितेषु विद्यन्ते लक्षणानि, तेषामलक्षितेष्वभाव इत्यहेतुः । यानि खलु भवन्ति तेषामभावो व्याहत इति ॥

न लक्षणावस्थितापेक्षसिद्धेः ॥ ११ ॥

न ब्रूमो यानि लक्षणानि भवन्ति तेषामभाव इति । किन्तु केषुचि- ल्लक्षणान्यवस्थितानि अनवस्थानि केषुचिदपेक्षमाणो येषु लक्षणानां भावं न पश्यति तानि लक्षणाभावेन प्रतिपद्यत इति ॥

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

अभावद्वैतं खलु भवति प्राक् चोत्पत्तेरविद्यमानता उत्पन्नस्य चात्मनो हानादविद्यमानता, तत्रालक्षितेषु वासःसु प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति । आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते तस्मिन् सामान्येन विचारः किं नित्योऽथानित्य इति ॥

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ॥१३॥

आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके, गन्धादि- सहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मक इत्यपरे,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे, महाभूतसङ्क्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मक इत्यन्ये, अतः संशयः किमत्र तत्त्वमिति, अनित्यः शब्द इत्युत्तरम्, कथम् ॥

आदिमत्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च॥१४

आदिर्योनिः कारणम्, आदीयतेऽस्मादिति कारणवदनित्यं दृष्टम् संयोगविभागजश्च शब्दः कारणवत्वादनित्य इति, का पुनरियमर्थदेशना कारणवदिति उत्पत्तिधर्मकत्वादनित्यः शब्द इति। भूत्वा न भवति विनाशधर्मक इति, सांशयिकमेतत् किमुत्पत्तिकारणं संयोगविभागौ शब्दस्य, आहोस्विदभिव्यक्तिकारणमित्यत आह। ऐन्द्रियकत्वात् इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियः। किमयं व्यञ्जकेन समानदेशोऽभिव्यज्यते रूपादिवत्। अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो गृह्यत इति, संयोगनिवृत्तौ शब्दग्रहणान्न व्यञ्जकेन समानदेशस्य ग्रहणम्। दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते न च व्यञ्जकाभावे व्यङ्ग्यस्य ग्रहणं भवति, तस्मान्न व्यञ्जकः संयोगः। उत्पादके तु संयोगे संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणमिति। इतश्च शब्द उत्पद्यते नाभिव्यज्यते कृतकवदुपचारात् तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं मन्दं दुःखमिति उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति। व्यञ्जकस्य तथाभावाद्ग्रहणस्य तीव्रमन्दता रूपवदिति चेन्न अभिभवोपपत्तेः संयोगस्य व्यञ्जकस्य तीव्रमन्दतया शब्दग्रहणस्य तीव्रमन्दता भवति न तु शब्दो भिद्यते यथा प्रकाशस्य तीव्रमन्दतया रूपग्रहणस्येति तच्च नैवम् अभिभवोपपत्तेः, तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभिभवति न मन्दः, न च शब्दग्रहणमभिभावकं शब्दश्च न भिद्यते शब्दे तु भिद्यमाने युक्तोऽभिभवः तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति, अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात् व्यञ्जकेन समानदेशोऽभिव्यज्यते शब्द इत्येतस्मिन् पक्षे नोपपद्यतेऽभिभवः, न हि भेरीशब्देन तन्त्रीस्वनः प्राप्त इति, अप्राप्ते अभिभव इति चेत् शब्दमात्राभिभवप्रसङ्गः। अथ मन्येता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽसत्यां प्राप्तावभिभवो भवतीति । एवं सति यथा भेरीशब्दः कश्चित्तन्त्री-स्वनमभिभवति । एवमन्तिकस्योपादानमिव दवीयस्योपादानमपि तन्त्री-स्वनं नाभिभवेत् अप्राप्तेरविशेषात् तत्र कश्चिदेव भेर्यां प्रणादितायां सर्व्वलोकेषु समानकालास्तन्त्रीस्वना न श्रूयेरन् इति ॥ नानाभूतेषु शब्द-सन्तानेषु सत्सु श्रोत्रप्रत्यासत्तिभावेन कस्यचिच्छब्दस्य तीव्रेण मन्दस्याभि-भवो युक्त इति । कः पुनरयमभिभवो नाम ग्राह्यसमानजातीयग्रहण-मभिभवः । यथोल्काप्रकाशस्य ग्रहणार्हस्यादित्यप्रकाशेनेति ॥

न घटाभावसामान्यनित्यत्वात् नित्येष्वप्यनित्य-वदुपचाराच्च ॥ १५ ॥

न खलु आदिमत्त्वादनित्यः शब्दः, कस्मात् व्यभिचारात् आदिमतः खलु घटाभावस्य दृष्टं नित्यत्वम्, कथमादिमान् कारणविभागेभ्यो हि घटो न भवति कथमस्य नित्यत्वं योऽसौ कारणविभागेभ्यो न भवति न तस्या-भावो भावेन कदाचिन्निवर्त्त्यत इति, यदप्यैन्द्रियकत्वात् तदपि व्यभिच-रति । ऐन्द्रियकञ्च सामान्यं नित्यञ्चेति, यदपि कृतकवदुपचारादिति तदपि व्यभिचरति नित्येष्वनित्यवदुपचारो दृष्टः यथा हि भवति वृक्षस्य प्रदेशः कम्बलस्य प्रदेशः एवमाकाशस्य प्रदेशः आत्मनः प्रदेश इति भवतीति॥

तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥ १६॥

नित्यमित्यत्र किं तावत्तत्त्वम् । आत्मान्तरस्यानुत्पत्तिधर्मकस्यात्महा-नानुपपत्तिर्नित्यत्वम् । तच्चाभावे नोपपद्यते, भाक्तं तु भवति यत्तत्रात्मा न महानासीत् यद्भूत्वा न भवति न जातु तत् पुनर्भवति तत्रानित्य इव नित्यो घटाभाव इत्ययं पदार्थ इति, तत्र यथाजातीयकः शब्दो न तथा-जातीयकं कार्य्यं किञ्चिन्नित्यं दृश्यत इत्यव्यभिचारः । यदपि सामान्य-नित्यत्वादिति इन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्तानानुमानविशेषणात् ॥ १७ ॥

नित्ये व्यभिचार इति प्रकृतम्। नेन्द्रियग्रहणसामर्थ्याच्छब्दस्यानित्यत्वं किन्तर्हीन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्वमिति यदपि नित्येष्वप्यनित्यत्ववदुपचारादिति न ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इति ॥ १८ ॥

एवमाकाशप्रदेश आत्मप्रदेश इति नात्राकाशात्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य, कथं ह्यविद्यमानमभिधीयते अविद्यमानता च प्रमाणतोऽनुपलब्धेः किन्तर्हि तत्राभिधीयते संयोगस्याव्याप्यवृत्तित्वम् परिच्छिन्नेन द्रव्येणाकाशस्य संयोगो नाकाशं व्याप्नोति अव्याप्य वर्त्तत इति, तदस्य कृतकेन द्रव्येण सामान्यम् नह्यामलकयोः संयोग आश्रयं व्याप्नोति सामान्यकृता च भक्तिराकाशस्य प्रदेश इति। अनेनात्मप्रदेशो व्याख्यातः संयोगवच्च शब्दबुद्ध्यादीनामव्याप्यवृत्तित्वमिति। परीक्षिता च तीव्रमन्दता शब्दतत्त्वं न भक्तिकृतेति। कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयत इति, शीलमिदं भगवतः सूत्रकारस्य बहुष्वधिकरणेषु द्वौ पक्षौ न व्यवस्थापयति तत्र शास्त्रसिद्धान्तात् तत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशाखमनुमानमिति। अथापि खल्विदमस्ति इदं नास्तीति कुत एतत् प्रतिपत्तव्यमिति प्रमाणत उपलब्धेरनुपलब्धेश्चेति। अविद्यमानस्तर्हि शब्दः ॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १९ ॥

प्रागुच्चारणान्नास्ति शब्दः। कस्मात्। अनुपलब्धेः सतोऽनुपलब्धिरावरणादिभ्य एतन्नोपपद्यते कस्मात् आवरणादीनामनुपलब्धिकारणानामग्रहणात्। अनेनावृतः शब्दो नोपलभ्यते असन्निकृष्टश्चेन्द्रियव्यवधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादित्येवमादि अनुपलब्धिकारणं न गृह्यत इति सोऽयमनुच्चारितो नास्तीति, उच्चारणमस्य व्यञ्जकं तदभावात् प्रागुच्चारणादनुपलब्धिरिति। किमिदमुच्चारणं नामेति। विवक्षाजनितेन प्रयत्नेन कोष्ठस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघातः। यथास्थानं प्रतिघाताद्वर्णाभिव्यक्तिरिति। संयोगविशेषो वै प्रतिघातः प्रतिषिद्धञ्च संयोगस्य व्यञ्जकत्वम्। तस्मान्न व्यञ्जकाभावादग्रहणम् अपि त्वभावादेवेति सोऽयमुच्चार्य्यमाणः श्रूयते श्रूयमाणश्च भूत्वा भवतीति अनुमीयते ऊर्द्ध्वं चोच्चारणाच्छ्रूयते स भूत्वा न भवतीति अभावान्न श्रूयत इति कथं आवरणाद्यनुपलब्धेरित्युक्तं तस्मादुत्पत्तितिरोभावधर्मकः शब्द इति एवञ्च सति तत्त्वं पांशुभिरिवावाकिरन्निदमाह॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः॥ २०॥

यद्यनुपलम्भादावरणं नास्ति आवरणानुपलब्धिरपि तर्ह्यनुपलम्भान्नास्तीति तस्या अभावादप्रतिषिद्धमावरणमिति कथं पुनर्जानीतेऽभावान्नावरणानुपलब्धिरुपलभ्यत इति किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात् समानम् अयं खल्वावरणमनुपलभमानः प्रत्यात्ममेव संवेदयते नावरणमुपलभ्य इति यथा कुड्येनावृतस्यावरणमुपलभमानः प्रत्यात्ममेव संवेदयते सेयमावरणोपलब्धिवदावरणानुपलब्धिरपि संवेद्यैवेति एवञ्च सत्यपहृतविषयमुत्तरवाक्यमस्तीति अभ्यनुज्ञावादेन तूच्यते जातिवादिना॥

अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात्॥ २१॥

यथानुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति यद्यभ्यनुजानाति भवाननुपलभ्यमानाप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति। यद्यभ्यनुजानाति न चानुपलभ्यमाना नावरणानुपलब्धिरस्तीति अभ्यनुज्ञाय च वदति नास्त्यावरणमनुपलम्भादिति। एतस्मिन्नप्यभ्यनुज्ञावादे प्रतिपत्तिनियमो नोपपद्यत इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ २२ ॥

यदुपलभ्यते तदस्ति यन्नोपलभ्यते तन्नास्तीति अनुपलम्भात्मकमसदिति व्यवस्थितम् उपलब्ध्यभावश्चानुपलब्धिरिति सेयमभावत्वान्नोपलभ्यते सच्च खल्वावरणं तस्योपलब्ध्या भवितव्यम्। न चोपलभ्यते तस्मान्नास्तीति। तत्र यदुक्तं नावरणानुपपत्तिरनुपलम्भादित्ययुक्तमिति अथ शब्दस्य नित्यत्वं प्रतिजानानः कस्मा.द्धेतोः प्रतिजानीते ॥

अस्पर्शत्वात् ॥ २३ ॥

अस्पर्शनाकाशं नित्यं दृष्टमिति तथा च शब्द इति सोऽयमुभयतः सव्यभिचारः स्पर्शवांश्चाणुर्नित्यः अस्पर्शञ्च कर्माऽनित्यं दृष्टं अस्पर्शत्वादित्येतस्य साध्यसाधर्म्येणोदाहरणम् ॥

न कर्म्मानित्यत्वात् ॥ २४ ॥

साध्यवैधर्म्येणोदाहरणम् ॥

नाणुनित्यत्वात् ॥ २५ ॥

उभयस्मिन्नुदाहरणे व्यभिचारान्न हेतुः। अयन्तर्हि हेतुः ॥

सम्प्रदानात् ॥ २६ ॥

सम्प्रदीयमानमवस्थितं दृष्टम्, सम्प्रदीयते च शब्द आचार्य्येणान्तेवासिने तस्मादवस्थित इति ॥

तदन्तरालानुपलब्धेरहेतुः ॥ २७ ॥

येन सम्प्रदीयते यस्मै च तयोरन्तरालेऽवस्थानमस्य केन लिङ्गेनोपलभ्यते सम्प्रदीयमानो ह्यवस्थितः सम्प्रदातुरपैति सम्प्रदानञ्च प्राप्नोतीत्यवर्जनीयमेतत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्यापनादप्रतिषेधः ॥ २८ ॥

अध्यापनं लिङ्गं असति सम्प्रदानेऽध्यापनं न स्यादिति ॥

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः॥२९॥

समानमध्यापनमुभयोः पक्षयोः संशयानतिवृत्तेः किमाचार्य्यस्थः शब्दोऽन्तेवासिनमापद्यते तदध्यापनम्। आहोस्विन्नृत्योपदेशवद्गृहीतस्यानुकरणमध्यापनमिति। एवमध्यापनमलिङ्गं सम्प्रदानस्येति। अयन्तर्हि हेतुः ॥

अभ्यासात् ॥ ३० ॥

अभ्यस्यमानमवस्थितं दृष्टम् पञ्चकृत्वः पश्यतीति, रूपमवस्थितं पुनः पुनर्दृश्यते, भवति च शब्देऽभ्यासः,दशकृत्वोऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इति, तस्मादवस्थितस्य पुनः पुनरुच्चारणमभ्यास इति ॥

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३१ ॥

अनवस्थानेऽप्यभ्यासस्याभिधानं भवति। द्विर्न्नृत्यतु भवान् त्रिर्न्नृत्यतु भवानिति; द्विरनृत्यत् त्रिरनृत्यत् द्विरग्निहोत्रं जुहोति द्विर्भुङ्क्ते एवं व्यभिचारात् प्रतिषिद्धहेतावन्यशब्दस्य प्रयोगः प्रतिषिध्यते ॥

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः ॥३२॥

यदिदमन्यदिति मन्यसे तत् स्वार्थेनानन्यत्वादन्यन्न भवति। एवमन्यताया अभावः, तत्र यदुक्तमन्यत्वेऽप्यभ्यासोपचारादित्येवदयुक्तमिति शब्दप्रयोगं प्रतिषेधतः शब्दान्तरप्रयोगः प्रतिषिध्यते ॥

तदभावे नास्त्य नन्यता तयोरितरेतरापेक्षसिद्धेः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यस्मादन्यतामुपादयति भवान् उपपाद्य चान्यत् प्रत्याचष्टे अनन्यदिति च शब्दमनुजानाति प्रयुङ्क्ते चानन्यदिति। एतत् समासपदमन्यशब्दोऽयं प्रतिषेधेन सह समस्यते यदिचात्रोत्तरं पदं नास्ति कस्यायं प्रतिषेधेन सह समासः, तस्मात्तयोरनन्यान्यशब्दयोरितरोऽनन्यशब्द इतरमन्यशब्दमपेक्षमाणः सिध्यतीति तत्र यदुक्तमन्यताया अभाव इत्येतदयुक्तमिति, अस्तु तर्हीदानीं शब्दस्य नित्यत्वम् ॥

विनाशकारणानुपलब्धेः ॥ ३४ ॥

यदनित्यं तस्य विनाशः कारणाद्भवति यथा लोष्टस्य कारणद्रव्यविभागात्, शब्दश्चेदनित्यस्तस्य विनाशो यस्मात् कारणाद्भवति तदुपलभ्येत न चोपलभ्यते तस्मान्नित्य इति ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ३५

यथा विनाशकारणानुपलब्धेरविनाशप्रसङ्गः। एवमश्रवणकारणानुपलब्धेः सततं श्रवणप्रसङ्गः। व्यञ्जकाभावादश्रवणमिति चेत् प्रतिषिद्धम् व्यञ्जकम्। अथाविद्यमानस्य निर्निमित्तं श्रवणमिति विद्यमानस्य निर्निमित्तो विनाश इति समानस्य दृष्टविरोधो निमित्तमन्तरेण विनाशे चाश्रवणे चेति ॥

उपलभ्यमाने चानुपलब्धेरसत्वादनपदेशः ॥ ३६ ॥

अनुमानाच्चोपलभ्यमाने शब्दस्य विनाशकारणे विनाशकारणानुपलब्धेरसत्वादित्यनपदेशः। यस्माद्विषाणी तस्मादश्व इति किमनुमानमिति चेत् सन्तानोपपत्तिः उपपादितः शब्दसन्तानः संयोगविभागजाच्छब्दाच्छब्दान्तरं ततोऽप्यन्यत्ततोऽप्यन्यदिति तत्र कार्य्यः शब्दः कारणशब्दं निरुणद्धि प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधकः। दृष्टं हि तिरः प्रतिकुड्यमन्तिकस्थेनाप्यश्रवणं शब्दस्य श्रवणं दूरस्थेनाप्यसति व्यवधान इति। घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानोऽविच्छेदेन श्रूयते तत्र नित्ये शब्दे,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घण्टास्थमन्यगतं वाऽवस्थितं सन्ताननिवृत्तिरभिव्यक्तिकारणं वाच्यम् येन श्रुतिसन्तानो भवतीति शब्दभेदश्चासतिश्रुतिभेद उपपादयितव्य इति। अनित्ये तु शब्दे घण्टास्थं सन्तानवृत्तिसंयोगसहकारिनिमित्तान्तरं संस्कारभूतं पटुमन्दमिति वर्त्तते तस्यानुवृत्त्या शब्दसन्तानानुवृत्तिः। पटुमन्द-भावाच्च तीव्रमन्दता शब्दस्य, तत्कृतश्च श्रुतिभेद इति न वै निर्निमित्ता-न्तरं संस्कार उपलभ्यते अनुपलब्धेर्नास्तीति॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः॥३७॥

पाणिकर्म्मणा पाणिघण्टाप्रश्लेषो भवति तस्मिंश्च सति शब्दसन्तानो नोपलभ्यते अतः श्रवणानुपपत्तिः। तत्र प्रतिघातिद्रव्यसंयोगः शब्दस्य निमित्तान्तरं संस्कारभूतं निरुणद्धीत्यनुमीयते। तस्य च निरोधाच्छब्द-सन्तानो नोत्पद्यते अनुत्पत्तौ श्रुतिविच्छेदः। यथा प्रतिघातिद्रव्यसंयोगा-दिषोः क्रियाहेतौ संस्कारे निरुद्धे गमनाभाव इति कम्पसन्तानस्य स्पर्श-नेन्द्रियग्राह्यस्य चोपरमः कांस्यपात्रादिषु पाणिसंश्लेषो लिङ्गं संस्कारस-न्तानस्येति, तस्मान्निमित्तान्तरस्य संस्कारभूतस्य नानुपलब्धिरिति॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्व-प्रसङ्गः॥ ३८॥

यदि यस्य विनाशकारणं नोपलभ्यते तदवतिष्ठते अवस्थानाच्च तस्य नित्यत्वं प्रसज्यते। एवं यानि खल्विमानि शब्दश्रवणानि शब्दाभिव्य-क्तय इति मतं न तेषां विनाशकारणं भवतोपपाद्यते अनुपपादनादनव-स्थानमनवस्थानात् तेषां नित्यत्वं प्रसज्यत इति। अथ नैवन्तर्हि विना-शकारणानुपलब्धेः शब्दस्यावस्थानान्नित्यत्वमिति। कम्पसमानाश्रयस्य च नादस्य पाणिप्रश्लेषात् कम्पवत् कारणोपरमादभावः वैयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषात् समानाधिकरणस्यैवोपरमः स्यादिति॥

अस्पर्शत्वादप्रतिषेधः॥ ३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदिदमाकाशगुणः शब्द इति प्रतिषिध्यते अयमनुपपन्नः प्रतिषेधः अस्पर्शत्वाच्छब्दाश्रयस्य रूपादिसमानदेशस्याग्रहणे शब्दसन्तानोपपत्तेरस्पर्शव्यापिद्रव्याश्रयः शब्द इति ज्ञायते न च कम्पसमानाश्रय इति प्रतिद्रव्यं रूपादिभिः सह सन्निविष्टः शब्दसमानदेशो व्यज्यत इति नोपपद्यते कथम् ॥

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ४० ॥

सन्तानोपपत्तेश्चेति चार्थः, तद्व्याख्यातम्। यदि रूपादयः शब्दाश्च प्रतिद्रव्यं समस्ताः समुदितास्तस्मिन् समासे समुदाये यो यथाजातीयकः सन्निविष्टस्तस्य तथाजातीयस्यैव ग्रहणेन भवितव्यं शब्दे रूपादिवत् तत्र योऽयं विभाग एकद्रव्ये नानारूपाभिन्नश्रुतयो विधर्म्माणः शब्दा अभिव्यज्यमाना श्रूयन्ते। यच्च विभागान्तरं सरूपाः समानश्रुतयः सधर्म्माणः शब्दास्तीव्रमन्दधर्मतया भिन्नाः श्रूयन्ते तदुभयं नोपपद्यते नानाभूतानामुत्पद्यमानानामयं धर्म्मो नैकस्य व्यज्यमानस्येति। अस्ति चायं विभागो विभागान्तरञ्च तेन विभागोपपत्तेर्मन्यामहे न प्रतिद्रव्यं रूपादिभिः सह शब्दः सन्निविष्टो व्यज्यत इति। द्विविधश्चायं शब्दो वर्णात्मको ध्वनिमात्रश्च, तत्र वर्णात्मनि तावत् ॥

विकारादेशोपदेशात् संशयः ॥ ४१ ॥

दध्यत्रेति। केचिदिकार इत्वं हित्वा यत्वमापद्यते इति विकारं मन्यन्ते। केचिदिकारस्य प्रयोगे विषयकृते यदिकारः स्थानं जहाति तत्र यकारस्य प्रयोगं ब्रुवते। संहितायां विषये इकारो न प्रयुज्यते तस्य स्थाने यकारः प्रयुज्यते स आदेश इति। उभयमिदमुपदिश्यते तत्र न ज्ञायते किन्तत्त्वमिति। आदेशोपदेशस्तत्त्वम्। विकारोपदेशे ह्यन्वयस्याग्रहणाद्विकारानुमानम् सत्यन्वये किञ्चिन्निवर्त्तते किञ्चिदुपजायत इति शक्येत विकारोऽनुमातुम्, न चान्वयो गृह्यते, तस्माद्विकारो नास्तीति, भिन्नकरणयोश्च वर्णयोरप्रयोगे प्रयोगोपपत्तिः। विवृत्तकरण इकारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईषत्स्पृष्टकरणो यकारः । ताविमौ पृथक् करणाख्येन प्रयत्नेनोच्चारणीयौ तयोरेकस्याप्रयोगे ऽन्यतरस्य प्रयोग उपपन्न इति अविकारे चाविशेषः । यत्रेमाविकारयकारौ न विकारभूतौ यतते यच्छति प्रायंस्त इति । इकार इदमिति । यत्र च विकारभूतौ इदं व्याहरति उभयत्र प्रयोक्तुरविशेषो यत्नः, श्रोतुश्च श्रुतिरित्यादेशोपपत्तिः । प्रयुज्यमानाग्रहणाच्च न खल्विकारः प्रयुज्यमानो यकारतामापद्यमानो गृह्यते । किन्तर्हि इकारस्य प्रयोगे यकारः प्रयुज्यते तस्मादविकार इति । अविकारे च न शब्दान्वाख्यानलोपः । न विक्रियन्ते वर्णा इति नचैतस्मिन् पक्षे शब्दान्वाख्यानस्यासम्भवो येन वर्णविकारं प्रतिपद्येमहीति न खलु वर्णस्य वर्णान्तरं कार्य्यम् नहीकाराद्यकार उत्पद्यते यकाराद्विकारः । पृथक्स्थानप्रयत्नोत्पाद्या हीमे वर्णास्तेषामन्योन्यस्य स्थाने प्रयुज्यत इति युक्तम् । एतावच्चैतत् परिणामो विकारः स्यात् कार्यकारणभावो वा उभयञ्च नास्ति तस्मान्न सन्ति वर्णविकारा वर्णसमुदायविकारानुपपत्तिवच्च वर्णविकारानुपपत्तिः अस्ते भूः ब्रुवो वचिरिति यथा वर्णसमुदायस्य धातुलक्षणस्य क्वचिद्विषये वर्णान्तरसमुदायो न परिणामो नाकार्य्यं शब्दान्तरस्य स्थाने शब्दान्तरं प्रयुज्यते तथा वर्णस्य वर्णान्तरमिति इतश्च न सन्ति वर्णविकाराः ।

प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ ४२ ॥

प्रकृत्यनुविधानं विकारेषु दृष्टम् । यकारे ह्रस्वदीर्घानुविधानं नास्ति येन विकारत्वमनुमीयत इति ॥

न्यूनसमाधिकोपलब्धे विंकाराणामहेतुः ॥४३

द्रव्यविकारा न्यूनाः समा अधिकाश्च गृह्यन्ते तद्वदयं विकारो न्यून स्यादिति द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः । अत्र नोदाहरणं साधर्म्याद्धेतुरस्ति न वैधर्म्यात् अनुपसंहृतश्च हेतुना दृष्टान्तो न साधक इति प्रतिदृष्टान्ते चानियमः प्रसज्येत । यथाऽनडुहस्थानेऽश्वो वोढुं नियुक्तो न तद्विकारो भवति, एवमिवर्णस्य स्थाने यकारः प्रयुक्तो न विकार इति, न चात्र नियमहेतुरस्ति दृष्टान्तः साधको न प्रतिदृष्टान्त इति द्रव्यविकारोदाहरणञ्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४४ ॥

अतुल्यानां द्रव्याणां प्रकृतिभावो विकल्पते विकारश्च प्रकृतीरनुविधीयते, न तु इवर्णमनुविधीयते यकारः, तस्मादनुदाहरणं द्रव्यविकार इति।

द्रव्यविकारे वैषम्यवद्वर्णविकारविकल्पः ॥ ४५ ॥

यथा द्रव्यभावेन तुल्यायाः प्रकृते र्विकारवैषम्यम्, एवं वर्णभावेन तुल्यायाः प्रकृते र्विकारविकल्प इति ॥

न विकारधर्म्मानुपपत्तेः ॥ ४६ ॥

अयं विकारधर्म्मो द्रव्यसामान्ये, यदात्मकं द्रव्यं मृद्वा सुवर्णं वा तस्यात्मनोऽन्वये पूर्व्वो व्यूहो निवर्त्तते, व्यूहान्तरञ्चोपजायते तं विकारमाचक्ष्महे। न वर्णसामान्ये कश्चिच्छब्दात्मान्वयी य इत्वं जहाति यत्वञ्चापद्यते तत्र यथा सति द्रव्यभावे विकारवैषम्ये नाऽनडुहोऽश्वो विकारो विकारधर्म्मानुपपत्तेः, एवमिवर्णस्य न यकारो विकारो विकारधर्म्मानुपपत्तेरिति। इतश्च न सन्ति वर्णविकाराः॥

विकारप्राप्तानामपुनरावृत्तेः ॥ ४७ ॥

अनुपपन्ना पुनरापत्तिः। कथम्। पुनरापत्तेरननुमानादिति। इकारो यकारत्वमापन्नः पुनरिकारो भवति न पुनरिकारस्य स्थाने यकारस्य प्रयोगोऽप्रयोगश्चेत्यत्रानुमानं नास्ति॥

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

अननुमानादिति न इदं ह्यनुमानम्, सुवर्णं कुण्डलत्वं हित्वा रुचकत्वमापद्यते रुचकत्वं हित्वा पुनः कुण्डलत्वमापद्यते, एवमिकारोऽपि यकारत्वमापन्नः पुनरिकारो भवतीति व्यभिचारादननुमानम्, यथा पयो दधिभावमापन्नं पुनः पयो भवति किम्, एवं वर्णानां न पुनरापत्तिः। अथ सुवर्णवत्पुनरापत्तिरिति सुवर्णोदाहरणोपपत्तिश्च न॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४९ ॥

अवस्थितं सुवर्णं हीयमानेनोपजायमानेन धर्म्मेण धर्म्मि भवति नैवं कश्चिच्छब्दात्मा हीयमानेनेत्वेनोपजायमानेन यत्त्वेन धर्म्मी गृह्यते। तस्मात्सुवर्णोदाहरणं नोपपद्यत इति।

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः ॥ ५०

वर्णविकारा अपि वर्णत्वं न व्यभिचरन्ति। यथा सुवर्णविकारः सुवर्णत्वमिति॥

सामान्यवतो धर्म्मयोगो न सामान्यस्य ॥ ५१ ॥

कुण्डलरुचकौ सुवर्णस्य धर्म्मौ न सुवर्णत्वस्य एवमिकारयकारौ कस्य वर्णात्मनो धर्म्मौ वर्णत्वं सामान्यं न तस्येमौ वर्णौ भवितुमर्हतः। न च निवर्त्तमानो धर्म्म उपजायमानस्य प्रकृतिः। तत्र निवर्त्तमान इकारो न यकारस्योपजायमानस्य प्रकृतिरिति। इतश्च वर्णविकारानुपपत्तिः॥

नित्यत्वे विकारादनित्यत्वे चानवस्थानात् ॥५२

नित्या वर्णा इत्येतस्मिन् पक्षे इकारयकारौ वर्णौ इत्युभयोर्नित्यत्वाद्विकारानुपपत्तिः। अनित्यत्वे विनाशित्वात्कः कस्य विकार इति। अथानित्या वर्णा इति पक्षः एवमप्यनवस्थानं वर्णानाम्, किमिदमनवस्थानं वर्णानाम् उत्पद्य निरोधः। उत्पद्य निरुद्धे इकारे यकार उत्पद्यते यकारे चोत्पद्य निरुद्धे इकार उत्पद्यते इति कः कस्य विकारः तदेतदवगृह्य सन्धाने सन्धाय चावग्रहे वेदितव्यमिति नित्यपक्षे तु तावत्समाधिः॥

नित्यानामतीन्द्रियत्वात्तद्धर्म्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५३ ॥

नित्या वर्णा न विक्रियन्त इति विप्रतिषेधः यथा नित्यत्वे सति किञ्चिदतीन्द्रियं किञ्चिदिन्द्रियग्राह्यमिन्द्रियग्राह्याश्च वर्णा एवं।नत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सति किञ्चिन्न विक्रियते वर्णास्तु विक्रियन्त इति विरोधादहेतुस्तद्धर्मविकल्पः, नित्यं नोपजायते नापैति अनुपजनापायधर्मकम्, अनित्यं पुनरुपजनापाययुक्तम्, न चान्तरेणोपजनापायौ विकारः सम्भवति, तद्यदि वर्णा विक्रियन्ते नित्यत्वमेषां निवर्त्तते। अथ नित्या विकारधर्मत्वमेषां निवर्त्तते सोऽयं विरुद्धो हेत्वाभासो धर्मविकल्प इति, अनित्यपक्षे समाधिः॥

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ५४

यथाऽनवस्थायिनां वर्णानां श्रवणम्भवति एवमेषां विकारो भवतीति असम्बन्धादसमर्था अर्थप्रतिपादिका वर्णोपलब्धि र्न विकारेण सम्बन्धादसमर्था या गृह्यमाणा वर्णविकारमनुपपादयेदिति। तत्र यादृगिदं गन्धगुणा पृथिवी एवं शब्दसुखादिगुणापीति तादृगेतद्भवतीति। न च वर्णोपलब्धिर्वर्णनिवृत्तौ वर्णान्तरप्रयोगस्य निवर्त्तिका योऽयमिवर्णनिवृत्तौ यकारस्य प्रयोगो यद्ययं वर्णोपलब्ध्या निवर्त्तते तदा तत्रोपलभमान इवर्णो यत्वमापद्यत इति गृह्यते। तस्माद्वर्णोपलब्धिरहेतुर्वर्णविकारस्येति॥

विकारधर्मित्वे नित्यत्वाभावात्कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५५ ॥

तद्धर्मविकल्पादिति न युक्तः प्रतिषेधः, न खलु विकारधर्मकं किञ्चित् नित्यमुपलभ्यत इति वर्णोपलब्धिवदिति न युक्तः प्रतिषेधः अवग्रहे हि दधि अत्रेति प्रयुज्य चिरं स्थित्वा ततः संहितायां प्रयुङ्क्ते दध्यत्रेति, चिरनिवृत्ते चायमिवर्णे यकारः प्रयुज्यमानः कस्य विकार इति प्रतीयते कारणाभावात्कार्य्याभाव इत्यनुयोगः प्रसज्यत इति। इतश्च वर्णविकारानुपपत्तिः॥

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इकारस्थाने यकारः श्रूयते यकारस्थाने खल्विकारो विधीयते, विध्यति, तद्यदि स्यात् प्रकृतिविकारभावो वर्णानां तस्य प्रकृतिनियमः स्यात् दृष्टो विकारधर्म्मित्वे प्रकृतिनियम इति ।

अनियमे नियमान्नानियमः ॥ ५७ ॥

योऽयं प्रकृतेरनियम उक्तः स नियतो यथाविषयं व्यवस्थितः, नियतत्वान्नियम इति भवति, एवं सत्यनियमो नास्ति तत्र यदुक्तं प्रकृत्यनियमादित्येतदयुक्तमिति ॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ५८ ॥

नियम इत्यत्रार्थाभ्यनुज्ञा, अनियम इति तस्य प्रतिषेधः । अनुज्ञातनिषिद्धयोश्च व्याघातादनर्थान्तरत्वं न भवति । अनियमश्च नियतत्वान्नियमो न भवतीति नात्रार्थस्य तथाभावः प्रतिषिध्यते किन्तर्हि तथाभूतस्यार्थस्य नियमशब्देनाभिधीयमानस्य नियतत्वान्नियमशब्द एवोपपद्यते सोऽयं नियमादनियमे प्रतिषेधो न भवतीति न चेयं वर्णविकारोपपत्तिः परिणामात्कार्य्यकारणभावाद्वा, किन्तर्हि ॥

गुणान्तरापत्त्युपमर्द्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः ॥ ५९ ॥

स्थान्यादेशभावादप्रयोगे प्रयोगो विकारशब्दार्थः, स भिद्यते गुणान्तरापत्तिः उदात्तस्यानुदात्त इत्येवमादिः । उपमर्द्दो नाम एकरूपनिवृत्तौ रूपान्तरोपजननः । ह्रासो दीर्घस्य ह्रस्वः, वृद्धिर्ह्रस्वस्य दीर्घः, तयोर्वा प्लुतः । लेशो लाघवं स्त इत्यस्तेर्विकारः । श्लेष आगमः प्रकृतेः प्रत्ययस्य वा । एत एव विशेषा विकारा इति । एत एवादेशाः एते चेद्विकारा उपपद्यन्ते तर्हि वर्णविकारा इति ॥

ते विभक्त्यन्ताः पदम् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथादर्शनं विकृता वर्णा विभक्त्यन्ताः पदसंज्ञा भवन्ति । विभक्तिर्द्वयी नामिक्याख्यातिकी च, ब्राह्मणः पचतीत्युदाहरणम्, उपसर्गनिपातास्तर्हि न पदसंज्ञाः लक्षणान्तरं वाच्यमिति, शिष्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति पदेनार्थसम्प्रत्यय इति प्रयोजनम् नामपदञ्चाधिकृत्य परीक्षा गौरिति पदं खल्विदमुदाहरणम् ॥

तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥ ६१ ॥

अविनाभाववृत्तिः सन्निधिः अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्व्व इति । शब्दस्य प्रयोगसामर्थ्यात्पदार्थावधारणम् तस्मात् ॥

या शब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥ ६२ ॥

व्यक्तिः पदार्थः कस्मात् याशब्दप्रभृतीनां व्यक्तावुपचारादुपचारः प्रयोगः । या गौस्तिष्ठति या गौर्निषस्सेति नेदं वाक्यं जातेरभिधायकमभेदात् द्रव्याभिधायकम्, गवां समूह इति भेदात् द्रव्याधानं न जातेरभेदात्, वैद्याय गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् प्रतिक्रमानुक्रमानुपपत्तेश्च परिग्रहः स्वत्वेनाभिसम्बन्धः, कौण्डिन्यस्य गौ र्ब्राह्मणस्य गौरिति द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इति उपपन्नमभिन्ना तु जातिरिति, संख्या दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं सङ्ख्यायते न जातिरभेदादिति, वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति निरवयवा तु जातिरिति, एतेनापचयो व्याख्यातः, वर्णः शुक्ला गौः कपिला गौरिति द्रव्यस्य गुणयोगो न सामान्यस्य, समासः गोहितं गोसुखमिति द्रव्यस्य सुखादियोगो न जातेरिति । अनुबन्धः सरूपप्रजननसन्तानो गौ र्गां जनयतीति तदुत्पत्तिधर्म्मत्वाद्द्रव्ये युक्तं न जातौ विपर्य्ययादिति । द्रव्यं व्यक्तिरिति हि नार्थान्तरम्, अस्य प्रतिषेधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तदनवस्थानात् ॥ ६३ ॥

न व्यक्तिः पदार्थः। कस्मादनवस्थानात् याशब्दप्रभृतिभि र्यो विशेष्यते स गोशब्दार्थो या गौस्तिष्ठति या गौर्निषण्णेति न द्रव्यमात्रमविशिष्टं जात्याविनाऽभिधीयते, किन्तर्हि जातिविशिष्टं, तस्मान्न व्यक्तिः पदार्थः, एवं समूहादिषु द्रष्टव्यम्। यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति। निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु ॥

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥६४॥

अतद्भावेऽपि तदुपचार इत्यतच्छब्दस्य तेन शब्देनाभिधानमिति, सहचरणाद्यष्टिकां भोजयेति यष्टिकासहचरितो ब्राह्मणोऽभिधीयत इति, स्थानात् मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते, तादर्थ्यात् कटार्थेषु वीरणेषु व्यूह्यमानेषु कटङ्करोतीति, वृत्तात् यमो राजा कुबेरो राजेति तद्वद्वर्त्तत इति, मानात् आढकेन मिताः सक्तवः आढकसक्तव इति, धारणात् तुलया धृतं चन्दनं तुलाचन्दनमिति, सामीप्यात् गङ्गायां गावश्चरन्तीति देशोऽभिधीयते सन्निकृष्टः, योगात् कृष्णेन रागेन युक्तः शाटकः कृष्ण इत्यभिधीयते, साधनात् अन्नं प्राणा इति। आधिपत्यात् अयं पुरुषः कुलं अयं गोत्रमिति तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति यदि गौरित्यस्य पदस्य न व्यक्तिरर्थोऽस्तु तर्हि ॥

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥६५॥

आकृतिः पदार्थः कस्मात् तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। सत्त्वावयवानां तदवयवानाञ्च नियतो व्यूह आकृतिः तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति नागृह्यमाणायाम्, यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैतदुपपद्यते यस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। नचावयवव्यूहस्य जात्या योगः, कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य, तस्मान्नाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः॥

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां मृद्गवके जातिः॥ ६६॥

जातिः पदार्थः, कस्मात् व्यक्त्याकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते कस्मात् जातेरभावात्। अस्ति हि तत्र व्यक्तिरस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः॥ ६७॥

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नागृह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं शुद्धं गृह्यते तस्मान्न जातिः पदार्थः इति। न वै पदार्थेन न भवितुं शक्यम् कः खल्विदानीं पदार्थ इति॥

व्यक्त्याकृतिजातयस्तु पदार्थः॥ ६८॥

तुशब्दो विशेषणार्थः। किं विशिष्यते प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिस्तदा जातिः प्रधानमङ्गन्तु व्यक्त्याकृती स्त्रोक्तते तदेतद्बहुलं प्रयोगेष्वाकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः। कथं पुन र्ज्ञायते नानाव्यक्त्याकृतिजातय इति लक्षणभेदात् तत्र तावत्॥

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः॥ ६९॥

व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्व्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्वघनत्वद्रवत्वसंस्काराणामव्यापिनः परिमाणस्याश्रयो यथासम्भवं तद्द्रव्यम्, मूर्त्तिः मूर्च्छितावयवत्वादिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकृतिर्जातिलिङ्गाख्या ॥ ७० ॥

यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नाना सत्त्वानां तदवयवानाञ्च नियतव्यूहादिति नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गं शिरसा पादेन गामनुमिन्वन्ति। नियते च सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यङ्ग्यायां जातौ मृत्सुवर्णं रजतमित्येवमादिष्वाकृतिर्निवर्त्तते जहाति पदार्थ-त्वमिति॥

समानप्रसवात्मिका जातिः ॥ ७१ ॥

या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बहूनीतरेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति॥ २॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्य द्वितीयमाह्निकम्॥

समाप्तश्चायं द्वितीयोऽध्यायः॥ २॥

परीक्षितानि प्रमाणानि, प्रमेयमिदानीं परीक्ष्यते तच्चात्मादीत्यात्मा विविच्यते। किं देहेन्द्रियमनोबुद्धिवेदनासङ्घातमात्रमात्मा आहोस्वित्तद्-व्यतिरिक्त इति, कुतः संशयः व्यपदेशस्योभयथासिद्धेः क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं व्यपदेशः स द्विविधः अवयवेन समुदायस्य मूलै-र्वृक्षस्तिष्ठति स्तम्भैः प्रासादो ध्रियत इति। अन्येनान्यस्य व्यपदेशः पर-शुना वृश्चति प्रदीपेन पश्यति। अस्ति चायं व्यपदेशः चक्षुषा पश्यति मनसा विजानाति बुद्ध्या विचारयति शरीरेण सुखदुःखमनुभवतीति तत्र नावधार्य्यते किमवयवेन समुदायस्य देहादिसङ्घातस्य अथान्येनान्यस्य तद्व्यतिरिक्तस्य चेति अन्येनायमन्यस्य व्यपदेशः कस्मात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनेन कश्चिदर्थो गृहीतः स्पर्शनेनापि सोऽर्थो गृह्यते यमहमद्राक्षञ्चक्षुषा तं स्पर्शनेनापि स्पृशामीति यञ्चास्प्राक्षं स्पर्शनेन तं चक्षुषा पश्यामीति, एकविषयाविमौ प्रत्ययावेककर्तृकौ प्रतिसन्धीयेते न च सङ्घातकर्तृकौ नेन्द्रियेणैककर्तृकौ। तद्योऽसौ चक्षुषा त्वगिन्द्रियेण चैकार्थस्य सङ्ग्रहीता भिन्ननिमित्तावनन्यकर्तृकौ प्रत्ययौ समानविषयौ प्रतिसन्दधाति सोऽर्थान्तरभूत आत्मा। कथं पुनर्नेन्द्रियेणैककर्तृकौ इन्द्रियं खलु स्वं स्वं विषयग्रहणमनन्यकर्तृकं प्रतिसन्धातुमर्हति नेन्द्रियान्तरस्य विषयान्तरग्रहणमिति। कथं न सङ्घातकर्तृकौ एकः खल्वयं भिन्ननिमित्तौ स्वात्मकर्तृकौ प्रत्ययौ प्रतिसंहितौ वेदयते न सङ्घातः कस्मात् अनिवृत्तं हि सङ्घाते प्रत्येकं विषयान्तरग्रहणस्याप्रतिसन्धानमिन्द्रियान्तरेणैवेति॥

न विषयव्यवस्थानात् ॥ २ ॥

न देहादिसङ्घातादन्यश्चेतनः, कस्मात् विषयव्यवस्थानात् व्यवस्थितविषयाणीन्द्रियाणि चक्षुष्यसति रूपं न गृह्यते सति च गृह्यते। यच्च यस्मिन्नसति न भवति सति भवति तस्य तदिति विज्ञायते। तस्माद्रूपग्रहणं चक्षुषः चक्षू रूपं पश्यति एवं घ्राणादिष्वपीति तानीन्द्रियाणीमानि स्वस्वविषयग्रहणाच्चेतनानि इन्द्रियाणां भावाभावयो र्विषयग्रहणस्य तथाभावात् एवं सति किमन्येन चेतनेन सन्दिग्धत्वादहेतुः योऽयमिन्द्रियाणां भावाभावयो र्विषयग्रहणस्य तथाभावः स किं चेतनत्वादाहोस्विच्चेतनोपकरणानां ग्रहणनिमित्तत्वादिति सन्दिह्यते, चेतनोपकरणत्वेऽपीन्द्रियाणां ग्रहणनिमित्तत्वाद्भवितुमर्हति यच्चोक्तं विषयव्यवस्थानादिति॥

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥

यदि खल्वेकमिन्द्रियमव्यवस्थितविषयं सर्वज्ञं सर्वविषयग्राहि चेतनं स्यात्, कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात्। यस्मात्तु व्यवस्थितविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णानीन्द्रियाणि तस्मात्तेभ्योऽन्यश्चेतनः सर्वज्ञः सर्वविषयग्राही विषयव्यवस्थितितोऽनुमीयते। तत्रेदमभिज्ञानमप्रत्याख्येयं चेतनवृत्तमुदाह्रियते रूपदर्शी खल्वयं रसं गन्धं वा पूर्वगृहीतमनुमिनोति। गन्धप्रतिसंवेदी च रूपरसावनुमिनोति। एवं विषयशेषेऽपि वाच्यम्। रूपं दृष्ट्वा गन्धं जिघ्रति घ्रात्वा च गन्धं रूपं पश्यति। तदेवमनियतपर्यायं सर्वविषयग्रहणमेकचेतनाधिकरणमनन्यकर्तृकं प्रतिसन्धत्ते प्रत्यक्षानुमानागमसंशयप्रत्ययांश्च नानाविषयान् स्वात्मकर्तृकान् प्रतिसन्धाय वेदयते सर्वार्थविषयञ्च शास्त्रं प्रतिपद्यते। अर्थमविषयभूतं श्रोत्रस्य क्रमभाविनो वर्णान् श्रुत्वा पदवाक्यभावं प्रतिसन्धाय शब्दार्थव्यवस्थाञ्च बुध्यमानोऽनेकविषयमर्थजातमग्रहणीयमेकैकेनेन्द्रियेण गृह्णाति। सेयं सर्वज्ञस्य ज्ञेया व्यवस्थाऽनुपदं न शक्या परिक्रमितुम्। आकृतिमात्रन्तूदाहृतम्। तत्र यदुक्तमिन्द्रियचैतन्ये सति किमन्येन चेतनेन तदयुक्तं भवति। इतश्च देहादिव्यतिरिक्त आत्मा न देहादिसङ्घातमात्रम्॥

शरीरदाहे पातकाभावात्॥ ४॥

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते प्राणिभूतं शरीरं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते तस्याभावः तत्फलेन कर्त्तुरसम्बन्धात् अकर्तुश्च सम्बन्धात् शरीरेन्द्रियबुद्धिवेदनाप्रबन्धे खल्वन्यः सङ्घात उत्पद्यतेऽन्यो निरुध्यते उत्पादनिरोधसन्ततीभूतः प्रबन्धो नान्यत्वं बाधते, देहादिसङ्घातस्यान्यत्वाधिष्ठानत्वात्। अन्यत्वाधिष्ठानो ह्यसौ प्रख्यायत इति एवं सति यो देहादिसङ्घातः प्राणिभूतो हिंसां करोति नासौ हिंसाफलेन सम्बध्यते, यश्च सम्बध्यते न तेन हिंसा कृता, तदेवं सत्त्वभेदे कृतहानमकृताभ्यागमः प्रसज्यते सति तु सत्त्वोत्पादे सत्त्वनिरोधे चाकर्मनिमित्तः सत्त्वसर्गः प्राप्नोति। तत्र मुक्त्यर्थो ब्रह्मचर्य्यवासो न स्यात्। तद्यदि देहादिसङ्घातमात्रं स्यात् शरीरदाहे पातकं न भवेत् अनिष्टञ्चैतत् तस्माद्देहादिसङ्घातव्यतिरिक्त आत्मा नित्य इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥

यस्यापि नित्येनात्मना सात्मकं शरीरं दह्यते तस्यापि शरीरदाहे पातकं न भवेद्दग्धुः, कस्मात् नित्यत्वादात्मनः न जातु कश्चिन्नित्यं हिंसितुमर्हति अथ हिंस्यते नित्यत्वमस्य न भवति, सेयमेकस्मिन् पक्षे हिंसा निष्फला अन्यस्मिंस्त्वनुपपन्नेति ॥

न कार्य्याश्रयकर्तृबधात् ॥ ६ ॥

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसा, अपितवनुच्छित्तिधर्मकस्य सत्त्वस्य कार्य्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तॄणामुपघातः पीडा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा बधो हिंसेति, कार्य्यन्तु सुखदुःखसंवेदनं तस्यायतनमधिष्ठानमाश्रयः शरीरम्। कार्य्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तॄणामिन्द्रियाणां बधो हिंसा न नित्यस्यात्मनः। तत्र यदुक्तं तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वादित्येतदयुक्तम्। यस्य सत्वोच्छेदो हिंसा तस्य कृतहानमकृताभ्यागमश्च दोषः। एतावच्चैतत् स्यात्। सत्वोच्छेदो वा हिंसा अनुच्छित्तिधर्मकस्य सत्वस्य कार्य्याश्रय कर्तृबधो वा न कल्पान्तरमन्यदस्ति सत्वोच्छेदश्च प्रतिषिद्धः तत्र किमन्यच्छेषं यथाभूतमिति। अथवा कार्य्याश्रय कर्तृबधादिति कार्य्याश्रयो देहेन्द्रियबुद्धिसङ्घातो नित्यस्यात्मनस्तत्र सुखदुःखप्रतिसम्वेदनं तस्याधिष्ठानमाश्रयस्तदायतनं तद्भवति न ततोऽन्यदिति स एव कर्त्ता तन्निमित्ता हि सुखदुःखसम्वेदनस्य निर्वृतिः न तमन्तरेणेति तस्य बध उपघातः पीडा प्रमापणं वा हिंसा न नित्यत्वेनात्मोच्छेदः। तत्र यदुक्तं तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वादेतन्नेति। इतश्च देहादिव्यतिरिक्त आत्मा ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

पूर्व्वापरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम्। तमेवैतर्हि पश्यामि यमज्ञासिषं स एवायमर्थ इति। सव्येन चक्षुषा दृष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैतरेणापि चक्षुषा प्रत्यभिज्ञानात् । यमद्राक्षं तमेवैतर्हि पश्यामीति । इन्द्रियचैतन्ये तु नान्यदृष्टमन्यः प्रत्यभिजानातीति प्रत्यभिज्ञानुपपत्तिः अस्ति त्विदं प्रत्यभिज्ञानं तस्मादिन्द्रियव्यतिरिक्तश्चेतनः ॥

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥८॥

एकमिदं चक्षुर्मध्ये नासास्थिव्यवहितं तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतः मध्यव्यवहितस्य दीर्घस्येव ।

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

एकस्मिन्नुपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुर्विषयग्रहणलिङ्गम् तस्मादेकस्य व्यवधानानुपपत्तिः ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

एकविनाशे द्वितीयाविनाशादित्यहेतुः कस्मात् वृक्षस्य हि कासुचिच्छाखासु छिन्नास्वुपलभ्यत एव वृक्षः ॥

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥

न कारणद्रव्यस्य विभागे कार्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात् बहुष्ववयविषु यस्य कारणानि विभक्तानि तस्य विनाशः । येषां कारणान्यविभक्तानि तान्यवतिष्ठन्ते अथवा दृश्यमानार्थविरोधो दृष्टान्तविरोधः मृतस्य हि शिरःकपाले द्वाववटौ नासास्थिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासास्थिव्यवहिते सम्भवति अथवैकविनाशस्यानियमा द्वाविमावर्थौ तौ च पृथगावरणोपघातौ अनुमीयेते विभिन्नाविति अवपीडनाच्चैकस्य चक्षुषो रश्मिविषय सन्निकर्षस्य भेदाद् दृश्यभेद इव गृह्यते तच्चैकत्वे विरुध्यते अवपीडननिवृत्तौ चाभिन्नप्रतिसन्धानमिति तस्मादेकस्य व्यवधानानुपपत्तिः अनुमीयते चायं देहादिसङ्घातव्यतिरिक्तश्चेतन इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्रियान्तरविकारात् ॥ १२ ॥

कस्यचिदम्लफलस्य गृहीतसाहचर्य्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनस्येन्द्रियान्तरस्य विकारः रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितो-दन्तोदकसंप्लवभूतो गृह्यते तस्येन्द्रियचैतन्येऽनुपपत्तिः, नान्यदृष्टमन्यः स्मरति ॥

न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥ १३ ॥

स्मृतिर्नाम धर्मो निमित्तादुत्पद्यते तस्याः स्मर्त्तव्यो विषयः तत्कृत इन्द्रि-यान्तरविकारो नात्मकृत इति ॥

तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥

तस्या आत्मगुणत्वे सति सद्भावादप्रतिषेध आत्मनः यदि स्मृतिरात्म-गुणः एवं सति स्मृतिरुपपद्यते नान्यदृष्टमन्यः स्मरतीति, इन्द्रियचैतन्ये तु नानाकर्त्तृकाणां विषयग्रहणानामप्रतिसन्धानम्। अप्रतिसन्धाने वा वि-षयव्यवस्थानुपपत्तिः, एकस्तु चेतनोऽनेकार्थदर्शी भिन्ननिमित्तः पूर्वदृष्टमर्थं स्मरतीति एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् स्मृतेरात्मगुणत्वे सति सद्भावः विपर्य्यये चानुपपत्तिः। स्मृत्याश्रयाः प्राणभृतां सर्वे व्यव-हाराः आत्मलिङ्गमुदाहरणमात्रमिन्द्रियान्तरविकार इति ॥

अपरिसङ्ख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥

अपरिसङ्ख्याय च स्मृतिविषयमिदमुच्यते न स्मृतेः स्मर्त्तव्यविषयत्वा-दिति येयं स्मृतिरगृह्यमाणेऽर्थे अज्ञासिषमहममुमर्थमिति। एतस्या ज्ञातृज्ञानविशिष्टः पूर्व्वज्ञातोऽर्थो विषयो नार्थमात्रम् ज्ञातवानहममुमर्थ-मसावर्थो मया ज्ञातः ज्ञातमस्मिन्नर्थे मम ज्ञानमभूदिति चतुर्विधमेतद्-वाक्यं स्मृतिविषयज्ञापकं समानार्थम् सर्व्वत्र खलु ज्ञाता ज्ञानं ज्ञेयं च गृह्यते अथ प्रत्यक्षेऽर्थे या स्मृति स्तया त्रीणि ज्ञानान्येकस्मिन्नर्थे प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्धे यन्ते समानकर्तृकाणि न नानाकर्तृकाणि नाकर्तृकाणि किन्त्वेक-कर्तृकाणि अद्राक्षमस्पृक्षं यमेवैतर्हि पश्यामि अद्राक्षमिति दर्शनं दर्शन-संविच्च, न खल्वसंविदिते स्वे दर्शने स्यादेतदद्राक्षमिति, ते खल्वेते द्वे ज्ञाने यमेवैतर्हि पश्यामीति तृतीयं ज्ञानमेवमेकोऽर्थस्त्रिभिर्ज्ञानै-र्युज्यमानो नाकर्तृको न नानाकर्तृकः किन्त्वेककर्तृक इति, सोऽयं स्मृतिविषयोऽपरिशङ्क्यमानो विद्यमानः प्रज्ञातोऽर्थः प्रतिषिध्यते ना-स्त्यात्मा स्मृतेः स्मर्तव्यविषयत्वादिति न चेदं स्मृतिमात्रं स्मर्तव्यमात्र-विषयं वा इदं खलु ज्ञानप्रतिसन्धानवत् स्मृतिप्रतिसन्धानमेकस्य सर्वविषयत्वात् एकोऽयं ज्ञाता सर्वविषयः स्वानि ज्ञानानि प्रतिसन्धत्ते अमुमर्थं ज्ञास्याम्यमुमर्थं विजानाम्यमुमर्थमज्ञासिषममुमर्थं जिज्ञासमानश्चिरम-ज्ञात्वाऽध्यवस्यन्नज्ञासिषमिति एवं स्मृतिमपि त्रिकालविशिष्टां सुस्मूर्षा-विशिष्टाञ्च प्रतिसन्धत्ते संस्कारसन्ततिमात्रे तु सत्वे उत्पद्योत्पद्य संस्का-रास्तिरोभवन्ति स नास्त्येकोऽपि संस्कारो यस्त्रिकालविशिष्टं ज्ञानं स्मृति-ञ्चानुभवेत्। न चानुभवमन्तरेण ज्ञानस्य स्मृतेश्च प्रतिसन्धानमहं ममेति चोत्पद्यते देहान्तरवत् अतोऽनुमीयते अस्त्येकः सर्वविषयः प्रतिदेहं स्व-ज्ञानप्रबन्धं स्मृतिप्रबन्धञ्च प्रतिसन्धत्ते इति यस्य देहान्तरेषु वृत्तेरभावान्न प्रतिसन्धानं भवतीति॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्॥१६॥

न देहादिसङ्घातव्यतिरिक्त आत्मा कस्मात् आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्म-प्रतिपादकानां हेतूनां मनसि सम्भवो यतः मनो हि सर्वविषयमिति तस्मान्न शरीरेन्द्रियमनोबुद्धिसङ्घातव्यतिरिक्त आत्मेति॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्॥१७

ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते चक्षुषा पश्यति घ्राणेन जिघ्रति स्पर्शनेन स्पृशति एवमन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयं विद्यते येनायं मन्यत इति। एवं सति ज्ञातर्य्यात्मसंज्ञा न मृष्यते मनः संज्ञाऽभ्यनुज्ञायते मनसि च मनःसंज्ञा न मृष्यते मतिसाधनं त्वभ्यनुज्ञायते तदिदं संज्ञाभेदमात्रं नार्थे विवाद इति प्रत्याख्याने वा सर्व्वेन्द्रियविलोपप्रसङ्गः, अथ मन्तुः सर्व्वविषयस्य मतिसाधनं सर्व्वविषयं प्रत्याख्यायते नास्तीति। एवं रूपादिविषयग्रहणसाधनान्यपि न सन्तीति सर्वेन्द्रियविलोपः प्रसज्यत इति॥

नियमश्च निरनुमानः॥ १८॥

योऽयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति मतिसाधनं सर्व्वविषयं नास्तीति, अयं निरनुमानो नात्रानुमानमस्ति येन नियमं प्रतिपद्यामह इति। रूपादिभ्यश्च विषयान्तरं सुखादयस्तदुपलब्धौ करणान्तरसद्भावः, यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणम्, एवञ्चक्षुर्घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम् एवं शेषेषु तथा चक्षुरादिभिः सुखादयो न गृह्यन्त इति करणान्तरेण भवितव्यम् तच्च ज्ञानायौगपद्यलिङ्गम्। यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गम् तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेर्न युगपज्ज्ञानान्युत्पद्यन्ते तत्र यदुक्तमात्मप्रतिपत्तिहेतूनां मनसि सम्भवादिति तदयुक्तम् किं पुनरयं देहादिसङ्घातादन्यो नित्य उतानित्य इति कुतः संशयः उभयथा दृष्टत्वात् संशयः। विद्यमानमुभयथा भवति नित्यमनित्यञ्च प्रतिपादिते चात्मसद्भावे संशयानिवृत्तेरिति आत्मसद्भावे हेतुभिरेवास्य प्राग्देहभेदादवस्थानं सिद्धम् ऊर्द्ध्वमपि देहभेदादवतिष्ठते कुतः॥

पूर्वाभ्यस्तस्मृत्यनुबन्धात् जातस्य हर्षभयशोकसम्प्रतिपत्तेः॥ १९॥

जातः खल्वयं कुमारकोऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान् ते च स्मृत्यनुबन्धादुत्पद्यन्ते नान्यथा स्मृत्यनुबन्धश्च पूर्वाभ्यासमन्तरेण न भवति पूर्वाभ्यासश्च पूर्वजन्मनि सति नान्यथेति सिद्ध्यत्येतत्, अवतिष्ठतेऽयमूर्द्ध्वं शरीरभेदादिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मादिषु प्रबोधसंमीलनविकारवत्तद्विकारः॥२०॥

यथा पद्मादिष्वनित्येषु प्रबोधसंमीलनं विकारो भवति एवमनित्यस्यात्मनो हर्षभयशोकसम्प्रतिपत्तिर्विकारः स्यात् हेत्वभावादयुक्तम् अनेन हेतुना पद्मादिषु प्रबोधसंमीलनविकारवदनित्यस्यात्मनो हर्षादिसम्प्रतिपत्तिरिति, नात्रोदाहरणसाधर्म्यात् साध्यसाधनहेतु र्न वैधर्म्यादस्ति हेत्वभावादसंबद्धार्थकमपार्थकमुच्यत इति। दृष्टान्ताच्च हर्षादिनिमित्तस्यानिवृत्तिः या चेयमासेवितेषु विषयेषु हर्षादिसम्प्रतिपत्तिः स्मृत्यनुबन्धकृता प्रत्यात्मं गृह्यते सेयं पद्मादिसंमीलनदृष्टान्तेन न निवर्त्तते यथा चेदं न निवर्त्तते तथा जातस्यापीति, क्रियाजातश्च पर्णविभागः संयोगप्रबोधः, संमीलने क्रियाहेतुश्चानुमेयः। एवञ्च सति किं दृष्टान्तेन प्रतिषिध्यते। अथ निर्निमित्तः पद्मादिषु प्रबोधसंमीलनविकार इति मतम् एवमात्मनोऽपि हर्षादिसम्प्रतिपत्तिरिति तच्च॥

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्॥२१॥

उष्णादिषु सत्सु भावात् असत्स्वभावात् तन्निमित्ताः पञ्चभूतानुग्रहेण निवृत्तानां पद्मादीनां प्रबोधसंमीलनविकारा निमित्ताद्भवितुमर्हन्ति न निमित्तमन्तरेण, नचान्यत् पूर्वाभ्यस्तस्मृत्यनुबन्धात् निमित्तमस्तीति। नचोत्पत्तिनिरोधकारणानुमानमात्मनो दृष्टान्तात् न हर्षादीनां निमित्तमन्तरेणोत्पत्तिः नोष्णादिवन्निमित्तान्तरोपादानं हर्षादीनं तस्मादयुक्तमेतत् इतश्च नित्य आत्मा॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्॥२२

जातमात्रस्य वत्सस्य प्रवृत्तिलिङ्गः स्तन्याभिलाषो गृह्यते सच नान्तरेणाहाराभ्यासम्। कया युक्त्या, दृश्यते हि शरीरिणां क्षुधापीड्यमानानामाहाराभ्यासकृतात् स्मरणानुबन्धादाहाराभिलाषः, न च पूर्वशरीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्तरेणासौ जातमात्रस्योपपद्यते, तेनानुमीयते भूतपूर्वं शरीरं यत्रानेनाहारोऽभ्यस्त इति। स खल्वयमात्मा पूर्वशरीरात् प्रेत्य शरीरान्तरमापन्नः क्षुत्पीडितः पूर्व्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति तस्मान्न देहभेदादात्मा भिद्यते भवत्येवोर्द्ध्वं देहभेदादिति ॥

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥२३॥

यथा खलु अयोऽभ्यासमन्तरेणायस्कान्तमुपसर्पति, एवमाहाराभ्यासमन्तरेण बालः स्तन्यमभिलषति, किमिदमयसोऽयस्कान्ताभिसर्पणं निर्निमित्तमथ निमित्तादिति निर्निमित्तत्वावत् ॥

नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

यदि निर्निमित्तं लोष्टादयोऽप्ययस्कान्तमुपसर्पेयु र्नजातु नियमे कारणमस्तीति अथ निमित्तात् तत्केनोपलभ्यत इति क्रियालिङ्गः क्रियाहेतुः क्रियानियमलिङ्गश्च क्रियाहेतुनियमः तेनान्यत्र प्रवृत्त्यभावः बालस्यापि नियतमुपसर्पणं क्रियोपलभ्यते नच स्तन्याभिलाषलिङ्गमन्यदाहाराभ्यासकृतात् स्मरणानुबन्धात्। निमित्तं दृष्टान्तेनोपपाद्यते न चासति निमित्ते कस्य चिदुत्पत्तिः, न च दृष्टान्तो दृष्टमभिलाषहेतुं वाधते, तस्मादयसोऽयस्कान्ताभिगमनमदृष्टान्त इति, अयसः खल्वपि नान्यत्र प्रवृत्तिर्भवति न जात्वयो लोष्टमुपसर्पति किं कृतोऽस्यानियम इति यदि कारणनियमाः सर्व्वक्रियानियमलिङ्गः एवं बालस्यापि नियतविषयोऽभिलाषः कारणनियमाद्भवितुमर्हति तच्च कारणमभ्यस्तस्मरणमन्यद्वेति दृष्टेन विशिष्यते दृष्टो हि शरीरिणामभ्यस्तस्मरणादाहाराभिलाष इति। इतश्च नित्य आत्मा कस्मात् ॥

वीतरागजन्मादर्शनात् ॥ २५ ॥

स रागो जायत इत्यर्थादापद्यते अयं जायमानो रागानुबद्धो जायते रागस्य पूर्व्वानुभूतविषयानुचिन्तनं योनिः पूर्व्वानुभवश्च विषयाणामन्यस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मनि शरीरमन्तरेण नोपपद्यते;सोऽयमात्मा पूर्व्वशरीरानुभूतान् विषयाननुस्मरन् तेषु तेषु रज्यते तथा चायं द्वयोर्जन्मनोः प्रतिसन्धिः, एवं पूर्व्वशरीरस्य पूर्व्वतरेण पूर्व्वतरस्य पूर्वतमेनेत्यादिना ऽनादिश्चेतनस्य शरीरयोगः अनादिश्च रागानुबन्ध इति सिद्धं नित्यत्वमिति। कथं पुनर्ज्ञायते पूर्वविषयानुचिन्तनजनितो जातस्य रागो न पुनः॥

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः॥ २६॥

यथोत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणत उत्पद्यन्ते यथोत्पत्तिधर्मकस्यात्मनो रागः कुतश्चिदुत्पद्यते, अत्रायमुदितानुवादो निदर्शनार्थः॥

न सङ्कल्पनिमित्तत्वाद्रागादीनाम्॥ २७॥

न खलु सगुणद्रव्योत्पत्तिवदुत्पत्तिरात्मनो रागस्य च, कस्मात् सङ्कल्पनिमित्तत्वाद्रागादीनाम्। अयं खलु प्राणिनां विषयानासेवमानानां सङ्कल्पजनितो रागो गृह्यते सङ्कल्पश्च पूर्वानुभूतविषयानुचिन्तनयोनिः, तेनानुमीयते जातस्यापि पूर्वानुभूतार्थचिन्तनकृतोराग इति। आत्मोत्पादाधिकरणात्तु रागोत्पत्तिं भवन्ती सङ्कल्पादन्यस्मिन् रागकारणे सति वाच्या कार्यद्रव्यगुणवत् न चात्मोत्पादः सिद्धो नापि सङ्कल्पादन्यद्रागकारणमस्ति। तस्मादयुक्तं सगुणद्रव्योत्पत्तिवत्तयोरुत्पत्तिरिति, अथापि सङ्कल्पादन्यद्रागकारणं धर्माधर्मलक्षणमदृष्टमुपादीयते तथापि पूर्व्वशरीरयोगो ऽप्रत्याख्येयः। तत्र हि तस्य निर्वृत्तिः नास्मिन् जन्मनि तन्मयत्वाद्राग इति विषयाभ्यासः खल्वयं भावनाहेतुः तन्मयत्वमुच्यत इति जातिविशेषाच्च रागविशेष इति, कर्म्म खल्विदं जातिविशेषनिवर्त्तकम् तादर्थ्यात्ताच्छब्द्यं विज्ञायते, तस्मादनुपपन्नं सङ्कल्पादन्यद्रागकारणमिति, अनादिश्चेतनस्य शरीरयोग इत्युक्तं, स्वकृतकर्म्मनिमित्तं चास्य शरीरं सुखदुःखाधिष्ठानं तत् परीक्ष्यते किं प्राणादिवदेकप्रकृतिकम् उत नानाप्रकृती ति, कुतः संशयः, विप्रतिपत्तेः संशयः, पृथिव्यादीनि भूतानि सङ्ख्याविकल्पेन शरीरप्रकृतिरिति प्रतिजानत इति किन्तत्र तत्त्वम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥

तत्र मानुषं शरीरं पार्थिवम् । कस्मात् गुणान्तरोपलब्धेः गन्धवती पृथिवी गन्धवच्छरीरम् अबादीनामगन्धत्वात् तत् प्रकृत्यगन्धं स्यात् न त्विदमबादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्पत इत्यतः पञ्चानां भूतानां संयोगे सति शरीरं भवति भूतसंयोगोहि मिथः पञ्चानां न निषिद्ध इति, आप्यतैजसवायव्यानि लोकान्तरे शरीराणि, तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति स्थाल्यादिद्रव्यनिष्पत्तावपि निःसंशयो नाबादि संयोगमन्तरेण निष्पत्तिरिति । पार्थिवाप्यतैजसं तद्गुणोपलब्धेः, निश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्, गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्, त इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः, कथं सन्दिग्धाः सति च प्रकृतिभावे भूतानां धर्म्मोपलब्धिरसति च संयोगाप्रतिषेधात् सन्निहितानामिति । यथा स्थाल्यामुदकतेजोवाय्वाकाशानामिति तदिदमनेकभूतप्रकृति शरीरमगन्धमरसमरूपमस्पर्शञ्च प्रकृत्यनुविधानात् स्यात् नत्विदमित्थं भूतम् तस्मात् पार्थिं गुणान्तरोपलब्धेः॥

श्रुतिप्रामाण्याच्च ॥ २९ ॥

सूर्यन्ते चक्षु र्गच्छतादित्यत्र मन्त्रे पृथिवीन्ते शरीरमिति श्रूयते तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति सूर्य्यं ते चक्षुः स्पृणोमीत्यत्र मन्त्रान्तरे पृथिवीन्ते शरीरमिति श्रूयते सेयं कारणाद्विकारस्य सृष्टिरभिधीयत इति, स्थाल्यादिषु च तुल्यजातीयानामेककार्य्यारम्भदर्शनाद्भिन्नजातीयानामेककार्य्यारम्भानुपपत्तिः । अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्य्यन्ते किमाव्यक्तिकान्याहो स्विद्भौतिकानीति कुतः संशयः ॥

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णसारम्भौतिकं तस्मिन्ननुपहते रूपोपलब्धिः उपहते चानुपलब्धि-रिति व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्योपालम्भो न कृष्णसारप्राप्तस्य, न चाप्राप्यकारित्वमिन्द्रियाणाम् तदिदमभौतिकत्वे विभुत्वात् सम्भवति, एव मुभयधर्म्मोपलब्धेः संशयः, अभौतिकानि इत्याह कस्मात्॥

महदणुग्रहणात्॥ ३१॥

महदिति महत्तरं महत्तमं चोपलभ्यते यथा न्यग्रोधपर्व्वतादि, अणिवत्यणुतरमणुतमञ्च गृह्यते न्यग्रोधधानादि, तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं वाधते भौतिकं हि यावत्तावदेव व्याप्नोति अभौतिकन्तु विभुत्वात् सर्व्वव्यापकमिति न महदणुग्रहणमात्रादभौतिकत्वं विभुत्वञ्चे-न्द्रियाणां शक्यं प्रतिपत्तुम् इदं खलु॥

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्॥ ३२॥

तयोर्म्महदण्वोर्ग्रहणं चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषाद्भवति यथा प्रदीपरश्मेरर्थस्य चेति रश्म्यर्थ सन्निकर्षश्चावरणलिङ्गः, चाक्षुषो हि रश्मिः कुड्यादिभिरावृतमर्थं न प्रकाशयति यथा प्रदीपरश्मिरिति आव-रणानुमेयत्वे सतीदमाह॥

तदनुपलब्धेरहेतुः॥ ३३॥

रूपस्पर्शवद्धि तेजो महत्वादनेकद्रव्यवत्त्वाच्चोपलब्धिरिति प्रदीप-वत् प्रत्यक्ष उपलभ्येत चक्षुषोरश्मि र्यदिस्यादिति॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः॥३४

सन्निकर्ष प्रतिषेधार्थेनावरणेन लिङ्गेनानुमीयमानस्य रश्मे र्या प्रत्य-क्षतोऽनुपलब्धि र्नासावभावं प्रतिपादयति। यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३५ ॥

भिन्नः खल्वयं द्रव्यधर्म्मो गुणधर्मश्च महदनेकद्रव्यवच्च विषक्तावयवमाप्यं द्रव्यं प्रत्यक्षतो नोपलभ्यते स्पर्शस्तु शीतो गृह्यते तस्य द्रव्यस्यानुबन्धात् हेमन्तशिशिरौ कल्प्येते । तथाविधमेव च तैजसं द्रव्यमनुद्भूतरूपं सह रूपेण नोपलभ्यते स्पर्शस्त्वस्योष्ण उपलभ्यते तस्य द्रव्यस्यानुबन्धात् ग्रीष्मवसन्तौ कल्प्येते यत्र त्वेषा भवति ॥

अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥ ३६ ॥

यत्र रूपञ्च द्रव्यञ्च तदाश्रयः प्रत्यक्षतः उपलभ्यते रूपविशेषस्तु यद्भावात् क्वचिद्रूपोपलब्धिः यदभावाच्च द्रव्यस्य क्वचिदनुपलब्धिः स रूपधर्म्मोऽयमुद्भवसमाख्यात इति, अनुद्भूतरूपश्चायं नायनो रश्मिः, तस्मात्प्रत्यक्षतो नोपलभ्यत इति दृष्टश्च तेजसो धर्म्मभेदः उद्भूतरूपस्पर्शम्प्रत्यक्षं तेजो यथादित्यरश्मयः, उद्भूतरूपमनुद्भूतस्पर्शञ्च प्रत्यक्षम् यथा प्रदीपरश्मयः । उद्भूतस्पर्शमनुद्भूतरूपमप्रत्यक्षम् यथावादिसंयुक्तं तेजः । अनुद्भूतरूपस्पर्शोऽप्रत्यक्षश्चाक्षुषो रश्मिरिति ॥

कर्म्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३७

यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुखदुःखोपलब्धिभूतश्च कल्प्यते तथेन्द्रियाणि व्यूढानि विषयप्राप्त्यर्थश्च रश्मेश्चाक्षुषस्य व्यूहः, रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्त्यर्था द्रव्यविशेषे च प्रतीघातादावरणोपपत्तिर्व्यवहारार्था सर्व्वद्रव्याणां विश्वरूपो व्यूह इन्द्रियवत्कर्म्मकारितः पुरुषार्थतन्त्रः । कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति ॥

अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥ ३८ ॥

यश्चावरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतीघातः स भौतिकधर्म्मो न भूतानि व्यभिचरति नाभौतिकं प्रतिघातधर्मकं दृष्टमिति । अप्रतीघातस्तु व्यभिचारी भौतिकाभौतिकयोः समानत्वादिति । यदपि मन्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिघात द्भौतिकानीन्द्रियाणि अप्रतिघातादभौतिकानीतिप्राप्तम् दृष्टश्चाप्रतिघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः तन्न युक्तम् कस्मात् यस्माद्भौतिकमपि न प्रतिहन्यते काचाभ्रपटलस्फटिकान्तरितप्रकाशात् प्रदीपरश्मीनां, स्थाल्यादिषु पाचकस्य तेजसो ऽप्रतिघातः, उपपद्यते चानुपलब्धिः कारणभेदात्॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः॥३९

यथाऽनेकद्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धिकारणे मध्यन्दिनोल्काप्रकाशो नोपलभ्यते आदित्यप्रकाशेनाभिभूतः, एवं महदनेकद्रव्यवत्त्वाद्रूपविशेषाच्चोपलब्धिरिति, सत्युपलब्धिकारणे चाक्षुषो रश्मिर्नोपलभ्यते निमित्तान्तरतः, तच्च व्याख्यातमनुद्भूतरूपस्पर्शद्रव्यस्य प्रत्यक्षतोऽनुपलब्धिरिति, अत्यन्तानुपलब्धिस्त्वभावकारणम्, योहि ब्रवीति लोष्टप्रकाशो मध्यन्दिने आदित्यप्रकाशाभिभवान्नोपलभ्यत इति तस्यैतत्स्यात्॥

न रात्रावप्यनुपलब्धेः॥ ४०॥

अप्यनुमानतोऽनुपलब्धिरिति एवमत्यन्तानुपलब्धे लोष्टप्रकाशो नास्ति बत्वेवं चक्षुषो रश्मिरिति उपपन्नरूपा चेयम्॥

वाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः॥ ४१॥

वाह्येन प्रकाशेनानुगृहीतं चक्षुर्विषयग्राहकम्, तदभावेऽनुपलब्धिः, सति च प्रकाशानुग्रहे शीतस्पर्शोपलब्धौ च सत्यां तदाश्रयस्य द्रव्यस्य चक्षुषा ऽग्रहणम् रूपस्यानुद्भूतत्वात् सेयं रूपानभिव्यक्तितो रूपाश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा तत्र यदुक्तं तदनुपलब्धेरहेतुरित्येतदयुक्तम्, कस्मात् पुनरश्मिवोऽनुपलब्धिकारणम् चाक्षुषस्य रश्मेर्नोच्यत इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

वाह्यप्रकाशानुग्रहनिरपेक्षतायाञ्चेति चार्थः, यद्रूपमभिव्यक्तमुद्भूतं वाह्यप्रकाशानुग्रहं च नापेक्षते तद्विषयेऽभिभवोविपर्य्यये ऽभिभवाभावात् अनुद्भूतरूपत्वा च्चानुपलभ्यमानं वाह्यप्रकाशानुग्रहाच्चोपलभ्यमानं नाभिभूयत इति एवमुपपन्नम् अस्ति चाक्षुषो रश्मिरिति ॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनाम्, तेन शेषस्यानुमानमिति, जातिभेदवदिन्द्रियभेद इति चेत् धर्म्ममात्रं चानुपपन्नम् आवरणस्य प्राप्तिप्रतिषेधार्थस्य दर्शनादिति। इन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वानुपपत्तिः कस्मात् ॥

अप्राप्य ग्रहणम् काचाभ्रपटलस्फटिकान्तरितोऽपलब्धे ॥ ४४ ॥

तृणादिसर्पद्द्रव्यं काचेऽभ्रपटले वा प्रतिहतं दृष्टमव्यवहितेन सन्निकृष्यते व्यवहन्यते वै प्राप्तिर्व्यवधानेनेति यदि च रश्म्यर्थसन्निकर्षो ग्रहणहेतुः स्यात् न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात् अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः सा ज्ञापयत्यप्राप्यकारीणीन्द्रियाणि अत एवाभौतिकानि प्राप्यकारित्वं हि भौतिकधर्म इति ॥

न कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात् प्राप्यकारित्वेऽपि तु काचाभ्रपटलस्फटिकान्तरितोपलब्धिर्न स्यात् ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च काचाभ्रपटलं वा नयनरश्मिं विष्टम्नाति सो ऽप्रतिहन्यमानः सन्निकृष्यत इति, यश्च मन्यते न भौतिकस्यप्रतीघात इति तन्न ॥

आदित्यरश्मेः स्फटिकान्तरेऽपि दाह्येऽविघातात् ॥ ४७ ॥

आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघातात् दाह्येऽविघातात् अविघातादिति च पदाभिसम्बन्धभेदाद्वाक्यभेद इति यथा वाक्यं चार्थभेद इति प्रतिवाक्य वाक्यार्थभेदः आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यते अविघातात् कुम्भस्यमुदकन्तपति प्राप्तौ हि द्रव्यान्तरगुणस्य उष्णस्पर्शस्य ग्रहणम् तेन च शीतस्पर्शाभिभव इति, स्फटिकान्तरितेऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतिघातः अप्रतिघातात् प्राप्तस्य ग्रहणमिति भर्जनकपालादिस्थञ्च द्रव्यमाग्नेयेन तेजसा दह्यते तत्राविघातात् प्राप्तिः प्राप्तौ तु दाहोनाप्राप्यकारि तेज इति अविघातादिति च केवलं पद-मुपादीयते कोऽयमविघातो नाम अव्यूह्यमानावयवेन व्यवधायकेन द्रव्येण-सर्वतो द्रव्यस्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः प्राप्तेरप्रतिषेध इति, दृष्टं हि कलशनिषक्तानामपां वहिः शीतस्पर्शस्य ग्रहणम्, न च इन्द्रियेणा-सन्निकृष्टस्य द्रव्यस्य स्पर्शोपलब्धिः दृष्टौ च प्रस्यन्दपरिस्रवौ तत्र काचाभ्र-पटलादिभिर्नयनरश्मेरप्रतिघाताद्विभिद्यार्थेन सह सन्निकर्षादुपपन्नं ग्रहणमिति ॥

नेतरेतरधर्म्मप्रसङ्गात् ॥ ४८ ॥

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातः कुड्यादिवद्वा काचाभ्र-पटलादिभिः प्रतिघात इति नियमे कारणं वाच्यमिति ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धि-वत्तदुपलब्धिः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदर्शोदकयोः प्रसादो रूपविशेषः स्वो धर्मो नियमदर्शनात् प्रसादस्य वा स्वो धर्मो रूपोपलम्भनम् यथादर्शप्रतिहतस्य परावृत्तस्य नयनरश्मेः स्वेन मुखेन सन्निकर्षे सति स्वमुखोपलम्भनं प्रतिबिम्बग्रहणाख्यमादर्शरूपानुग्रहात्तन्निमित्तं भवति आदर्शरूपोपघाते तदभावात् कुड्यादिषु च प्रतिबिम्बग्रहणं न भवति एवं काचाभ्रपटलादिभिरविघातश्चक्षूरश्मेः कुड्यादिभिश्च प्रतिघातोद्रव्यस्वभावनियमादिति ॥

दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥५०॥

प्रमाणस्य तत्त्वविषयत्वात् न खलु भोः परीक्ष्यमाणेन दृष्टानुमिता अर्थाः शक्या नियोक्तुमेवं भवतेति नापि प्रतिषेद्धुमेवं न भवतेति । नहीदमुपपद्यते रूपवद्गन्धोऽपि चाक्षुषो भवत्विति गन्धवद्वा रूपमचाक्षुषं माभूदिति अग्निप्रतिपत्तिवद्धूमेनोदकप्रतिपत्तिरपि भवत्विति उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्तिरपि माभूदिति किं कारणम् यथा खल्वर्था भवन्ति य एषां स्वोभावः स्वोधर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्त इति तथाभूतविषयकं हि प्रमाणमिति इमौ खलु नियोगप्रतिषेधौ भवतादेशितौ काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातो भवतु कुड्यादिवद्वा काचाभ्रपटलादिभिरप्रतिघातो माभूदिति न दृष्टानुमिताः खल्विमे द्रव्यधर्माः प्रतिघाताप्रतीघातयोर्ह्युपलब्ध्यनुपलब्धी व्यवस्थापिके व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातः, व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति । अथापि खल्वेकमिदमिन्द्रियं बहूनीन्द्रियाणि वा कुतः संशयः ॥

स्थानान्यत्वे नानात्वादवयविनानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥

बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते नानास्थानश्च सन्नेकोऽवयवी चेति तेनेन्द्रियेषु भिन्नस्थानेषु संशय इति एकमिन्द्रियम् ॥

त्वगव्यतिरेकात् ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वगेकमिन्द्रियमित्याह कस्मात् अव्यतिरेकात् न त्वचा किञ्चिदिन्द्रियाधिष्ठानं न प्राप्तम् न चासत्यां त्वचि किञ्चिद्विषयग्रहणं भवति यया सर्वेन्द्रियस्थानानि व्याप्तानि यस्याञ्च सत्यां विषयग्रहणं भवति सा त्वगेकमिन्द्रियमिति ॥

नेन्द्रियान्तरार्थानुपलब्धेः ॥ ५३ ॥

स्पर्शोपलब्धिलक्षणायां सत्यां त्वचि गृह्यमाणे त्वगिन्द्रियेण स्पर्शेन्द्रियान्तरार्था रूपादयो न गृह्यन्ते अन्धादिभिः न स्पर्शग्राहकादिन्द्रियान्तरमस्तीति स्पर्शवदन्धादिभिर्गृह्येरन् रूपादयो न च गृह्यन्ते तस्मान्नैकमिन्द्रियं त्वगिति ॥

त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः ॥ ५४ ॥

यथा त्वचोऽवयवविशेषः कश्चिच्चक्षुषि सन्निकृष्टो धूमस्पर्शं गृह्णाति नान्यः एवं त्वचोऽवयवविशेषो रूपादिग्राहकस्तेषामुपघातादन्धादिभिर्न गृह्यन्ते रूपादय इति ॥

आहतत्वादहेतुः ॥ ५५ ॥

त्वगव्यतिरेकादेकमिन्द्रियमित्युक्त्वा त्वगवयवविशेषेण धूमोपलब्धिवद्रूपाद्युपलब्धिरित्युच्यते एवं च सति नानाभूतानि विषयग्राहकाणि विषयव्यवस्थानात् तद्भावे विषयग्रहणस्य भावात्तदुपघाते चाभावात् तथा च पूर्वोवाद उत्तरेण वादेन व्याहन्यत इति, सन्दिग्धश्चाव्यतिरेकः पृथिव्यादिभिरपि भूतैरिन्द्रियाधिष्ठानानि व्याप्तानि न च तेष्वसत्सु विषयग्रहणं भवतीति तस्मान्न त्वगन्यद्वा सर्वविषयमेकमिन्द्रियमिति ॥

न युगपदर्थानुपलब्धेः ॥ ५६ ॥

आत्मा मनसा संबध्यते मन इन्द्रियेण इन्द्रियं सर्वार्थैः सन्निकृष्टमिति आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपद्ग्रहणानि स्युः, न च युगपद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपादयो गृह्यन्ते, तस्मान्नैकमिन्द्रियं सर्व्वविषयमस्तीति असाहचर्य्याच्च विषयग्रहणानां नैकमिन्द्रियं सर्व्वविषयकम्, साहचर्य्ये हि विषयग्रहणानामन्धाद्यनुपपत्तिरिति ॥

विप्रतिषेधाच्च नत्वगेका ॥ ५७ ॥

न खलु त्वगेकमिन्द्रियं व्याघातात् त्वचा रूपाण्यप्राप्तानि गृह्यन्त इति अप्राप्यकारित्वे स्पर्शादिष्वप्येवं प्रसङ्गः, स्पर्शादीनाञ्च प्राप्तानां ग्रहणाद्रूपादीनामप्राप्तानामग्रहणमिति प्राप्तम्, प्राप्याप्राप्यकारित्वमिति चेत् आवरणानुपपत्ते र्विषयमात्रस्य ग्रहणम्, अथापि मन्येत प्राप्ताः स्पर्शादयस्त्वचा गृह्यन्ते रूपाणि त्वप्राप्तानीति, एवं सति नास्त्यावरणम् आवरणानुपपत्तेश्च रूपमात्रस्य ग्रहणं व्यवहितस्य चाव्यवहितस्य चेति। दूरान्तिकानुविधानं च रूपोपलब्ध्यनुपलब्ध्यो र्न स्यात् अप्राप्तं त्वचा गृह्यते रूपमिति दूरे रूपस्याग्रहणमन्तिके च ग्रहणमित्येतन्न स्यादिति एकत्वप्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते ॥

इन्द्रियार्थपञ्चत्वात् ॥ ५८ ॥

अर्थः प्रयोजनं तत् पञ्चविधमिन्द्रियाणाम्, स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न तेनैव रूपं गृह्यत इति रूपग्रहणप्रयोजनं चक्षुरनुमीयते, स्पर्शरूपग्रहणे च ताभ्यामेव गन्धो न गृह्यत इति गन्धग्रहणप्रयोजनं घ्राणमनुमीयते, त्रयाणां ग्रहणे न तैरेव रसो गृह्यत इति रसग्रहणप्रयोजनं रसनमनुमीयते, न चतुर्णां ग्रहणे तैरेव शब्दः श्रूयत इति शब्दग्रहणप्रयोजनं श्रोत्रमनुमीयते, एवमिन्द्रियप्रयोजनस्यानितरेतरसाधनसाध्यत्वात् पञ्चैवेन्द्रियाणि ॥

न तदर्थबहुत्वात् ॥ ५९ ॥

न खल्विन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति सिद्ध्यति, कस्मात् तेषामर्थानां बहुत्वात्, बहवः खल्विमे इन्द्रियार्थाः, स्पर्शास्तावच्छीतोष्णानुष्णाशीता इति, रूपाणि शुक्लहरितादीनि, गन्धा इष्टानिष्टोपेक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णीयाः रसाः कटुकादयः शब्दा वर्णात्मानो ध्वनिमात्राश्च भिन्नाः, तद्यस्येन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि, तस्येन्द्रियार्थबहुत्वाद्बहूनीन्द्रियाणि प्रसज्यन्त इति॥

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः॥६०॥

गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्थानां गन्धादीनां यानि गन्धादिग्रहणानि तान्यसमानसाधनसाध्यत्वाद्ग्राहकान्तराणि न प्रयोजयन्ति, अर्थसमूहोऽनुमानमुक्तो नार्थैकदेशः अर्थैकदेशञ्चाश्रित्य विषयपञ्चत्वमात्रं भवान् प्रतिषेधति, तस्मादयुक्तोऽयं प्रतिषेध इति, कथं पुनर्गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था गन्धादय इति। स्पर्शः खल्वयं त्रिविधः शीत उष्णोऽनुष्णाशीतश्च स्पर्शत्वेन स्वसामान्येन सङ्गृहीतः गृह्यमाणे च शीतस्पर्शे नोष्णस्यानुष्णाशीतस्य वा ग्रहणम् ग्राहकान्तरं प्रयोजयति, स्पर्शभेदानामेकसाधनसाध्यत्वात्। येनैव शीतस्पर्शो गृह्यते तेनैवेतरावपीति। एवं गन्धत्वेन गन्धानां रूपत्वेन रूपाणां रसत्वेन रसानां शब्दत्वेन शब्दानामिति, गन्धादिग्रहणानि पुनरसमानसाधनसाध्यत्वाद्ग्राहकान्तराणां प्रयोजकानि, तस्मादुपपन्नमिन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति, यदिसामान्यं संग्राहकं प्राप्तमिन्द्रियाणाम्॥

विषयत्वाव्यतिरेकादेकत्वम्॥६१॥

विषयत्वेन हि सामान्येन गन्धादयः संगृहीता इति॥

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः॥६२

न खलु विषयत्वेन सामान्येन कृतव्यवस्था विषया ग्राहकान्तरनिरपेक्षा एकसाधनग्राह्या अनुमीयन्ते, अनुमीयन्ते च पञ्च गन्धादयो गन्धत्वादिभिः स्वसामान्यैः कृत व्यवस्था इन्द्रियान्तरग्राह्यास्तस्मादसम्बद्धमेतत्। अयमेव चार्थोऽनूद्यते बुद्धिलक्षणपञ्चत्वादिति, बुद्धय एव लक्षणानि विषयग्रहणलिङ्गत्वादिन्द्रियाणाम्, तदेतदिन्द्रियार्थपञ्चत्वादित्येतस्मिन् सूत्रे कृतभाष्यमिति, तस्माद्बुद्धिलक्षणपञ्चत्वात् पञ्चेन्द्रियाणि,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिष्ठानान्यपि खलु पञ्चेन्द्रियाणाम् सर्व्वशरीराधिष्ठानं स्पर्शनं स्पर्शग्रहणलिङ्गम्, कृष्णसाराधिष्ठानं चक्षुर्वहिर्निःसृतं रूपग्रहणलिङ्गम्, नासाधिष्ठानं घ्राणम्, जिह्वाधिष्ठानं रसनम्, कर्णच्छिद्राधिष्ठानं श्रोत्रम्, गन्धरसरूपस्पर्शशब्दग्रहणलिङ्गत्वादिति। गतिभेदादपीन्द्रियभेदः, कृष्णसारोपनिबद्धं चक्षुर्वहिर्निःसृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति, स्पर्शनादीनि त्विन्द्रियाणि विषयाएवाश्रयोपसर्पणात् प्रत्यासीदन्ति, सन्तानवृत्त्या शब्दस्य श्रोत्रप्रत्यासत्तिरिति आकृतिः खलु परिमाणमियत्ता सा पञ्चधा स्वस्थानमात्राणि घ्राणरसनस्पर्शनानि विषयग्रहणे नानुमेयानि, चक्षुः कृष्णसाराश्रयं वहिर्निःसृतं विषयव्यापि, श्रोत्रं नान्यदाकाशात्, तच्च विभु शब्दमात्रानुभवानुमेयं पुरुषसंस्कारोपग्रहाच्चाधिष्ठाननियमेन शब्दस्य व्यञ्जकमिति। जातिरिति योनिं प्रचक्षते, पञ्च खल्विन्द्रिययोनयः पृथिव्यादीनि भूतानि, तस्मात् प्रकृतिपञ्चत्वादपि पञ्चेन्द्रियाणीति सिद्धम्, कथं पुन र्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६३ ॥

दृष्टोहि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः, वायुः स्पर्शव्यञ्जकः, आपो रसव्यञ्जिकाः, तेजो रूपव्यञ्जकम्, पार्थिवं किञ्चिद्द्रव्यं कस्यचिद्द्रव्यस्य गन्धव्यञ्जकम्। अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः, तेन भूतगुणविशेषोलब्धे र्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति, गन्धादयः पृथिव्यादिगुणा इत्युपदिष्टम् उद्देशश्च पृथिव्यादीनामेकगुणत्वे समान इत्यत आह॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्य्यन्ताः पृथिव्याः अप्तेजोवायूनां पूर्व्वं पूर्व्वमपोह्याकाशस्योत्तरः ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शपर्य्यन्तानामिति विभक्तिविपरिणामः, अकाशस्योत्तरं शब्दः स्पर्शपर्य्यन्तेभ्य इति कथन्तरन्निर्देशः स्वतन्त्रविनियोगसामर्थ्यात्, तेनोत्तरशब्दस्य परार्थाभिधानं विज्ञायते, उद्देशसूत्रे हि स्पर्शपर्य्यन्तेभ्यः परः शब्द इति तन्त्रं वा स्पर्शस्य विवक्षितत्वात् स्पर्शपर्य्यन्तेषु नियुक्तेषु योऽन्यस्तदुत्तरः शब्द इति ॥

न सर्व्वगुणानुपलब्धेः ॥ ६५ ॥

नायं गुणनियोगः साधुः, कस्मात् यस्य भूतस्य ये गुणा न ते तदात्मकेनेन्द्रियेण सर्व्वे उपलभ्यन्ते पार्थिवेन हि घ्राणेन स्पर्शपर्य्यन्ता न गृह्यन्ते गन्धएवैको गृह्यते एवं शेषेष्वपीति कथन्तर्हीमे गुणा, विनियोक्तव्या इति ॥

एकैकस्यैवोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६६ ॥

गन्धादीनामेकैको यथाक्रमं पृथिव्यादीनामेकैकस्य गुणः अतस्तदनुपलब्धिः तेषान्तयोस्तस्य चानुपलब्धिः, घ्राणेन रसरूपस्पर्शानां रसेन रूपस्पर्शयोः, चक्षुषा स्पर्शस्येति, कथन्तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति ॥

संसर्गाच्चानेकगुणग्रहणम् ॥ ६७ ॥

अवादिसंसर्गाच्च पृथिव्यां रसादयो गृह्यन्ते एवं शेषेष्वपीति नियमस्तर्हि न प्राप्नोति संसर्गस्यानियमाच्चतुर्गुणा पृथिवी त्रिगुणा आपो द्विगुणं तेज एकगुणो वायुरिति नियमश्चोपपद्यते कथम् ॥

विष्टं ह्यपरम्परेण ॥ ६८ ॥

पृथिव्यादीनां पूर्व्वम्पूर्व्वमुत्तरेणोत्तरेण विष्टमतः संसर्गनियम इति तच्चैतद्भूतसृष्टौ वेदितव्यन्नैतर्हीति ॥

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेति विस्तरीं प्रत्याचष्टे, कस्मात् पार्थिवस्य द्रव्यस्याप्यस्य च प्रत्यक्षत्वात् महत्त्वानेकद्रव्यत्वाद्रूपाच्चोपलब्धिरिति तैजसमेव द्रव्यं प्रत्यक्षं स्यात् न पार्थिवमाप्यं वा रूपाभावात् तेजसवत्तु पार्थिवाप्ययोः प्रत्यक्षत्वात् न संसर्गादनेकगुणग्रहणं भूतानामिति। भूतान्तररूपकृतञ्च पार्थिवाप्ययोः प्रत्यक्षत्वं ब्रुवतः प्रत्यक्षो वायुः प्रसज्यते नियमे वा कारणमुच्यतामिति, रसयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवो रसः षड्विधः, आप्यो मधुर एव नचैतत् संसर्गाद्भवितुमर्हति, रूपयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात् तैजसरूपानुगृहीतयोः संसर्गे हि व्यञ्जकमेव रूपं न व्यङ्ग्यमस्तीति एकानेकविधत्वे च पार्थिवाप्ययोः प्रत्यक्षत्वात् रूपयोः, पार्थिवं हरितलोहितपीताद्यनेकविधं रूपम्, आप्यन्तु शुक्लमप्रकाशम्। नचैतदेकगुणानां संसर्गेसत्युपलभ्यत इति। उदाहरणमात्रञ्चैतत् अतः परं प्रपञ्चः, स्पर्शयोर्वा पार्थिवतैजसयोः प्रत्यक्षत्वात् पार्थिवोऽनुष्णाशीतः स्पर्शः, उष्णस्तैजसः प्रत्यक्षो, नचैतदेकगुणानामनुष्णशीतस्पर्शेन वायुना संसर्गेणोपपद्यत इति, अथवा पार्थिवाप्ययोर्द्रव्ययोर्व्यवस्थितगुणयोः प्रत्यक्षत्वात् चतुर्गुणं पार्थिवं द्रव्यं त्रिगुणमाप्यं प्रत्यक्षन्तेन तत्कारणमनुमीयते, तथाभूतमिति तस्य कार्य्यं लिङ्गं कारणभावाद्धि कार्य्यभाव इति, एवं तैजसवायव्ययोर्द्रव्ययोः प्रत्यक्षत्वाद्गुणव्यवस्थायास्तत्कारणे द्रव्ये व्यवस्थानुमानमिति। दृष्टश्च विवेकः पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवं द्रव्यमवादिभिर्वियुक्तं प्रत्यक्षतो गृह्यते आप्यञ्च पराभ्यां तैजसञ्च वायुना न चैकैकगुणं गृह्यत इति निरनुमानन्तु विष्टं ह्यपरं परेणेत्येतदिति नात्रलिङ्गमनुमापकं गृह्यत इति येनैतदेवं प्रतिपद्येमहि यच्चोक्तं विष्टं ह्यपरम्परेणेति भूतसृष्टौ वेदितव्यं न साम्प्रतमिति नियमकारणाभावादयुक्तं दृष्टञ्च साम्प्रतमपरम्परेण विष्टमिति वायुना च विष्टं तेज इति। विष्टत्वं संयोगः सच द्वयोः समानो वायुना च विष्टत्वात् स्पर्शवत्तेजो न तु तेजसाविष्टत्वाद्रूपवान् वायुरिति नियमकारणं नास्तीति। दृष्टञ्च तैजसेन स्पर्शेन वायव्यस्पर्शस्याभिभवादग्रहणमिति न च तेनैव तस्याभिभव इति। तदेवं न्यायविरुद्धं प्रवादं प्रतिषेध्यन् सर्वगुणानुपलब्धेरिति चोदितं समाधीयते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्व्वं पूर्व्वं गुणोत्कर्षात्तत्तत्प्रधानम् ॥ ७० ॥

तस्मान्न सर्व्वगुणोपलब्धिः घ्राणादीनां पूर्व्वं पूर्व्वं गन्धादेर्गुणस्योत्कर्षात्तत्तत्प्रधानम् का प्रधानता विषयग्राहकत्वम्, को गुणोत्कर्षः अभिव्यक्तौ समर्थत्वम्, यथा वाह्यानां पार्थिवाप्यतैजसानां द्रव्याणां चतुर्गुणत्रिगुणद्विगुणानां न सर्व्वगुणव्यञ्जकत्वम्, गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपव्यञ्जकत्वम्, एवं घ्राणरसनचक्षुषां चतुर्गुणत्रिगुणद्विगुणानां सर्व्वगुणग्राहकत्वम्। गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपग्राहकत्वं तस्माद् घ्राणादिभिर्न सर्व्वेषां गुणानामुपलब्धिरिति। यस्तु प्रतिजानीते गन्धगुणत्वाद्घ्राणं गन्धग्राहकं एवं रसनादिष्वपीति तस्य यथागुणयोगं घ्राणादिभिर्गुणग्रहणं प्रसज्यत इति किंकृतं पुनर्व्यवस्थानम् किञ्चित् पार्थिवमिन्द्रियं न सर्व्वाणि कानिचिदाप्यतैजसवायव्यानीन्द्रियाणि न सर्व्वाणीति॥

तद्व्यवस्थानन्तु भूयस्त्वात् ॥ ७१ ॥

अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम्, दृष्टो हि प्रकर्षे भूयस्त्वशब्दः प्रकृष्टो यथा विषयोभूयानित्युच्यते। यथा पृथगर्थक्रियासमर्थानि पुरुषसंस्कारवशाद्विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्त्यन्ते न सर्व्वं सर्व्वार्थम्, एवं पृथग्विषयग्रहणसमर्थानि घ्राणादीनि निर्वर्त्त्यन्ते न सर्व्वविषयग्रहणसमर्थानीति स्वगुणान्नोपलभन्ते इन्द्रियाणि कस्मादितिचेत्॥

सगुणानामिन्द्रियभावात् ॥ ७२ ॥

स्वान् गन्धादीन्नोपलभन्ते घ्राणादीनि केन कारणेनेतिचेत् स्वगुणैः सह घ्राणादीनामिन्द्रियभावात् घ्राणं स्वेन गन्धेन समानार्थकारिणा सह वाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यात् न भवति, एवं शेषाणामपि यदि पुनर्गन्धः सहकारी च स्यात् घ्राणस्य ग्राह्यश्चेत्त तस्याह॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेनैव तस्याग्रहणाच्च ॥ ७३ ॥

न गुणोपलब्धिरिन्द्रियाणाम्। यो ब्रूते यथा वाह्यं द्रव्यं चक्षुषा गृह्यते तथा तेनैव चक्षुषा तदेव चक्षुर्गृह्यतामिति तादृगिदम् तुल्यो ह्युभयत्र प्रतिपत्तिहेत्वभाव इति ॥

न शब्दगुणोपलब्धेः ॥ ७४ ॥

स्वगुणान्नोपलभन्त इन्द्रियाणीत्येतत् न भवति उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति ॥

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७५ ॥

न शब्देन गुणेन सगुणमाकाशमिन्द्रियं भवति न शब्दः शब्दस्य व्यञ्जकः न च घ्राणादीनां स्वगुणग्रहणं प्रत्यक्षं नाप्यनुमीयते अनुमीयते तु श्रोत्रेणाकाशेन शब्दस्य ग्रहणं शब्दगुणत्वञ्चाकाशस्येति, परिशेषश्चानुमानं वेदितव्यम्, आत्मा तावत् श्रोता न करणं मनसः श्रोत्रत्वे वधिरत्वाभावः पृथिव्यादीनां घ्राणादिभावे सामर्थ्यं श्रोत्रभावे चासामर्थ्यम् अस्ति चेदं श्रोत्रमाकाशञ्च शिष्यते परिशेषादाकाशं श्रोत्रमिति ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्याद्यमाह्निकम् ॥

परीक्षितानीन्द्रियाण्यर्थाश्च बुद्धेरिदानीं परीक्षाक्रमः सा किमनित्या नित्यावेति कुतः संशयः ॥

कर्म्माकाशसाधर्म्यात् संशयः ॥ १ ॥

अस्पर्शवत्त्वताभ्यां समानो धर्म उपलभ्यते। बुद्धौ विशेषश्चोपजनापायधर्मवत्त्वम् विपर्य्ययश्च यथास्वमनित्यनित्ययोस्तस्यां बुद्धौ नोपलभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेन संशयः । अनुपपन्नरूपः खल्वयं संशयः, सर्व्वशरीरिणां हि प्रत्यात्मवेदनीयाऽनित्या बुद्धिः सुखादिवत्, भवति च संवित्तिर्ज्ञास्यामि जानामि अज्ञासिषमिति नचोपजननापायौ अन्तरेण त्रैकाल्यव्यक्तिः, ततश्च त्रैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत् सिद्धम्, प्रमाणसिद्धञ्चेदम् शास्त्रेऽप्युक्तम् इन्द्रियार्थसन्निकर्षोत्पन्नं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्येवमादि, तस्मात् संशयप्रक्रियानुपपत्तिरिति । दृष्टिप्रवादोपालम्भार्थन्तु प्रकरणम् । एवं हि पश्यन्तः प्रवदन्ति साङ्ख्याः पुरुषस्यान्तःकरणभूता नित्याः बुद्धिरिति साधनं प्रचक्षते ॥

विषयप्रत्यभिज्ञानात् ॥ २ ॥

किं पुनरिदं प्रत्यभिज्ञानम् यं पूर्वमज्ञासिषमर्थं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम् एतच्चावस्थिताया बुद्धेरुपपन्नम्, नानात्वे तु बुद्धिभेदेषूत्पन्नापवर्गिषु प्रत्यभिज्ञानानुपपत्तिः नान्यज्ञातमन्यः प्रत्यभिजानातीति ॥

साध्यसमत्वादहेतुः ॥ ३ ॥

यथा खलु नित्यत्वं बुद्धेः साध्यमेवम्प्रत्यभिज्ञानमपीति किं कारणम् चेतनधर्म्मस्य करणेऽनुपपत्तिः पुरुषधर्म्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोधः प्रत्ययोऽध्यवसाय इति, चेतनो हि पूर्वज्ञातमर्थम्प्रत्यभिजानातीति तस्यैतस्माद्धेतो र्नित्यत्वं युक्तमिति, करणचैतन्याभ्युपगमे तु चेतनस्वरूपं वचनीयं नानिर्द्दिष्टस्वरूपमात्मान्तरं शक्यमस्तीति प्रतिपत्तुम्, ज्ञानञ्चेद्बुद्धेरन्तःकरणस्याभ्युपगम्यते, चेतनस्येदानीं किं स्वरूपं को धर्मः किन्तत्त्वम् ज्ञानेन च बुद्धौ वर्त्तमानेनायं चेतनः किं करोतीति, चेतयत इति चेत् न ज्ञानादर्थान्तरवचनम् । पुरुषश्चेतयते बुद्धिर्जानातीति नेदं ज्ञानादर्थान्तरमुच्यते चेतयते जानीते बुध्यते पश्यत्युपलभ्यत इत्येकोऽयमर्थ इति, बुद्धिर्ज्ञापयतीतिचेत् अद्धा जानीते पुरुषो बुद्धिर्ज्ञापयतीति सत्यमेतत् एवञ्चाभ्युपगमे ज्ञानं पुरुषस्येति सिद्धं भवति न बुद्धेरन्तःकरण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्येति प्रतिपुरुषञ्च शब्दान्तरव्यवस्था प्रतिज्ञाने प्रतिषेधहेतुवचनम्। यश्च प्रतिजानीते कश्चित् पुरुषश्चेतयते कश्चिद्बुध्यते कश्चिदुपलभते कश्चित् पश्यतीति पुरुषान्तराणि खल्विमानि चेतनोबोधोपलब्ध्रा द्रष्टेति नैकस्यैते धर्मा इति, अत्र कः प्रतिषेधहेतुरिति, अर्थस्याभेद इति चेत् समानमभिन्नार्था एते शब्दा इति तत्र व्यवस्थानुपपत्तिरित्येवं चेन्मन्यसे समानं भवति पुरुषश्चेतयते बुद्धिर्जानीते इत्यत्राप्यर्थो न भिद्यते तत्रोभयोश्चेतनत्वादन्यतरलोप इति यदि पुनर्बुध्यतेऽनयेति बोधनं बुद्धिर्मन एवोच्यते तच्च नित्यम् अस्त्वेतदेवं न तु मनसोविषयप्रत्यभिज्ञानान्नित्यत्वत्। दृष्टं हि करणभेदे ज्ञातुरेकत्वात् प्रत्यभिज्ञानम् सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति चक्षुर्वत् प्रदीपवच्च प्रदीपान्तरदृष्टस्य प्रदीपान्तरेण प्रत्यभिज्ञानमिति तस्माज्ज्ञातुरयं नित्यत्वे हेतुरिति। यच्च मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयो ज्ञानानि निश्चरन्ति वृत्तिश्च वृत्तिमतो नान्येति॥

न युगपद्ग्रहणात्॥ ४॥

वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमतोऽवस्थानाद्वृत्तीनामवस्थानमिति यानीमानि विषयग्रहणानि तान्यवतिष्ठन्त इति युगपद्विषयाणां ग्रहणं प्रसज्यत इति॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः॥ ५॥

अतीते च प्रत्यभिज्ञाने वृत्तिमानप्यतीत इत्यन्तःकरणस्य विनाशः प्रसज्यते विपर्य्यये च नानात्वमिति। अविभुः चैकमनः पर्य्यायेन्द्रियैः संयुज्यत इति॥

क्रमवृत्तित्वादयुगपद्ग्रहणम्॥ ६॥

इन्द्रियार्थानां वृत्तिवृत्तिमतोर्नानात्वमिति, एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥ ७ ॥

अप्रत्यभिज्ञानमनुपलब्धिः, अनुपलब्धिश्च कस्यचिदर्थस्य विषयान्तरव्यासक्ते मनस्युपपद्यते वृत्तिवृत्तिमतोर्नानात्वात् एकत्वे ह्यनर्थको व्यासङ्गः इति । विभुत्वे चान्तःकरणस्य पर्य्यायेणेन्द्रियैः संयोगः ॥

न गत्यभावात् ॥ ८ ॥

प्राप्तानीन्द्रियाण्यन्तःकरणेनेति प्राप्त्यर्थस्य गमनस्याभावः । तत्र क्रमवृत्तित्वाभावादयुगपद्ग्रहणानुपपत्तिरिति गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयते । यथा चक्षुषो गतिः प्रतिषिद्धा सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणात् पाणिचन्द्रमसोर्व्यवधानप्रतीघातेनानुमीयत इति सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे सिद्धं हि मनोऽन्तःकरणं नित्यञ्चेति, क्व तर्हि विवादः तस्य विभुत्वे तच्च प्रमाणतोऽनुपलब्धेः प्रतिषिद्धमिति एकञ्चान्तःकरणं नाना चैता ज्ञानात्मिका वृत्तयः चक्षुर्विज्ञानं घ्राणविज्ञानं रूपविज्ञानं गन्धविज्ञानमेतच्च वृत्तिवृत्तिमतोरेकत्वेऽनुपपन्नमिति । एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः । विषयान्तरग्रहणलक्षणो विषयान्तरव्यासङ्गः पुरुषस्य नान्तःकरणस्येति केनचिदिन्द्रियेण सन्निधिः केनचिदसन्निधिरिति । अयन्तु व्यासङ्गोऽनुज्ञायते मनस इति । एवमन्तःकरणं नाना वृत्तय इति सत्यभेदे वृत्तेरिदमुच्यते ॥

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ ९ ॥

तस्यां वृत्तौ नानात्वाभिमानः यथा द्रव्यान्तरोपहिते स्फटिकेऽन्यत्वाभिमानो नीलो लोहित इति । एवं विषयान्तरोपधानादिति ॥

न हेत्वभावात् ॥ १० ॥

स्फटिकान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमानो गौणो न पुनर्गन्धाद्यन्यत्वाभिमानवदिति हेतुर्नास्ति हेत्वभावादनुपपन्न इति, समानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेत्वभाव इति चेत् न ज्ञानानां क्रमेणोपजननापायदर्शनात् क्रमेण हीन्द्रियार्थेषु ज्ञानान्युपजायन्ते चापयन्ति चेति दृश्यते तस्माद्गन्धान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमान इति॥ स्फटिकान्यत्वाभिमानवदित्येतदमृष्यमाणः क्षणिकवाद्याह॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ ११ ॥

स्फटिकस्याभेदेनावस्थितस्योपधानभेदान्नानात्वाभिमान इत्ययमविद्यमानहेतुः पक्षः, कस्मात् स्फटिकेऽप्यपरापरोत्पत्तेः, स्फटिकेऽप्यन्या व्यक्तय उत्पद्यन्ते अन्या निरुध्यन्त इति, कथम् क्षणिकत्व व्यक्तीनां क्षणश्चाल्पीयान् कालः, क्षणस्थितिकाः क्षणिकाः कथं पुनर्गम्यते क्षणिका व्यक्तय इति, उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु पक्तिनिर्वृत्तस्याहाररसस्य शरीररुधिरादिभावेनोपचयोऽपचयश्च प्रबन्धेन प्रवर्त्तते उपचयाद्व्यक्तीनामुत्पादः अपचयाद्व्यक्तिनिरोधः, एवं च सत्यवयवपरिणामभेदेन वृद्धिः शरीरस्य कालान्तरे गृह्यत इति सोऽयं व्यक्तिमात्रे वेदितव्य इति॥

नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ॥ १२ ॥

पदार्थानां सर्वासु व्यक्तिषूपचयापचयप्रबन्धः शरीरवदिति नायं नियमः, कस्मात् हेत्वभावात्, नात्र प्रत्यक्षमनुमानं वा प्रतिपादकमस्तीति, तस्माद्यथादर्शनमभ्यनुज्ञा यत्र यत्रोपचयापचयप्रबन्धो दृश्यते तत्र तत्र व्यक्तीनाम-परापरोत्पत्ति-रूपचयापचयप्रबन्धदर्शनेनाभ्यनुज्ञायते यथा शरीरादिषु, यत्र यत्र न दृश्यते तत्र तत्र प्रत्याख्यायते यथा ग्रावप्रभृतिषु, स्फटिकेऽप्युपचयापचयप्रबन्धो न दृश्यते तस्मादयुक्तं स्फटिकेऽप्यपरापरोत्पत्तिरिति, यथा चार्कस्य कटुकिम्ना सर्वद्रव्याणां कटुकिमानमापादयेत्, तादृगेतदिति। यश्चाशेषनिरोधेनापूर्वोत्पादं निरन्वयं द्रव्यसन्ताने क्षणिकानां मन्यते तस्यैतत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोत्पत्तिविनाशकारणोपलब्धेः ॥ १३ ॥

उत्पत्तिकारणं तावदुपलभ्यते अवयवोपचयोवल्मीकादीनाम्, विनाशकारणञ्चोपलभ्यते घटादीनामवयवविभागः। यस्य त्वनपचितावयवं निरुध्यते अनुपचितावयवञ्चोत्पद्यते तस्याशेषनिरोधे निरन्वये वा पूर्वोत्पादे न कारणमुभयथाप्युपलभ्यत इति ॥

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः ॥ १४ ॥

यथानुपलभ्यमानं क्षीरविनाशकारणं दध्युत्पत्तिकारणञ्चाभ्यनुज्ञायते तथा स्फटिकेऽपरापरासु व्यक्तिषु विनाशकारणमुत्पत्तिकारणं चाभ्यनुज्ञेयमिति ॥

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १५ ॥

क्षीरविनाशलिङ्गं क्षीरविनाशकारणं दध्युत्पत्तिलिङ्गं दध्युत्पत्तिकारणञ्च गृह्यतेऽतोनानुपलब्धिः। विपर्ययस्तु स्फटिकादिषु द्रव्येषु अपरापरोत्पत्तौ व्यक्तीनां न लिङ्गमस्तीत्यनुत्पत्तिरेवेति, अत कश्चित् परिहारमाह ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥१६॥

पयसः परिणामो न विनाश इत्येक आह। परिणामश्चावस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिरिति। गुणान्तरप्रादुर्भाव इत्यपर आह गुणान्तरप्रादुर्भावश्च सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति स खल्वेकपक्षीभाव इव, अत्र तु प्रतिषेधः ॥

व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्मूर्च्छनलक्षणादवयवव्यूहाद्द्रव्यान्तरे दध्न्युत्पन्ने गृह्यमाणे पूर्वं पयोद्रव्यमवयवविभागेभ्यो निवृत्तमित्यनुमीयते यथा मृदवयवानां व्यूहान्तराद्द्रव्यान्तरे स्थाल्यामुत्पन्नायां पूर्वं मृत्पिण्डद्रव्यं मृदवयवविभागेभ्यो निवर्त्तत इति मृद्वच्चावयवान्वयः पयोदध्नोर्नाशेषनिरोधे निरन्वयो द्रव्यान्तरोत्पादो घटत इति अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं दध्युत्पादञ्च प्रतिषेध उच्यते इति ॥

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १८ ॥

क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकादिव्यक्तीनामिति नायमेकान्त इति, कस्मात् हेत्वभावात् नात्र हेतुरस्ति अकारणौ विनाशोत्पादौ स्फटिकादि व्यक्तीनां क्षीरदधिवत् न पुनर्विनाशकारणाभावात् कुम्भस्य विनाशः उत्पत्तिकारणाभावाच्चोत्पत्तिः एवं स्फटिकादिव्यक्तीनां विनाशोत्पत्तिकारणाभावाद्विनाशोत्पत्तिभाव इति निरधिष्ठानञ्च दृष्टान्तवचनम् गृह्यमाणयोर्विनाशोत्पादयोः स्फटिकादिषु स्यादयमाश्रयवान् दृष्टान्तः क्षीरविनाशकारणानुपलब्धिवद्दध्युपलब्धिवच्चेति तौ तु न गृह्येते तस्मान्निरधिष्ठानोऽयं दृष्टान्त इति, अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः। कुम्भवन्न निष्कारणौ विनाशोत्पादौ स्फटिकादीनामित्यस्यनुज्ञेयोऽयं दृष्टान्तः प्रतिषेद्धुमशक्यत्वात् क्षीरदधिवत्तु निष्कारणौ विनाशोत्पादाविति शक्योऽयं प्रतिषेद्धुं कारणतो विनाशोत्पत्तिदर्शनात् क्षीरदध्नोर्विनाशोत्पत्ती पश्यता तत्कारणमनुमेयम्, कार्य्यलिङ्गं हि कारणमित्युपपन्नमनित्या बुद्धिरिति। इदन्तु चिन्त्यते कस्येयं बुद्धिः आत्मेन्द्रियमनोऽर्थानां गुण इति प्रसिद्धोऽपि च खल्वयमर्थः परीक्षाशेषं प्रवर्त्तयामीति प्रक्रियते सोऽयं बुद्धौ सन्निकर्षोत्पत्तेः संशयः विशेषस्याग्रहणादिति। तत्रायं विशेषः ॥

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेन्द्रियाणामर्थानां वा गुणो ज्ञानं तेषां विनाशे ज्ञानस्य भावात्, भवति खल्विदमिन्द्रियेऽर्थे च विनष्टे ज्ञानमद्राक्षमिति न च ज्ञातरि विनष्टे ज्ञानम्भवितुमर्हति अन्यत् खलु चैतदिन्द्रियार्थसन्निकर्षजं ज्ञानं यदिन्द्रियार्थ विनाशे न भवति, इदमन्यदात्ममनःसन्निकर्षजं तस्य युक्तोभाव इति, स्मृतिः खल्वियमद्राक्षमिति पूर्वदृष्टविषया न च विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तम्, न चान्यदृष्टमन्यः स्मरति, न च मनसि ज्ञातर्य्यभ्युपगम्यमाने शक्यमिन्द्रियार्थयोर्ज्ञातृत्वं प्रतिपादयितुम्, अस्तु तर्हि मनो गुणोज्ञानम् ॥

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥ २० ॥

युगपज्ज्ञेयानुपलब्धिरन्तःकरणस्य लिङ्गम्, तत्र युगपज्ज्ञेयानुपलब्ध्यानुमीयते अन्तःकरणं न तस्य गुणोज्ञानम्, कस्य तर्हि ज्ञस्य वशित्वात्, वशी ज्ञाता, वश्यं करणम्, ज्ञानगुणत्वे च करणभावनिवृत्तिः घ्राणादिसाधनस्य च ज्ञातुर्गन्धादिज्ञानाभावादनुमीयते अन्तःकरणसाधनस्य सुखादिज्ञानं स्मृतिश्चेति तत्र यज्ज्ञानगुणं स आत्मा, यत्तु सुखाद्युपलब्धिसाधनमन्तःकरणं मनस्तदिति संज्ञाभेदमात्रन्नार्थभेद इति युगपज्ज्ञेयानुपलब्धेश्चायोगिन इति चार्थः योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मा निर्माय सेन्द्रियाणि शरीरान्तराणि तेषु तेषु युगपज्ज्ञेयानुपलभते, तच्चैतद्विभौ ज्ञातर्य्युपपद्यते नाणौ मनसीति, विभुत्वे वा मनसो ज्ञानस्य नात्मगुणत्वप्रतिषेधः, विभु मनस्तदन्तःकरणभूतमिति तस्य सर्वेन्द्रियैर्युगपत् संयोगाद्युगपज्ज्ञानान्युत्पद्येरन्निति ॥

तदात्मगुणत्वेऽपि तुल्यम् ॥ २१ ॥

विभुरात्मा सर्वेन्द्रियैः संयुक्त इति यगपज्ज्ञानोत्पत्तिप्रसङ्ग इति ॥

इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः॥२२॥

गन्धाद्युपलब्धेरिन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोऽपि कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यम् तस्य चायौगपद्यमणुत्वात् मनसः, अयौगपद्यादनुत्पत्तिर्युगपज्ज्ञानानामात्मगुणत्वेऽपीति। यदि पुनरात्मेन्द्रियार्थसन्निकर्षमात्राद्गन्धादिज्ञानमुत्पद्यते॥

नोत्पत्तिकारणानपदेशात्॥ २३॥

आत्मेन्द्रियार्थसन्निकर्षमात्राद्गन्धादिज्ञानमुत्पद्यत इति नात्रोत्पत्तिकारणमपदिश्यते येनैतत् प्रतिपद्येमहीति॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः॥ २४॥

तदात्मगुणत्वेऽपि तुल्यमित्येतदनेन समुच्चीयते। द्विविधो हि गुणनाशहेतुः, गुणानामाश्रयाभावो विरोधी च गुणः, नित्यत्वादात्मनोऽनुपपन्नः विरोधी च बुद्धेर्गुणो न गृह्यते तस्मादात्मगुणत्वे सति बुद्धेर्नित्यत्वप्रसङ्गः॥

अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत्॥२५

अनित्या बुद्धिरिति सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत् गृह्यते च बुद्धिसन्तानस्तत्र बुद्धेर्बुद्ध्यन्तरं विरोधी गुण इत्यनुमीयते, यथा शब्दसन्ताने शब्दः शब्दान्तरविरोधीति, असङ्ख्येयेषु ज्ञानकारितेषु संस्कारेषु स्मृतिहेतुष्वात्मसमवेतेष्वात्ममनसोश्च सन्निकर्षे समाने स्मृतिहेतौ सति न कारणस्यायौगपद्यमस्तीति युगपत् स्मृतयः प्रादुर्भवेयुः यदि बुद्धिरात्मगुणः स्यादिति। तत्र कश्चित् सन्निकर्षस्यायौगपद्यमुपपादयिष्यन्नाह॥

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः॥ २६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानसाधनः संस्कारो ज्ञानमित्युच्यते ज्ञानसंस्कृतैरात्मप्रदेशैः पर्य्यायेण मनः सन्निकृष्यते आत्ममनःसन्निकर्षात् स्मृतयोऽपि पर्य्यायेन भवन्तीति॥

नान्तःशरीरवृत्तित्वान्मनसः॥ २७॥

सदेहस्यात्मनो मनसा संयोगो विपच्यमानकर्म्माशयसहितो जीवनमिष्यते। तत्रास्य प्राक् प्रापणादन्तःशरीरे वर्त्तमानस्य मनसः शरीराद्बहिर्ज्ञानसंस्कृतैरात्मप्रदेशैः संयोगो नोपपद्यत इति॥

साध्यत्वादहेतुः॥ २८॥

विपच्यमानकर्माशयमात्रं जीवनम्, एवञ्च सति साध्यमन्तःशरीरवृत्तित्वं मनस इति॥

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः॥ २९॥

सुस्मूर्षया खल्वयं मनः प्रणिदधानः चिरादपि कञ्चिदर्थं स्मरति स्मरतश्च शरीरधारणं दृश्यते आत्ममनःसन्निकर्षजश्च प्रयत्नो द्विविधः धारकः प्रेरकश्च, निःसृते च शरीराद्बहिर्मनसि धारकस्य प्रयत्नस्याभावाद्गुरुत्वात्पतनं स्यात् शरीरस्य स्मरत इति॥

न तदाशुगतित्वान्मनसः॥ ३०॥

आशुगति मनस्तस्य वहिः शरीरादात्मप्रदेशेन ज्ञानसंस्कृतेन सन्निकर्षः प्रत्यागतस्य च प्रयत्नोत्पादनमुभयं युज्यत इति, उत्पाद्य वा धारकं प्रयत्नं शरीरान्निःसरणं मनसोऽतस्तत्रोपपन्नं धारणमिति॥

न स्मरणकालानियमात्॥ ३१॥

किञ्चित् क्षिप्रं स्मर्यते किञ्चिच्चिरेण, यदा चिरेण तदा सुस्मूर्षया मनसि धार्य्यमाणे चिन्ताप्रबन्धे सति कस्यचिदर्थस्य लिङ्गभूतस्य चिन्तनमाराधितं स्मृतिहेतुर्भवति तत्रैतच्चिरनिश्चरिते मनसि नोपपद्यते इति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरसंयोगानपेक्षश्चात्ममनःसंयोगो न स्मृतिहेतुः शरीरस्य भोगायतनत्वात् उपभोगायतनं पुरुषस्य ज्ञातुः शरीरं न ततो निश्चरितस्य मनस आत्मसंयोगमात्रं ज्ञानसुखादीनामुत्पत्तौ कल्पते, क्लृप्तौ वा शरीरवैयर्थ्यमिति ॥

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ३२

आत्मप्रेरणेन वा मनसो बहिः शरीरात् संयोगविशेषः स्यात्, यदृच्छया वाकस्मिकतया, ज्ञतया वा मनसः सर्व्वथा चानुपपत्तिः, कथम् स्मर्त्तव्यत्वादिच्छातः स्मरणज्ञानासंभवाच्च, यदि तावदात्माऽमुष्यार्थस्य स्मृतिहेतुः संस्कारः अमुष्मिन्नात्मप्रदेशे समवेतस्तेन मनः संयुज्यतामिति मनः प्रेरयति तदा स्मृत एवासावर्थो भवति न स्मर्त्तव्यः। न चात्मप्रत्यक्ष आत्मप्रदेशः संस्कारोवा तत्रानुपपन्नात्मप्रत्यक्षेण संवित्तिरिति, सुस्मूर्षया चायं मनः प्रणिदधानश्चिरादपि कञ्चिदर्थं स्मरति नाकस्मात्, ज्ञत्वञ्च मनसो नास्ति ज्ञानप्रतिषेधादिति, एतच्च॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३३ ॥

यदा खल्वयं व्यासक्तमनाः क्वचिद्देशे शर्करया कण्टकेन वा पादव्यथनमाप्नोति तदात्ममनः संयोगविशेष एषितव्यः, दृष्टं हि दुःखं दुःखवेदनञ्चेति तत्रायं समानः प्रतिषेधः, यदृच्छया तु विशेषो नाकस्मिकी क्रिया, नाकस्मिकः संयोगः इति, कर्म्मादृष्टमुपभोगार्थं क्रियाहेतुरितिचेत् समानम्, कर्म्मादृष्टं पुरुषस्थं पुरुषोपभोगार्थम्मनसि क्रियाहेतुरेवं दुःखं दुःखसंवेदनञ्च सिध्यतीत्येवञ्चेन्मन्यसे समानं स्मृतिहेतावपि संयोगविशेषो भवितुमर्हति । तत्र यदुक्तमात्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेष इत्ययमप्रतिषेध इति पूर्व्वस्तु प्रतिषेधो नान्तःशरीरवृत्तित्वान्मनस इति कः खल्विदानीं कारणयौगपद्यसद्भावे युगपदस्मरणस्य हेतुरिति ॥

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपदस्मरणम् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा खल्वात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुरेवं प्रणिधानं लिङ्गादिज्ञानानि तानि च न युगपद्भवन्ति तत्कृता स्मृतीनां युगपदनुत्पत्तिरिति॥

प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः॥ ३५॥

यत् खल्विदं प्रतिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त्तमुत्पद्यते कदाचित्तस्य युगपदुत्पत्तिप्रसङ्गो हेत्वभावात् स्वतः स्मृतिहेतोरसम्वेदनात् प्रातिभेन समानाभिमानः, बह्वर्थविषये वै चिन्ताप्रबन्धे कश्चिदेवार्थः कस्यचित् स्मृतिहेतुः तस्यानुचिन्तनात् तस्य स्मृतिर्भवति, नचायं स्मर्त्ता सर्व्वं स्मृतिहेतुं संवेदयते, एवं मे स्मृतिरुत्पन्नेत्यसंवेदनात्, प्रातिभमिवज्ञानमिदं स्मार्त्तमिति। प्रातिभे कथमितिचेत् पुरुषकर्म्मविशेषादुपभोगवन्नियमः। प्रातिभमिदानीं ज्ञानं युगपत् कस्मात् नोत्पद्यते यथोपभोगार्थं कर्म्म युगपदुपभोगं न करोति। एवं पुरुषकर्म्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयति, हेत्वभावादयुक्तमेतदिति चेत् न करणस्य प्रत्ययपर्य्याये सामर्थ्यात्, उपभोगवन्नियमइत्यस्ति दृष्टान्तः, हेतुःर्नास्तीति चेन्मन्यसे न करणस्य प्रत्ययपर्य्याये सामर्थ्यात् नैकस्मिन् ज्ञेये युगपदनेकं ज्ञानमुत्पद्यते, नचानेकस्मिंस्तदिदं दृष्टेन प्रत्ययपर्य्यायेणानुमेयं करणसामर्थ्यमित्यम्भूतमिति न ज्ञातुर्विकरणधर्म्मिणो देहनानात्वे प्रत्ययौगपद्यादिति, अयञ्च द्वितीयःप्रतिषेधः अवस्थितशरीरस्य चानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात् कच्चिदेऽवस्थितशरीरस्य ज्ञातुरिन्द्रियार्थप्रबन्धेन ज्ञानमनेकमेकस्मिन्नात्मप्रदेशे समवैति तेन यदा मनःसंयुज्यते तदा ज्ञातपूर्व्वस्यानेकस्य युगपत् स्मरणं प्रसज्यते प्रदेशस्य संयोगपर्य्यायाभावादिति आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यप्रतिषेधानुपपत्तिः, शब्दसन्ताने तु श्रोत्राधिष्ठानप्रत्यासत्त्या शब्दश्रवणवत् संस्कारप्रत्यासत्त्या मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिप्रसङ्गः, पूर्वएव तु प्रतिषेधो नानेकज्ञानसमवायादेकप्रदेशे युगपत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ट्यतिप्रसङ्ग इति, यत्पुरुषधर्म्मो ज्ञानमन्तःकरणस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्म्मा इति कस्यचिद्दर्शनं तत् प्रतिषिध्यते ॥

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३६ ॥

अयं खलु जानीते तावत् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति, ज्ञातं सुखसाधनमाप्तुमिच्छति दुःखसाधनं हातुमिच्छति, प्राप्तुं इच्छाप्रयुक्तस्यास्य सुखसाधनावाप्तये समीहाविशेष आरम्भः जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्ज्जनं निवृत्तिरेव ज्ञानेच्छाप्रयत्नसुखदुःखानामेकेनाभिसम्बन्धः एककर्तृकत्वं ज्ञानेच्छाप्रवृत्तीनां समानाश्रयत्वञ्च, तस्माज्ज्ञस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्म्माः नाचेतनस्येति, आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात्परत्रानुमानं वेदितव्यमिति । अत्र भूतचैतनिक आह ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३७

आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति यस्यारम्भनिवृत्ती तस्येच्छाद्वेषौ तस्य ज्ञानमिति प्राप्तं पार्थिवाप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति चैतन्यम् ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३८ ॥

शरीरे चैतन्यनिवृत्तिरारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति प्राप्तम् परश्वादेः करणस्यारम्भनिवृत्तिदर्शनाच्चैतन्यमिति । अथ शरीरस्येच्छादिभिर्योगः परश्वादेस्तु करणस्यारम्भनिवृत्ती व्यभिचरतः न तर्ह्ययं हेतुः पार्थिवाप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति । अयन्तर्ह्यन्योऽर्थः तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः पृथिव्यादीनां भूतानामारम्भस्तावत् त्रसस्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषः, लोष्टादिषु च लिङ्गाभावात् प्रवृत्तिविशेषाभावो निवृत्तिः आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति पार्थिवाद्येष्वणुषु तद्दर्शनादिच्छाद्वेषयोस्तद्योगाज्ज्ञानयोग इति सिद्धं भूतचैतन्यमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुम्भादिष्वनुपलब्धेरहेतुः ॥ ३९ ॥

कुम्भादिस्थदवयवानां व्यूहलिङ्गः प्रवृत्तिविशेष आरम्भः, सिकतादिषु प्रवृत्तिविशेषाभावो निवृत्तिः, न च मृत्सिकतानामारम्भनिवृत्तिदर्शनादिच्छाद्वेषप्रयत्नज्ञानैर्योगः, तस्मात् तल्लिङ्गत्वादिच्छाद्वेषयोरित्यहेतुरिति ॥

नियमानियमौ तु तद्विशेषकौ ॥ ४० ॥

तयोरिच्छाद्वेषयोर्नियमानियमौ विशेषकौ भेदकौ ज्ञस्येच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती न स्वाश्रये किन्तर्हि प्रयोज्याश्रये, तत्र प्रयुज्यमानेषु भूतेषु प्रवृत्तिनिवृत्ती स्तः न सर्वेषु इत्यनियमोपपत्तिः । यस्य तु ज्ञानाद्भूतानामिच्छाद्वेषनिमित्ते आरम्भनिवृत्ती स्वाश्रये तस्य नियमः स्यात् । यथा भूतानां गुणान्तरनिमित्ता प्रवृत्तिर्गुणप्रतिबन्धाच्च निवृत्तिर्भूतमात्रे भवति नियमेन एवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्याताम् । तस्मात् प्रयोजकाश्रिताज्ञानेच्छाद्वेषप्रयत्नाः प्रयोज्याश्रये तु प्रवृत्तिनिवृत्ती इति सिद्धम् । एकशरीरे तु ज्ञातृबहुत्वं निरनुमानम् । भूतचैतनिकस्यैकशरीरे बहूनि भूतानि ज्ञानेच्छाद्वेषप्रयत्नगुणानीति ज्ञातृबहुत्वं प्राप्तम्, ओमिति ब्रुवतः प्रमाणं नास्ति । यथा नानाशरीरेषु नाना ज्ञातारो बुद्ध्यादिगुणव्यवस्थानात्, एवमेकशरीरेऽपि बुद्ध्यादिव्यवस्थानुमानं स्यात् ज्ञातृबहुत्वस्येति दृष्टश्चान्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानाम् सोऽनुमानमन्यत्रापि दृष्टः करणलक्षणेषु भूतेषु परश्वादिषूपादानलक्षणेषु च मृत्प्रभृतिष्वन्यगुणनिमित्तः प्रवृत्तिविशेषः सोऽनुमानम् अन्यत्रापि च । त्रसस्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषो भूतानामन्यगुणनिमित्त इति स च गुणः प्रयत्नसमानाश्रयः संस्कारो धर्म्माधर्म्मसमाख्यातः सर्वार्थः पुरुषार्थाराधनाय प्रयोजको भूतानां प्रयत्नवदिति । आत्मास्तित्वहेतुभिरात्मनित्यत्वहेतुभिश्च भूतचैतन्यप्रतिषेधः कृतो वेदितव्यः, नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानादिति च समानः प्रतिषेध इति, क्रियामात्रं क्रियोपरममात्रञ्च प्रवृत्तिनिवृत्ती इत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिप्रेत्योक्तन्तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः, अन्यथा त्विमे आरम्भनिवृत्ती आख्याते न च तथाविधे पृथिव्यादिषु दृश्येते, तस्मादयुक्तं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध इति। भूतेन्द्रियमनसां समानः प्रतिषेधोमनस्तूदाहरणमात्रम् ॥

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ४१ ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनोलिङ्गमित्यतः प्रभृति यथोक्तं संगृह्यते तेन भूतेन्द्रियमनसाञ्चैतन्य प्रतिषेधः। पारतन्त्र्यात् परतन्त्राणि भूतेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्त्तन्ते चैतन्ये पुनः स्वतन्त्राणि स्युरिति। अकृताभ्यागमाच्च प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति चैतन्ये भूतेन्द्रियमनसां परकृतं कर्म पुरुषेण भुज्यत इति स्यात् अचैतन्ये तु तत्साधनस्य स्वकृतकर्मफलोपभोगः पुरुषस्येत्युपपद्यत इति, अथायं सिद्धोपसंग्रहः ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४२ ॥

आत्मगुणोज्ञानमिति प्रकृतम्, परिशेषो नाम प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः, भूतेन्द्रियमनसां प्रतिषेधे द्रव्यान्तरं न प्रसज्यते शिष्यते चात्मा तस्य गुणोज्ञानमिति ज्ञायते, यथोक्तहेतूपपत्तेश्चेति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधादिति परिशेषज्ञापनार्थं प्रकृतस्थापनादिज्ञानार्थञ्च यथोक्तहेतूपपत्तिवचनमिति। अथवोपपत्तेश्चेति हेत्वन्तरमेवेदम् नित्यः खल्वयमात्मा यस्मादेकस्मिन् शरीरे धर्मञ्चरित्वा कायभेदात् स्वर्गे देवेषूपपद्यते अधर्मञ्चरित्वा देहभेदान्नरकेषूपपद्यत इति उपपत्तिः शरीरान्तरप्राप्तिलक्षणा, सा सति सत्ये नित्ये चाश्रयवती बुद्धिप्रबन्धमात्रे तु निरात्मके निराश्रया नोपपद्यत इति। एकसत्वाधिष्ठानश्चानेकशरीरयोगः संसार उपपद्यते। शरीरप्रबन्धोच्छेदश्चापवर्गो मुक्तिरित्युपपद्यते, बुद्धिसन्ततिमात्रे त्वेक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्वानुपपत्तेर्न कश्चिद्दीर्घमध्वानं सन्धावति न कश्चिच्छरीरप्रबन्धाद्विमुच्यत इति संसारापवर्गानुपपत्तिरिति बुद्धिसन्ततिमात्रे च सत्वभेदात् सर्वमिदं प्राणिव्यवहारजातमप्रतिसंहितमव्यावृत्तमपरिनिष्ठनञ्च स्यात्, ततः स्मरणाभावान्नान्यदृष्टमन्यः स्मरतीति, स्मरणञ्च खलु पूर्व्वज्ञातस्य समानेन ज्ञात्रा ग्रहणम् अज्ञासिषममुमर्थं ज्ञेयमिति, सोऽयमेको ज्ञाता पूर्व्वज्ञातमर्थं गृह्णाति तच्चास्य ग्रहणं स्मरणमिति, तद्बुद्धिप्रबन्धमात्रे निरात्मके नोपपद्यते ॥

स्मरणन्त्वात्मनोज्ञस्वाभाव्यात् ॥ ४३ ॥

उपपद्यत इति, आत्मन एव स्मरणं न बुद्धिसन्ततिमात्रस्येति, तुशब्दोऽवधारणे, कथम् ज्ञस्वभावत्वात् ज्ञइत्यस्य स्वभावः स्वोधर्मः। अयं खलु ज्ञास्यति जानाति अज्ञासीदिति त्रिकालविषयेणानेकेन ज्ञानेन सम्बध्यते तच्चास्य त्रिकालविषयं ज्ञानं प्रत्यात्मवेदनीयम् ज्ञास्यामि जानामि अज्ञासिषमिति वर्त्तते तद्यस्यायं स्वो धर्मस्तस्य स्मरणं न बुद्धिप्रबन्धमात्रस्य निरात्मकस्येति। स्मृतिहेतूनामयौगपद्याद्युगपदस्मरणमित्युक्तम्, अथ केभ्यः स्मृतिरुत्पद्यते इति, स्मृतिः खलु ॥

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्य्यवियोगैककार्य्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः ॥ ४४ ॥

सुस्मूर्षया मनसो धारणं प्रणिधानम्, सुस्मूर्षितलिङ्गचिन्तनञ्चार्थस्मृतिकारणम्, निबन्धः खल्वेकग्रन्थोपयमोऽर्थानाम् एकग्रन्थोपयताः खल्वर्था अन्योऽन्यस्मृतिहेतव आनुपूर्व्व्येतरथा वा भवन्तीति। धारणाशास्त्रकृतो वा, प्रज्ञातेषु वस्तुषु स्मर्त्तव्यानामुपनिःक्षेपोनिबन्ध इति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासस्तु समाने विषये ज्ञानानामभ्यावृत्तिरभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्देनोच्यते स च स्मृतिहेतुः समान इति, लिङ्गं पुनः संयोगिसमवाय्येकार्थसमवायिविरोधिचेति, संयोगी यथा धूमोऽग्नेः, गोर्विषाणं, पाणिः पादस्य, रूपं स्पर्शस्य, अभूतं भूतस्येति। लक्षणं पश्ववयवस्थं गोत्रस्य स्मृतिहेतुः विदानामिदं गर्गाणामिदमिति, सादृश्यं चित्रगतं प्रतिरूपकं देवदत्तस्येत्येवमादि, परिग्रहात् स्वेन वा स्वामी स्वामिना वा स्वं स्मर्य्यते, आश्रयात् ग्रामण्या तदधीनं स्मरति। आश्रितात् तदधीनेन ग्रामण्यमिति, सम्बन्धात् अन्तेवासिना गुरुं स्मरति ऋत्विजा याज्यमिति, आनन्तर्य्यात् इति करणीयेष्वर्थेषु, वियोगात् येन विप्रयुज्यते तद्वियोगप्रतिसम्वेदी भृशं स्मरति, एककार्य्यात् कर्त्रन्तरदर्शनात् कर्त्रन्तरे स्मृतिः, विरोधात् विजिगीषमाणयोरन्यतरदर्शनादन्यतरः स्मर्य्यते, अतिशयात् येनातिशय उत्पादितः, प्राप्तेः, यतो येन किञ्चित् प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति, व्यवधानात् कोशादिभिरसिप्रभृतीनि स्मर्य्यन्ते, सुखदुःखाभ्यां तद्धेतुः स्मर्य्यते, इच्छाद्वेषाभ्यां यमिच्छति यञ्च द्वेष्टि तं स्मरति, भयात् यतो बिभेति, अर्थित्वात् येनार्थी भोजनेनाच्छादनेन वा, क्रियाया रथेन रथकारं स्मरति, रागात् यस्यां स्त्रियां रक्तो भवति तामभीक्ष्णं स्मरति, धर्मात् जात्यन्तरस्मरणमिह चाधीतश्रुतावधारणमिति, अधर्म्मात् प्रागनुभूतदुःखसाधनं स्मरति, न चैतेषु निमित्तेषु युगपत्संवेदनानि भवन्तीति युगपदस्मरणमिति, निदर्शनञ्चेदं स्मृतिहेतूनां न परिसङ्ख्यानमिति, अनित्यायाञ्च बुद्धावुत्पन्नापवर्गित्वात् कालान्तरावस्थानाच्चानित्यानां संशयः। किमुत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहोस्वित् कालान्तरावस्थायिनी कुम्भवदिति, उत्पन्नापवर्गिणीति पक्षः परिगृह्यते कस्मात्॥

कर्म्मानवस्थायिग्रहणात्॥ ४५॥

कर्म्मणोऽनवस्थायिनो ग्रहणादिति क्षिप्तस्येषोरापतनात् क्रियासन्तानो गृह्यते प्रत्यर्थनियमाच्च बुद्धीनां क्रियासन्तानवद्बुद्धिसन्तानोपपत्तिरिति अवस्थितग्रहणे च व्यवधीयमानस्य प्रत्यक्षनिवृत्तेः अवस्थिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च कुम्भे गृह्यमाणेन सन्तानेनैव बुद्धिर्वर्त्तते प्राग्व्यवधानात् तेन व्यवहिते प्रत्यक्षं ज्ञानं निवर्त्तते कालान्तरावस्थाने तु बुद्धेर्दृश्यव्यवधानेऽपि प्रत्यक्षमवतिष्ठेतेति, स्मृतिश्चालिङ्गं बुद्ध्यवस्थाने संस्कारस्य बुद्धिजस्य स्मृतिहेतुत्वात्, यश्च मन्येतावतिष्ठते बुद्धिः दृष्टाहि बुद्धिविषये स्मृतिः सा च बुद्धावनित्यायां कारणाभावान्नस्यादिति, तदिदमलिङ्गं कस्मात् बुद्धिजो हि संस्कारो गुणान्तरं स्मृतिहेतुर्न बुद्धिरिति हेत्वभावादयुक्तमिति चेत्॥

बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभावः॥ ४६॥

यावदवतिष्ठते बुद्धिस्तावदसौ बोद्धव्योऽर्थः प्रत्यक्षः, प्रत्यक्षे च स्मृतिरनुपपन्नेति॥

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्॥ ४७॥

यद्युत्पन्नाऽपवर्गिणी बुद्धिः प्राप्तमव्यक्तं बोद्धव्यस्य ग्रहणम्, यथा विद्युत्सम्पाते वैद्युतस्य प्रकाशस्यानवस्थानादव्यक्तं रूपग्रहणमिति व्यक्तन्तु द्रव्याणां ग्रहणं तस्मादयुक्तमेतदिति॥

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा॥ ४८॥

उत्पन्नापवर्गिणी बुद्धिरिति प्रतिषेद्धव्यन्तदेवाभ्यनुज्ञायते विद्युत्सम्पाते रूपाव्यक्तग्रहणवदिति यत्राव्यक्तं ग्रहणं तत्रोत्पन्नापवर्गिणी बुद्धिरिति ग्रहणहेतुविकल्पाद्ग्रहणविकल्पो न बुद्धिविकल्पात्, यदिदं क्वचिदव्यक्तं ग्रहणमयं विकल्पो ग्रहणहेतुविकल्पात्, यत्रानवस्थितो ग्रहणहेतुस्तत्राव्यक्तं ग्रहणम् यत्रावस्थितस्तत्र व्यक्तं न तु बुद्धेरवस्थानानवस्थानाभ्यामिति, कस्मात् अर्थग्रहणं हि बुद्धिः यत्तदर्थग्रहणमव्यक्तं व्यक्तं वा बुद्धिः सेति विशेषाग्रहणे च सामान्यग्रहणमात्रमव्यक्तग्रहणम् तत्र विषयान्तरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्ध्यन्तरानुत्पत्तिर्निमित्ताभावात्, यत्र समानधर्म्मयुक्तश्च धर्मी गृह्यते विशेषधर्म्मयुक्तश्च तद्व्यक्तं ग्रहणम्, यत्र तु विशेषेऽगृह्यमाणे सामान्यग्रहणमात्रं तदव्यक्तं ग्रहणम्, समानधर्मायोगाच्च विशिष्टधर्म्मयोगो विषयान्तरम् तत्र यद्ग्रहणं न भवति तद्ग्रहणनिमित्ताभावात् न बुद्धेरनवस्थानादिति यथाविषयञ्च ग्रहणं व्यक्तमेव प्रत्यर्थनियतत्वाच्च बुद्धीनाम् सामान्यविषयञ्च ग्रहणं स्वविषयं प्रत्यव्यक्तं विशेषविषयञ्च ग्रहणं स्वविषयं प्रत्यव्यक्तं विशेषविषयञ्च ग्रहणं स्वविषयं प्रति व्यक्तम्, प्रत्यर्थनियताहि बुद्धयः, तदिदमव्यक्तग्रहणं देशितं क्व विषये बुद्ध्यनवस्थानकारितं स्यादिति धर्मिणस्तु धर्मभेदे बुद्धिनानात्वस्य भावाभावाभ्यां तदुपपत्तिः धर्मिणः खल्वर्थस्य समानाश्च धर्म्मा विशिष्टाश्च तेषु प्रत्यर्थनियता नानाबुद्धयस्ता उभय्यो यदा धर्म्मिणि वर्त्तन्ते तदा व्यक्तं ग्रहणम् धर्मिणमभिप्रेत्य यदातु सामान्यग्रहणमात्रं तदाऽव्यक्तं ग्रहणमिति, एवं धर्मिणमभिप्रेत्य व्यक्ताव्यक्तयोर्ग्रहणयोरुपपत्तिरिति, नवेदमव्यक्तं ग्रहणं बुद्धेर्बौद्धव्यस्य वाऽनवस्थायित्वादुपपद्यत इति इदं हि न ॥

प्रदीपार्च्चिः सन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम्॥४९॥

अनवस्थायित्वेऽपि बुद्धेस्तेषां द्रव्याणां प्रतिपत्तव्यम्, कथम् प्रदीपार्चिः सन्तत्यभिव्यक्तग्रहणवत् प्रदीपार्चिषां सन्तत्या वर्त्तमानानां ग्रहणानवस्थानं ग्राह्यानवस्थानञ्च प्रत्यर्थनियतत्वात् बुद्धीनां यावन्ति प्रदीपार्चींषि तावन्त्यो बुद्धय इति दृश्यते चात्र व्यक्तं प्रदीपार्चिषां ग्रहणमिति, चेतना शरीरगुणः सति शरीरे भावादसति चाभावादिति ॥

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ५० ॥

सांशयिकः सति भावः स्वगुणोऽप्सु द्रवत्वमुपलभ्यते परगुणश्चोष्णता, तेनायं संशयः किं शरीरगुणश्चेतना शरीरे गृह्यते अथ द्रव्यान्तरगुण इति न शरीरगुणश्चेतना कस्मात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ५१ ॥

न रूपादिहीनं शरीरं गृह्यते चेतनाहीनन्तु गृह्यते । यथोष्णताहीना आपः, तस्मान्न शरीरगुणश्चेतनेति, संस्कारवदिति चेन्न कारणानुच्छेदात् यथाविधे द्रव्ये संस्कारस्तथाविधे एवोपरमो न तत्र कारणोच्छेदादत्यन्तं संस्कारानुपपत्तिर्भवति यथाविधे शरीरे चेतना गृह्यते तथाविध एवात्यन्तोपरमश्चेतनाया गृह्यते, तस्मात् संस्कारवदित्यसमः समाधिः, अथापि शरीरस्थश्चेतनोत्पत्तिकारणं स्यात् द्रव्यान्तरस्थं वोभयस्थं वा, तत्र नियमहेत्वभावात् शरीरस्थेन कदाचिच्चेतनोत्पद्यते कदाचिन्नेति नियमहेतुर्नास्तीति द्रव्यान्तरस्थेन शरीर एव चेतनोत्पद्यते न लोष्टादिषु इत्यत्र न नियमहेतुरस्तीति उभयस्य निमित्तत्वे शरीरसमानजातीये द्रव्ये चेतना नोत्पद्यते शरीर एव चोत्पद्यते इति नियमहेतुर्नास्तीति, यच्च मन्येत सति श्यामादिगुणे द्रव्ये श्यामाद्युपरमो दृष्टः एवं चेतनोपरमः स्यादिति ॥

न पाकजगुणान्तरोत्पत्तेः ॥ ५२ ॥

नात्यन्तं रूपोपरमोद्रव्यस्य श्यामे रूपे निवृत्ते पाकजं गुणान्तरं रक्तं रूपमुत्पद्यते शरीरेतु चेतनामात्रोपरमोऽत्यन्तमिति, अथापि ॥

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५३ ॥

यावत्सु द्रव्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धिस्तावत्सु पाकजोत्पत्तिर्दृश्यते पूर्वगुणैः सह पाकजानामवस्थानस्याग्रहणात्, न च शरीरे चेतनाप्रतिद्वन्द्विसिद्धौ सहानवस्थायिगुणान्तरं गृह्यते येनानुमीयेत तेन चेतनाया विरोधः, तस्मादप्रतिषिद्धा चेतना यावच्छरीरं वर्त्तेत न तु वर्त्तते तस्मान्न-शरीरगुणश्चेतना इति, इतश्च न शरीरगुणश्चेतना ॥

शरीरव्यापित्वात् ॥ ५४ ॥

शरीरं शरीरावयवाश्च सर्वे चेतनोत्पत्त्या व्याप्ता इति न क्वचिदनुत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्तिश्चेतनायाः, शरीरवच्छरीरावयवाश्चेतना इति प्राप्तं चेतनबहुत्वम्, तत्र यथा प्रतिशरीरं चेतनबहुत्वे सुखदुःखज्ञानानां व्यवस्थालिङ्गमेव-मेकशरीरेऽपि स्यात् न तु भवति तस्मान्न शरीरगुणश्चेतनेति, यदुक्तं न क्वचिच्छरीरावयवे चेतनाया अनुत्पत्तिरिति सा न ॥

केशनखादिष्वनुपलब्धेः ॥ ५५ ॥

केशेषु नखादिषु चानुत्पत्तिश्चेतनाया इति । अनुपपन्नं शरीरव्यापित्वमिति ॥

त्वक्पर्य्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥ ५६

इन्द्रियाश्रयत्वं शरीरलक्षणं त्वक्पर्य्यन्तं जीवमनःसुखदुःखसंवित्त्याय-तनभूतं शरीरम्, तस्मान्न केशादिषु चेतनोत्पद्यते । अर्थकारितस्तु शरी-रोपनिबन्धः केशादीनामिति, इतश्च न शरीरगुणश्चेतना ॥

शरीरगुणवैधर्म्यात् ॥ ५७ ॥

द्विविधश्च शरीरगुणः अप्रत्यक्षश्च गुरुत्वम् इन्द्रियग्राह्यश्च रूपादिः, विधान्तरन्तु चेतना प्रत्यक्षा संवेद्यत्वात् नेन्द्रियग्राह्या मनोविषयत्वात्, तस्मात् द्रव्यान्तरगुण इति ॥

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५८ ॥

यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वं जहति एवं रूपादि-वैधर्म्याच्चेतना शरीरगुणत्वं न हास्यतीति ॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५९ ॥

अप्रत्यक्षत्वाच्चेति । यथेतरेतरविधर्माणो रूपादयो न द्वैविध्यमति-वर्त्तेत यदि शरीरगुणःस्यादिति, अतिवर्त्तते तु, तस्मान्न शरीरगुण-इति । भूतेन्द्रियमनसां ज्ञानप्रतिषेधात् सिद्धे सत्यारम्भोविशेषज्ञाप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नार्थम् बहुधा परीक्ष्यमाणं तत्त्वं सुनिश्चिततरं भवतीति परीक्षिता बुद्धिः, मनस इदानीं परीक्षाक्रमः तत् किं प्रतिशरीरमेकमनेकमिति विचारे॥

ज्ञानायौगपद्यादेकं मनः॥ ६० ॥

अस्ति खलु वै ज्ञानायौगपद्यमेकैकस्येन्द्रियस्य यथाविषयम् करणस्यैकप्रत्ययनिर्वृत्तौ सामर्थ्यान्न तदेकत्वे मनसोलिङ्गम्, यत्तु खल्विदमिन्द्रियान्तराणां विषयान्तरेषु ज्ञानायौगपद्यमिति तल्लिङ्गं कस्मात् सम्भवति खलु वै बहुषु मनःसु इन्द्रियमनःसंयोगयौगपद्यमिति ज्ञानयौगपद्यं स्यात् न तु भवति तस्माद्विषये प्रत्ययपर्य्यायादेकं मनः॥

न युगपदनेकक्रियोपलब्धेः॥ ६१ ॥

अयं खल्वध्यापकोऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति शृणोत्यरण्यजान् शब्दान् बिभ्यत् व्याललिङ्गानि बुभुत्सते स्मरति च गन्तव्यं स्थानीयमिति क्रमस्याग्रहणाद्युगपदेताः क्रियाः इति प्राप्तं मनसो बहुत्वमिति॥

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चरात्॥६२

आशुसञ्चारादलातस्य संभ्रमतो विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणादविच्छेदबुद्धा चक्रवद्बुद्धिर्भवतीति तथा बुद्धीनां क्रियाणाञ्चाशुवृत्तित्वाद्विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणाद्युगपत्क्रियाभवन्त्यभिमानो भवति। किं पुन क्रमस्याग्रहणाद्युगपत् क्रियाभिमानः अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिरिति नात्रविशेषप्रतिपत्तेः कारणमुच्यते इति उक्तमिन्द्रियान्तराणां विषयान्तरेषु पर्य्यायेण बुद्धयो भवन्तीति तच्चाप्रत्याख्येयमात्मप्रत्यक्षत्वात्। अथापि दृष्टश्रुतानर्थांश्चिन्तयतः क्रमेण बुद्धयो वर्त्तन्ते न युगपदनेनानुमातव्यमिति वर्णपदवाक्यबुद्धीनां तदर्थबुद्धीनाञ्चाशुवृत्तित्वात् क्रमस्याग्रहणम् कथम् वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावत् श्रवणं भवति श्रुतं वर्णमेकमनेकं वा पदभावेन स प्रतिस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वर्त्ते प्रतिसन्धाय पदं व्यवस्यति पदव्यवसायेन स्मृत्या पदार्थम्प्रतिपद्यते पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति सम्बद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते न चासां क्रमेण वर्त्तमानानां बुद्धीनामाशुवृत्तित्वात् क्रमो गृह्यते तदेतदनुमानमतन्त्रं बुद्धिक्रियायौगपद्याभिमानस्येति न चास्ति मुक्तसंशया युगपदुत्पत्तिर्बुद्धीनां यया मनसां बहुत्वमेकशरीरेऽनुमीयत इति ॥

यथोक्तहेतुत्वाच्चाणु ॥ ६३ ॥

अणु मन एकञ्चेति धर्म्मसमुच्चयो ज्ञानायौगपद्यात् महत्त्वे मनसः सर्व्वेन्द्रियसंयोगाद्युगपद्विषयग्रहणं स्यादिति मनसः खलु भोः सेन्द्रियस्य शरीरे वृत्तिलाभो नान्यत्र शरीरात् ज्ञातुश्च पुरुषस्य शरीरायतना बुद्ध्यादयो विषयोपभोगो जिहासितहानमीप्सितावाप्तिश्च सर्व्वे च शरीराश्रया व्यवहाराः, तत्र खलु विप्रतिपत्तेः संशयः किमयम्पुरुषकर्मनिमित्तः शरीरसर्ग आहोस्वित् भूतमात्रादकर्म्मनिमित्त इति श्रूयते खल्वत्र विप्रतिपत्तिरिति तत्रेदन्तत्त्वम् ॥

पूर्व्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६४ ॥

पूर्व्वशरीरे या प्रवृत्तिर्व्वाग्बुद्धिशरीरारम्भलक्षणा तत् पूर्व्वकृतं कर्म्मोक्तं तस्य फलं तज्जनितौ धर्माधर्मौ तत्फलस्यानुबन्धः आत्मसमवेतस्यावस्थानं तेन प्रयुक्तेभ्यो भूतेभ्यस्तस्योत्पत्तिः शरीरस्य न स्वतन्त्रेभ्य इति यदधिष्ठानोऽयमात्मा अयमहमिति मन्यमानो यत्राभियुक्तो यत्रोपभोगतृष्णया विषयानुपलभमानो धर्म्माधर्म्मौ संस्करोति तदस्य शरीरम्, तेन संस्कारेण धर्माधर्म्मलक्षणेन भूतसहितेन पतितेऽस्मिन् शरीरे उत्तरं निष्पाद्यते निष्पन्नस्य चास्य पूर्वशरीरवत् पुरुषार्थक्रिया पुरुषस्य च पूर्वशरीरवत् प्रवृत्तिरिति कर्मापेक्षेभ्यो भूतेभ्यः शरीरसर्गे सत्येतदुपपद्यत इति। दृष्टा च पुरुषगुणेन प्रयत्नेन प्रयुक्तेभ्यो भूतेभ्यः पुरुषार्थक्रियासमर्थानां द्रव्याणां रथप्रभृतीनामुत्पत्तिः तथानुमातव्यं शरीरमपि पुरुषार्थक्रियासमर्थमुत्पद्यमानं पुरुषस्य गुणान्तरापेक्षेभ्यो भूतेभ्य उत्पद्यते इति। अत्र नास्तिक आह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतेभ्योमूर्त्त्युपादानवत् तदुपादानम् ॥ ६५ ॥

यथा कर्म्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्त्तयः सिकताशर्करापाषाणगैरिकाञ्जनप्रभृतयः पुरुषार्थकारित्वादुपादीयन्ते तथा कर्म्मनिरपेक्षेभ्यो भूतेभ्यः शरीरमुत्पन्नं पुरुषार्थकारित्वादुपादीयत इति ॥

न साध्यसमत्वात् ॥ ६६ ॥

यथा शरीरोत्पत्तिरकर्म्मनिमित्ता साध्या तथा सिकताशर्करापाषाणगैरिकाञ्जनप्रभृतीनामप्यकर्मनिमित्तः सर्गः साध्यः साध्यसमत्वादसाधनमिति । भूतेभ्योमूर्त्त्युपादानवत् तदिति चानेन साम्यम् ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६७ ॥

विषमश्चायमुपन्यासः कस्मात् निर्वीजाः इमाः मूर्त्तयः उत्पद्यन्ते वीजपूर्व्विका तु शरीरोत्पत्तिः, मातापितृशब्देन लोहितरेतसी वीजभूते गृह्येते, तत्र सत्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाशये शरीरोत्पत्तिं भूतेभ्यः प्रयोजयन्तीत्युपपन्नं वीजानुविधानमिति ॥

तथाहारस्य ॥ ६८ ॥

उत्पत्तिनिमित्तत्वादिति प्रकृतम्, भुक्तं पीतमाहारस्तस्य पक्तिनिर्वृत्तं रसद्रव्यं मातृशरीरे चोपचीयते वीजे गर्भाशयस्थे वीजसमानपाकं मात्रया चोपचयो वीजे यावद्व्यूहसमर्थः सञ्चय इति सञ्चितं चार्व्वुदमांसपेशीकललकण्डराशिरःपाणिपादादिनाच व्यूहेनेन्द्रियाधिष्ठानभेदेन व्यूह्यते व्यूहेच गर्भनाड्यावतारितं रसद्रव्यमुपचीयते यावत्प्रसवसमर्थमिति, न चायमन्नपानस्य स्थाल्यादिगतस्य कल्पत इति एतस्मात् कारणात् कर्मनिमित्तत्वं शरीरस्य विज्ञायत इति ॥

प्राप्तौ चानियमात् ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न सर्वो दम्पत्योः संयोगो गर्भाधानहेतुर्दृश्यते तत्रासति कर्मणि न भवति सति च भवतीत्यनुपपन्नो नियमाभाव इति, कर्मनिरपेक्षेषु भूतेषु शरीरोत्पत्तिहेतुष अनियमःस्यात् नह्यत्र कारणाभाव इति, अथापि।

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म्म ॥ ७० ॥

यथा खल्विदं शरीरं धातुप्राणसंवाहिनीनां नाडीनां शुक्रान्तानां धातूनाञ्च स्नाय्वस्थिशिरापेशीकललकण्डराणाञ्च शिरोबाहूदराणां शक्थ्नाञ्च कोष्ठगानां वातपित्तकफानाञ्च मुखकण्ठहृदयामाशयपक्वाशयाधः-स्रोतसाञ्च परमदुःखसम्पादनीयेन सन्निवेशेन व्यूहनमशक्यं पृथिव्यादिभिः कर्मनिरपेक्षैरुत्पादयितुमिति कर्मनिमित्ता शरीरोत्पत्तिरिति विज्ञायते, एवञ्च प्रत्यात्मनियतस्य निमित्तस्याभावान्निरतिशयैरात्मभिः संबन्धात् सर्वात्मनाञ्च समानैः पृथिव्यादिभिरुत्पादितं शरीरं पृथिव्यादिगतस्य च नियमहेतोरभावात् सर्वात्मनां सुखदुःखसंवित्त्यायतनं समानं प्राप्तम्, यत्तु प्रत्यात्मं व्यवतिष्ठते तत्र शरीरोत्पत्तिनिमित्तं कर्म व्यवस्थाहेतुरिति विज्ञायते परिपच्यमानो हि प्रत्यात्मनियतः कर्माशयो यस्मिन्नात्मनि वर्त्तते तस्यैवोपभोगायतनं शरीरमुत्पाद्य व्यवस्थापयति। तदेवं शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्म इति विज्ञायते। प्रत्यात्मव्यवस्थानन्तु शरीरस्यात्मना संयोगं प्रचक्ष्महे इति॥

एतेनानियमः प्रत्युक्तः ॥ ७१ ॥

योऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते अयं शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्मेत्यनेन प्रत्युक्तः, कस्तावदयं नियमः यथैकस्यात्मनः शरीरं तथा सर्वेषामिति नियमः, अन्यस्याऽन्यथेत्यनियमो भेदो व्यावृत्तिर्विशेष इति। दृष्टा च जन्मव्यावृत्तिरुच्चाभिजनो निकृष्टाभिजनः इति, प्रशस्तं निन्दितमिति, व्याधिबहुलमरोगमिति, समग्रं विकलमिति, पीडाबहुलं सुखबहुलमिति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषातिशयलक्षणोपपन्नं विपरीतमिति, प्रशस्तलक्षणं निन्दितलक्षणमिति, पट्विन्द्रियं म्टद्विन्द्रियमिति, सूक्ष्मश्च भेदोऽपरिमेयः । सोऽयं जन्मभेदः प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियते निरतिशयित्वादात्मनां समानत्वाच्च पृथिव्यादीनां पृथिव्यादिगतस्य नियमहेतोरभावात् सर्वं सर्वात्मनां प्रसज्येत नत्विदमित्यम्भूतं जन्म तस्मात् कर्म्मनिमित्ता शरीरोत्पत्तिरिति ॥

उपपन्नश्च तद्वियोगः कर्म्मक्षयोपपत्तेः ॥ ७२ ॥

कर्म्मनिमित्ते शरीरसर्गे तेन शरीरेणात्मनो वियोगः उपपन्नः, कस्मात् कर्मक्षयोपपत्तेः उपपद्यते खलु कर्मक्षयः सम्यग्दर्शनात् प्रक्षीणे मोहे वीतरागः पुनर्भवहेतुकर्म्मकायवाङ्मनोभिर्न करोति इत्युत्तरस्यानुपचयः पूर्वोपचितस्य विपाकप्रतिसंवेदनात् प्रक्षयः । एवं प्रसवहेतोरभावात् पतिते ऽस्मिन् शरीरे पुनः शरीरान्तरानुपपत्तेरप्रतिसन्धिः अकर्म्मनिमित्ते तु शरीरसर्गे भूतक्षयानुपपत्तेस्तद्वियोगानुपपत्तिरिति ॥

तदृष्टकारितमितिचेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥७३

अदर्शनं खलु अदृष्टमित्युच्यते अदृष्टकारिता भूतेभ्यः शरीरोत्पत्तिः, न जात्वनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यति, तच्चास्य दृश्यं द्विविधम् विषयश्च नानात्वञ्चाव्यक्तात्मनोस्तदर्थः शरीरसर्गः तस्मिन्नवसिते चरितार्थानि भूतानि न शरीरमुत्पादयन्तीत्युपपन्नः शरीरवियोग इति । एवं चेन्मन्यसे पुनस्तत्प्रसङ्गोऽपवर्गे पुनः शरीरोत्पत्तिः प्रसज्यते इति, या चानुत्पन्ने शरीरे दर्शनानुत्पत्तिरदर्शनाभिमता या चापवर्गे शरीरनिवृत्तौ दर्शनानुत्पत्तिरदर्शनभूता नैतयोरदर्शनयोः कंचिद्विशेष इत्यदर्शनस्यानिवृत्तेरपवर्गे पुनः शरीरोत्पत्तिप्रसङ्ग इति । चरितार्थाविशेष इति चेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न करणाकरणयोरारम्भदर्शनात् ॥ ७४ ॥

चरितार्थानि भूतानि दर्शनावसानान्न शरीरान्तरमारभन्त इत्ययं विशेष एवं चेदुच्यते करणाकरणयोरारम्भदर्शनात् चरितार्थानां भूतानां विषयोपलब्धिकरणात् पुनः पुनः शरीरारम्भो दृश्यते प्रकृतिपुरुषयो-र्नानात्वदर्शनस्याकरणान्निरर्थकः शरीरारम्भः पुनः पुनर्दृश्यते । तस्माद्-कर्म्मनिमित्ताभ्यां भूतसृष्टौ न दर्शनार्था शरीरोत्पत्तिर्युक्ता युक्तात कर्म्म-निमित्ते सर्गे दर्शनार्था शरीरोत्पत्तिः । कर्मविपाकसम्वेदनं दर्शन-मिति तददृष्टकारितमिति चेत् कस्यचिद्दर्शनमदृष्टं नाम परमाणूनां गुणविशेषः क्रियाहेतुस्तेन प्रेरिताः परमाणवः सम्मूर्च्छिताः शरीरमु-त्पादयन्तीति तन्मनः समाविशति स्वगुणेनादृष्टेन प्रेरिते समनस्के शरीरे द्रष्टुरुपलब्धिर्भवतीति एतस्मिन् वै दर्शने गुणानुच्छेदात् पुनस्तत्प्रसङ्गोऽप-वर्गे अपवर्गे शरीरोत्पत्तिः परमाणुगुणस्यादृष्टस्यानुच्छेद्यत्वादिति ॥

मनःकर्म्मनिमित्तत्वाच्च संयोगानुच्छेदः ॥ ७५ ॥

मनोगुणेनादृष्टेन समावेशिते मनसि संयोगव्युच्छेदो न स्यात् तत्र किङ्कृतं शरीरादपसर्पणं मनस इति । कर्माशयक्षये तु कर्माशयान्तराद्वि-पच्यमानादपसर्पणोपपत्तिरिति । अदृष्टादेवापसर्पणमितिचेत् योऽदृष्टः शरीरोपसर्पणहेतुः स एवापसर्पणहेतुरपीति नैकस्य जीवनप्रायणहेतु-त्वानुपपत्तेः, एवं च सति एकोऽदृष्टं जीवनप्रायणयोर्हेतुरितिप्राप्तम् नैतदुपपद्यते ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७६ ॥

विपाकसंवेदनात् कर्म्माशयक्षये शरीरपातः प्रायणम् कर्म्माशयान्त-राच्च पुनर्जन्म । भूतमात्रात्तु कर्मनिरपेक्षात् शरीरोत्पत्तौ कस्य क्षयात् शरीरपातः प्रायणमिति । प्रायणानुपपत्तेः खलु वै नित्यत्वप्रसङ्गं विद्मः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादृच्छिकेतु प्रायणे प्रायणभेदानुपपत्तिरिति, पुनस्तत्प्रसङ्गोऽपवर्गे इत्येतत् समाधित्सुराह ॥

अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७७ ॥

यथाऽणोः श्यामता नित्या अग्निसंयोगेन प्रतिबद्धा न पुनरुत्पद्यते एवमदृष्टकारितं शरीरमपवर्गे पुनर्नोत्पद्यते इति ॥

नाकृताभ्यागमप्रसङ्गात् ॥ ७८ ॥

नायमस्ति दृष्टान्तः कस्मात् अकृताभ्यागमप्रसङ्गात् अकृतं प्रमाणतोऽनुपपन्नं तस्याभ्यागमोऽभ्युपपत्तिर्व्यवसायः एतच्छ्रद्दधानेन प्रमाणतोऽनुपपन्नं मन्तव्यम् तस्मान्नायं दृष्टान्तो न प्रत्यक्षं न चानुमानं किञ्चिदुच्यत इति । तदिदं दृष्टान्तस्य साध्यसमत्वमभिधीयत इति । अथवा नाकृताभ्यागमप्रसङ्गात् अणुश्यामतादृष्टान्तेनाकर्म्मनिमित्तां शरीरोत्पत्तिं समादधानस्याकृताभ्यागमप्रसङ्गः अकृते सुखदुःखहेतौ कर्म्मणि पुरुषस्य सुखं दुःखमभ्यागच्छतीति प्रसज्येत, ओमितिब्रुवतः प्रत्यक्षानुमानागमविरोधः प्रत्यक्षविरोधस्तावत् भिन्नमिदं सुखदुःखं प्रत्यात्मवेदनीयत्वात् प्रत्यक्षं सर्वशरीराणां को भेदः तीव्रम्मन्दञ्चिरमाशु नानाप्रकारमेक प्रकारमिति एवमादिर्विशेषः, नचास्ति प्रत्यात्मनियतः सुखदुःखहेतुविशेषः नचासति हेतुविशेषे फलविशेषो दृश्यते कर्म्मनिमित्ते तु सुखदुःखयोगे कर्मणां तीव्रमन्दतोपपत्तेः कर्मसञ्चयानाञ्चोत्कर्षापकर्षभावान्नानाविधैकविधभावाच्च कर्मणां सुखदु.खभेदोपपत्तिः । सोऽयं हेतुभेदाभावात् दृष्टः सुखदुःखभेदो न स्यादिति प्रत्यक्षविरोधः । तथानुमानविरोधः दृष्टं हि पुरुषगुणव्यवस्थानात् सुखदुःखव्यवस्थानम्, यः खलु चेतनावान् साधननिर्वर्त्तनीयं सुखं बुद्ध्वा तदीप्सन् तदाप्तिसाधनावाप्तये प्रयतते स सुखेन युज्यते न विपरीतः यस्य साधननिर्वर्त्तनीयं दुःखं बुद्ध्वा तज्जिहासुः साधनपरिवर्ज्जनाय यतते स दुःखेन परित्यज्यते न विपरीतः अस्तिचेदं यत्नमन्तरेण चेतनानां सुखदुःखव्यवस्थानम् तेनापि चेतनगुणान्तरव्यवस्थानकृतेन भवितव्यमित्यनुमानम् । तदेतदकर्म्मनिमित्ते सुखदुःखयोगे विरुध्यत इति, तच्च गुणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरमसंवेद्यत्वाद्दृष्टं विपाककालानियमाच्चाव्यवस्थितम् बुद्ध्यादयस्तु संवेद्याश्चापवर्गिणश्चेति। अथागमविरोधः। बहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाश्रयमुपदेशफलञ्च शरीरिणां वर्णाश्रमविभागेनानुष्ठानलक्षणा प्रवृत्तिः परिवर्ज्जनलक्षणा निवृत्तिः, तच्चोभयमेतस्यां दृष्टौ नास्ति कर्म सुचरितं दुश्चरितं वा, कर्मनिमित्तः पुरुषाणां सुखदुःखयोगः इति विरुध्यते, सेयं पापिष्ठानां मिथ्यादृष्टिरकर्मनिमित्ता शरीरसृष्टिरकर्मनिमित्तः सुखदुःखयोगः इति ॥

इति वात्स्यायनीये न्यायभाष्ये तृतीयाऽध्यायस्य द्वितीयमाह्निकम् ॥२॥

समाप्तश्चायं तृतीयोऽध्यायः ॥ ३ ॥

मनसोऽनन्तरं प्रवृत्तिः परीक्षितव्या तत्र खलु यावद्धर्माधर्माश्रयशरीरादि परीक्षितम् सर्व्वा सा प्रवृत्तेः परीक्षा इत्याह ॥

प्रवृत्तिर्यथोक्ता ॥ १ ॥

तथा परीक्षितेति प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह ॥

तथा दोषाः ॥ २ ॥

परीक्षिता इति बुद्धिसमानाश्रयत्वादात्मगुणाः, प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः, संसारस्यानादित्वादनादिना प्रबन्धेन प्रवर्त्तन्ते, मिथ्याज्ञाननिवृत्तिस्तत्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति प्रादुर्भावनिरोधधर्मका इत्येवमाद्युक्तं दोषाणामिति प्रवर्त्तनालक्षणा दोषा इत्युक्तं तथा चेमे मानेर्ष्यासूयाविचिकित्सामत्सरादयः ते कस्माच्चोपसङ्ख्यायन्ते इत्यत आह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥

तेषां दोषाणां त्रयोराशयस्त्रयः पक्षाः, रागपक्षाः कामो मत्सरः स्पृहा तृष्णा लोभ इति, द्वेषपक्षाः क्रोधः ईर्ष्याऽसूया द्रोहोऽमर्ष इति, मोहपक्षाः मिथ्याज्ञानं विचिकित्सा मानः प्रमादः इति त्रैराश्यान्नोपसङ्ख्यायन्ते इति, लक्षणस्य तर्ह्यभेदात् त्रित्वमनुपपन्नम्, नानुपपन्नं रागद्वेषमोहार्थान्तरभावात् आसक्तिलक्षणो रागः, अमर्षलक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इति, एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्, विजानात्ययंशरीरी रागमुत्पन्नम्, अस्तिमेऽध्यात्मं रागधर्म इति, विरागञ्च विजानाति नास्तिमेऽध्यात्मं रागधर्म इति। एवमितरयोरपीति। मानेर्ष्याऽसूयाप्रभृतयस्तु त्रैराश्यमनुपतिता इति नोपसङ्ख्यायन्ते ॥

नैकप्रत्यनीकभावात् ॥ ४ ॥

नार्थान्तरं रागादयः कस्मात् एकप्रत्यनीकभावात् तत्त्वज्ञानं सम्यङ्मतिरार्य्यप्रज्ञा सम्बोध इत्येकमिदं प्रत्यनीकं त्रयाणामिति ॥

व्यभिचारादहेतुः ॥ ५ ॥

एकप्रत्यनीकाः पृथिव्यां श्यामादयोऽग्निसंयोगेनैकेन, एकयोनयश्च पाकजा इति, सति चार्थान्तरभावे ॥

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥

मोहः पापः पापतरो वा द्वावभिप्रेत्युक्तम्, कस्मात् नामूढस्येतरोत्पत्तेः अमूढस्य रागद्वेषौ नोत्पद्येते मूढस्य तु यथासङ्कल्पमुत्पत्तिः, विषयेषु रञ्जनीयाः सङ्कल्पाः रागहेतवः, कोपनीयाः सङ्कल्पा द्वेषहेतवः, उभये च सङ्कल्पा न मिथ्याप्रतिपत्तिलक्षणत्वान्मोहादन्ये ताविमौ मोहयोनी रागद्वेषाविति तत्त्वज्ञानाच्च मोहनिवृत्तौ रागद्वेषानुत्पत्तिरित्येकप्रत्यनीकभावोपपत्तिः। एवञ्च कृत्वा तत्त्वज्ञानात् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरानावादपवर्ग इति व्याख्यातमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥७॥

अन्यद्धि निमित्तमन्यच्च नैमित्तिकमिति दोषनिमित्तत्वाददोषो-मोह इति ॥

न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥

प्रवर्त्तनालक्षणा दोषा इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति ॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥

द्रव्याणां गुणानां वाऽनेकविधविकल्पो निमित्तनैमित्तिकभावे तुल्यजातीयानां दृष्ट इति। दोषान्तरं प्रेत्यभावस्तस्यासिद्धिः आत्मनो नित्यत्वात्, न खलु नित्यं किञ्चिज्जायते म्रियते इति जन्ममरणयोर्नि-त्यत्व आत्मनोऽनुपपत्तिः उभयञ्च प्रेत्यभाव इति तत्रायं सिद्धानुवादः ॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

नित्योऽयमात्मा प्रैति पूर्वशरीरं जहाति म्रियत इति। प्रेत्य च पूर्वशरीरं हित्वा भवति जायते शरीरान्तरमुपादत्ते इति। तच्चैत-दुभयं पुनरुत्पत्तिः प्रेत्यभाव इत्यत्रोक्तं पूर्वशरीरं हित्वा शरीरान्तरो-पादानं प्रेत्यभाव इति तच्चैतन्नित्यत्वे सम्भवतीति यस्य तु सत्वोत्पादः सत्वनिरोधः प्रेत्यभावस्तस्य कृतहानमकृताभ्यागमश्च दोषः। उच्छेदहेतु-वादे ऋष्युपदेशाश्चानर्थका इति, कथमुत्पत्तिरिति चेत् ॥

व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

केन प्रकारेण किंधर्मकात् कारणाद्व्यक्तं शरीराद्युत्पद्यते इति, व्यक्ताद्भूतसमाख्यातात् पृथिव्यादितः परमसूक्ष्मान्नित्याद्व्यक्तं शरीरे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते। व्यक्तञ्च खल्विन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तम्, किं सामान्यं रूपादिगुणयोगः, रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीराद्युत्पद्यते प्रत्यक्षप्रमाणयात्। दृष्टोहि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः, तेन चादृष्टस्यानुमानमिति, रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनामतीन्द्रियाणां कारणभावोऽनुमीयते इति ॥

न घटाद्घटानिष्पत्तेः ॥ १२ ॥

इदमपि प्रत्यक्षम् न खलु व्यक्ताद्घटाद्व्यक्तोघट उत्पद्यमानो दृश्यत इति व्यक्ताद्व्यक्तस्यानुत्पत्तिदर्शनान्न व्यक्तं कारणमिति ॥

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

न ब्रूमः सर्वं सर्वस्य कारणमिति किन्तु यदुत्पद्यते व्यक्तं द्रव्यं तत् तथाभूतादेवोत्पद्यते इति। व्यक्तञ्च तन्मृद्द्रव्यं कपालसंज्ञकं यतो घट उत्पद्यते नचैतन्निह्नुवानः क्वचिदभ्यनुज्ञां लब्धुमर्हतीति। तदेतत् तत्त्वम्, अतःपरं प्रावादुकानां दृष्टयः प्रदर्श्यन्ते ॥

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥१४॥

असतः सदुत्पद्यते इत्ययं पक्षः कस्मात् उपमृद्य वीजमङ्कुर उत्पद्यते नानुपमृद्य नचेद्वीजोपमर्दोऽङ्कुरोत्पत्तिः स्यादिति, अत्राभिधीयते ॥

व्याघातादप्रयोगः ॥ १५ ॥

उपमृद्य प्रादुर्भावादित्ययुक्तः प्रयोगो व्याघातात् यदुपमृद्नाति न तदुपमृद्य प्रादुर्भवितुमर्हति विद्यमानत्वात् यच्च प्रादुर्भवति न तेनाप्रादुर्भूतेनाविद्यमानेनोपमर्द इति।

नातीतानागतयोः कारकशब्दप्रयोगात् ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतीते चानागते चाविद्यमाने कारकशब्दाः प्रयुज्यन्ते पुत्त्रो जनिष्यते जनिष्यमाणं पुत्त्रमभिनन्दति पुत्त्रस्य जनिष्यमाणस्य नाम करोति। अभूत् कुम्भो भिन्नं कुम्भमनुशोचति। भिन्नस्य कुम्भस्य कपालानि, अजाताः पुत्त्राः पितरन्तापयन्तीति बहुलं भाक्ताः प्रयोगाः दृश्यन्ते, का पुनरियं भक्तिः आनन्तर्यंभक्तिः आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भावार्थः प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीति भाक्तं कर्तृत्वमिति ॥

न विनष्टेभ्योऽनिष्पत्तेः ॥ २७ ॥

न विनष्टाद्बीजादङ्कुर उत्पद्यत इति तस्मान्नाभावाद्भावोत्पत्तिरिति ॥

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

उपमर्द्दप्रादुर्भावयोः पौर्व्वापर्य्यनियमः क्रमः स खल्वभावाद्भावोत्पत्तेर्हेतुर्निर्द्दिश्यते स च न प्रतिषिध्यत इति। व्याहतव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तराद्द्रव्यनिष्पत्तिर्नाभावात्। बीजावयवाः कुतश्चिन्निमित्तात् प्रादुर्भूतक्रियाः पूर्व्वव्यूहं जहति व्यूहान्तरञ्चापद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते। दृश्यन्ते खल्ववयवास्तत्संयोगाश्चाङ्कुरोत्पत्तिहेतवः। नचानिवृत्ते पूर्व्वव्यूहे बीजावयवानां शक्यं व्यूहान्तरेण भवितुमित्युपमर्द्द प्रादुर्भावयोः पौर्व्वापर्य्यनियमः क्रमः, तस्मान्नाभावाद्भावोत्पत्तिरिति। न चान्यद्बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणमित्युपपद्यते बीजोपादाननियम इति। अथापर आह॥

ईश्वरः कारणं पुरुषकर्म्माफल्यदर्शनात् ॥ १९ ॥

पुरुषोऽयं समीहमानो नावश्यं समीहाफलमाप्नोति तेनानुमीयते पराधीनं पुरुषकर्मफलाराधनमिति यदधीनं स ईश्वरः तस्मादीश्वरः कारणमिति ॥

न पुरुषकर्म्माभावे फलानिष्पत्तेः ॥ २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वराधीना चेत् फलनिष्पत्तिः स्यादपि तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येतेति ॥

तत्कारितत्वादहेतुः ॥ २१ ॥

पुरुषकारमीश्वरोऽनुगृह्णाति फलाय पुरुषस्य यतमानस्येश्वरः फलं सम्पादयतीति । यदा न सम्पादयति तदा पुरुषकर्माफलम्भवतीति तस्मादीश्वरकारितत्वादहेतुः पुरुषकर्माभावे फलानिष्पत्तेरिति, गुणविशिष्टमात्मान्तरमीश्वरः तस्यात्मकल्पात् कल्पान्तरानुपपत्तिः । अधर्म्म मिथ्याज्ञानप्रमादहान्या धर्म्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः तस्य च धर्म्मसमाधिफलमणिमाद्यष्टविधमैश्वर्य्यम् सङ्कल्पानुविधायी चास्य धर्मः प्रत्यात्मवृत्तीन् धर्म्माधर्म्मसञ्चयान् पृथिव्यादीनि च भूतानि प्रवर्त्तयति, एवञ्च स्वकृताभ्यागमस्यालोपेन निर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम्, आप्तकल्पश्चायं यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम्, न चात्मकल्पादन्यः कल्पः सम्भवति न तावदस्य बुद्धिं विना कश्चिद्धर्म्मो लिङ्गभूतः शक्य उपपादयितुम्, आगमाच्च द्रष्टा बोद्धा सर्व्वज्ञातेश्वर इति बुद्ध्यादिभिश्चात्मलिङ्गैर्निरुपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः शक्त उपपादयितुम् ॥ स्वकृताभ्यागमलोपेन च प्रवर्त्तमानस्यास्य यदुक्तं प्रतिषेधजातमकर्मनिमित्ते शरीरसर्गे तत् सर्व्वम्प्रसज्यते इति । अपरं इदानीमाह ॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥

अनिमित्ता शरीराद्युत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् कण्टकस्य तैक्ष्ण्यं पर्व्वतधातूनां चित्रता ग्राव्णः श्लक्ष्णता निर्निमित्तञ्चोपादानं दृष्टं तथा शरीरसर्गोऽपीति ॥

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिमित्ततो भावोत्पत्तिरित्युच्यते यतश्चोत्पद्यते तन्निमित्तमनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिरिति ॥

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥२४

अन्यद्धि निमित्तमन्यच्च निमित्तप्रत्याख्यानम्, न च प्रत्याख्यानमेव प्रत्याख्येयम्, यथानुदकः कमण्डलुरिति नोदकप्रतिषेध उदकम्भवतीति, स खल्वयं वादोऽकर्मनिमित्तः शरीरादिसर्ग इत्येतस्मान्न भिद्यते। अभेदात्तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति, अन्येऽनुमन्यन्ते ॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

किमनित्यन्नाम यस्य कदाचिद्भावस्तदनित्यम् उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकमविनष्टं नास्ति किं पुनः सर्व्वम्, भौतिकञ्च शरीरादि अभौतिकञ्च बुद्ध्यादि तदुभयमुत्पत्तिविनाशधर्मकं विज्ञायते तस्मात्तत्सर्व्वमनित्यमिति ॥

नानित्यतानित्यत्वात् ॥ २६ ॥

यदि तावत्सर्वस्यानित्यता नित्या, तन्नित्यत्वान्न सर्वमनित्यम्, अथानित्या तस्यामविद्यमानायां सर्व्वं नित्यमिति ॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥२७॥

तस्या अनित्यताया अप्यनित्यत्वम् कथम्, यथाग्निर्दाह्यं विनाश्यानुविनश्यति एवं सर्व्वस्यानित्यता सर्व्वं विनाश्यानुविनश्यतीति ॥

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥२८॥

अयं खलु वादो नित्यं प्रत्याचष्टे नित्यस्य च प्रत्याख्यानमनुपपन्नम् कस्मात्, यथोपलब्धिव्यवस्थानात् यस्योत्पत्तिविनाशधर्मकत्वमुपलभ्यते प्रमाणतस्तदनित्यम्, यस्य नोपलभ्यते तद्विपरीतम्, न च परमसूक्ष्माणां भूतानामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काशकालदिगात्ममनसां तद्गुणानाञ्च केषाञ्चित् सामान्यविशेषसमवाया-नाञ्चोत्पत्तिविनाशधर्म्मकत्वं प्रमाणत उपलभ्यते तस्मान्नित्यान्येतानीति। अयमन्य एकान्तः ॥

सर्व्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

भूतमात्रमिदं सर्व्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेरिति ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

उत्पत्तिकारणञ्चोपलभ्यते विनाशकारणञ्च तत् सर्व्वनित्यत्वे व्याह-न्यत इति ॥

तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

यस्योत्पत्तिविनाशकारणमुपलभ्यत इति मन्यसे तद्भूतलक्षणहीनम-र्थान्तरं गृह्यते भूतलक्षणावरोधाद्भूतमात्रमिदमित्ययुक्तो ऽयं प्रतिषेधः इति ॥

नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥

कारणसमानगुणस्योत्पत्तिः कारणञ्चोपलभ्यते। न चैतदुभयं नित्य-विषयं नचोत्पत्तितत्कारणोपलब्धिः शक्या प्रत्याख्यातुम्, नचाविषया काचिदुपलब्धिः उपलब्धिसामर्थ्यात् कारणेन समानगुणं कार्य्यमुत्पद्यत इत्यनुमीयते स खलूपलब्धेर्विषय इति। एवञ्च तल्लक्षणावरोधोपपत्ति-रिति, उत्पत्तिविनाशकारणप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्ट इति, प्रसि-द्धश्चावयवी तद्धर्म्मा उत्पत्तिविनाशधर्म्मा चावयवी सिद्ध इति। शब्दकर्म-बुद्ध्यादीनां चाव्याप्तिः पञ्चभूतनित्यत्वात्तल्लक्षणावरोधाच्चेत्यनेन शब्दकर्म-बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च न व्याप्तास्तस्मादनेकान्तः, स्वप्नविषयाभिमा-नवन्मिथ्योपलब्धिरितिचेत् भूतोपलब्धौ तुल्यम्। यथा स्वप्ने विषयाभि-मान एवमुत्पत्तिकारणाभिमानः इति एवञ्चेतद्भूतोपलब्धौ तुल्यम्, पृथि-व्याद्युपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते, पृथिव्याद्यभावे सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवहारविलोप इतिचेत् तदितरत्र समानम् उत्पत्तिविनाशकारणोपलब्धिविषयस्याप्यभावे सर्व्वव्यवहारविलोप इति सोऽयं नित्यानामतीन्द्रियत्वादविषयत्वाच्चोत्पत्तिविनाशयोः स्वप्नविषयाभिमानवदनित्यहेतुरिति। अवस्थितस्योपादानस्य धर्ममात्रं निवर्त्तते धर्ममात्रमुपजायते स खलूत्पत्तिविनाशयोर्विषयः। यच्चोपजायते तत् प्रागप्युपजननादस्ति। यच्च निवर्त्तते तन्निवृत्तमप्यस्तीति। एवञ्च सर्व्वस्य नित्यत्वमिति॥

न व्यवस्थानुपपत्तेः॥ ३३॥

अयमुपजनः इयं निवृत्तिरिति व्यवस्था नोपपद्यते उपजातनिवृत्तयोर्विद्यमानत्वात् अयं धर्म उपजातोऽयं निवृत्तइति सद्भावाविशेषादव्यवस्था। इदानीमुपजननिवृत्ती नेदानीमिति कालव्यवस्था नोपपद्यते सर्वदा विद्यमानत्वात् अस्य धर्मस्योपजननिवृत्ती नास्येति व्यवस्थानुपपत्तिरुभयोरविशेषात्। अनागतोऽतीत इति कालव्यवस्थानुपपत्तिः वर्त्तमानस्य सद्भावलक्षणत्वात् अविद्यमानस्यात्मलाभउपजनोविद्यमानस्यात्महानं निवृत्तिरित्येतस्मिन् सति नैते दोषाः तस्माद्यदुक्तं प्रागप्युपजननादस्ति निवृत्तञ्चास्ति तदयुक्तमिति अयमन्य एकान्तः॥

सर्वं पृथग्भावलक्षणपृथक्त्वात्॥ ३४॥

सर्व्वं नाना न कश्चिदेको भावोविद्यते कस्मात् भावलक्षणपृथक्त्वात् भावस्य लक्षणमभिधानं येन लक्ष्यते भावः स समाख्याशब्दः तस्य पृथग्विषयत्वात् सर्व्वोभावः समाख्याशब्दः समूहवाची कुम्भइति संज्ञाशब्दोगन्धरसरूपस्पर्शसमूहे बुध्नपार्श्वग्रीवादिसमूहे च वर्त्तते निदर्शनमात्रञ्चेदमिति॥

नानेकलक्षणैरेकभावनिष्पत्तेः॥ ३५॥

अनेकविधलक्षणैरिति मध्यमपदलोपी समासः। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एकोभावो निष्पद्यते गुणव्यतिरिक्तश्च द्रव्यमवयवातिरिक्तश्चावयवीति विभक्तन्यायञ्चैतदुभयमिति। अथापि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

न कश्चिदेकोभाव इत्ययुक्तः प्रतिषेधः कस्मात् लक्षणव्यवस्थानादेव यदिह लक्षणं भावस्य संज्ञाशब्दभूतं तदेकस्मिन् व्यवस्थितम् यंकुम्भमद्राक्षं तं स्पृशामि यमेवास्प्राक्षं तं पश्यामीति, नाणुसमूहो गृह्यते इति। अणुसमूहे चागृह्यमाणे यद्गृह्यते तदेकमेवेति। अथाप्येतदनूक्तं नास्त्येको भावो यस्मात् समुदायः। एकानुपपत्तेर्नास्त्येव समूहः नास्त्येको-भावो यस्मात् समूहे भावशब्दप्रयोगः एकस्य चानुपपत्तेः समूहो नोपपद्यते। एकसमुच्चयोर्हि समूह इति व्याहतत्वादनुपपन्नं नास्त्येको भाव इति यस्य प्रतिषेधः प्रतिज्ञायते समूहे भावशब्दप्रयोगादिति हेतुं ब्रुवता स एवाभ्यनुज्ञायते एकसमुच्चयोर्हि समूह इति समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य प्रत्येकं समूहिप्रतिषेधो नास्त्येकोभाव इति सोऽयमुभयतोव्याघाताद्यत्किञ्चनवाद इति। अयमपर एकान्तः॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

यावद्भावजातं तत्सर्व्वमभावः कस्मात् भावेष्वितरेतराभावसिद्धेः असन् गौरश्वात्मनानश्वो गौः। असन्नश्वोगवात्मनाऽगौरश्व इत्यसत्प्रत्ययस्यप्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्व्वमभाव इति प्रतिज्ञावाक्ये पदयोः प्रतिज्ञाहेत्वोश्च व्याघातादयुक्तम्, अनेकस्याशेषता सर्व-शब्दस्यार्थोभावप्रतिषेधश्चाभावशब्दस्यार्थः पूर्वं सोपाख्यमुत्तरं निरुपाख्यम् तत्र समुपाख्यायमानं कथं निरुपाख्यमभावः स्यादिति न जात्वभावो निरुपाख्योऽनेकतयाऽशेषतया शक्यः प्रतिज्ञातुमिति, सर्व्वमेतदभाव इति चेत् यदिदं सर्व्वमिति मन्यसे तदभाव इति एवं चेदनिवृत्तो व्याघातः अनेकमशेषञ्चेति नाभावप्रत्ययेन शक्यं भवितुम्, अस्ति चायं प्रत्ययः सर्व्वमिति तस्मान्नाभाव इति, प्रतिज्ञाहेत्वोश्च व्याघातः सर्व्वमभाव इति भावप्रतिषेधः प्रतिज्ञा भावेष्वितरेतराभावसिद्धेरिति हेतुः। भावेष्वितरेतराभावमनुज्ञायाश्रित्य चेतरेतराभावसिद्ध्या सर्व्वमभाव इत्युच्यते यदि सर्व्वमभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वो भावेष्वितरेतराभावसिद्धेरिति नोपपद्यते अथ भावेष्वितरेतराभावसिद्धिः सर्व्वमभावः इति नोपपद्यते सूत्रेण चाभिसम्बन्धः ॥

न स्वभावसिद्धे र्भावानाम् ॥ ३८ ॥

न सर्व्वभावः कस्मात् स्वेन भावेन सद्भावात् भावानाम्, स्वेन धर्म्मेण भावाभवन्तीति प्रतिज्ञायते कश्च स्वोधर्म्मो भावानां द्रव्यगुणकर्म्मणां सदादिसामान्यम् द्रव्याणां क्रियावदित्येवमादिर्विशेषः, स्पर्शपर्य्यन्ताः पृथिव्यादूति च प्रत्येकञ्चानन्तोभेदः। सामान्यविशेषसमवायानाञ्च विशिष्टा धर्म्मा गृह्यन्ते सोऽयमभावस्य निरुपाख्यत्वात् सम्प्रत्यायकोऽर्थभेदो न स्यात्, अस्तित्वयन्तस्मान्न सर्वमभाव इति। अथवा न स्वभावसिद्धेर्भावानामिति। स्वरूपसिद्धेरिति गौरितिप्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते नाभावमात्रम् यदि च सर्वमभावः गौरित्यभावः प्रतीयेत गौशब्देन चाभावः उच्येत, यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते नाभावस्तस्मादयुक्तमिति, अथवा न स्वभावसिद्धेरिति। असन् गौरश्वात्मनेति-गवात्मना कस्मान्नोच्यते अवचनात् गवात्मना गौरस्तीति स्वभावसिद्धिः, अनश्वोऽश्व इति वा अगौर्गौरिति वा कस्मान्नोच्यते अवचनात् स्वेन रूपेण विद्यमानता द्रव्यस्येति विज्ञायते अव्यतिरेकप्रतिषेधे च भावानामसंयोगादिसम्बन्धो व्यतिरेकः, अत्राव्यतिरेकोऽभेदाख्यसम्बन्धः। प्रत्ययसामानाधिकरण्यम् यथा न सन्ति कुण्डे वदराणीति असन् गौरश्वात्मनामनश्वे गौरिति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते गवाश्वयोरेकत्वं नास्तीति। तस्मिन् प्रतिषिध्यमाने भावेन गवा सामानाधिकरण्यमसत्प्रत्ययस्यासन् गौरश्वात्मनेति, यथा न सन्ति कुण्डे वदराणीति कुण्डे वदरसंयोगे प्रतिषिध्यमाने सद्भिरसत्प्रत्ययस्य सामानाधिकरण्यमिति ॥

न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥

अपेक्षाकृतमापेक्षिकम् ह्रस्वापेक्षाकृतं दीर्घं दीर्घापेक्षाकृतं ह्रस्वं, न स्वेनात्मनावस्थितं किञ्चित्, कस्मात् अपेक्षासामर्थ्यात् तस्मान्न स्वभावसिद्धिर्भावानामिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याहतत्वादयुक्तम् ॥ ४० ॥

यदि ह्रस्वापेक्षाकृतं दीर्घं किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते, अथ दीर्घापेक्षाकृतं ह्रस्वं दीर्घमनापेक्षिकम्, एवमितरेतराश्रययोरेकाभावेऽन्यतराभावादुभयाभाव इति अपेक्षाव्यवस्थानुपपन्ना, स्वभावसिद्धावसत्याम् समयोः परिमण्डलयोर्वा द्रव्ययोरापेक्षिके दीर्घत्वह्रस्वत्वे कस्मान्न भवतः। अपेक्षायामनपेक्षायाञ्च द्रव्ययोरभेदः, यावती द्रव्ये अपेक्षमाणे तावती एवानपेक्षमाणे नान्यतरत्र भेदः आपेक्षिकत्वे तु सत्यन्यतरत्र विशेषोपजनः स्यादिति, किमपेक्षासामर्थ्यमिति चेत् द्वयोर्ग्रहणेऽतिशयग्रहणोपपत्तिः। द्वे द्रव्ये पश्यन्नेकत्र विद्यमानमविशयं गृह्णाति, तद्दीर्घमिति व्यवस्यति, यच्च हीनं गृह्णाति तद्ध्रस्वमिति व्यवस्यतीति। एतच्चापेक्षासामर्थ्यमिति। अथेमे सङ्ख्यैकान्ताः। सर्व्वमेकं सदविशेषात्, सर्व्वं द्वेधा नित्यानित्यभेदात् सर्वं त्रेधा ज्ञाता ज्ञानं ज्ञेयमिति, सर्वं चतुर्द्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति, एवं यथासम्भवमन्येऽपीति। तत्र परीक्षा॥

सङ्ख्यैकान्ता सिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्॥४१॥

यदि साध्यसाधनयोर्नानात्वमेकान्तो न सिद्ध्यति व्यतिरेकात् अथ साध्यसाधनयोरभेदः एवमप्येकान्तो न सिद्ध्यति साधनाभावात् नहि तमन्तरेण कस्यचित् सिद्धिरिति॥

न कारणावयवभावात्॥ ४२ ॥

न सङ्ख्यैकान्तानामसिद्धिः, कस्मात् कारणस्यावयवभावात् अवयवः कश्चित् साधनभूत इत्यव्यतिरेकः, एवं द्वैतादीनामपीति॥

निरवयवत्वादहेतुः॥ ४३ ॥

कारणस्यावयवभावादित्यहेतुः कस्मात् सर्वमेकमित्यनपवर्गेण प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाय कस्यचिदेकत्वमुच्यते तत्र व्यपवृत्तोऽवयवः साधनभूतो नोपपद्यते एवं द्वैतादिष्वपीति। ते खल्विमे सङ्ख्यैकान्ताः विशेषकारितस्यार्थविस्तारस्य प्रत्याख्याने न वर्त्तन्ते प्रत्यक्षानुमानागमविरोधान्मिथ्यावादा भवन्ति। अथाभ्यनुज्ञानेन वर्त्तन्ते समानधर्मकारितार्थसंग्रहो विशेषकारितश्चार्थभेद इति एवमेकान्तत्वं जहतीति। ते खल्वेते तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता इति। प्रेत्यभावानन्तरं फलं तस्मिन् ॥

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥४४॥

पचति दोग्धीति सद्यः फलमोदनपयसी, कृषति वपतीति कालान्तरे फलं शस्याधिगम इति। अस्ति चेयं क्रिया अग्निहोत्रं जुहुयात् स्वर्गकाम इति, एतस्याः फले संशयः ॥

न सद्यः कालान्तरोपभोग्यत्वात् ॥ ४५ ॥

स्वर्गः फलं श्रूयते तच्च भिन्नेऽस्मिन् देहभेदादुत्पद्यत इति, न सद्यो-ग्रामादिकामानामारम्भफलमिति ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४६ ॥

ध्वस्तायां प्रवृत्तौ प्रवृत्तेः फलं न कारणमन्तरेणोत्पत्तुमर्हति, न खलु वै विनष्टात्कारणात् किञ्चिदुत्पद्यतइति ॥

प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ॥ ४७ ॥

यथा फलार्थिना वृक्षमूले सेकादिपरिकर्म क्रियते तस्मिंश्च प्रध्वस्ते पृथिवीधातुरब्धातुना सङ्गृहीतः आन्तरेण तेजसा पच्यमानो रसद्रव्यं निवर्त्तयति स द्रव्यभूतो रसोवृक्षानुगतः पाकविशिष्टो व्यूहविशेषेण सन्निविशमानः पर्णादिफलं निर्वर्त्तयति। एवं परिषेकादि कर्म चार्थवत् न च विनष्टात् फलनिष्पत्तिः, तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यते स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नातो निमित्तान्तरानुगृहीतः कालान्तरे फलं निष्पादयतीति। उक्तञ्चै-तत्पूर्वकृतफलानुबन्धात्तदुत्पत्तिरिति तदिदं प्राङ्निष्पत्तेर्निष्पद्यमानम्॥

नासन्नसन्नसदसदसतोर्वैधर्म्यात्॥ ४८॥

प्राङ्निष्पत्तेर्निष्पत्तिधर्मकं नासत् उपादाननियमात् कस्यचिदुत्पत्तये किञ्चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यत इति, न सत् प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति, न सदसत् सदसतोर्वैधर्म्यात् सदित्यर्थाभ्यनुज्ञा असदित्यर्थप्रतिषेधः एतयोर्व्याघातो वैधर्म्यं व्याघातादव्यतिरेकानुपपत्तिरिति प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा कस्मात्॥

उत्पादव्ययदर्शनात्॥ ४९॥

यत्पुनरुक्तं प्रागुत्पत्तेः कार्य्यन्नासदुपादाननियमादिति॥

बुद्धिसिद्धन्तु तदसत्॥ ५०॥

इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्य्यं बुद्ध्या सिद्धमुत्पत्तिनियमदर्शनात् तस्मादुपादाननियमस्योपपत्तिः सति तु कार्य्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति॥

आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः॥ ५१॥

मूलसेकादि परिकर्म फलञ्चोभयं वृक्षाश्रयम्, कर्म चेह शरीरे फलञ्चामुत्रेत्याश्रयव्यतिरेकादहेतुरिति॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः॥ ५२॥

प्रीतिरात्मप्रत्यक्षत्वादात्माश्रया तदाश्रयमेव कर्म धर्मसंज्ञितम् धर्मस्यात्मगुणत्वात्। तस्मादाश्रयव्यतिरेकानुपपत्तिरिति॥

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्॥ ५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रादि फलं निर्दिश्यते न प्रीतिः ग्रामकामो यजेत पुत्रकामो यजेतेति । तत्र यदुक्तं प्रीतिः फलमित्येतदयुक्तमिति ॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥५४॥

पुत्रादिसम्बन्धात् फलं प्रीतिलक्षणमुत्पद्यत इति पुत्रादिषु फलवदुपचारः यथाऽन्ने प्राणशब्दो ऽन्नं वै प्राणा इति । फलानन्तरं दुःखमुद्दिष्टम्, उक्तञ्च बाधनालक्षणं दुःखमिति । तत् किमिदं प्रत्यात्मवेदनीयस्य सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानम्, आहोस्विदन्यः कल्प इति, अन्य इत्याह कथम् न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्, अयन्तु जन्ममरणप्रबन्धानुभवनिमित्ताद्दुःखान्निर्विण्णस्य दुःखञ्जिहासतो दुःखसंज्ञाभावनोपदेशो दुःखहानार्थ इति, कया युक्त्या सर्वे खलु सत्वनिकायाः सर्वाण्युत्पत्तिस्थानानि सर्वः पुनर्भवो बाधनानुषक्तो दुःखसाहचर्य्याद्बाधनालक्षणं दुःखमित्युक्तम् ऋषिभि र्दुःखसंज्ञाभावनमुपदिश्यते अत्र च हेतुरुपादीयते ॥

विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्तिः ॥५५

जन्म जायत इति शरीरेन्द्रियबुद्धयः, शरीरादीनाञ्च संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः । विविधा च बाधना हीना मध्यमोत्कृष्टा चेति । उत्कृष्टा नारकिणाम्, तिरश्चान्तु मध्यमा, मनुष्याणान्तु हीना, देवानां हीनतरा वीतरागाणाञ्च, एवं सर्वमुत्पत्तिस्थानं विविधबाधनानुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते, दुःखसंज्ञाव्यवस्थानात् सर्वलोकेष्वनभिरतिसंज्ञा भवति, अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषया तृष्णा विच्छिद्यते, तृष्णाप्रहाणात् सर्वदुःखाद्विमुच्यत इति । यथा विषयोगात् पयोविषमिति बुध्यमानो नोपादत्ते, अनुपाददानो मरणदुःखं नाप्नोति, दुःखोद्देशस्तु न सुखस्य प्रत्याख्यानम्, कस्मात् ॥

न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम् । कस्मात् सुखस्यान्तरालनिष्पत्तेः । निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणाम्, तदशक्यं प्रत्याख्यातुमिति, अथापि ॥

बाधनाऽनिवृत्तेर्वेदयतः पर्य्येषणदोषादप्रतिषेधः॥५७

सुखस्य दुःखोद्देशेनेतिप्रकरणात् पर्य्येषणं प्रार्थनाविषयार्जनतृष्णा- पर्य्येषणस्य दोषो यदयं वेदयमानः प्रार्थयते तस्य प्रार्थितं न सम्पद्यते, सम्पद्य वा विपद्यते, न्यूनं वा सम्पद्यते, बहु प्रत्यनीकं वा सम्पद्यते इत्येतस्मात् पर्य्येषणदोषान्नानाविधो मानसः सन्तापो भवति । एवं वेदयतः पर्य्येषणदोषाद्बाधनाया अनिवृत्तिः । बाधनानिवृत्तेर्दुःखसंज्ञाभावनमुपदिश्यते, अनेन कारणेन दुःखं जन्म न तु सुखस्याभावादिति । अथाप्येतदनुक्तम् । कामं कामयमानस्य यदा कामः समृद्ध्यति, अथैनमपरः कामः क्षिप्रमेव प्रबाधते । अपि चेदुदनेमिं समन्ताद्भूमिमिमां लभते स गवाश्वाम्, न स तेन धनेन धनैषी तृप्यति किन्नु सुखं धनकाम इति ॥

दुःखविकल्पे सुखाभिमानाच्च ॥ ५८ ॥

दुःखसंज्ञाभावनोपदेशः क्रियते, अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते न सुखादन्यन्निःश्रेयसमस्ति सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति । मिथ्यासङ्कल्पात् सुखे तत्साधनेषु च विषयेषु संरज्यते संरक्तः सुखाय घटते घटमानस्याऽस्य जन्मजराव्याधिप्रायणानिष्टसंयोगेष्टवियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद्दुःखमुत्पद्यते तं दुःखविकल्पं सुखमित्यभिमन्यते, सुखाङ्गभूतं दुःखम्, न दुःखमनापाद्य शक्यं सुखमवाप्तुम्, तादर्थ्यात् सुखमेवेदमिति सुखसंज्ञोपहतप्रज्ञो जायस्व म्रियस्व सन्धावतीति संसारं नातिवर्त्तते, तदस्याः सुखसंज्ञायाः प्रतिपक्षो दुःखसंज्ञाभावनमुपदिश्यते दुःखानुषङ्गाद्दुःखं जन्मेति न सुखस्याभावात् यद्येवं कस्माद्दुःखं जन्मेति नोच्यते सोऽयमेवं वाच्ये यदेवमाह दुःखमेव जन्मेति तेन सुखाभावं ज्ञापयतीति । जन्मविनिग्रहार्थी यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वै खल्वयमेवशब्दः कथं न दुःखं जन्म स्वरूपतः किन्तु दुःखोपचारात्, एवं सुखमपीति, एतदनेनैव निवर्त्यते न तु दुःखमेव जन्मेति। दुःखोद्देशानन्तरमपवर्गः स प्रत्याख्यायते।

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५९ ॥

ऋणानुबन्धान्नास्त्यपवर्गः, जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति, ऋणानि तेषामनुबन्धः स्वकर्मभिः सम्बन्धः कर्मसम्बन्धवचनात्। जरामर्य्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति जरया ह एष तस्मात् सत्राद्विमुच्यते मृत्युना ह चेति, ऋणानुबन्धादपवर्गानुष्ठानकालो नास्तीत्यपवर्गाभावः। क्लेशानुबन्धान्नास्त्यपवर्गः, क्लेशानुबद्धश्च जायते न-स्य क्लेशानुबन्धविच्छेदो गृह्यते। प्रवृत्त्यनुबन्धान्नास्त्यपवर्गः। जन्मप्रभृत्ययं यावत् प्रायणं वाग्बुद्धिशरीरारम्भेणाविमुक्तो गृह्यते तत्र यदुक्तं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति तदनुपपन्नमिति। अत्राभिधीयते, यत्तावदृणानुबन्धादिति ऋणैरिव ऋणैरिति॥

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ६० ॥

ऋणैरिति नायं प्रधानशब्दः यत्र खल्वेकः प्रत्यादेयं ददाति द्वितीयश्च प्रतिदेयं गृह्णाति तत्रास्य दृष्टत्वात् प्रधानमृणशब्दः, न चैतदिहोपपद्यते प्रधानशब्दानुपपत्तेर्गुणशब्देनायमनुवादः ऋणैरिव ऋणैरिति प्रयुक्तोपमञ्चैतत् अग्निर्माणवक इति। अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते यथाऽग्निशब्दो माणवके, कथं गुणशब्देनानुवादः निन्दाप्रशंसोपपत्तेः कर्मलोपे ऋणीव ऋणादानान्निन्द्यते, कर्मानुष्ठाने च ऋणीव ऋणदानात् प्रशस्यते। जायमान इति गुणशब्दो विपर्य्यये ऽनधिकारात्। जायमानो ह वै ब्राह्मण इति च शब्दो गृहस्थः सम्पद्यमानो जायमान इति। यदायं गृहस्थो जायते तदा कर्मभिरधिक्रियते मातृतो जायमानस्यानधिकारात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदा तु मातृतो जायते कुमारो न तदा कर्मभिरधिक्रियते, अर्थिनः शक्तस्य चाधिकारात् । अर्थिनः कर्मभि रधिकारः कर्मविधौ कामसंयोगश्रुतेः अग्निहोत्रं जुहुयात् स्वर्गकामः इत्येवमादि, शक्तस्य च प्रवृत्तिसम्भवात् शक्तस्य कर्मभिरधिकारः प्रवृत्तिसम्भवात्, शक्तः खलु विहिते कर्मणि प्रवर्त्तते नेतर इति, उभयाभावस्तु प्रधानशब्दार्थे मातृतो जायमाने कुमारे उभयमर्थिता शक्तिश्च न भवतीति । न भिद्यते च लौकिकाद्वाक्याद्वैदिकं वाक्यम् प्रेक्षापूर्व्वकारिपुरुषप्रणीतत्वेन तत्र लौकिकस्तावदपरीक्षकोऽपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्य्यं चरेति । कुतएवं ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति । न खलु वै नर्त्तकोऽन्धेषु प्रवर्त्तते न गायनो वधिरेष्विति, उपदिष्टार्थविज्ञानञ्चोपदेशविषयः यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न चैतदस्ति जायमानकुमारके इति गार्हस्थ्यलिङ्गञ्च मन्त्रब्राह्मणं कर्माभिवदति यच्च मन्त्रब्राह्मणं कर्माभिवदति तत्पत्नीसम्बन्धिना गार्हस्थ्यलिङ्गेनोपपन्नम् । तस्माद्गृहस्थोऽयं जायमानोऽभिधीयत इति । अर्थित्वस्य चाविपरिणामे जरामर्य्यवादोपपत्तिः, यावच्चास्य फलेनार्थित्वं न विपरिणमते न निवर्त्तते तावदनेन कर्म्मानुष्ठेयमित्युपपद्यते जरामर्य्यवादस्तं प्रतीति, जरया ह वेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनम्, जरया ह वा एष एतस्माद्विमुच्यत इति, आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते तत्र हि प्रव्रज्या विधीयते अत्यन्तजरासंयोगे जरया ह वेत्यनर्थकम् अशक्तोविमुच्यत इत्येतदपि नोपपद्यते स्वयमशक्तस्य वाह्यां शक्तिमाह । अन्तेवासी वा जुहुयाद्ब्राह्मणा स परिक्रीतः क्षीरहोता वा जुहुयाद्धनेन स परीक्रीत इति । अथापि विहितं वानूद्येत कामाद्वार्थः परिकल्प्येत विहितानुवचनं न्याय्यमिति ऋणवानिवास्वतन्त्रो गृहस्थः कर्मसु प्रवर्त्तते इत्युपपन्नं वाक्यस्य सामर्थ्यम्, फलस्य हि साधनानि प्रयत्नविषयो न फलम्, तानि सम्पन्नानि फलाय कल्पन्ते, विहितञ्च जायमानं विधीयते च जायमानं तेन यः सम्बध्यते सोऽयं जायमान इति । प्रत्यक्षविधानाभावादिति चेत् न प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति । प्रत्यक्षतोविधीयते गार्हस्थ्यं ब्राह्मणेन, यदि चाश्रमान्तरमभविष्यत् तदपि व्यधा-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यात् प्रत्यक्षतः, प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति न प्रतिषेधस्य प्रत्यक्षविधानाभावात् न प्रतिषेधोऽपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते न सन्त्याश्रमान्तराणि एक एव गृहस्थाश्रम इति प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति ॥

अधिकाराच्च विधानं विद्यान्तरवत् ॥ ६१ ॥

यथा शास्त्रान्तराणि स्वे स्वेऽधिकारे प्रत्यक्षतो विधायकानि नार्थान्तराभावात्, एवमिदम् ब्राह्मणं गृहस्थशास्त्रं स्वेऽधिकारे प्रत्यक्षतोविधायकं नाश्रमान्तराणामभावादिति । ऋग्ब्राह्मणञ्चापवर्गाभिधाय्यभिधीयते । ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति । ऋचश्च तावत्, कर्म्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमिच्छमानाः, अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः, न कर्मणा न प्रजया धनेन, त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति, वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । अथ ब्राह्मणानि, त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति, प्रथमस्तपएव, द्वितीयो ब्रह्मचार्य्याचार्य्यकुलवासी, तृतीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽवसादयन्, सर्व्व एवैते पुण्यलोका भवन्ति । ब्रह्मसंस्थोऽमृतत्वमेति । एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति अथो खल्वाहुः काममयएवायं पुरुष इति स यथाकामो भवति तथा क्रतुर्भवति तथा तत्कर्म कुरुते यत्कर्म्म कुरुते तदभिसम्पद्यते इति कर्मभिः संसरणमुक्ता प्रकृतमन्यदुपदिशन्ति इति तु कामयमनो योऽकामोनिष्काम आत्मकामो भवति न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीति । तत्र यदुक्तमृणानुबन्धादपवर्गाभाव इत्येतद् युक्तमिति ये चत्वारः पथयो देवयाना इति च चातुराश्रम्यश्रुतेरैकाश्रम्यानुपपत्तिः, फलार्थिनश्चेदं ब्राह्मणञ्जरामर्य्यं वा एतत् सत्रं यदग्निहोत्रं दर्श पूर्णमासौ चेति, कथम् ॥

समारोपणादात्मन्यप्रतिषेधः ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राजापत्यामिष्टिं निरूप्य तस्यां सार्व्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति श्रूयते, तेन विजानीमः प्रजावित्तलोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्तीति, एषणाभ्यश्च व्युत्थितस्य पात्रचयान्तानि कर्म्माणि नोपपद्यन्त इति नाविशेषेण कर्त्तुः प्रयोजकफलं भवतीति । चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः । तदप्रमाणमिति चेत् न प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते, ते वा खल्वेते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदन् इतिहासपुराणं पञ्चमं वेदानां वेद इति । तस्मादयुक्तमेतदप्रामाण्यमिति । अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसङ्गः । द्रष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः, य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्म्मशास्त्रस्य चेति । विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यम् अन्यमन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्म्मशास्त्राणामिति । यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य लोकव्यवहारव्यवस्थानं धर्म्मशास्त्रस्य विषयः । तत्रैकेन सर्व्वं व्यवस्थाप्यत इति, यथाविषयमेतानि प्रमाणानीन्द्रियादिवदिति । यत्पुनरेतत् क्लेशानुबन्धस्याविच्छेदादिति ॥

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ६३ ॥

यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते तथा ऽपवर्गेऽपीति । एतच्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरन्तीति । यदपि प्रवृत्त्यनुबन्धादिति ॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६४ ॥

प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसन्धानाय, पूर्वसन्धिस्तु पूर्व्वजन्मनिवृत्तौ पुनर्जन्म तच्चादृष्टकारितम्, तस्यां प्रहीणायां पूर्वजन्माभावे जन्मान्तराभावोऽप्रतिसन्धानमपवर्गः । कर्म्मवैकल्यप्रसङ्ग इति चेत् न कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात् पूर्वजन्मनिवृत्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनर्जन्म न भवतीत्युच्यते न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते। सर्व्वाणि पूर्वकर्म्माणि ह्यन्ते जन्मनि विपच्यन्त इति॥

न क्लेशसन्ततेः स्वाभाविकत्वात्॥ ६५॥

नोपपद्यते क्लेशानुबन्धविच्छेदः, कस्मात् क्लेशसन्ततेः स्वाभाविकत्वात् अनादिरियं क्लेशसन्ततिः नचानादिः शक्यः उच्छेत्तुमिति। अत्र कश्चित् परीहारमाह॥

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम्॥ ६६॥

यथाऽनादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्त्यते एवं स्वाभाविकी क्लेशसन्ततिरनित्येति॥

अणुश्यामताऽनित्यत्ववद्वा॥ ६७॥

अपरआह तथाऽनादिरणुश्यामता अथ चाग्निसंयोगादनित्या तथा क्लेशसन्ततिरपीति, सतः खलु धर्म्मौ नित्यत्वमनित्यत्वञ्च तत्त्वभावे भावे आक्तमिति। अनादिरणुश्यामतेति हेत्वभावादयुक्तम्, अनुत्पत्तिधर्मकमनित्यमिति नात्र हेतुरस्तीति। अयन्तु समाधिः॥

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम्॥ ६८॥

कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति समुच्चयः। मिथ्यासङ्कल्पेभ्यो रञ्जनीयकोपनीयमोहनीयेभ्यो रागद्वेषमोहा उत्पद्यन्ते कर्म च सत्त्वनिकायनिर्वर्त्तकं नैयमिकान् रागद्वेषमोहान् निर्व्वर्त्तयति नियमदर्शनात्, दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुलः कश्चिद्द्वेषबहुलः कश्चिन्मोहबहुल इति। इतरेतरनिमित्ता च रागादीनामुत्पत्तिः मूढो रज्यति, मूढः कुप्यति, रक्तोमुह्यति, कुपितोमुह्यति। सर्वमिथ्यासङ्कल्पानां तत्त्वज्ञानादनुत्पत्तिः। कारणानुत्पत्तौ च कार्य्यानुत्पत्तेरिति, रागादीना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यन्तमनुत्पत्तिरिति। अनादिश्च क्लेशसन्ततिरित्ययुक्तम्। सर्वे इमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्त्तन्ते शरीरादयः, न जातु कश्चिदनुत्पन्नपूर्वः प्रथमत उत्पद्यते अन्यत्र तत्त्वज्ञानात्, नचैवं सत्यनुत्पत्तिधर्मकं किञ्चिद्व्ययधर्मकं प्रतिज्ञायत इति। कर्म च सत्त्वनिकायनिर्वर्त्तकम् तत्त्वज्ञानकृतात् मिथ्यासङ्कल्पविघातान्न रागाद्युत्पत्तिनिमित्तं भवति सुखदुःखसम्वित्तिफलन्तु भवतीति॥

इति वात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्याद्यमाह्निकम्॥

किन्तु खलु भो यावन्तो विषयास्तावत्सु प्रत्येकं ज्ञानमुत्पद्यते। अथ क्वचिदुत्पद्यत इति कस्मात् विशेषः, नतावदेकैकत्र यावद्विषयमुत्पद्यते ज्ञेयानामानन्त्यात्, नापि क्वचिदुत्पद्यते, यत्र नोत्पद्यते तत्रानिवृत्तो मोह इति मोहशेषप्रसङ्गः। न चान्यविषयेण तत्त्वज्ञानेनान्यविषयोमोहः शक्यः प्रतिषेद्धुमिति। मिथ्याज्ञानं वै खलु मोहो न;तत्त्वज्ञानस्यानुत्पत्तिमात्रं, तच्च मिथ्याज्ञानं यत्र विषये प्रवर्त्तमानं संसारवीजं भवति स विषयस्तत्त्वतो ज्ञेय इति,किं पुनस्तन्मिथ्याज्ञानम् अनात्मन्यात्मग्रहः,अहमस्मीति मोहोऽहङ्कार इति। अनात्मानं खल्वहमस्मीति पश्यतो दृष्टिरहङ्कार इति, किं पुनस्तदर्थजातं यद्विषयोऽहङ्कारः शरीरेन्द्रियमनोवेदनाबुद्धयः, कथं तद्विषयोऽहङ्कारः संसारवीजं भवति। अयं खलु शरीराद्यर्थजातमहमस्मीति व्यवसितस्तदुच्छेदेनात्मोच्छेदं मन्यमानोऽनुच्छेदतृष्णापरिप्लुतः पुनः पुनस्तदुपादत्ते तदुपाददानो जन्ममरणाय यतते तेनावियोगान्नात्यन्तं दुःखाद्विमुच्यते इति। यस्तु दुःखं दुःखायतनं दुःखानुषक्तं सुखञ्च सर्वमिदं दुःखमिति पश्यति, स दुःखं परिजानाति परिज्ञातञ्च दुःखं प्रहीणं भवत्यनुपादानात् सविषान्नवत्, एवं दोषान् कर्म च दुःखहेतुरिति पश्यति, न वा प्रहीणेषु दोषेषु दुःखप्रबन्धोच्छेदेन शक्यम्भवितुमिति दोषान् जहाति, प्रहीणेषु च दोषेषु न प्रवृत्तिः प्रतिसन्धानायेत्युक्तम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेत्यभावफलदुःखानि च ज्ञेयानि व्यवस्थापयति कर्म च दोषांश्च प्रहेयान् अपवर्गोऽधिगन्तव्यस्तस्याधिगमोपायस्तत्त्वज्ञानम्, एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्याभ्यस्यतो भावयतः सम्यग्दर्शनम् यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते, एवं च॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥१

शरीरादि दुःखान्तं प्रमेयं दोषनिमित्तं तद्विषयत्वान्मिथ्याज्ञानस्य, तदिदं तत्त्वज्ञानं तद्विषयमुत्पन्नमहङ्कारं निवर्त्तयति, समानविषये तयोर्विरोधात्, एवं तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति, स चायं शास्त्रार्थसङ्ग्रहोऽनूद्यते नापूर्वो विधीयत इति। प्रसङ्ख्यानानुपूर्व्या तु खलु॥

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः॥२॥

कामविषया इन्द्रियार्था इति रूपादय उच्यन्ते ते मिथ्यासङ्कल्प्यमाना रागद्वेषमोहान् प्रवर्त्तयन्ति तान् पूर्वम्प्रसञ्चक्षीत, तांश्च प्रसञ्चक्षाणस्य रूपादिविषयो मिथ्यासङ्कल्पो निवर्त्तते, तन्निवृत्तावध्यात्मं शरीरादि प्रसञ्चक्षीत, तत्प्रसङ्ख्यानादध्यात्मविषयोऽहङ्कारो निवर्त्तते, सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते। अतः परं काचित् संज्ञा हेया, काचिद्भावयितव्येत्युपदिश्यते, नार्थनिराकरणमर्थोपादनं वा कथमिति॥

तन्निमित्तन्त्ववयव्यभिमानः ॥ ३ ॥

तेषां दोषाणां निमित्तन्त्ववयव्यभिमानः सा च खलु स्त्रीसंज्ञा सपरिष्कारा पुरुषस्य, पुरुषसंज्ञा च स्त्रियाः। परिष्कारश्च निमित्तसंज्ञा अनुव्यञ्जनसंज्ञा च, निमित्तसंज्ञा दन्तोष्ठं चक्षुर्नासिकम्, अनुव्यञ्जनसंज्ञा इत्थं दन्तौ इत्थमोष्ठाविति, सेयं संज्ञा कामं वर्द्धयति तदनुषक्तांश्च दोषान् विवर्जनीयान्, वर्ज्जनन्त्वस्याः भेदेनावयवसंज्ञा केश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णीममांसशोणितास्थिस्नायुशिराकफपित्तोच्चारादिसंज्ञा, तामशुभसंज्ञे-त्याचक्षते, तामस्य भावयतः कामरागः प्रहीयते, सत्ये च द्विविधे विषये काचित् संज्ञा भावनीया काचित् परिवर्ज्जनीयेत्युपदिश्यते यथा विषसम्पृक्तेऽन्ने ऽन्नसंज्ञोपादानाय विषसंज्ञा प्रहाणायेति । अथेदानीमर्थं निराकरिष्यताऽवयव्युपपाद्यते ॥

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

सदसतोरुपलम्भाद्विद्या द्विविधा, सदसतोरनुपलम्भादविद्यापि द्विविधा, उपलभ्यमानेऽवयविनि विद्याद्वैविध्यात् संशयः, अनुपलभ्यमाने चाविद्याद्वैविध्यात् संशयः सोऽयमवयवी यद्युपलभ्यते अथापि नोपलभ्यते न कथञ्चन संशयात् मुच्यते इति ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तस्मिन्ननुपपन्नः संशयः, कस्मात् पूर्वोक्तहेतूनामप्रतिषेधादस्ति द्रव्यान्तरारम्भ इति ॥

वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥ ६ ॥

वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिर्नास्त्यवयवीति तद्विभजते ॥

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥७॥

एकैकोऽवयवो न तावत् कृत्स्नेऽवयविनि वर्त्तते तयोः परिमाणभेदा-दवयवान्तरसम्बन्धाभावप्रसङ्गाच्च, नाप्यवयव्येकदेशेन, नह्यस्यान्येऽवयवाः एकदेशभूताः । सन्तीति । अथावयवेष्वेवावयवी वर्त्तते ॥

तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥

न तावत् प्रत्यवयवं वर्त्तते तयोः परिमाणभेदात् द्रव्यस्य चैकद्रव्य-त्वप्रसङ्गात्, नाप्येकदेशैः सर्व्वेषु अन्यावयवाभावात्, तदेवं यत्नः संशयो नास्त्यवयवीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथक् चावयवेभ्योऽवृत्तेः ॥ ९ ॥

पृथक् चावयवेभ्यो धर्मिभ्यो धर्मस्याग्रहणादिति समानम् ॥

नचावयव्यवयवाः ॥ १० ॥

एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११॥

किं प्रत्यवयवं कृत्स्नोऽवयवी वर्त्तते अथैकदेशेनेति नोपपद्यते प्रश्नः, कस्मात् एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेः। कृत्स्नमित्यनेकस्याशेषाभिधानम्, एकदेशइति नानात्वे कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविन्युपपद्येते भेदाभावादिति, अन्यावयवाभावान्नैकदेशेन वर्त्तते इत्यहेतुः ॥

अवयवान्तराभावेऽप्यवृत्तेरहेतुः ॥ १२ ॥

अवयवान्तराभावादिति यद्यप्येकदेशोऽवयवान्तरभूतः स्यात् तथाप्यवयवेऽवयवान्तरं वर्त्तेत नावयवीति, अन्यावयवभावेऽप्यवृत्तेरवयविनो नैकदेशेन वृत्तिरन्यावयवाभावादित्यहेतुः, वृत्तिः कथमिति चेत् एकस्यानेकत्राश्रयाश्रितसम्बन्धलक्षणा प्राप्तिः, आश्रयाश्रितभावः कथमिति चेत् यस्य यतोऽन्यत्रात्मलाभानुपपत्तिः स आश्रयः, न कारणद्रव्येभ्यो ऽन्यत्र कार्य्यद्रव्यमात्मानं लभते, विपर्य्ययस्तु कारणद्रव्येष्विति, नित्येषु कथमिति चेत् अनित्येषु दर्शनात् सिद्धम्। नित्येषु द्रव्येषु कथमाश्रयाश्रयिभाव इतीति चेत् अनित्येषु द्रव्यगुणेषु दर्शनादाश्रयाश्रितभावस्य नित्येषु सिद्धिरिति। तस्मादवयव्यभिमानः प्रतिषिध्यते निःश्रेयसकामस्य नावयवी यथा रूपादिषु मिथ्यासङ्कल्पो न रूपादय इति। सर्वाग्रहणमवयव्यसिद्धेरिति प्रत्यवस्थितोऽप्येतद.ह ॥

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथैकैकः केशस्तैमिरिकेण नोपलभ्यते, केशसमूहस्तूपलभ्यते, तथैकैकोऽणुर्नोपलभ्यते अणुसञ्चयस्तूपलभ्यते, तदिदमणुसमूहविषयं ग्रहणमिति॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः॥ १४॥

यथा विषयमिन्द्रियाणां पटुमन्दभावाद्विषयग्रहणानां पटुमन्दभावो भवति, चक्षुः खलु प्रकृष्यमाणं नाविषयङ्गन्धं गृह्णाति, निकृष्यमाणञ्च न स्वविषयात् प्रच्यवते, सोऽयं तैमिरिकः कश्चिच्चक्षुर्विषयं केशं न गृह्णाति कश्चित् गृह्णाति केशसमूहम्, उभयं ह्यतैमिरिकेण चक्षुषा गृह्यते, परमाणवस्त्वतीन्द्रियाः इन्द्रियाविषयाभूता न केनचिदिन्द्रियेण गृह्यन्ते, समुदितास्तु गृह्यन्त इत्यविषये प्रवृत्तिरिन्द्रियस्य प्रसज्येत, न जात्वर्थान्तरमणुभ्यो गृह्यत इति, ते खल्विमे परमाणवः सञ्चिता गृह्यमाणा अतीन्द्रियत्वं जहति, वियुक्ताश्चागृह्यमाणा अतीन्द्रियत्वं जहति इति सोऽयं द्रव्यान्तरानुत्पत्तावतिमहान् व्याघातः, इत्युपपद्यते द्रव्यान्तरम्, यत् ग्रहणस्य विषय इति, सञ्चयमात्रं विषय इति चेत् न सञ्चयस्य संयोगभावात्तस्य चातीन्द्रियस्याग्रहणादयुक्तम्, सञ्चयः खल्वनेकस्य संयोगः स च गृह्यमाणाश्रयो गृह्यते नातीन्द्रियाश्रयः। भवति हीदमनेन संयुक्तमिति, तस्मादयुक्तमेतदिति। गृह्यमाणस्य चेन्द्रियेण विषयस्यावरणाद्यनुपलब्धिकारणमुपलभ्यते तस्मान्नेन्द्रियदौर्ब्बल्यादनुपलब्धिरणूनाम्। यथा नेन्द्रियदौर्ब्बल्याच्चक्षुषाऽनुपलब्धिर्गन्धादीनामिति॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात्॥ १५॥

यः खल्ववयविनोऽवयवेषु वृत्तिप्रतिषेधादभावः सोऽयमवयवस्यावयवेषु प्रसज्यमानः, सर्वप्रलयाय वा कल्पेत, निरवयवाद्वा परमाणुत्वं निवर्त्तेत, उभयथा चोपलब्धिविषयस्याभावः, तदभावादुपलब्ध्यभावः। उपलब्ध्याश्रयश्चायं वृत्तिप्रतिषेधः स आश्रयं व्याघ्नन्नात्मघाताय कल्पत इति। अथापि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न प्रलयोऽणुसद्भावात् ॥ १६ ॥

अवयवविभागमाश्रित्य वृत्तिप्रतिषेधादभावः प्रसज्यमानो निरवयवात् परमाणो र्निवर्त्तते न सर्वप्रलयाय कल्पते । निरवयवत्वं तु खलु परमाणोर्विभागैरल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् लोष्टस्य खलु प्रविभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति स चायमल्पतरप्रसङ्गः यस्मान्नाल्पतरमस्ति यः परमोऽल्पस्तत्र निवर्त्तते, यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे इति ॥

परं वा त्रुटेः ॥ १७ ॥

अवयवविभागस्यानवस्थानाद्द्रव्याणामसङ्ख्येयत्वात् त्रुटिनिवृत्तिरिति। अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह ॥

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥

तस्याणोर्निरवयवस्यानुपपत्तिः, कस्मात् आकाशव्यतिभेदात् । अन्तर्वहिश्चाणुराकाशेन समाविष्टो व्यतिभिन्नः व्यतिभेदात् सावयवः, सावयवत्वादनित्य इति ॥

आकाशासर्वगतत्वं वा ॥ १९ ॥

अथैतन्नेष्यते परमाणोरन्तर्नास्त्याकाशमित्यसर्वगतत्वं प्रसज्यत इति ॥

अन्तर्वहिश्च कार्य्यद्रव्यस्य कारणान्तरवचनादकार्य्ये तदभावः ॥ २० ॥

अन्तरिति पिहितं कारणान्तरैः कारणमुच्यते, वहिरिति च व्यवधायकमव्यवहितं कारणमेवोच्यते, तदेतत्कार्य्यद्रव्यस्य सम्भवति नाणोरकार्य्यत्वात् अकार्य्ये हि परमाणावन्तर्वहिरित्यस्याभावः । यत्र चास्य भावोऽणुकार्य्यं तन्न परमाणुः यतो हि नाल्पतरमस्ति स परमाणुरिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वसंयोगशब्दविभवाच्च सर्वगतम् ॥ २१ ॥

यत्र क्वचिदुत्पन्नाः शब्दा विभवन्त्याकाशे तदाश्रयाभवन्ति मनोभिः परमाणुभि स्तत्कार्य्यैश्च संयोगा विभवन्त्याकाशे नासंयुक्तः।काशेन किञ्चिन्मूर्त्तद्रव्यमुपलभ्यते तस्मान्नासर्वगतमिति ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥२२॥

संयताप्रतिघातिना द्रव्येण न व्यूह्यते यथा काष्ठेनोदकम्, कस्मात् निरवयवत्वात् सर्पच्च प्रतिघाति द्रव्यं न विष्टभ्नाति, नास्य क्रियाहेतुं गुणं प्रतिबध्नाति, कस्मात् अस्पर्शत्वात् विपर्य्यये हि विष्टम्भो दृष्ट इति। स भवान् स्पर्शवति द्रव्ये दृष्टं धर्म्मं विपरीते नाशङ्कितुमर्हति। अणववयवस्याणुतरत्वप्रसङ्गादणुकार्य्यप्रतिषेधः। सावयवत्वे चाणोरणवयवोऽणुतर इति प्रसज्यते, कस्मात् कार्य्यकारणद्रव्ययोः परिमाणभेददर्शनात्। तस्मादणवयवस्याणुतरत्वम्, यस्तु सावयवोऽणुकार्य्यं तदिति, तस्मादणुकार्य्यमिदं प्रतिषिद्ध्यत इति, कारणविभागाच्च कार्य्यस्यानित्यत्वं नाकाशव्यतिभेदात् लोष्टस्यावयवविभागादनित्यत्वं नाकाशसमावेशादिति ॥

मूर्त्तिमताञ्च संस्थानोपपत्तेरवयवसद्भावः ॥२३॥

परिच्छिन्नानां हि स्पर्शवतां संस्थानं त्रिकोणं चतुरस्रं समं परिमण्डलमित्युपपद्यते, यत् तत्स्थानं सोऽवयवसन्निवेशः, परिमण्डलाश्चाणवस्तस्मात् सावयवादिति ॥

संयोगोपपत्तेश्च ॥ २४ ॥

मध्ये सन्नणुः पूर्वापराभ्यामणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते व्यवधानेनानुमीयते, पूर्वभागेन पूर्वेणाणुना संयुज्यते, परभागेणापरेणाणुना संयुज्यते, यौ तौ पूर्वापरौ भागौ तावस्यावयवौ, एवं सर्व्वतः संयुज्यमानस्य सर्व्वतोभागा अवयवा इति, यत् तावन्मूर्त्तिमतां संस्थानोपपत्तेरवयवस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्भाव इति, अत्रोक्तं किमुक्तम् विभागाल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्र निवृत्तेरण्ववयवस्य चाणुतरत्व प्रसङ्गादणुकार्य्यप्रतिषेध इति। यत् पुनरेतत् संयोगोपपत्तेश्चेति स्पर्शवत्वाद्व्यवधानमाश्रयस्य चाव्याप्त्या भागभक्तिः, उक्तञ्चात्र स्पर्शवानणुः स्पर्शवतोरण्वोः प्रतिघाताद्व्यवधायको न सावयवत्वात्, स्पर्शवत्वात्, स्पर्शवत्वाच्च व्यवधाने सत्यणुसंयोगो नाश्रयं व्याप्नोतीति भागभक्तिर्भवति। भागवानिवायमिति, उक्तञ्चात्र विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् तदवयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति मूर्त्तिमताञ्च संस्थानोपपत्तेः संयोगोपपत्तेश्च परमाणूनां सावयवत्वमिति हेत्वोः॥

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः २५

यावन्मूर्त्तिमद्यावच्च संयुज्यते तत्सर्वं सावयवमित्यनवस्थाकारिणाविमौ हेतू, सा चानवस्था नोपपद्यते सत्यामवस्थायां सत्यौ हेतू स्याताम्। तस्मादप्रतिषेधोऽयं निरवयवत्वस्येति। विभागस्य च विभज्यमानहानेर्नोपपद्यते तस्मात् प्रलयान्तता नोपपद्यत इति। अनवस्थायाञ्च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् परिमाणभेदानां गुरुत्वस्य चाग्रहणम्, समानपरिमाणत्वं चावयवावयविनोः परमाण्ववयवविभागादूर्द्ध्वमिति। यदिदं भावान् बुद्धीराश्रित्य बुद्धिविषयाः सन्तीति मन्यते। मिथ्याबुद्धय एताः। यदि हि तत्त्वबुद्धयः स्युर्बुद्ध्या विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयाणामुपलभ्येत॥

बुद्ध्याविवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥

यथायं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुषु विविच्यमानेषु नार्थान्तरं किञ्चिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात् याथात्म्यानुपलब्धेरसति विषये पटबुद्धिर्भवतीति मिथ्याबुद्धिर्भवति एवं सर्वत्रेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याहतत्वादहेतुः ॥ २७ ॥

यदि बुद्ध्या विवेचनं भावानाम्, न सर्वभावानां याथात्म्यानुपलब्धिः । अथ सर्व्वभावानां याथात्म्यानुपलब्धिर्न बुद्ध्या विवेचनं भावानां याथात्म्यानुपलब्धिश्चेति व्याहन्यते, तदुक्तमवयवावयविप्रसङ्गश्चैवमाप्रलयादिति ॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

कार्य्यद्रव्यं कारणद्रव्याश्रितं तत् कारणेभ्यः पृथङ् नोपलभ्यते विपर्य्यये पृथग्ग्रहणात्, यत्राश्रयाश्रितभावो नास्ति तत्र पृथग्ग्रहणमिति बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहणमतीन्द्रियेष्वणुषु यदिन्द्रियेण गृह्यते तदेतया बुद्ध्या विविच्यमानमन्यदिति ॥

प्रमाणतश्चाऽर्थप्रतिपत्तेः ॥ २९ ॥

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिः । यदस्ति यथा च तत् सर्वम्प्रमाणत उपलब्ध्या सिद्ध्यति । या च प्रमाणत उपलब्धिस्तद्बुद्ध्या विवेचनं भावानाम्, तेन सर्व्वशास्त्राणि सर्व्वकर्म्माणि सर्व्वे च शरीरिणां व्यवहाराः व्याप्ताः । परीक्षमाणो हि बुद्ध्याध्यवस्यति इदमस्तीदं नास्तीति तत्र न सर्व्वभावानुपपत्तिः ॥

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

एवञ्च सति सर्व्वन्नास्तीति नोपपद्यते, कस्मात् प्रमाणानुपपत्त्युपपत्तिभ्याम्, यदि सर्व्वन्नास्तीति प्रमाणमुपपद्यते सर्वं नास्तीत्येतद्व्याहन्यते । अथ प्रमाणं नोपपद्यते सर्वं नास्तीत्यस्य कथं सिद्धिः, अथ प्रमाणमन्तरेण सिद्धिः, सर्वमस्तीत्यस्य कथं न सिद्धिः ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ३१

यथा स्वप्ने न विषयाः सन्त्यथ चाभिमानो भवति, एवं न प्रमाणानि प्रमेयाणि च सन्ति, अथ च प्रमाणप्रमेयाभिमानो भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥

हेत्वभावादसिद्धिः ॥ ३३ ॥

स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानो न पुनर्जागरितान्ते विषयोपलब्धिवदित्यत्र हेतुर्नास्ति हेत्वभावादसिद्धिः। स्वप्नान्ते चासन्तो विषया उपलभ्यन्त इत्यत्रापि हेत्वभावः। प्रतिबोधेऽनुपलम्भादिति चेत् प्रतिबोधविषयोपलम्भादप्रतिषेधः, यदि प्रतिबोधेऽनुपलम्भात् स्वप्ने विषया न सन्तीति तर्हि य इमे प्रतिबुद्धेन विषया उपलभ्यन्ते उपलम्भात्सन्तीति विपर्य्यये हि हेतुसामर्थ्यम्, उपलम्भाभावे सत्यनुपलम्भादभावः सिद्ध्यति, उभयथा त्वभावे नानुपलम्भस्य सामर्थ्यमस्ति, यथा प्रदीपस्याभावाद्रूपस्यादर्शनमिति, तत्र भावेनाभावः समर्थ्यत इति, स्वप्नान्तविकल्पे च हेतुवचनम् स्वप्नविषयाभिमानवदिति ब्रुवता स्वप्नान्तविकल्पे हेतुर्वाच्यः, कश्चित् स्वप्नोभयोपसंहितः, कश्चित् प्रमोदोपसंहितः, कश्चिदुभयविपरीतः कदाचित् स्वप्नमेव न पश्यतीति, निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद्विकल्पोपपत्तिः ॥

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३४ ॥

पूर्वोपलब्धो विषयो यथा स्मृतिश्च सङ्कल्पश्च पूर्वोपलब्धविषयो न तस्य प्रत्याख्यानाय कल्पेते। तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानाय कल्पते। एवं दृष्टविषयश्च स्वप्नान्तोजागरितान्तेन यः सुप्तः स्वप्नं पश्यति स एव जाग्रत् स्वप्नदर्शनानि प्रतिसन्धत्ते इदमद्राक्षमिति। तत्र जाग्रद्बुद्धिवृत्तिवशात् स्वप्नविषयाभिमानो मिथ्येति व्यवसायः, सति च प्रतिसन्धाने या जाग्रतो बुद्धिवृत्तिस्तद्वशादयं व्यवसायः स्वप्नविषयाभिमानो मिथ्येति। उभयाविशेषे तु साधनानर्थक्यम्, यस्य स्वप्नान्तजागरितान्तयोरविशेषस्तस्य स्वप्नविषयाभिमानवदिति साधनमनर्थकम्, तदाश्रयप्रत्याख्यानात्। अतस्मिंस्तदिति च व्यवसायः प्रधानाश्रयः, अपुरुषे स्थाणौ पुरुष इति व्यवसायः स प्रधानाश्रयो न खलु पुरुषेऽनुपलब्धे पुरुष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यपुरुषे व्यवसायो भवति, एवं स्वप्नविषयस्य व्यवसायो हस्तिनमद्राक्षं पर्वतमद्राक्षमिति प्रधानाश्रयो भवितुमर्हति। एवञ्च सति ॥

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३५ ॥

स्थाणौ पुरुषोऽयमिति व्यवसायो मिथ्योपलब्धिरतस्मिंस्तदिति ज्ञानम्, स्थाणौ स्थाणुरिति व्यवसायस्तत्त्वज्ञानम्, तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्त्यते नार्थः स्थाणुपुरुषसामान्यलक्षणः, यथा प्रतिबोधे या ज्ञानवृत्तिस्तया स्वप्नविषयाभिमानो निवर्त्यते नार्थो विषयसामान्यलक्षणः, तथा मायागन्धर्वनगरमृगतृष्णिकानामपि या बुद्धयोऽतस्मिंस्तदिति व्यवसायास्तत्राप्यनेनैव कल्पेन मिथ्योपलब्धिविनाशस्तत्त्वज्ञानान्नार्थप्रतिषेध इति। उपादानवच्च मायादिषु मिथ्याज्ञानम्। प्रज्ञापनीयसरूपञ्च द्रव्यमुपादाय साधनवान् परस्य मिथ्याध्यवसायं करोति सा माया। नीहारप्रभृतीनां नगरस्वरूपसन्निवेशे दूरान्नगरबुद्धिरुत्पद्यते, विपर्य्यये तदभावात्, सूर्य्यमरीचिषु भौमेनोष्मणा संसृष्टेषु स्पन्दमानेषूदकबुद्धिर्भवति, सामान्यग्रहणात् अन्तिकस्थस्य, विपर्य्यये तदभावात्, क्वचित् कदाचित्कस्यचिच्च भावान्नानिमित्तं मिथ्याज्ञानम्। दृष्टञ्च बुद्धिद्वैतं मायाप्रयोक्तुः परस्य च दूरान्तिकस्थयोर्गन्धर्व्वनगरमृगतृष्णिकासु, सुप्तप्रतिबुद्धयोस्च स्वप्नविषये तदेतत्सर्वस्याभावे निरुपाख्यतायां निरात्मकत्वेनोपपद्यत इति॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३६ ॥

मिथ्याबुद्धेश्चार्थवदप्रतिषेधः कस्मात् निमित्तोपलम्भात् सद्भावोपलम्भाच्च, उपलभ्यते मिथ्याबुद्धिनिमित्तम्, मिथ्याबुद्धिश्च प्रत्यात्ममुत्पन्ना गृह्यते संवेद्यत्वात्, कस्मात् मिथ्याबुद्धिरप्यस्तीति॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वं स्थाणुरिति प्रधानं पुरुष इति। तत्त्वप्रधानयोरलोपाद्भेदात् स्थाणौ पुरुष इति मिथ्याबुद्धिरुत्पद्यते सामान्यग्रहणात्, एवं पताकायां वलाकेति, लोष्टे कपोतइति, न तु समाने विषये मिथ्याबुद्धीनां समावेशः, सामान्यग्रहणाव्यवस्थानात्। यस्य तु निरात्मकं निरुपाख्यं सर्वं तस्य समावेशः प्रसज्यते, गन्धादौ च प्रमेये गन्धादिबुद्धयो मिथ्याभिमतास्तत्त्वप्रधानयोः सामान्यग्रहणस्य चाभावात् तत्त्वबुद्धय एव भवन्ति। तस्मादयुक्तमेतत् प्रमाणप्रमेयबुद्धयो मिथ्येति, दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम् अथ कथं तत्त्वज्ञानमुत्पद्यत इति॥

समाधिविशेषाभ्यासात्॥ ३८॥

स तु प्रत्याहृतस्येन्द्रियेभ्यो मनसो धारकेण प्रयत्नेन धार्य्यमाणस्यात्मना संयोगस्तत्त्वबुभुत्साविशिष्टः, सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते, तदभ्यासवशात् तत्त्वबुद्धिरुत्पद्यते, यदुक्तं सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्त इत्येतत्॥

नार्थविशेषप्राबल्यात्॥ ३९॥

अनिच्छतोऽपि बुद्ध्युत्पत्तेर्नैतद्युक्तम्, कस्मात् अर्थविशेषप्राबल्यात् अबुभुत्समानस्यापि बुद्ध्युत्पत्तिर्दृष्टा। यथा स्तनयित्नुशब्दप्रभृतिषु। तत्र समाधिविशेषो नोपपद्यते॥

क्षुदादिभिः प्रवर्त्तनाच्च॥ ४०॥

क्षुत्पिपासाभ्यां शीतोष्णाभ्यां व्याधिभिश्चानिच्छतोऽपि बुद्धयः प्रवर्त्तन्ते। तस्मादैकाग्र्यानुपपत्तिरिति। अस्त्वेतत् समाधिव्युत्याननिमित्तं समाधिप्रत्यनीकञ्च सति त्वेतस्मिन्॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः॥ ४१॥

पूर्वकृतो जन्मान्तरोपचितस्तत्त्वज्ञानहेतुर्धर्म्मप्रविवेकः फलानुबन्धो योगाभ्याससामर्थ्यम्, निष्फले हि अभ्यासेनाभ्यास आद्रियेरन्। दृष्टं हि लौकिकेषु कर्म्मस्वभ्याससामर्थ्यम् प्रत्यनीकपरिहारार्थञ्च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥४२

योगाभ्यासजनितो धर्मो जन्मान्तरेऽप्यनुवर्त्तते प्रचयकाष्ठागते तत्त्वज्ञानहेतौ धर्मे प्रकृष्टायां समाधिभावनायां तत्त्वज्ञानमुत्पद्यत इति, दृष्टश्च समाधिनार्थविशेषप्राबल्याभिभवः। नाहमेतदश्रौषं नाहमेतदज्ञासिषमन्यत्र मे मनोऽभूदित्याह लौकिक इति। यद्यर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तिरनुज्ञायते ॥

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४३ ॥

मुक्तस्यापि बाह्यार्थसामर्थ्याद्बुद्धय उत्पद्येरन्निति ॥

न निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥

कर्म्मवशान्निष्पन्नशरीरे चेष्टेन्द्रियार्थाश्रये निमित्तभावादवश्यम्भावी बुद्धीनामुत्पादः न च प्रबलोऽपि सन् बाह्योऽर्थ आत्मनो बुद्ध्युत्पादे समर्थो भवति। तस्येन्द्रियेण संयोगाद्बुद्ध्युत्पादे सामर्थ्यं दृष्टमिति ॥

तदभावश्चापवर्गे ॥ ४५ ॥

तस्य बुद्धिनिमित्ताश्रयस्य शरीरेन्द्रियस्य धर्म्माधर्म्माभावादभावोऽपवर्गे तत्र यदुक्तमपवर्गेऽप्येवं प्रसङ्ग इति तदयुक्तम्। तस्मात् सर्वदुःखविमोक्षोऽपवर्गः यस्मात् सर्वदुःखवीजं सर्वदुःखायतनं चापवर्गे विच्छिद्यते, तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्गो न निर्वीजं निरायतनञ्च दुःखमुत्पद्यत इति ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः। यमः समानमाश्रमिणां धर्म्मसाधनम्, नियमस्तु विशिष्टम्, आत्मसंस्कारः पुनरधर्म्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानं धर्म्मोपचयश्च, योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्यः। स पुनस्तपः प्राणायामः प्रत्याहारो ध्यानं धारणेति इन्द्रियविषयेषु प्रसङ्ख्यानाभ्यासो रागद्वेषप्रहाणार्थः। उपायस्तु योगाचारविधानमिति॥

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥४७॥

तदर्थमिति प्रकृतम्, ज्ञायतेऽनेनेति ज्ञानमात्मविद्याशास्त्रन्तस्य ग्रहणमध्ययनधारणे अभ्यासः सततक्रियाध्ययनश्रवणचिन्तनानि तद्विद्यैश्च सह संवाद इति प्रज्ञापरिपाकार्थम्, परिपाकस्तु संशयच्छेदनमविज्ञातार्थावबोधोऽध्यवसिताभ्यनुज्ञानमिति। समायवादः संवादः। तद्विद्यैश्च सह संवाद इत्यविभक्तार्थं वचनं विभज्यते॥

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ॥ ४८ ॥

एतन्निगदेनैव नीतार्थमिति यदिदं मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥४९॥

तमुपेयादिति वर्त्तते परतः प्रज्ञामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन स्वपक्षमनवस्थापयन् स्वदर्शनम् परिशोधयेदिति। अन्योऽन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि स्वपक्षरागेण चैके न्यायमतिवर्त्तन्ते तत्र॥

तत्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे वीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥

अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामेतदिति। विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य, ताभ्यां विगृह्य कथनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरुद्ध्येति विजिगीषया न तत्त्वबुभुत्सयेति। तदेतद्विद्यापालनार्थं न लाभपूजाख्यात्यर्थमिति॥

इति वात्स्यायनीये न्यायभाष्ये चतुर्थोऽध्यायस्य द्वितीयमाह्निकम्॥ ०॥

समाप्तश्चायं चतुर्थोऽध्यायः॥ ४॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति संक्षेपेणोक्तं तद्विस्तरेण विभज्यते, ताः खल्विमा जातयः स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः॥

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः॥ १॥

साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेततः साधर्म्यसमः अविशेषं तत्र तत्रोदाहरिष्यामः। एवं वैधर्म्यसमप्रभृतयोऽपि निर्वक्तव्याः। लक्षणन्तु॥

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्म्मविपर्य्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ॥ २॥

साधर्म्येणोपसंहारे साध्यधर्मविपर्य्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेततः साधर्म्यसमः प्रतिषेधः। निदर्शनम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति, एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वात् विभु चाकाशं निष्क्रियञ्च तथा चात्मा तस्मान्निष्क्रिय इति, न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यम् न पुनरक्रियसाधर्म्यान्निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति, अथ वैधर्म्यसमः। क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टो न च तथात्मा तस्मान्न लोष्टवत् क्रियावानिति। न चास्ति विशेषहेतुः। क्रियावत्साधर्म्यात् क्रियावता भवितव्यम् न पुनः क्रियावद्वैधर्म्यादक्रियेणेति। विशेषहेत्वभावाद्वैधर्म्यसमः। वैधर्म्येण चोपसंहारे निष्क्रियः आत्मा विभुत्वात् क्रियावद्द्रव्यमविभ दृष्टम्, यथा लोष्टः न च तथात्मा तस्मान्निष्क्रिय इति वैधर्म्येण प्रत्यवस्थानम् निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टम् न तथात्मा तस्मान्न निष्क्रिय इति न चास्ति विशेषहेतुः, क्रियावद्वैधर्म्यान्निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति। विशेषहेत्वभावाद्वैधर्म्यसमः, क्रियावान् लोष्टः क्रियाहेतुगुणयुक्तो दृष्टस्तथा चात्मा तस्मात् क्रियावानिति न चास्ति विशेषहेतुः। क्रियावद्वैधर्म्यान्निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात् साधर्म्यसमः अनयोरुत्तरम्॥

गोत्वाद्गोसिद्धिवत् तत्सिद्धिः॥ ३॥

साधर्म्यमात्रेण वैधर्म्यमात्रेण च साध्यसाधने प्रतिज्ञायमाने स्यादव्यवस्था, सा तु धर्मविशेषे नोपपद्यते गोसाधर्म्यात् गोत्वाज्जातिविशेषाद्गौः सिद्ध्यति न तु सास्नादिसम्बन्धात्, अश्वादिवैधर्म्याद्गोत्वादेव न गौः सिद्ध्यति न गुणादिभेदात् तच्चैतत्कृतव्यवस्थानमवयवप्रकरणे प्रमाणानामभिसम्बन्धाच्चैकार्थकारित्वं समानं वाक्य इति हेत्वाभासाश्रया खल्वियमव्यवस्थेति॥

साध्यदृष्टान्तयोर्धर्म्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टान्तधर्मं साध्येन समासञ्जन्नुत्कर्षसमः। यदि क्रियाहेतुगुणयोगाल्लोष्टवत् क्रियावानेवात्मा लोष्टवदेव स्पर्शवानपि प्राप्नोति, अथ न स्पर्शवान् लोष्टवत् क्रियावानपि न प्राप्नोति विपर्य्यये वा विशेषो वक्तव्य इति साध्ये धर्माभावं दृष्टान्तात् प्रसजतोऽपकर्षसमः, लोष्टः खलु क्रियावानविभुर्दृष्टः काममात्मापि क्रियावानविभुरस्तु विपर्य्यये वा विशेषो वक्तव्य इति। ख्यापनीयो वर्ण्यो विपर्य्ययादवर्ण्यः। तावेतौ साध्यदृष्टान्तधर्म्मौ विपर्य्ययस्यतौ वर्ण्यावर्ण्यसमौ भवतः, साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्म्मविकल्पं प्रसजतो विकल्पसमः। क्रियाहेतुगुणयुक्तं किञ्चिद्गुरु यथा लोष्टः किञ्चिल्लघु यथा वायुः एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः किञ्चिदक्रियम् यथात्मा विशेषो वा वाच्य इति हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः। तं दृष्टान्ते प्रसजतः साध्यसमः। यदि यथा लोष्टस्तथात्मा प्राप्तस्तर्हि यथात्मा तथा लोष्ट इति साध्यश्चायमात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः। अथ नैवं न तर्हि यथा लोष्टस्तथात्मा एतेषामुत्तरम्॥

किञ्चित्साधर्म्म्यादुपसंहारसिद्धेर्वैधर्म्म्यादप्रतिषेधः॥५॥

अलभ्यः सिद्धस्य निह्नवः सिद्धञ्च किञ्चित्साधर्म्यादुपमानं यथा गौस्तथा गवय इति। तत्र न लभ्यो गोगवययोर्धर्मविकल्पश्चोदयितुम्। एवं साधके धर्मे दृष्टान्तादिसामर्थ्ययुक्ते न लभ्यः साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैधर्म्यात् प्रतिषेधो वक्तुमिति॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः॥६॥

यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं तेनाविपरीतोऽर्थोऽतिदिश्यते प्रज्ञापनार्थमेवं साध्यातिदेशाद्दृष्टान्त उपपद्यमाने साध्यत्वमनुपपन्नमिति॥

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या अविशिष्टत्वादप्राप्त्या असाधकत्वाच्च प्राप्त्यप्राप्तिसमौ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा, न तावत्प्राप्य, प्राप्त्यामविशिष्टत्वादसाधकः। द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा। अप्राप्य साधकं न भवति नाप्राप्तः प्रदीपः प्रकाशयतीति प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः। अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः। अनयोरुत्तरम्॥

घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः॥ ८॥

उभयथा खल्वयुक्तः प्रतिषेधः, कर्तृकरणाधिकरणानि प्राप्य मृदं घटादिकार्य्यं निष्पादयन्ति अभिचाराच्च पीडने सति दृष्टमप्राप्य साधकत्वमिति॥

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ॥ ९॥

साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गे प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः क्रियाहेतुगुणयोगी क्रियावान् लोष्ट इति हेतुर्नापदिश्यते न च हेतुमन्तरेण सिद्धिरस्तीति प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः। क्रियावानात्मा क्रियाहेतुगुणयोगात् लोष्टवदित्युक्ते प्रतिदृष्टान्त उपादीयते क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियमिति कः पुनराकाशस्य क्रियाहेतुर्गुणो वायुना संयोगः संस्कारापेक्षः वायुवनस्पतिसंयोगवदिति, अनयोरुत्तरम्॥

प्रदीपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः॥ १०॥

इदं तावदयं पृष्टो वक्तुमर्हति अथ के प्रदीपमुपाददते किमर्थं वेति दिदृक्षमाणदृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणः प्रदीपान्तरं कस्मान्नोपाददते, अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः, तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम् अथ दृष्टान्तः किमर्थमुच्यत इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रज्ञातस्य ज्ञापनार्थमिति, अथ दृष्टान्ते कारणापदेशः, किमर्थं दृश्यते यदि प्रज्ञापनार्थम् प्रज्ञातो दृष्टान्तः, स खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति तत्प्रज्ञानार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम्। अथ प्रतिदृष्टान्तसमस्योत्तरम् ॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरपदिश्यते अनेन प्रकारेण प्रतिदृष्टान्तः साधकः न दृष्टान्त इति एवं प्रतिदृष्टान्तहेतुत्वेनाहेतुर्दृष्टान्त इत्युपपद्यते स च कथमहेतुर्नस्याद्यद्यप्रतिषिद्धः साधकः स्यादिति ॥

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते अपर आह प्रागुत्पत्तेरनुत्पन्ने शब्दे प्रयत्नानन्तरीयकत्वमनित्यत्वकारणं नास्ति तदभावान्नित्यत्वं प्राप्तं नित्यस्य चोत्पत्तिर्नास्ति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः अस्योत्तरम् ॥

तथाभावादुत्पन्नस्यकारणोपपत्तेर्नकारणप्रतिषेधः।१३

तथा भावादुत्पन्नस्येति उत्पन्नः खल्वयं शब्द इति भवति प्रागुत्पत्तेः शब्द एव नास्ति उत्पन्नस्य शब्दभावात् शब्दस्य सतः प्रयत्नानन्तरीयकत्वमनित्यकारणमुपपद्यते कारणोपपत्तेरयुक्तोऽयं दोषः प्रागुत्पत्तेः कारणाभावादिति ॥

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥ १४ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वमस्ति च घटेनानित्येन। अतो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति। अस्योत्तरम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयोऽत्यन्तसंशयप्रसङ्गो नित्यत्वान्नाभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥

विशेषाद्वैधर्म्यादवधार्यमाणेऽर्थे पुरुष इति न स्थाणुपुरुषसाधर्म्यात् संशयोऽवकाशं लभते एवं वैधर्म्याद्विशेषात्प्रयत्नानन्तरीयकत्वादवधार्यमाणे शब्दस्यानित्यत्वे नित्यानित्यसाधर्म्यात् संशयोऽवकाशं न लभते, यदि वै लभेत ततः स्थाणुपुरुषसाधर्म्यानुच्छेदादत्यन्तं संशयः स्यात् गृह्यमाणे च विशेषे नित्यसाधर्म्यं संशयहेतुरिति नाभ्युपगम्यते न हि गृह्यमाणे पुरुषस्य विशेषे स्थाणुपुरुषसाधर्म्यं संशयहेतुर्भवति ॥

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥१६

उभयेन नित्येन चानित्येन साधर्म्यात् पक्षप्रतिपक्षयोः प्रवृत्तिः प्रक्रिया, अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद्घटवदित्येकः पक्षं प्रवर्त्तयति। द्वितीयश्च नित्यसाधर्म्यात् एवञ्च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानेन हेतौ तदिदं प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः, समानञ्चैतद्वैधर्म्येऽपि उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति। अस्योत्तरम् ॥

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ १७ ॥

उभयसाधर्म्यात् प्रक्रियासिद्धिं ब्रुवता प्रतिपक्षात् प्रक्रियासिद्धिरुक्ता भवति यद्युभयसाधर्म्यं तत्रैकतरः प्रतिपक्ष इत्येवं सत्युपपन्नः प्रतिपक्षो भवति प्रतिपक्षोपपत्तेरनुपपन्नः प्रतिषेधो यतः प्रतिपक्षोपपत्तिः प्रतिषेधोपपत्तिश्चेति विप्रतिषिद्धमिति तत्त्वानवधारणाच्च प्रक्रियासिद्धिर्विपर्य्यये प्रकरणावसानात् तत्त्वावधारणे ह्यवसितं प्रकरणं भवतीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥

हेतुः साधनं तत्साध्यात् पूर्वम् पश्चात् सह वा भवेत् यदि पूर्वं साधनमसति साध्ये कस्य साधनम्। अथ पश्चात् असति साधने कस्येदं साध्यम्। अथ युगपत्साध्यसाधने द्वयोर्विद्यमानयोः किं कस्य साधनं किं कस्य साध्यमिति हेतुना न विशिष्यते अहेतुना साधर्म्यात् प्रत्यवस्थानमहेतुसमः। अस्योत्तरम् ॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

न त्रैकाल्यासिद्धिः कस्मात् हेतुतः साध्यसिद्धेः। निर्वर्त्तनीयस्य निर्वृत्तिः विज्ञेयस्य विज्ञानम् उभयं कारणतो दृश्यते सोऽयं महान् प्रत्यक्षविषय उदाहरणमिति। यत्तु खल्वुक्तमसति साध्ये कस्य साधनमिति यत्तु निर्वर्त्त्यते यच्च विज्ञाप्यते तस्येति।

प्रतिषेधानुपपत्तेः प्रतिषेद्धव्याप्रतिषेधः ॥२०॥

पूर्वं पश्चाद्युगपद्वा प्रतिषेध इति नोपपद्यते प्रतिषेधानुपपत्तेः स्थापनाहेतुः सिद्ध इति ॥

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥२१

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद्घटवदिति स्थापिते पक्षे अर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः, यदि प्रयत्नानन्तरीयकत्वादनित्यसाधर्म्यादनित्यः शब्दः इत्यर्थादापद्यते नित्यसाधर्म्यान्नित्य इति अस्ति त्वस्य नित्येन साधर्म्यमस्पर्शत्वमिति। अस्योत्तरम् ॥

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

अनुपपाद्य सामर्थ्यमनुक्तमर्थादापद्यत इति ब्रुवतः पक्षहानेरुपपत्तिरनुक्तत्वात् अनित्यपक्षसिद्धावर्थादापन्नमनित्यपक्षस्य हानिरिति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनैकान्तिकत्वाच्चार्थापत्तेः उभयपक्षसमा चेयमर्थापत्तिः, यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दः अर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति, न चेयं विपर्ययमात्रादेकान्तेनार्थापत्तिः, न खलु वै घनस्य ग्राव्णः पतनमित्यर्थादापद्यते द्रवाणामपां पतनाभाव इति ॥

एकधर्म्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥

एको धर्मः प्रयत्नानन्तरीयकत्वं शब्दघटयोरुपपद्यत इत्यविशेषे उभयोरनित्यत्वे सर्वस्याविशेषः प्रसज्यते कथम् सद्भावोपपत्तेः एको धर्मः सद्भावः सर्वस्योपपद्यते सद्भावोपपत्तेः सर्व्वाविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमः। अस्योत्तरम् ॥

क्वचिद्धर्म्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः ॥ २४ ॥

यथा साध्यदृष्टान्तयोरेकधर्मस्य प्रयत्नानन्तरीयकत्वस्योपपत्तेरनित्यत्वधर्म्मान्तरमविशेषेण, एवं सर्वभावानां सद्भावोपपत्तिनिमित्तं धर्म्मान्तरमस्ति येनाविशेषः स्यात् अथ मतमनित्यत्वमेव धर्म्मान्तरं सद्भावोपपत्तिनिमित्तं भावानां सर्वत्र स्यादित्येवं खलु वै कल्प्यमाने अनित्याः सर्वे भावाः सद्भावोपपत्तेरितिपक्षः प्राप्नोति तत्र प्रतिज्ञार्थव्यतिरिक्तमन्यदुदाहरणं नास्ति अनुदाहरणश्च हेतुर्नास्तीति प्रतिज्ञैकदेशस्य च उदाहरणत्वमनुपपन्नं न हि साध्यमुदाहरणं भवति ततश्च नित्यानित्यभावादनित्यनित्यत्वानुपपत्तिः तस्मात् सद्भावोपपत्तेः सर्व्वाविशेषप्रसङ्ग इति निरभिधेयमेतद्वाक्यमिति सर्वभावानां सद्भावोपपत्तेरनित्यत्वमिति ब्रुवताऽनुज्ञातं शब्दस्यानित्यत्वं तत्रानुपपन्नः प्रतिषेध इति ॥

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यनित्यत्वकारणमुपपद्यते शब्दस्येत्यनित्यः शब्दो नित्यत्वकारणमप्युपपद्यते अस्यास्पर्शत्वमिति नित्यत्वमप्युपपद्यते उभयस्यानित्यत्वस्य नित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः । अस्योत्तरम् ॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

उभयकारणोपपत्तेरिति ब्रुवता नानित्यत्वकारणोपपत्तेरनित्यत्वं प्रतिषिध्यते यदि प्रतिषिध्यते नोभयकारणोपपत्तिः स्यात् उभयकारणोपपत्तिवचनादनित्यत्वकारणोपपत्तिरभ्यनुज्ञायते अभ्यनुज्ञानादनुपपन्नः प्रतिषेधः, व्याघातात् प्रतिषेध इति चेत् समानो व्याघातः एकस्य नित्यत्वानित्यत्वप्रसङ्गं व्याहतम् ब्रुवतोक्तः प्रतिषेधः इति चेत् स्वपक्षपरपक्षयोः समानो व्याघातः स च नैकतरस्य साधक इति ॥

निर्द्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः २७

निर्द्दिष्टप्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावेऽपि वायुनोदनाद्वृक्षशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते निर्द्दिष्टस्य साधनस्याभावेऽपि साध्यधर्म्मोपलब्ध्या प्रत्यवस्थानमुपलब्धिसमः । अस्योत्तरम् ॥

कारणान्तरादपि तद्धर्म्मोपपत्तेरप्रतिषेधः २८

प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते न कार्य्यस्य कारणनियमः यदि च कारणान्तरादप्युपपद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते किमत्र प्रतिषिध्यत इति न प्रागुच्चारणादविद्यमानस्य शब्दस्यानुपलब्धिः कस्मात् आवरणाद्यनुपलब्धेः, यथा विद्यमानस्योदकादेरर्थस्यावरणादेरनुपलब्धिः नैवं शब्दस्याग्रहणकारणेनावरणादिनानुपलब्धिः गृह्येत चैतदस्याग्रहणकारणमुदकादिवन्न गृह्यते, तस्मादुदकादिविपरीतः शब्दोऽनुपलभ्यमान इति ॥

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषामावरणादीनामनुपलब्धिर्नोपलभ्यते अनुपलम्भान्नास्तीत्यभावोऽस्याः सिद्ध्यति, अभावसिद्धौ हेत्वभावात्तद्विपरीतमस्तित्वमावरणादीनामवधार्य्यते तद्विपरीतोपपत्तेर्यत् प्रतिज्ञातं न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धिरित्येतन्न सिद्ध्यति सोऽयं हेतुरावरणाद्यनुपलब्धेरित्यावरणादिषु चावरणाद्यनुपलब्धौ च समयानुपलब्ध्या प्रत्यवस्थितोऽनुपलब्धिसमो भवति। अस्योत्तरम् ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥

आवरणाद्यनुपलब्धिर्नास्त्यनुपलम्भादित्यहेतुः कस्मात् अनुपलम्भात्मकत्वादनुपलब्धेः, उपलम्भाभावमात्रत्वादनुपलब्धेः, यदस्ति तदुपलब्धेर्विषयः उपलब्ध्या तदस्तीति प्रतिज्ञायते, यन्नास्ति तदनुपलब्धेर्विषयः अनुपलभ्यमानं नास्तीति प्रतिज्ञायते। सोऽयमावरणाद्यनुपलब्धेरनुपलम्भाभावोऽनुपलब्धौ स्वविषये प्रवर्त्तमानो न स्वविषयं प्रतिषेधति। अप्रतिषिद्धा चावरणाद्यनुपलब्धिर्हेतुत्वाय कल्पते, आवरणादीनि तु विद्यमानत्वादुपलब्धेर्विषयास्तेषामुपलब्ध्या भवितव्यम्, यत्तानि नोपलभ्यन्ते तदुपलब्धेः स्वविषयप्रतिपादिकाया अभावादनुपलम्भादनुपलब्धेर्विषयो गम्यते न सन्त्यावरणादीनि शब्दस्याग्रहणकारणानीति अनुपलम्भादनुपलब्धिः सिद्ध्यति, विषयः स तस्येति ॥

ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥

अहेतुरिति वर्त्तते। शारीरे शरीरिणां ज्ञानविकल्पानां भावाभावौ संवेदनीयौ, अस्ति मे संशयज्ञानं नास्ति मे संशयज्ञानमिति, एवं प्रत्यक्षानुमानागमस्मृतिज्ञानेषु सेयमावरणाद्यनुपलब्धिरुपलब्ध्यभावः स्वसंवेद्यो नास्ति मे शब्दस्यावरणाद्यनुपलब्धिरिति नोपलभ्यन्ते शब्दस्याग्रहणकारणान्यावरणादीनीति, तत्र यदुक्तं तदनुपलब्धेरनुपलम्भादभावसिद्धिरिति एतन्नोपपद्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधर्म्यात्तुल्यधर्म्मोपपत्तेः सर्व्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥

अनित्येन घटेन साधर्म्यादनित्यः शब्द इति ब्रुवतोऽस्ति घटेनानित्येन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वमनिष्टं सम्पद्यते, सोऽयमनित्यत्वेन प्रत्यवस्थानादनित्यसम इति । अस्योत्तरम् ॥

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ॥ ३३ ॥

प्रतिज्ञाद्यवयवयुक्तं वाक्यं पक्षनिर्वर्त्तकं प्रतिपक्षलक्षणं प्रतिषेधस्तस्य पक्षेण प्रतिषेध्येन साधर्म्यं प्रतिज्ञादियोगः तद्यद्यनित्यसाधर्म्यादनित्यत्वस्यासिद्धिः साधर्म्यादसिद्धेः प्रतिषेधस्याप्यसिद्धिः प्रतिषेध्येन साधर्म्यादिति ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः ॥३४ ॥

दृष्टान्ते यः खलु धर्म्मः साध्यसाधनभावेन प्रज्ञायते स हेतुत्वेनाभिधीयते स चोभयथा भवति, केनचित् समानः कुतश्चिद्विशिष्टः, सामान्यात् साधर्म्यम् विशेषाच्च वैधर्म्यम् एवं साधर्म्यविशेषो हेतुः नाविशेषेण साधर्म्यमात्रं वैधर्म्यमात्रं वा, साधर्म्यमात्रं वैधर्म्यमात्रं चाश्रित्य भवानाह । साधर्म्यात्तुल्यधर्म्मोपपत्तेः सर्व्वानित्यत्वप्रसङ्गादनित्यसम इति एतदयुक्तमिति अविशेषसमप्रतिषेधे च यदुक्तं तदपि वेदितव्यम् ॥

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनित्यः शब्द इति प्रतिज्ञायते तदनित्यत्वं किं शब्दे नित्यमथानित्यम्, यदि तावत् सदा भवति धर्म्मस्य सदाभावाद्धर्म्मिणोऽपि सदाभाव इति नित्यः शब्द इति। अथ न सर्वदा भवति अनित्यत्वस्याभावान्नित्यः शब्दः। एवं नित्यत्वेन प्रत्यवस्थानान्नित्यसमः। अस्योत्तरम्॥

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः॥ ३६॥

प्रतिषेध्ये शब्दे नित्यमनित्यत्वस्य भावादित्युच्यमानेऽनुज्ञातं शब्दस्यानित्यत्वम्, अनित्यत्वोपपत्तेश्च नानित्यः शब्द इति प्रतिषेधो नोपपद्यते, अथ नाभ्युपगम्यते नित्यमनित्यत्वस्य भावादिति हेतुर्न भवतीति हेत्वभावात्प्रतिषेधानुपपत्तिरिति, उत्पन्नस्य निरोधादभावः शब्दस्यानित्यत्वं तत्र परिप्रश्नानुपपत्तिः, सोऽयं प्रश्नः तदा नित्यत्वं किं शब्दे सर्वदा भवति अथ नेत्यनुपपन्नः, कस्मात् उत्पन्नस्य यो निरोधादभावः शब्दस्य तदनित्यत्वम्, एवञ्च सत्यधिकरणाधेयविभागो व्याघातान्नास्तीति नित्यानित्यविरोधाच्च नित्यत्वमनित्यत्वं चैकस्य धर्मिणो धर्मौ विरुध्येते न सम्भवतः तत्र यदुक्तम् नित्यमनित्यत्वस्य भावान्नित्य एव तदवर्त्तमानार्थमुक्तमिति॥

प्रयत्नकार्य्यानेकत्वात्कार्य्यसमः॥ ३७॥

प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति, यस्य प्रयत्नानन्तरमात्मलाभस्तत् खल्वभूत्वा भवति यथा घटादिकार्यमनित्यमिति च भूत्वा न भवतीत्येतद्विज्ञायते। एवमवस्थिते प्रयत्नकार्य्यानेकत्वादिति प्रतिषेध उच्यते। प्रयत्नानन्तरमात्मलाभश्च दृष्टो घटादीनाम् व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानाम्, तत् किं प्रयत्नानन्तरमात्मलाभः शब्दस्य आहोऽभिव्यक्तिरिति विशेषोनास्तिः कार्य्याविशेषेण प्रत्यवस्थनं कार्य्यसम. अस्योत्तरम्॥

कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः॥ ३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सति कार्य्यान्यत्वे अनुपलब्धिकारणोपपत्तेः प्रयत्नस्याहेतुत्वं शब्दस्याभिव्यक्तौ यत्र प्रयत्नानन्तरमभिव्यक्तिस्तत्रानुपलब्धिः कारणं व्यवधानमुपपद्यते। व्यवधानापोहाच्च प्रयत्नानन्तरभाविनोऽर्थस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति नतु शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यते, यस्य प्रयत्नानन्तरमपोहाच्छब्दस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति हेतोश्चेदनैकान्तिकत्वमुपपाद्यते अनैकान्तिकत्वादसाधकः स्यात् इति, यदि चानैकान्तिकत्वादसाधकम्॥

प्रतिषेधेऽपि समानो दोषः॥ ३९॥

प्रतिषेधोऽप्यनैकान्तिकः किञ्चित् प्रतिषेधति किञ्चिन्नेति अनैकान्तिकत्वादसाधक इति, अथ वा शब्दस्यानित्यत्वपक्षे प्रयत्नानन्तरमुत्पादे नाभिव्यक्तिरिति विशेषहेत्वभावः, नित्यत्वपक्षेऽपि प्रयत्नानन्तरमभिव्यक्तिर्नोत्पाद इति विशेषहेत्वभावः, सोऽयमुभयपक्षसमो विशेषहेत्वभाव इत्युभयमप्यनैकान्तिकमिति॥

सर्वत्रैवम्॥ ४०॥

सर्वेषु साधर्म्यप्रभृतिषु प्रतिषेधहेतुषु यत्र विशेषो दृश्यते तत्रोभयोः पक्षयोः समः प्रसज्यत इति॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः॥ ४१॥

योऽयं प्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वमापाद्यते सोऽयं प्रतिषेधस्य प्रतिषेधेऽपि समानः, तत्रानित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति साधनवादिनः स्थापना प्रथमः पक्षः, प्रयत्नकार्य्यानेकत्वात् कार्य्यसम इति दूषणवादिनः प्रतिषेधहेतुना द्वितीयः पक्षः, स च प्रतिषेध इत्युच्यते, तस्मिन् प्रतिषेधविप्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वम् चतुर्थः पक्षः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गोमतानुज्ञा ॥ ४२ ॥

प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तदुद्धारमनुक्त्वा अनुज्ञाय प्रतिषेधविप्रतिषेधे तृतीये पक्षे समानमनेकान्तिकत्वमिति समानं दूषणं प्रसजतोदूषणवादिनो मतानुज्ञा प्रसज्यत इति पञ्चमः पक्षः ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानोदोष इति ॥ ४३ ॥

स्थापनापक्षे प्रयत्नकार्य्यानेकत्वादिति दोषः स्थापनाहेतुवादिनः स्वपक्षलक्षणो भवति, कस्मात् स्वपक्षसमुत्थत्वात्, सोऽयं स्वपक्षलक्षणं दोषमपेक्षमाणोऽनुद्धृत्यानुज्ञाय प्रतिषेधेऽपि समानो दोष इत्युपपद्यमानं दोषं परपक्ष उपसंहरति इत्थं वानैकान्तिकः प्रतिषेध इति हेतुं निर्द्दिशति तत्र स्वपक्षलक्षणापेक्षयोपपद्यमानदोषोपसंहारे हेतुनिर्द्देशे च सत्यनेन परपक्षोऽभ्युपगतो भवति, कथं कृत्वा यः परेण प्रयत्नकार्य्यानेकत्वादित्यादिनाऽनैकान्तिकदोष उक्तस्तमनुद्धृत्य प्रतिषेधेऽपि समानो दोषो भवति यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधेऽपि समानं दोषं प्रसजतः परपक्षाभ्युपगमात् समानो दोषो भवति, यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधेऽपि समानं दोषं प्रसजतो मतानुज्ञा प्रसज्यत इति, स खल्वयं षष्ठः पक्षः, तत्र खलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमपक्षाः, प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठपक्षाः, तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरविशेषात् पुनरुक्तदोषप्रसङ्गः। चतुर्थपक्षे समानदोषत्वं परस्योच्यते प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष इति, षष्ठेऽपि परपक्षाभ्युपगमात् समानो दोष इति समानदोषत्वमेवोच्यते, नार्थविशेषः कश्चिदस्ति समानस्तृतीयपञ्चमयोः पुनरुक्तदोषप्रसङ्गः, तृतीयपक्षेऽपि प्रतिषेधेऽपि समानो दोषइति समानत्वमभ्युपगम्यते, पञ्चम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षेऽपि प्रतिषेधप्रतिषेधे समानो दोषप्रसङ्गोऽभ्युपगम्यते नार्थविशेषः कश्चिदुच्यतइति, तत्र पञ्चमषष्ठपक्षयोरर्थाविशेषात् पुनरुक्तदोषः, तृतीयचतुर्थयोर्मतानुज्ञा, प्रथमद्वितीययोर्विशेषहेत्वभावइति, षट्पक्ष्यामुभयोरसिद्धिः, कदा षट्पक्षी यदा प्रतिषेधेऽपि समानो दोष इत्येवं प्रवर्त्तते तदोभयोः पक्षयोरसिद्धिः, यदा तु कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेरित्यनेन तृतीयपक्षो युज्यते तदा विशेषहेतुवचनात् प्रयत्नानन्तरमात्मलाभः शब्दस्य नाभिव्यक्तिरिति सिद्धिः प्रथमपक्षो न षट्पक्षी प्रवर्त्तत इति ॥

इति वात्स्यायनीये न्यायभाष्ये पञ्चमाध्यायस्याद्यमाह्निकम् ॥

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति सङ्क्षेपेणोक्तं तदिदानीं विभजनीयम् निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि प्रायेण प्रतिज्ञाद्यवयवाश्रयाणि तत्त्ववादिनमतत्त्ववादिनञ्चाभिसंप्लवन्ते तेषां विभागः ॥

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तानीमानि द्वाविंशतिधा विभज्य लक्ष्यन्ते ॥

प्रतिदृष्टान्तधर्म्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥

साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः, निदर्शनम् ऐन्द्रियकत्वादनित्यः शब्दो घटवदिति कृते अपर आह दृष्टमैन्द्रियकत्वं सामान्ये नित्ये कस्मान्न तथा शब्द इति प्रत्यवस्थिते इदमाह यद्यैन्द्रियकं सामान्यं नित्यं कामं घटो नित्योऽस्त्विति स खल्वयं साधकस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन्निगमनान्तमेव पक्षं जहाति पक्षं जहत् प्रतिज्ञां जहातीत्युच्यते प्रतिज्ञाश्रयत्वात् पक्षस्येति ॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ३ ॥

प्रतिज्ञातार्थोऽनित्यः शब्द ऐन्द्रियकत्वात् घटवदित्युक्ते योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः सामान्यमैन्द्रियकं नित्यमिति तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्प इति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात् सामान्यमैन्द्रियकं सर्व्वगतम् ऐन्द्रियकस्त्वसर्व्वगतो घट इति धर्मविकल्पात् तदर्थं निर्द्देश इति साध्यसिद्ध्यर्थम्, कथम् यथा घटोऽसर्वगत एवं शब्दोऽप्यसर्वगतो घटवदेवानित्य इति, तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा, असर्वगत इति द्वितीया प्रतिज्ञा प्रतिज्ञान्तरम्, तत्कथं निग्रहस्थानमिति, न प्रतिज्ञायाः साधनं प्रतिज्ञान्तरं, किन्तु हेतुदृष्टान्तौ साधनं प्रतिज्ञायाः, तदेतदसाधनोपादानमनर्थकमिति आनर्थक्यान्निग्रहस्थानमिति ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥

गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा, रूपादितोऽर्थान्तरस्यानुपलब्धेरिति हेतुः, सोऽयं प्रतिज्ञाहेत्वोर्विरोधः, कथम् यदि गुणव्यतिरिक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रव्यं रूपादिभ्योऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते, अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः, गुणव्यतिरिक्तं द्रव्यमिति नोपपद्यते, गुणव्यतिरिक्तञ्च द्रव्यं रूपादिभ्यश्चार्थान्तरस्यानुपलब्धिरिति विरुध्यते व्याहन्यते न सम्भवतीति ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ५

अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते परो ब्रूयात् सामान्यमैन्द्रियकं न च अनित्यमेवं शब्दोऽप्यैन्द्रियको न चानित्य इति, एवम्प्रतिषिद्धे पक्षे यदि ब्रूयात् कः पुनराह अनित्यः शब्द इति, सोऽयं प्रतिज्ञातार्थनिह्नवः प्रतिज्ञासन्न्यास इति ॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

निदर्शनम् एकप्रकृतीदं व्यक्तमिति प्रतिज्ञा, कस्माद्धेतोः एकप्रकृतीनां विकाराणां परिमाणात् मृत्पूर्व्वकाणां शरावादीनां दृष्टं परिमाणम्, यावान् प्रकृतेर्व्यूहो भवति तावान् विकार इति, दृष्टञ्च प्रतिविकारं परिमाणम्, अस्ति चेदम्परिमाणं प्रतिव्यक्तम्, तदेकप्रकृतीनां विकाराणां परिमाणात्पश्यामो व्यक्तमिदमेकप्रकृतीति। अस्य व्यभिचारेण प्रत्यवस्थानम्, नानाप्रकृतीनामेकप्रकृतीनाञ्च विकाराणां दृष्टं परिमाणमिति, एवं प्रत्यवस्थिते आह एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनात् सुखदुःखमोहसमन्वितं हीदं व्यक्तं परिमितं गृह्यते तत्र प्रकृत्यन्तररूपसमन्वयाभावे सत्येकप्रकृतित्वमिति, तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रुवतो हेत्वन्तरम्भवति, सति च हेत्वन्तरभावे पूर्व्वस्य हेतोरसाधकत्वान्निग्रहस्थानम्, हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शनो दृष्टान्त उपादीयते नेदं व्यक्तमेकप्रकृति भवति प्रकृत्यन्तरोपादानात्, अथ नोपादीयते दृष्टान्ते हेत्वर्थस्यानिदर्शितस्य साधकभावानुपपत्तेरानर्थक्याद्धेतोरनिवृत्तं निग्रहस्थानमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात् नित्यः शब्दोऽस्पर्शत्वादिति हेतुः, हेतुर्नाम हिनोतेर्धातोस्तुनिप्रत्यये कृदन्तपदम्, पदञ्च नामाख्यातोपसर्गनिपाताः अभिधेयस्य क्रियान्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम, क्रियाकारकसमुदायः, कारकसङ्ख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातम्, धात्वर्थमात्रञ्च कालाभिधानविशिष्टम्,योगेष्वर्थादभिन्नम नरूपानिपाताः उपसृज्यमानाः क्रियावद्योतका उपसर्गा इत्येवमादि, तदर्थान्तरं वेदितव्यमिति ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

यथा नित्यः शब्दः कचटतपाः जबगडदशत्वात् झभञ्घढधष्वदिति एवम्प्रकारं निरर्थकम्, अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद्वर्णाएव क्रमेण निर्दिश्यन्त इति ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

यद्वाक्यं परिषदा प्रतिवादिना च त्रिरभिहितमपि न विज्ञायते श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातमविज्ञातार्थमसामर्थ्यसम्वरणाय प्रयुक्तमिति निग्रहस्थानमिति ॥

पौर्व्वापर्य्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १०

यत्रानेकस्य पदस्य वाक्यस्य वा पौर्व्वापर्य्येणान्वययोगोनास्तीत्यसम्बन्धार्थत्वम् गृह्यते तत्समुदायोऽर्थस्यापायादपार्थकम् । यथा दश दाडिमानि षड़पूपाः कुण्डमजाजिनम्पललपिण्डः । अथ रौरुकमेतत्कुमार्य्याः पाय्यम् तस्याः पिता अप्रतिशीन इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवयवविपर्य्यासवचनमप्राप्तकालम् ॥ ११ ॥

प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः, तत्रावयवविपर्यासेन वचनमप्राप्तकालमसम्बन्धार्थकालं निग्रहस्थानमिति ॥

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानम्, साधनाभावे साध्यासिद्धिरिति ॥

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

एकेन कृतत्वादन्यतरस्यानर्थक्यमिति तदेतन्नियमाभ्युपगमे वेदितव्यमिति ॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४

अन्यत्रानुवादात् शब्दपुनरुक्तमर्थपुनरुक्तं वा, नित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तम्, अर्थपुनरुक्तमनित्यः शब्दो निरोधधर्मको ध्वान इति ॥

अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः॥१५

यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्व्वचनं निगमनमिति ॥

अर्थादापन्नस्य स्वशब्देन पुनर्व्वचनम् ॥ १६ ॥

पुनरुक्तमिति प्रकृतम्, निदर्शनम् उत्पत्तिधर्म्मकत्वादनित्यमित्युक्त्वा अर्थादापन्नस्य योऽभिधायकः शब्दस्तेन स्वशब्देन ब्रूयादनुत्पत्तिधर्म्मकं नित्यमिति । तच्च पुनरुक्तम्वेदितव्यम्, अर्थसम्प्रत्ययार्थे शब्दप्रयोगे प्रतीतः सोऽर्थोऽर्थापत्त्येति ॥

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यनुच्चारणमननुभाषणम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विज्ञातस्य वाक्यार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणन्तदननुभाषणं नाम निग्रहस्थानमिति, अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयात् ॥

अविज्ञातञ्चाज्ञानम् ॥ १८ ॥

विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदविज्ञानन्तदज्ञानं निग्रहस्थानमिति। अयं खल्वविज्ञाय कस्य प्रतिषेधं ब्रूयादिति ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १९ ॥

परपक्षप्रतिषेधः उत्तरम् तद्यदा न प्रतिपद्यते तदा निगृहीतो भवति ॥

कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ २० ॥

यत्र कर्त्तव्यं व्यासज्य कथां व्यवच्छिनत्ति इदं मे करणीयं विद्यते तस्मिन्नवसिते कथयिष्यामीति विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यत इति ॥

स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ॥ २१ ॥

यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्यानुद्धृत्य वदति भवत्पक्षे समानो दोष इति स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञा नाम निग्रहस्थानमापद्यत इति ॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्य्यनुयोज्योपेक्षणम् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्य्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयस्तस्योपेक्षणम् निग्रहस्थानं प्राप्तोऽसीत्यननुयोगः, एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयम्, न खलु निग्रहं प्राप्तः स्वकौपीनं विवृणुयादिति ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २३ ॥

निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽसीति परं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्य इति ॥

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः ॥ २४ ॥

कस्यचिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्य्ययादनियमात् कथां प्रसञ्जयतोऽपसिद्धान्तो वेदितव्यः यथा न सदात्मानञ्जहाति न सतो विनाशो नासदात्मानं लभते नासदुत्पद्यत इति, सिद्धान्तमभ्युपेत्य स्वपक्षं व्यवस्थापयति एकप्रकृतीदं व्यक्तं विकाराणामन्वयदर्शनात् मृदन्वितानां शरावादीनां दृष्टमेकप्रकृतित्वम् तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो दृश्यते तस्मात् समन्वयदर्शनात् सुखादिभिरेकप्रकृतीदं शरीरमिति एवमुक्तवाननुयुज्यते । अथ प्रकृतिविकार इति कथं लक्षितव्यमिति । यस्यावस्थितस्य धर्म्मान्तरनिवृत्तौ धर्म्मान्तरं प्रवर्त्तते सा प्रकृतिः । यच्च धर्म्मान्तरं प्रवर्त्तते स विकार इति, सोऽयं प्रतिज्ञातार्थविपर्य्यासादनियमात् कथां प्रसञ्जयति प्रतिज्ञातं खल्वनेन नासदाविर्भवति सत् तिरोभवतीति । सदसतोश्च तिरोभावाविर्भावमन्तरेण न कस्यचित्प्रवृत्तिः प्रवृत्त्युपरमश्च भवति, मृदि खल्ववस्थितायाम्भविष्यति शरावादिलक्षणं धर्म्मान्तरमिति प्रवृत्तिर्भवति, अभूदिति च प्रवृत्त्युपरमः, तदेतन्मृद्धर्म्माणामपि न स्यात् एवं प्रत्यवस्थितो यदि सतश्चात्महानमसतश्चात्मलाभमभ्युपैति, तदस्यापसिद्धान्तोनिग्रहस्थानम्भवति । अथ नाभ्युपैति पक्षोऽस्य न सिद्ध्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेत्वाभासाश्च यथोक्ताः ॥ २५ ॥

हेत्वाभासाश्च निग्रहस्थानानि किं पुनर्लक्षणान्तरयोगात् हेत्वाभासाः निग्रहस्थानत्वमापन्नाः यथा प्रमाणानि प्रमेयत्वमित्यत आह। यथोक्ता इति। हेत्वाभासलक्षणेनैव निग्रहस्थानभाव इति। त इमे प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्चेति ॥

इति वात्स्यायनीये न्यायभाष्ये पञ्चमाध्यायस्य द्वितीयमाह्निकं समाप्तश्चायं पञ्चमोऽध्यायः ॥ ५ ॥

॥ समाप्तञ्चेदं शास्त्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः ।

न्यायसूत्रवृत्तिः ।

वपुर्लीलालक्ष्मीजितमदनकोटिर्व्रजवधू-
जनानामानन्दं कमपि कमनीयं विरचयन् ।
सकोऽपि प्रेमाणं प्रथयतु मनोमन्दिरचर
स्त्रिलोकीलोकानां सजलजलदश्यामलतनुः ॥१॥
संयुक्तांयुक्तरूपामभिनवनिहितालङ्कारक्तभासा
सन्ध्यापीयूषभानोरतिरुचिरतरां चूर्णयन्तीमभिख्यां
मानव्यामोकनम्रत्रिपुरहरशिरोरम्यभूषाविशेषं
भूयोभव्यं विधातुं चरणनखरुचं भावयामोभवान्याः
यदीयतर्ककिरणैरान्तरध्वान्तसन्ततिम् ।
सन्तस्तरन्तिभास्वन्तमक्षपादं नमामि तम् ॥ २ ॥
अद्वैतं गुरुधर्मयोरिव लसत्क्ष्मामण्डलीमण्डनं
रूपं किञ्चन पौरुषं गिरइव प्रागल्भ्यसम्पादकम्
दाने कर्णमिवावतीर्णमपरं दीने दयादक्षिणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तातं विश्वविसारिचारुयशसं विद्यानिवासं नुमः॥४॥
अलसमतिरपीदं विस्तृतं न्यायशास्त्रं
विरहितबहुयत्नो लीलया वेत्तु विज्ञः।
इति विनिहितचेताः कौशलं कर्त्तुकामो
गुरुचरणरजोऽहं कर्णधारीकरोमि ॥५॥
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।
विदुषामति सूक्ष्मधियाममत्सराणां मुदे भविता॥६॥

प्रयोजनमनभिसन्धाय प्रेक्षावन्तो न प्रवर्त्तन्ते अतः प्रथमं प्रयोजनमभिधानीयं तथा चाहुः सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ सिद्धो ज्ञातोऽर्थः प्रयोजनं यस्य तत्तथा एवं सिद्धसम्बन्धमित्यपि अतस्तत्प्रतिपादनाय भगवानक्षपादः प्रथमं सूत्रयति। अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः प्रमाणादिशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः सम्बन्धः तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रं' तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव सम्बन्ध इति सम्प्रदायविदः,' अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः' यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवस्तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः' तत्र च निर्देशे यथा वचनं विग्रह इति यथाश्रुतभाष्यानुसारिणः' प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति। सम्प्रदायविदस्तु भाष्यस्थवचनपदेन क्वचित्श्रौतं क्वचिदार्थं वचनं गृह्यते' तत्र प्रमाणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमेये च सौत्रं वचनं गृह्यते सप्रयोजनत्वात् तच्च वच्यते ननु दृष्टान्तादावेकवचनं सप्रयोजनं तथाच दृष्टान्ते द्विवचनम् अन्वयव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वच्यमाणत्वात्। संशये सिद्धान्ते छले च बहुवचनं संशये छले च त्रैविध्यस्य सिद्धान्ते चातुर्विध्यस्य वच्यमाणत्वात्; अन्यथा जातिनिग्रहस्थानयोर्बहुवचनं तत्रापि व्याहन्येत एकवचनस्यैव लक्षणसूत्रे सत्त्वादिति वदन्ति। नव्यास्तु सर्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः, नह्यत्र बहुवचनेनैव प्रमाणादीनां बहुत्वं परिच्छिद्यते किन्त्विभविभागेन, नह्येकद्वित्व धवखदिरादौ धवश्च खदिरश्च पलाशश्चेति न विगृह्यते अतएव प्रयोजनस्यैकवचनान्तत्वेऽपि तद्विभागाकरणेऽपि सुखदुःखाभावतत्साधनभेदेन तस्य बहुत्वं न विरुध्यतइति प्राहुः। अत्र च निःश्रेयसे सिद्धे पटादिवत्तत्प्राप्तये न प्रयत्नान्तरमपेक्षितमिति प्रतिपादनायाधिगमपदम्। ननु प्रमाणादयः पदार्थाइति शब्दात् प्रथमसूत्रादेव वा तत्त्वज्ञानं स्यादिति चेन्न तेषां विशिष्य ज्ञानं हि तत्त्वज्ञानं तच्चोद्देशलक्षणपरीक्षाप्रकाशकाच्छास्त्रादेव, शास्त्रं हि विशिष्टानुपूर्वीका पञ्चाध्यायी अध्यायस्त्वाह्निकसमूहः आह्निकन्तु तादृशप्रकरणसमूहः, प्रकरणन्तु तादृशसूत्रसमूहः सूत्रन्तु तादृशवाक्यसमूहः वाक्यन्तु तादृशपदसमूहइति वदन्ति। अत्र समूहशब्देनानेकत्वं विवक्षितं तेनाध्यायादेराह्निकादिद्वयात्मकत्वेऽपि न क्षतिः। अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात्प्रथमसुद्देशः। ततोऽवसरतो बुभुत्सितप्रमेयस्य ततश्च पदार्थव्यवस्थापनस्यन्यायाधीनतया न्याये निरूपणीयेऽभ्यर्हितयोर्न्यायपूर्वाङ्गयोः संशयप्रयोजनयोः तत्राप्यभ्यर्हिततया संशयस्य प्रथमं नच निर्णीतेऽपि मननविधानान्न संशयस्य न्यायाङ्गत्वमिति वाच्यम्। आहार्यसंशयोपगमात् यद्यपि प्रयोजनं न न्यायाङ्गमपि तु तज्ज्ञानं तथापि तदेव निरूपणीयं न तु ज्ञाननिरूपणापेक्षेति। परप्रत्यायने दृष्टान्तस्य मूलत्वादनन्तरं दृष्टान्तस्य दृष्टान्तमूलको न्यायः सिद्धान्तविषय इत्यतोऽनन्तरं सिद्धान्तस्य,ततश्चावसरतः सिद्धान्ताधीनस्य, पञ्चावयवरूपस्य न्यायस्य ततस्तैककार्य्यतया न्यायसहकारिणस्तर्कस्य, ततश्च तर्कजन्यतया निर्णयस्य, ततश्च निर्णयानुकूलत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादस्य, जल्पस्यापि वादकार्य्यकारित्वादनन्तरं जल्पस्य, ततश्च विजयरूपैककार्य्यानुकूलतया वितण्डायाः कथात्रयस्यापि दूषणसापेक्षतयानन्तरं दूषणेषु निरूपणीयेषु वादे देशनीयत्वरूपोत्कर्षवत्त्वाद्धेतुवदाभासमानत्वाच्चादौ हेत्वाभासानां, ततश्च हेत्वाभासोपजीवनेन छलस्य, स्वव्याघातकत्वेन अत्यन्तासदुत्तरत्वात्ततो जातेः कथावसानत्वेनार्थादनन्तरं निग्रहस्थानानामिति, अत्र च प्रमेयान्तःपातिबुद्धिरूपस्यापि संशयादेर्निरनुयोज्यानुयोगरूपनिग्रहस्थानान्तःपातिनोश्छलजात्योश्च प्रकारभेदेन प्रतिपादनं शिष्यबुद्धिवैशद्यार्थमस्तु निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनन्तु जानाति भगवानक्षपाद एव । भाष्ये तु वादे देशनीयतया हेत्वाभासानां पृथगुपन्यास इत्युक्तम् अत्र वार्त्तिकं, यदि वादे देशनीयत्वात् पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे देशनीयत्वात्पृथगभिधानं स्यात्, यदि पृथगभिधानाद्वादे देशनीयत्वं तदा संशयादीनामपि वादे देशनीयत्वं स्यात् । तस्मादान्वीक्षिकीत्रयीवार्त्तादण्डनीतिरूपविद्याप्रस्थानभेदज्ञापनार्थं संशयादेर्हेत्वाभासस्य च पृथग्वचनमिति तदप्यसत् निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणेन प्रस्थानभेदसम्भवात् । वयन्तु हेत्वाभासानां न निग्रहस्थानत्वं तथा सति सर्वत्र हेत्वाभाससत्त्वात् सर्वस्यैव निगृहीतत्वापत्तेः । तस्मात् हेत्वाभासप्रयोगो निग्रहस्थानं तद्विभाजकसूत्रस्थहेत्वाभासपदञ्च तत्प्रयोगपरं, तत्र च प्रयोगस्य न लक्षणमपेक्षणीयं अपि तु हेत्वाभासानामित्यत उक्तं हेत्वाभासाश्च यथोक्ता इति चरमसूत्रं, न च हेत्वाभासस्यावच्छेदकप्रवेशादेव पृथङ्निरूपणापेक्षेति वाच्यं तथा सति प्रमाणतर्कसाधनोपालम्भ इति वादाद्यवच्छेदकप्रमाणादेरपि पृथङ्निरूपणापत्तेरिति युक्तमुत्पश्यामः । अत्र केचित् सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकर्त्ता तात्पर्य्यं वर्णयन्ति, तदसत् कृतस्याप्यनिबन्धनसम्भवात् विघ्नाभावनिर्णयेनाकरणसम्भवाच्च वयन्तु प्रमाणं प्रमाणनिलय इति भगवन्नामगणान्तःपातिप्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः, अत्र च उद्देशलक्षणपरीक्षाणां पूर्वपूर्वसापेक्षतया प्रथमउद्देशोऽनन्तरं लक्षणं प्रसङ्गाच्छलपरीक्षेति सोद्देशपदार्थलक्षणछलपरीक्षा प्रथमाध्यायार्थः तत्र च सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः, तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च स योजनाभिधेयप्रतिपादकं प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणं, ततः प्रमाणलक्षणप्रकरणं ततः प्रमेयलक्षणप्रकरणं ततो न्यायपूर्व्वाङ्गप्रकरणं ततोन्यायसिद्धान्तप्रकरणं ततोन्यायस्वरूपप्रकरणं ततो न्यायोत्तराङ्गप्रकरणमिति प्रथमाह्निके सप्तप्रकरणानि। श्रवणादनु पश्चादीक्षा अन्वीक्षा उन्नयनन्तन्निर्वाहिका सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियते तथा च "न्यायो मीमांसा धर्मशास्त्राणीति,, स्मृतिः, पुराणन्यायमीमांसेत्यादि स्मृतिः। मीमांसा न्यायतर्कश्च उपाङ्गः परिकीर्त्तित इति पुराणम्। त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्। आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकत इति मनुः, तथा यस्तर्केणानुसन्धत्ते स धर्मं वेदनेतर इत्यादि मोक्षधर्मे तत्रोपनिषदं तात! परिशेषन्तु पार्थिव!। मथ्नामि मनसा तात! दृष्ट्वा चान्वीक्षिकीं परामित्युपनिषदर्थस्यान्वीक्षिक्यनुसारी प्राह्य इत्युक्तमिति ॥ १ ॥

ननु तत्त्वज्ञानस्य न साक्षादेव निःश्रेयसहेतुत्वं निःश्रेयसं तावद्द्विविधं परापरभेदात् तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव तदप्यवधारितात्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धकर्मोपभुञ्जानस्य परन्तु क्रमेण, तत्र क्रमप्रदिपादनायेदं सूत्रमिति दुःखादीनां मध्ये यदुत्तरोत्तरं तेष मपाये तदनन्तरस्य तदव्यवहितस्य पूर्वपूर्वस्यापायादपवर्गः प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः दण्डाभावाद्घटाभाव इति वत् स्वरूपसम्बन्धविशेष एव तत् तदयमर्थः तत्त्वज्ञानेन विरोधितयापहृते मिथ्याज्ञाने कारणाभावाच्च निवृत्ते रागद्वेषात्मके दोषे तदभावाच्च प्रवृत्तेर्धर्म्माधर्म्मात्मिकाया अनुत्पत्तौ तदभावाच्च जन्मनोविशिष्टशरीरसम्बन्धस्याभावे दुःखाभावादपवर्गः। यद्यपि ज्ञानिनोऽपि रागादयस्तिष्ठन्ति तथाप्युत्कटरागाद्यभावे तात्पर्यम्। यद्यपि दोषाणां न धर्म्मादिजनकत्वं व्यभिचारात्तथापि तत्तद्दोषाणां तत्तद्धर्म्मादिहेतुत्वाद्दोषाणये धर्म्माद्यपायः वस्तुतोविनापीच्छां गङ्गाजलसंयोगादितो धर्मादिसम्भवाद्व्यभिचारः तस्मात् मिथ्याज्ञानजवासनैवात्र दोषः, तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानजवासनातो वा नाश इत्याशय इत्यपि वदन्ति। यद्यपि दुःखापायान्नापवर्गः किन्तु स एव सः तथा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमेद एव तत्र पञ्चम्यर्थः, अपवर्गपदं वा तद्व्यवहारपरम् अनन्तर-पदेन जन्मान्तरमेव परामृश्यत इति तु न व्याख्यानं दुःखपदवैयर्थ्या-पत्तेः दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्प्यत इत्याशयेनेदमित्यपि कश्चित् ॥ २ ॥

इति सूत्रवृत्तौ सप्रयोजनाभिधेयप्रकरणम्।

अथ यथोद्देशं लक्षणस्यापेक्षितत्वात् प्रथमोद्दिष्टप्रमाणं लक्षयति विभजते च। अत्र तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टज्ञानं प्रशब्दविशिष्टेन माधातुना प्रत्याय्यते तत्करणत्वं प्रमाणत्वं ज्ञानं चात्रानुभवो विवक्षित-स्तेन स्मृतिकरणे नातिव्याप्तिः लक्षितानां प्रमाणानां विभागः प्रत्यक्षानु-मानोपमानशब्दा इति विभागस्योद्देश एवान्तर्भूतत्वादयं विशेषोद्देशः॥ प्रत्येकलक्षणन्तु वक्ष्यते। इति त्रिसूत्री वृत्तिः समाप्ता ॥ ३ ॥

अथ विभक्तानि यथाक्रमं लक्षयितुमारभते। अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य प्रस्तुतत्वाच्च करण-लक्षणस्य प्रमितिलक्षणं यद्यप्यनुचितं तथापि यत इत्यध्याहारेण प्रत्यक्ष-प्रमाकरणलक्षणं वाच्यं तदेकदेशप्रमास्वरूपे ज्ञाते तत्करणत्वं सुज्ञेय मित्याशयेन वा सङ्गमनीयम्। आत्ममनःसंयोगजन्यसुखादिवारणाय ज्ञानमिति यद्यपि तज्जन्यत्वात् ज्ञानमात्रेऽतिव्याप्तिरीश्वरप्रत्यक्षे चा-व्याप्तिस्तथापि साक्षात्करोमीत्यनुव्यवसायसिद्धसाक्षात्त्वजात्यवच्छिन्नं ज्ञा-नमित्यन्तस्य तात्पर्यं, यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणं इन्द्रियार्थसन्निकर्षातिरिक्तानुत्पन्नं अतिरिक्तं चात्र ज्ञानं तेन ज्ञाना-करणकमित्यर्थः, भ्रमवारकमव्यभिचारीति भ्रमभिन्नमित्यर्थः, इद-ञ्चांशिकभ्रमस्यालक्ष्यत्वेन लक्ष्यत्वे तु तद्वति तत्प्रकारकत्वं निर्विकल्पकस्य लक्ष्यत्वे तदभाववति तदप्रकारकत्वमर्थः तस्य विभागः अव्यपदेश्यं व्यवसायात्मकमिति निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमि-त्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुमानं लक्षयति विभजते च । आनन्तर्य्यबोधकाथशब्दो हेतुहेतु-मद्भावसङ्गतिसूचनाय' तत्पूर्वकं प्रत्यक्षपूर्वकं' प्रत्यक्षं प्रत्यक्षविशेषो व्या-प्त्यादिविषयकस्तेन व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यत्वं लभ्यते ' अनु-मानम् अनुमिति यत इत्यध्याहारेण च करणलक्षणं' अथ वा करण-लक्षणमेवेदं · तत्रानुमानमिति करणल्युटा अनुमिति करणमिति समा-ख्याबलादेव लब्धं,' तच्च व्याप्तिज्ञानं 'प्रत्यक्षपूर्वकं ' सहचारप्रत्यक्षपूर्वकं' विभजते त्रिविधमिति' पूर्वं कारणं तद्वत् तल्लिङ्गकं 'यथा मेघोन्नति-विशेषेण वृष्ट्यनुमानं' शेषः कार्य्यं तल्लिङ्गकं शेषवत्' यथा नदीवृद्ध्या वृष्ट्यनुमानं' सामान्यतो दृष्टं कार्य्यकारणभिन्नलिङ्गकं 'यथा पृथिवीत्वेन द्रव्यत्वानुमानम्'अथ वा पूर्व्वम् अन्वयस्तद्वत्केवलान्वयीत्यर्थः' यथा अभि-धेयं प्रमेयत्वादित्यादि' शेषो व्यतिरेकस्तद्वत्केवलव्यतिरेकीत्यर्थः' यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि'सामान्यतो दृष्टं अन्वयव्यति-रेकि'यथा वह्निमान् धूमादित्यादि'॥ ५ ॥

उपमानं लक्षयति। प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः' साधर्म्यात्सादृश्यात्' तज्ज्ञानात्'साध्यस्य'गवयादिपदवाच्यत्वस्य'साधनं सिद्धिरुपमानमुपमिति-र्यतइत्यध्याहारेण च करणलक्षणं' अथ वा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम्'अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः,'यथा च अतिदीर्घग्रीवत्वादि पश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यताग्रहः । एव-मन्योऽप्युपमानस्य विषयइति भाष्यं,' तथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियतइत्यादि ॥ ६ ॥

शब्दं लक्षयति। शब्दइति लक्ष्यकथनं'तदर्थः प्रमाणशब्द इति'आप्तोपदेश इति लक्षणं'आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान्'तस्योपदेश इत्यर्थः' प्रकृत-वाक्यार्थयथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः'अथ वा आप्तो यथार्थउप-देशः शाब्दबोधोयस्मात् । शाब्दत्वञ्च जातिविशेषस्तथा च यथार्थशाब्दज्ञा-नकरणत्वमर्थः । अत्र च विशेष्यावृत्त्यप्रकारकत्वंतद्वति तत्प्रकारकत्वादि-प्रमालक्षणानामेकं बध्यं' परञ्च लक्ष्यतावच्छेदके निवेशनीयमतो ना-भेदः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभजते। सप्रमाणशब्दः' शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः' शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः' तथा च दृष्टार्थकत्वादृष्टार्थकत्वभेदात्प्रमाणस्य द्वैविध्यमित्यर्थः॥ ८॥

समाप्तं प्रमाणलक्षणप्रकरणम्॥ ६॥

प्रमेयं विभजते लक्षयति च। अत्र तु शब्दः पुनरर्थे तथाचैतेषां पुनः प्रमेयत्वं न तु प्रमा विषयत्वेन संयोगादीनामपि "प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण द्वादशसु प्रवर्त्तते' तत्र च प्रकृष्टं मेयं प्रमेयमिति योगार्थः' प्रकर्षश्च संसारहेतुमिथ्याज्ञानविषयत्वं' मोक्षहेतुधीविषयत्वं' वा रूढ्या च तावदन्यान्यत्वमर्थः' लक्षणमपि तदेव' प्रमेयं किमित्याकाङ्क्षायामात्मादयो दर्शिता इत्यतो वचनभेदेऽपि नानन्वयः' वेदाः प्रमाणमित्यादावप्येवं, अन्यथा आत्मसूत्रे विगतिः स्यात्तथा च वक्ष्यते' प्रमेयत्वे नैक्यमिति प्रतिपादनाय' अन्यतमाज्ञानेऽपि नापवर्ग इति प्रतिपादनाय' वा प्रमेयमित्येकवचनमित्यन्ये, तच्चिन्त्यं, अत्रापि आत्मा च शरीरञ्च इन्द्रियाणि च अर्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलञ्च दुःखञ्च अपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति, अत्र प्राधान्यात्कारणरूपषट्कमभिधाय कार्य्यरूपप्रमेयषट्कमभिहितं तत्र पूर्व्वपूर्व्वस्य प्रधान्यात् प्रथममुद्देश इति वदन्ति॥ ९॥

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति। अत्र चात्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतं' न च शरीरातिरिक्तात्मव्युत्पादनार्थं तदिति वाच्यं' अग्रिमपरीक्षावैयर्थ्यापत्तेः' लक्षणाकथनेन न्यूनत्वं चेति चेन्न' तल्लिङ्गपदस्य लक्षणार्थत्वात्' न च लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते' तच्चायुक्तं वैयर्थ्यादिति वाच्यं' किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानान्मिलितं लक्षणमिति प्रत्यायकाभावात्,' तथा च प्रत्येकमेव लक्षणं' अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं' सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति'॥ १०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमप्राप्तं शरीरं लक्षयति। अत्र चेष्टादीनां मिलितानां आश्रयत्वं न लक्षणं वैयर्थ्यादपि त्वाश्रयपदस्य प्रत्येकमन्वयाच्चेष्टाश्रयत्वादिलक्षणत्रये तात्पर्यं चेष्टात्वञ्च प्रयत्नजन्यतावच्छेदको जातिविशेषः न च शरीरावयवेऽतिव्याप्तिः अन्त्यावयवित्वेन विशेषणात् न च निष्क्रियशरीरेऽव्याप्तिस्तादृशे मानाभावात् अतएवाह, इन्द्रियाश्रय इति इन्द्रियाश्रयत्वञ्च अवच्छेदकताख्यस्वरूपसम्बन्धविशेषेण चक्षुष्मान् देवदत्तोऽयमित्यादिप्रतीतेः, अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरस्तदाश्रयत्वस्य घटादावतिव्याप्तेः किन्तु सुखदुःखान्यतरपरः अतएव भाष्ये यस्मिन्नायतने सुखदुःखयोः प्रतिसम्वेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरमिति, वस्तुतस्तन्यतराश्रयत्वमपि न लक्षणं, किन्तु सुखाश्रयत्वं दुःखाश्रयत्वञ्चेति लक्षणद्वये तात्पर्यं शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन हस्तादेरलक्ष्यत्वे त्वन्त्यावयवित्वेन विशेषणीयं स्वर्गिशरीरे नारकिशरीरे वृक्षादौ च सुखदुःखस्वीकारान्नाव्याप्तिः, न च तच्छून्यखण्डशरीरेऽव्याप्तिः सुखाद्याश्रयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः कल्पभेदेन नरसिंहशरीराणां भेदान्नरसिंहत्वजातिमादाय नरसिंहशरीरे, लक्षणसमन्वय इति ॥ ११ ॥

इन्द्रियं विभजते लक्षयति च । यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव तथापि घ्राणेत्यादेरुपलक्षणपरत्वान्न दोषः वस्तुतस्त्विन्द्रियाणीत्यस्य वहिरिन्द्रियाणीत्यर्थः तेन भूतेभ्य इत्यस्य नासङ्गतिः अत्र चैतानीन्द्रियाणीति वदता घ्राणाद्यन्यान्यत्वं लक्षणमिति सूचितं, प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वमखण्डोपाधिरूपमित्यन्ये, घ्राणत्वादिकं जातिविशेषरूपं कर्णशष्कुल्यवच्छिन्नं नभः. श्रोत्रं घ्राणादीनि किंप्रकृतिकानीत्याकाङ्क्षायामाह भूतेभ्य इति तेनेन्द्रियाणामहङ्कारप्रकृतिकत्वं नेति मन्तव्यं व्युत्पादयिष्यते चेदं तृतीयाध्याये, अत्र घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं सम्भवति श्रोत्रस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य कर्णशष्कुलीजन्यत्वादेव जन्यत्वव्यपदेशः अथवा अभिन्नानीति पूरयित्वा भूताभिन्नानीति व्याख्येयम्। घ्राणादीत्यस्योपलक्षणपरत्वे तु भूतेभ्य इति वहिरिन्द्रियपरम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतान्येव कानीत्याकाङ्क्षायामाह । आरम्भे परस्परानपेक्षत्वसूचनायासमासकरणं भूतत्वन्तु वहिरिन्द्रियग्रहणयोग्यविशेषगुणवत्त्वं पृथिवीत्वादयस्तु जातिविशेषा इति ॥ १३ ॥

क्रमप्राप्तमर्थं विभजते लक्षयति च । वैशेषिकाणां द्रव्यगुणकर्मस्वर्थशब्दाभिधेयत्वमतः पञ्चानां गन्धादीनामेव कथं तत्त्वंनित्याशङ्कानिरासाय तदर्था इत्युक्तं तेषामिन्द्रियाणामर्था विषया उद्दिष्टा अपि तएवेत्याशयः' इत्यञ्च तदर्थत्वं लक्षणमिति मन्तव्यं' तच्छब्देन वहिरिन्द्रियाणि परामृश्यन्ते' तथा चैकबहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वं' बहिरिन्द्रियग्राह्यबहिरिन्द्रियाग्राह्यगुणत्वं 'वा तदर्थः । पृथिव्यादिगुणा इति लक्ष्यनिर्देशस्ते के गुणा इत्याकाङ्क्षायां ' गन्धेत्यादि ' पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यादिसम्मतस्तेन गुणगुणिनोरभेदो नेति सूचितम् ॥ १४ ॥

बुद्धिं लक्षयितुमाह । अनर्थान्तरं' समानार्थकं' न तु साङ्ख्यानामिव बुद्धितत्त्वस्य महत्तत्त्वापरपर्य्यायस्य परिणामविशेषो ज्ञानं' यथा चैतत्तथा वक्ष्यते' तथाच बुद्ध्यादिपदवाच्यत्वमनुभव सिद्धज्ञानत्वजातिरेव' वा लक्षणमिति भावः ॥ १५ ॥

मनो लक्षयति। युगपत् एककाले'एकात्मनीति पूरणीयं' ज्ञानानामनुत्पत्तिर्यतः स एव धर्मो ज्ञानकरणाणुत्व''मनसोलिङ्ग''लक्षणमित्यर्थः । तथाहि चक्षुरादिषु विषयसम्बद्धेष्वपि यस्यासत्त्वभावादेकं न ज्ञानं जनयति'यत्सम्बन्धादपरञ्च ज्ञानं जनयति तदेव चाणु निखिलज्ञानजनकं सुखादिसाक्षात्कारासाधारणकारणं'तदेकमेव लाघवात्सिद्धं'मन'इत्यर्थः एवमव्याख्याने च लक्षणप्रकरणे प्रमाणोपन्यासोऽसङ्गतः स्यादिति अन्ये तु सति धर्मिणि लक्षणचिन्तेत्यतोमनःसाधनाय'युगपदिति सूत्रं'इत्यञ्च मनःसिद्धौ'निःस्पर्शाणुत्वादिकं लक्षणं सुकरमित्याशय इति वदन्ति ॥ १६ ॥

प्रवृत्तिं लक्षयति विभजते च । अत्र च प्रवृत्तित्वं' रागजन्यतावच्छेदको जातिविशेषः' स एव लक्षणं'ईश्वरकृतेरपि लक्ष्यत्वे' यत्नत्वमेव तथा। जीवनयोनियत्ने निवृत्तौ च मानाभावात्' तत्सद्भावेऽपि प्रवृत्तित्वं नित्ययत्नसाधारणं'तद्व्यावृत्तं वा तथा,' द्वन्द्वानन्तरस्मृता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रम्भपदस्य प्रत्येकमन्वयाद्वागारम्भादिभेदेन त्रिविधा प्रवृत्तिः' बुद्धि-शब्देनात्र मनोऽभिप्रेतमिति' शरीरशब्दस्य' चेष्टावत्त्वेन हस्तादिसाधा-रणः' तथा च' वचनानुकूलो यत्नोवागारम्भः' शरीरगोचरो यत्नश्चेष्टानु-कूलयत्नोवा शरीरारम्भः' एतद्द्वयभिन्नो यत्नोबुद्ध्यारम्भः' स च ध्यानोदयाद-देवन्दर्शनाद्यनुकूलः' पर्य्यवस्यति' प्राञ्चस्तु' सामान्यविशेषलक्षणे चादृष्ट-जनकत्वं निवेशयन्ति' इयञ्च कारणरूपा प्रवृत्तिः' कार्य्यरूपा तु धर्म्मा-धर्म्मात्मिकेति ॥ १७ ॥

दोषं लक्षयति। दोषा इति बहुवचनं' रागद्वेषमोहात्मकलक्ष्य-त्रयज्ञापनाय' प्रवर्त्तना प्रवृत्तिजनकत्वं' तदेव लक्षणं\ येषां ' यद्यपीदं शरीरादृष्टेश्वरेच्छादावतिव्याप्तं ' तथापि' लौकिकप्रत्यक्षविषयत्वे सतीति विशेषणीयं ' यागादिगोचरप्रमावारणाय प्रमान्यत्वे सतीति विशेषयन्ति' ॥ १८ ॥

प्रेत्यभावं लक्षयति । प्रेत्यं मृत्वा भावो जननं प्रेत्यभावः । तत्र पुन-रित्यनेनाभ्यासकथनात्' प्रागुत्पत्तिस्ततोमरणं' तत उत्पत्तिरिति' प्रेत्य-भावोऽयमनादिरपवर्गान्तः' एतज्ज्ञानञ्च वैराग्य उपयुज्यते इति' प्रेत्येति न व्यर्थं' तदीयमरणञ्च तदीयजीवनादृष्टनाशस्तदीयचरमप्राणसंयोगध्वंस-स्तदीयप्राणध्वंसो' वा' तदीयोत्पत्तिस्तु तदीयविजातीयशरीराद्यप्राण-संयोग इति ॥ १९ ॥

फलं लक्षयति। अत्र च मुख्यं फलं' सुखदुःखोपभोगः' तथाच भाष्यं' सुख-दुःखसंवेदनं फलं,' तत्र च धर्माधर्मात्मकप्रवृत्तेः प्रयोजकत्वात्तत्र च दोषस्य हेतुत्वात्' प्रवृत्तिदोषजनितेत्युक्तं' लक्षणन्तु सुखदुःखान्यतरसाक्षात्कार इति' गौणं फलन्तु शरीरादिकं सर्वमेव' तथा च भाष्यं' तत्पुनर्देहेन्द्रियबुद्धिषु सतीषु भवतीति सह देहेन्द्रियादिभिः फलमभिप्रेतं' तथाहि' प्रवृत्तिदोष-जनितोऽर्थः फलमेतत्सर्वं भवतीति' इत्यञ्च' जन्यत्वमेव फलत्वं' प्रवृत्तिदोष-जनित इति तु निर्वेदोपयोगादुक्तम् ॥ २० ॥

दुःखं लक्षयति। बाधना पीड़ा' तदेव लक्षणं स्वरूपं यस्य' तथाचानु-भवसिद्धदुःखत्वजातिरेव लक्षणं' शरीरेन्द्रियार्थेषु दुःखसाधनत्वात्सुखे च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुःखानुषङ्गात् दुःखव्यवहारो गौण इति अतएवाग्रिमसूत्रे तत्पदेन मुख्य दुःखपरामर्शः ॥ २१ ॥

अपवर्गं लक्षयति । तस्य दुःखस्य अत्यन्तविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः तस्य च जन्मापायादेव सम्भव इत्याशयेन दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्ग इति भाष्यं दुःखेन दुःखानुषङ्गिणेत्यर्थः ॥ २२ ॥

समाप्तं प्रमेयलक्षणप्रकरणम् ॥

क्रमप्राप्तं संशयं लक्षयति । संशय इति लक्ष्यनिर्द्देशः विमर्श इत्यत विशब्दो विरोधार्थः स्मृशिर्ज्ञानार्थः एकस्मिन् धर्म्मिणीति पूरणीयं तेन एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः तत्र कारणमुखेन विशेषलक्षणान्याह समानेत्यादि उपपत्तिर्ज्ञानं तथाच समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः अनेकधर्मः असाधारणधर्मः तज्ज्ञानादित्यर्थः तथाच साधारणधर्मवद्धर्मिज्ञानजन्योऽसाधारणधर्मवद्धर्मिज्ञानजन्यश्चेत्यर्थः, विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्तस्मादित्यर्थः यद्यपि शब्दस्य न संशायकत्वं तथापि शब्दात्कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति उपलब्धेर्ज्ञानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य याऽव्यवस्था तद्विषयकत्वानिर्द्धारणं प्रामाण्य संशय इति फलितोऽर्थः, अन्ये तु उपलब्ध्यव्यवस्थाप्रामाण्यसंशयः अनुपलब्धिरुपलब्धिविरोधिधर्मत्वं तदव्यवस्था तत्संशय इत्याहुः । वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किंत्वगृहीताप्रामाण्यकज्ञानस्य विरोधितया सति प्रामाण्यसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति उपलब्धीत्यादिकं तादृशस्थले संशयोभवतीत्येतावन्मात्रपरं चकारोव्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति, विशेषापेक्षः कोटिस्मरणसापेक्षः वस्तुतस्तु संशयधारावाहिकत्वं स्यादत आह विशेषेति विशेषं विशेषदर्शनं अपेक्षते निवर्त्तकत्वेन तथाच विशेषदर्शननिवर्त्त्यत्वकथनमुखेन विशेषादर्शनजन्यसंशय इत्युक्तम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमप्राप्तं प्रयोजनं लक्षयति। अधिकृत्य उद्दिश्य' तथाच प्रवृत्तिहेत्विच्छाविषयत्वं प्रयोजनत्वं' विषयत्वं साध्यताख्यविषयताविशेषः' तेन ज्ञानसुखत्वादिवारणं' प्रवृत्तिहेत्विति स्वरूपकथनं' तच्चकचूडामणिसुमेर्वादिप्राप्तिवारकं तदिति केचित्' अत्र निरुपाधीच्छाविषयत्वात् सुखदुःखाभावयोर्मुख्यप्रयोजनत्वं' तदुपायस्य तु' तदिच्छाधीनेच्छाविषयत्वाद्गौणप्रयोजनत्वमिति ॥ २४ ॥

क्रमप्राप्तं दृष्टान्तं लक्षयति। लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः प्रतिपाद्य इति फलितोऽर्थः' परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः' प्रतिपादक इति फलितार्थः' तथाच' प्रतिपाद्यप्रतिपादकयोरिति' पर्यवसन्नं' बहुवचनं कथाबहुत्वमभिप्रेत्य' बुद्धेः साध्यसाधनोभयविषयिण्यास्तदभावविषयिण्या वा साम्यं अविरोधो यस्मिन्नर्थे' सोऽर्थो दृष्टान्तः' वादिप्रतिवादिनोः साध्यसाधनोभयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयो दृष्टान्त इति पर्य्यवसितोऽर्थः। समाप्तं न्यायपूर्वाङ्गप्रकरणम् ॥ २५ ॥

क्रमप्राप्तं सिद्धान्तं लक्षयति। तन्त्रं शास्त्रं' तदेवाधिकरणं ज्ञापकतया' यस्य तादृशस्य' योऽभ्युपगमस्तस्य समीचीनतयाऽऽशयरूपतया स्थितिस्तथाच शास्त्रितार्थनिश्चयः सिद्धान्तः' अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्त' इति भाष्यम्' अभ्युपगमः सिद्धान्त इति' वार्त्तिकटीका;' नचात्र विरोधः शङ्कनीयः' आचार्य्यैः परिहृतत्वात्' तथाच' तिस्रूत्रीनिबन्धः' अर्थाभ्युपगमयोर्गुणप्रधानभावस्य विवक्षा तन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्तस्तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः' अत्र च' भाष्यानुसारात्सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगम सिद्धान्तान्यतमः' सिद्धान्त' इति सूत्रार्थ' इति तु न युक्त' अग्रिमसूत्रानुत्थानापत्तेः' तन्त्रसिद्धान्तत्वेन द्वयमनुगमय्य तन्त्राधिकरणाभ्युपगमान्यतमः' सिद्धान्त इति कश्चित् ॥ २६ ॥

विभजते। स चतुर्विध इति शेषः' सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः ॥ २७ ॥

सर्वतन्त्रसिद्धान्तं लक्षयति। सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति बहवः' वस्तुनो' यथाश्रुतएवार्थः' अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेरेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव च जात्यादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः न च तन्त्रेऽधिकृत इति
स्पष्टार्थं लक्षणे तु न देयमेवेति वाच्यं मनस इन्द्रियत्वस्यापि सर्वतन्त्रसि-
द्धान्ततापत्तेः नव्यास्तु सूत्रस्योपलक्षणमात्रत्वाद्वादिप्रतिवाद्युभयाभ्युपगतः
कथानुकूलोऽर्थः स इति वदन्ति ॥ २८ ॥

प्रतितन्त्रसिद्धान्तं लक्षयति। समानशब्द एकार्थस्तेनैकतन्त्रसिद्ध इ-
त्यर्थः स्वतन्त्रसिद्ध इति पर्य्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरमात्रा-
भ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः यथा मीमांस-
कानां शब्दनित्यत्वम् ॥ २९ ॥

अधिकरणसिद्धान्तं लक्षयति ॥ यस्यार्थस्य सिद्धौ जायमानायामेवा-
न्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः यथा
तद्व्यणुकादिकं पक्षीकृत्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वे
साध्यमाने सर्वज्ञत्वमीशस्य एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थ-
ग्रहणादिन्द्रियादिव्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वं तथा च
यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसि-
द्धान्त इति, वस्तुतस्तु शब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणमात्रमपेक्षितं
अतएव प्रत्यक्षेण स्थूलत्वसाधनानन्तरमुक्तमात्मतत्त्वविवेके सोऽयमधि-
करणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ क्षणभङ्गभङ्ग इति तत्र च वाक्यार्थसिद्धौ
तदनुषङ्गी यो यः सोऽधिकरणसिद्धान्त इति वार्त्तिक फक्किकां लिखित्वा
येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽन्यार्थः सिध्यति
स तयेत्यर्थः, इति व्याख्यातं, दीधितिकृता, एवं हेतुरीदृशः पक्षस्य वा-
क्यार्थ इति टीकावचने च उपलक्षणमेतदित्युक्तं तत्र तत्र विशिष्यैव
लक्षणं कार्य्यं यत्तु जनकीभूतव्यापकताज्ञाने व्यापककोटावेव विषयः प्रक-
तानुमित्या व्यापककोटौ विषयीकृतः शाब्दजनकपदार्थज्ञानविषयत्वे सति
शाब्दविषयस्येति द्वयमधिकरणसिद्धान्त इति तन्न इन्द्रियनानात्वादौ
भाष्याद्युदाहृतेऽव्याप्तेरिति ॥ ३० ॥

अभ्युपगमसिद्धान्तं लक्षयति। अपरीक्षितस्य साक्षादसूत्रितस्य
विशेषपरीक्षणं विशेषधर्मकथनं अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्यु-
पगमज्ञापकमित्यर्थः विशेषपरीक्षणाज्ज्ञायते सूत्रकृतोऽभ्युपगतमिद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिति तथा च साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति ॥ ३१ ॥ समाप्तं न्यायाश्रयसिद्धान्तलक्षणप्रकरणम् ॥ ५ ॥

क्रमप्राप्तानवयवाँल्लक्षयितुं विभजते। अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमवयवत्वमिति लक्षणं सूचितं, अत्र च प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयववादो व्युदस्त इति मन्तव्यं, ते च यथा दर्शिता भाष्ये जिज्ञासासंशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति एते प्रतिज्ञादिसहिता दश व्याख्याताश्च ते तात्पर्यटीकायां प्रयोजनं हानादिबुद्धयः तत्प्रवर्त्तिका जिज्ञासा तज्जनकः संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः अयमेवार्थो निबन्धे निष्टङ्कितः जिज्ञासा विप्रतिपत्तिरिति कश्चित् एतेषाञ्च न न्यायावयवत्वं न्यायाघटकत्वात् नच न्यायजन्यबोधानुकूलत्वेनैवावयवत्वं एकदेशस्यापि तत्त्वप्रसङ्गात् प्रयोजनेऽव्याप्तेश्च ॥ ३२ ॥

प्रतिज्ञां लक्षयति। साधनीयस्यार्थस्य योनिर्देशः स प्रतिज्ञा साधनीयस्य वह्निमत्त्वादिना पर्वतादेस्तथा च पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधकशब्द इत्यर्थः निगमनवारणाय च साध्यांशे साध्यतावच्छेदकातिरिक्ताप्रकारकत्वं वाच्यं तदर्थश्च साध्यतावच्छेदकप्रकारताविलक्षणप्रकारताशून्यत्वं तेन प्रमेयवतः साध्यत्वे नासिद्धिः उदासीनवाक्यवारणाय च न्यायान्तर्गतत्वे सतीति विशेषणीयम्, न्यायान्तर्गतत्वे सति प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकत्वं तत्प्रतिज्ञात्वावयवत्वादिकं परिभाषाविशेषविषयत्वरूपं तत्तद्व्यक्तित्वरूपं चेत्यपि वदन्ति ॥ ३३ ॥

क्रमप्राप्तं हेतुं लक्षयति विभजते च सूत्राभ्याम्। अत्र साध्यसाधनं हेतुरिति सामान्यलक्षणं साध्यसाधनं साध्यसिद्ध्यनुकूलज्ञापकत्वबोधक इत्यर्थः तथा च साध्यतावच्छेदकावच्छिन्नसाध्यान्वितज्ञापकत्वबोधकः साध्यान्वितस्वार्थबोधकोवाऽवयव इति फलितार्थः तस्य द्वैविध्यमाह उदाहरणसाधर्म्यात्तथा वैधर्म्यादिति साधर्म्यमन्वयः वैधर्म्यं व्यतिरेकः तादृशव्याप्तिरिति फलितार्थः उदाहरणसाधर्म्यं उदाहरणबोध्यान्वयव्याप्तिस्ततोऽन्वयी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुर्ज्ञातव्यं उदाहरणेति स्पष्टार्थं तथा च ज्ञातान्वयव्याप्तिकहेतुबोधको हेत्ववयवः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयव इति फलितार्थः एवमप्रतीतान्वयव्याप्तिकहेतुबोधको हेत्ववयवो व्यतिरेकी हेतुः इत्थमेव प्रतीतान्वयव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवोऽन्वयव्यतिरेकीत्यपि सूचितमिति वदन्ति ॥ ३४,३५ ॥

क्रमप्राप्तमुदाहरणं लक्षयति । दृष्टान्तउदाहरणमिति लक्षणं दृष्टान्तो दृष्टान्तवचनं दृष्टान्तकथनयोग्यावयवइत्यर्थः तेन दृष्टान्तस्य सामयिकत्वेना-सार्वत्रिकत्वेऽपि न क्षतिः योग्यतावच्छेदकन्तु अवयवान्तरार्थानन्वितार्थ-कावयवत्वं; तच्च द्विविधं अन्वयिव्यतिरेकिभेदात्तत्रान्वय्युदाहरणं लक्षयति साध्यसाधर्म्यात्तद्धर्मभावीति अन्वय्युदाहरणमिति शेषः परे तु सम्पूर्णसू-त्रमन्वय्युदाहरणमेव सामान्यलक्षणं तूह्यमित्याहुः, साध्यसाधर्म्यात्साध्यस-हचरितधर्मात् प्रकृतसाधनादित्यर्थः तं साध्यरूपं धर्मं भावयति तथा च साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्त्युपदर्शको-दाहरणमिति यावत् ॥ ३६ ॥

व्यतिरेक्युदाहरणं लक्षयति । तद्विपर्ययात् साध्यसाधनव्यतिरेक-व्याप्तिप्रदर्शनात्तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यति-रेक्युदाहरणं यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घट इति वाक्यारः प्रयोगमपेक्ष्य तथा चान्वय्युदाहरणं व्यतिरेक्युदा-हरणं वा प्रयोक्तव्यमित्यर्थः ॥ ३७ ॥

क्रमप्राप्तमुपनयं लक्षयति । साध्यस्य पक्षस्य उदाहरणापेक्षउदा-हरणानुसारी य उपसंहार उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्ति-विशिष्टहेतुविशिष्टपक्षविषयकबोधजनको न्यायावयवइत्यर्थः निगमनं हेतुविशिष्टत्वेन न पक्षबोधकं किन्तु पक्षवृत्तिहेतुबोधकमिति तद्व्युदासः अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमः कार्य उदाहरणो-पदर्शितेति तु परिचायकमात्रमिति तु न वाच्यं उदाहरणविपरीतव्या-प्त्युपदर्शकोपनयवारकत्वात् वस्तुतोऽवयवपदेनैव तद्व्युदासः सचोपनयो द्वि-विधोऽन्वयिव्यतिरेकिभेदात् तथेति साध्यस्योपसंहारोऽन्वय्युपनयः न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः अत्र च तथाशब्दप्रयोगात्स्य क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वेन तात्पर्यं 'किन्तु' व्याप्तिविशिष्टवत्त्वबोधे 'तथा च' वह्निव्याप्य धूमवांश्चा-यमिति वा 'तथा चायमिति वोपन्यासः' एवं 'व्यतिरेकिण्यपि' वह्न्यभाव-व्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा 'न तथेति वोपन्यासः ॥३८॥

निगमनं लक्षयति। हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य' अपदेशः कथनं' प्रतिज्ञायाः प्रतिज्ञार्थस्य 'साध्यविशिष्टपक्षस्य 'वचनं 'निगमनं 'तथा च 'व्याप्ति-विशिष्टपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः' व्याप्तपक्षधर्महे-तुज्ञाप्यसाध्यविशिष्टपक्षबोधकस्तादृशसाध्यबोधको 'वा न्यायावयवो' निगमन मिति' अस्य 'त्वन्वयिव्यतिरेकिभेदान्न भेद इत्याशयः' व्यतिरेकिणि तु तस्मान्न तथेत्येवाकार इत्यपरे ॥ ३९ ॥ समाप्तं न्यायस्वरूपप्रकरणम् ॥ ६ ॥

क्रमप्राप्तं तर्कं लक्षयति। तर्क इति लक्ष्यनिर्देशः' कारणोपपत्ति-त ऊह इति लक्षणं' अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति' प्रयोजनकथनं' कारणं व्याप्यं 'तस्योपपत्तिरारोपस्तस्मात्' ऊहआरोपः' अर्थाद्व्यापकस्य' तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद्यो व्यापकस्याहा-र्यारोपः स तर्कः' यथा' निर्वह्नित्वारोपान्निर्धूमत्वारोपः' निर्वह्निः स्यान्नि-र्धूमः स्यादित्यादि' ह्रदो निर्वह्निः स्यान्निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीत इति' निर्वह्निः स्यात् अद्रव्यं स्यादित्यादि-वारणाय व्याप्यस्येति' तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति' न चानुमानादितोऽर्थसिद्धेस्तर्कोव्यर्थ' इति वाच्यं' अप्रयोजकत्वादिशङ्का-कलङ्कितेन हेतुनार्थस्य साधयितुमशक्यत्वात्तदेतदुक्तमविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति' तत्त्वनिर्णयार्थमित्यर्थः' यत्र' नाप्रयोजकत्वाद्याशङ्का' तत्र नापेक्षएवेति' भावः। परे तु 'ऊह इत्येव लक्षणं 'ऊहत्वञ्च मानसत्व-व्याप्यो जातिविशेषस्तर्कयामीत्यनुभवसिद्धः' तर्कः किं स्वतएव निर्णायकः परम्परया वेत्यतआह' कारणेति' कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारे-त्यर्थः' तथा च धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यनेन व्यभिचारशङ्कानिरासे 'निरङ्कुशेन व्याप्तिज्ञानेनानुमितिरिति 'परम्पर-यैवास्योपयोग इत्याहुः' स चायं पञ्चविधः 'आत्माश्रयान्योन्याश्रयचक्रका-नवस्थातदन्यबाधितार्थप्रसङ्गभेदात्' स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्गआत्माश्रयः' स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा 'यथा 'यद्ययं घटएतद्घटजन्यः स्यात्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैतद्घटानधिकरनत्त्वयोत्तरवर्त्ती न स्यात्' यद्ययं घट एतद्घटवृत्तिः स्यात् एतद्घटव्याप्यो न स्यात्' यद्ययं घटएतद्घटज्ञानाभिन्नः स्यात्' ज्ञानसामग्री-जन्यः स्यात्' एतद्घटभिन्नः स्यादिति वा' सर्व्वत्रापाद्यं' तदपेच्यापेचित्व-निबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः सोऽपि पूर्ववत्त्रेधा' तदपेच्यापेच्यपे-चित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकं'चतुः कच्चादावपि'स्वस्य स्वापेच्यापच्चेपे-च्चित्वरुत्त्वान्नाधिक्यं' अस्यापि पूर्ववत्त्रैविध्यं'' अव्यवस्थितपरम्परारोपा-धीनानिष्टप्रसङ्गोऽनवस्था'यथा'यदि घटत्वं घटजन्यत्वव्याप्यं स्यात्कपाल-समवेतत्वव्याप्यं न स्यात्'तदन्यबाधितार्थप्रसङ्गस्तु'धूमो यदि वह्निव्यभि-चारी स्याद्वह्निजन्यो न स्यादित्यादिः' प्रथमोपस्थितत्वोत्सर्गविनिगमना-विरहलाघवगौरवादिकन्तु प्रसङ्गानात्मकत्वात् न तर्कः' किन्तु' प्रमाणस-हकारित्वरूपसाधर्म्यात्तथा व्यवहार'इति संचेपः' ॥ ४० ॥

क्रमप्राप्तं निर्णयं लचयति। विमृश्य सन्दिह्य' पचप्रतिपचाभ्यां साधनोपालम्भाभ्यां'उपालम्भः परपचदूषणं'अर्थस्यावधारणं तदभावाप्रका-रकं तत्प्रकारकं ज्ञानं'यद्यप्येतावदेव निर्णयसामान्यलचणं' तथापि'विमृ-श्येत्यादिकं 'जल्पवितण्डस्थलीयनिर्णयमधिकृत्य' तदुक्तं भाष्ये'शास्त्रे वादे च विमर्शवर्जमिति'एवं' प्रत्यचतः शब्दाच्चनिर्णये' न विमर्शपचप्रति-पचापेचेति'॥ ४० ॥ समाप्तं न्यायोत्तराङ्गप्रकरणम् ॥ ७ ॥

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ प्रथमाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमाह्निकेन सपरिकरे न्याये लक्षिते वादादिलक्षणाय द्वितीयाह्निकारम्भः छलपरीक्षा च प्रसङ्गाद्भविष्यति तथा च छलपरीक्षासहितवादादिलक्षणं द्वितीयाह्निकार्थः तत्र चत्वारि प्रकरणानि आदौ कथाप्रकरणं ततो हेत्वाभासप्रकरणं छलप्रकरणं दोषलक्षणप्रकरणं चेति अत्र कथासामान्यस्यायं विशेषो वादादिस्तथा च त्रिभिः सूत्रैरेकं कथाप्रकरणं अन्यथैकसूत्रस्य प्रकरणभावाभावादसङ्गतिः स्यादित्याशयेनोक्तं भाष्यकृता तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा चेति तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यो न्यायानुगतवचनसन्दर्भः कथा लौकिकविवादवारणाय न्यायेत्यादि, यत्रैकेन न्यायः प्रयुक्तोऽपरेण तु मतपरिग्रहोऽपि न कृतस्तद्वारणाय आद्यं विशेषणमिति कथाधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्व्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवः अकलहकारिणः कथौपयिकव्यापारसमर्था इति ॥

तत्र वादं लक्षयति । अत्र च वाद इति लक्ष्यनिर्देशः पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहस्तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः तावन्मात्रञ्च कथान्तरसाधारणमतआह प्रमाणेत्यादि प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां साधनोपालम्भौ यत्र स तथा उभयत्रापि प्रमाणादिसद्भावे कोटिद्वयस्यापि सिद्धिः स्यादतस्तद्रूपेण ज्ञाताभ्यामिति ज्ञानमनाहार्य्यं विवक्षितं उपालम्भो दूषणं जल्पादौ तु प्रमाणाभासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणं तथा इतरथा तु तद्धेतोरेव दुष्टत्व इत्यञ्च प्रमाणाभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्यान्यत्वे सतीत्यर्थस्तेन तादृशजल्पविशेषे नातिव्याप्तिः तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादिविशेषणद्वयं अन्ये तु तदपि लक्षणघटकमेव तदर्थश्च तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा निग्रहस्थानं प्रतिज्ञाहान्यादीनामेकैकं धृत्वा तदुपन्यासायोग्यत्वमिति निष्कर्षः तेनोक्तजल्पविशेषवारणमित्याहुः सिद्धान्ताविरुद्ध इत्यनेनापसिद्धान्तोद्भावनं पञ्चावयवोपपन्न इत्यनेन न्यूनाधिकोद्भावने अवयवाभासस्य दृष्टान्तादिदुष्टादेश्चोद्भावनं प्रमाणेत्यनेन च प्रमाणाभासत्वेन हेत्वाभासानां तर्काभासस्य चोपन्यासो नियम्यते तथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चात्र हेत्वाभासन्यूनाधिकापसिद्धान्तरूपनिग्रहस्थानचतुष्टयोद्भावनमिति वदन्ति वस्तुतस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनमुचितमतएव पञ्चावयवावश्यकत्वमपि भाष्यकारो नानुमेने हेत्वाभासाद्युद्भावनेनापिच तत्रैव कथाविच्छेदो यदि हेत्वन्तरेणापि साधयितुं न शक्यते इतरथा तु तद्धेतोरेव दुष्टत्वं इत्यञ्च पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेति तत्त्ववादाधिकारिणस्तु तत्त्वबुभुत्सवः प्रकृतोक्तिकाः अविप्रलम्भकाः यथाकालस्फूर्त्तिका अनाक्षेपका युक्तिसिद्धप्रत्येतारः अनुविधेयस्थेयः सभ्यपुरुषवती जनता सभा अनुविधेयो राजादिः स्थेयान् मध्यस्थः साच वादे नावश्यकी वीतरागकथात्वादिति ॥ ४२ ॥

जल्पं लक्षयति । यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः मध्यपदलोपी समासः तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः अन्यथा जल्पस्य वादविशेषत्वापत्तिः प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां न तु ज्ञानेऽनाहार्यत्वं विवक्षितं आरोपितप्रमाणाभावेनाभासेऽपि जल्पनिर्वाहात् यद्यपि छलादिभिरुपालम्भ एव न तु साधनं तथापि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायान्नातिव्याप्तिः सप्रतिपक्षस्थापनाहीन इत्युत्तरसूत्रात्प्रकृते उभयपक्षस्थापनावत्त्वलाभः स्थापनावत्त्वादेवच पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति अत्र च छलादिभिः सर्व्वैरुपालम्भो न विशेषणाय व्याप्तिरपि तु तद्योग्यतयैव योग्यतावच्छेदकन्तु वादभिन्नकथात्वमेव तत्र चोक्तवादत्वावच्छिन्नभेदस्तत्तद्वादभेदो वा विशेषणमिति छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथाचोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थः इत्यपि वदन्ति अत्र चायं क्रमः वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगादिति सामान्यतो नायमसिद्ध इत्यादि विशेषतो वा प्रतिज्ञादिना स्वस्याज्ञानादिनिरासाय परोक्ते सम्मतत्वादेव लाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरनिरर्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञाहानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिज्ञान्तर प्रतिज्ञाविरोध प्रतिज्ञासन्यासहेत्वन्तरार्थान्तरनिरर्थकाविज्ञातार्थविक्षेपमतानुज्ञान्यूनाधिक पुनरुक्तनिरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्य्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वादेवानुपन्यासार्हतया यथा सम्भव-हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्षउपन्यसनीयः ततो वादिना तृतीयकक्षाश्रितेन परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तिग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वाभासेन यथा सम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया अन्यथा क्रमविपर्य्यासेऽप्राप्तकालं अनवसरे दूषणोद्भावने च निरनुयोज्यानुयोगः यथा त्यक्ष्यसि चेत् प्रतिज्ञाहानिर्विशेषयसि चेद्धेत्वन्तरमित्यादि प्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तग्राह्यत्वाविशेषेऽपि अर्थदोषत्वेन प्रधानत्वाच्चरमसन्धानमिति ॥ ४३ ॥

वितण्डां क्रमप्राप्तां लक्षयति। यद्यपि तच्छब्देन जल्पो न परामृष्टुं शक्यते जल्पस्य स्थापनद्वयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात् तथापि स्थापनाद्वयवत्त्वं विहाय जल्पैकदेशः परामृश्यते प्रतिपक्षो-द्वितीयपक्षस्तथा च प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति न च स्वस्य स्थापनीयाभावात् कथमियं कथा प्रवर्त्ततामिति वाच्यं परपक्षखण्डनेन जयस्यैवोद्देश्यत्वात् परे तु यत्परपक्षखण्डनेनैव स्वपक्षसिद्धेरर्थादेव सिद्धिस्तत्साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वदन्ति ॥ ४४ ॥ समाप्तं कथाप्रकरणम्।

क्रमप्राप्तान् हेत्वाभासांल्लक्षयति विभजते च। नचात्र लक्षणं न प्रतीयत इति वाच्यं हेत्वाभासशब्दस्य हेतुवदाभासमानार्थकत्वेनैव तत्-सूचनात् सूचनाद्धि सूत्रं तथा हि पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्व सत्प्रतिपक्षितत्वोपपन्नो हेतुर्गमकः तद्वदाभासत इत्यतः वस्त्वार्थ-सञ्छिन्नत्वे सति तद्धर्मवत्त्वं तथा च पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमान इति फलितार्थः; तत्र च लक्षणे सत्यन्तं तस्यैव दूषकतायामुपयोगात् न च असाधकतायां पक्षसत्त्वाद्येकैकाभावस्यैव गमकत्वसम्भवेऽधिकवैयर्थ्यं एतेन पञ्चान्यतं लक्षणमित्यपि प्रत्युक्तमिति वाच्यं पञ्चत्वावच्छिन्नाभावस्य पक्षसत्त्वाभावाद्यघटितत्वेन वैयर्थ्याभावात् वस्तुतस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथिवी इतरेभ्यो भिद्यते स्पर्शवत्त्वात् प्रमेयमाकाशादित्यादौ सपक्षाद्यप्रसिद्धेर्नैतस्य लक्षणत्वे तात्पर्यं परन्तु विपक्षासत्त्वसपक्षसत्त्वाभ्यामव्यभिचरितसामानाधिकरण्यं पक्षसत्त्वसहितस्य चैतस्य विरोधित्वं त्रिभिर्लभ्यं तेन व्याप्तिविशिष्टपक्षधर्मताविरोधित्वं चरमयोस्त्वनुमिति विरोधिरूपानवच्छिन्नत्वार्थकयोरभावादनुमितिविरोधित्वं तेनानुमिति तत्कारणाज्ञानान्यतरविरोधित्वं पर्य्यवस्यति ॥ ४५ ॥

सव्यभिचारं लक्षयति। एकस्य साध्यस्य तदभावस्य च यो ऽन्तः सहचारः अव्यभिचरितसहचारः (सोऽन्तः सहचारः अव्यभिचरितसहचारः इत्याशयः) सचान्वव्याप्तिग्राहकस्तथाचैकमात्र व्याप्तिग्राहकसहचारवानैकान्तिकस्तदन्यो ऽनैकान्तिकः स च साधारणो ऽसाधारणो ऽनुपसंहारी चेति त्रिविधः साधारणः साध्यवत्तदन्यवृत्तिः यथा शब्दो नित्यः निःस्पर्शत्वात् न च विरुद्धसङ्कीर्णदोषः उपधेयसङ्करे ऽप्युपाधेरसङ्करात् असाधारणः सपक्षविपक्षव्यावृत्तः सपक्षः साध्यवत्त्वनिश्चयविषयः यथा शब्दोनित्यः शब्दत्वादित्यादौ अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः यथा सर्वं नित्यं मेयत्वादित्यादि अत्र च साध्यसन्देहाद्व्याप्तिग्रहो न भवतीत्याशयः नव्यास्तु असाधारणः साध्यवदवृत्तिः एतस्य साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धो दूषकताबीजं अनुपसंहारी च केवलान्वयिसाध्यकस्तस्य चात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपस्य ज्ञानाद्व्यतिरेकव्याप्तिग्रहप्रतिबन्धो दूषकताबीजं इत्याहुः ॥ ४६ ॥

क्रमप्राप्तं विरुद्धं लक्षयति। अत्र च सिद्धान्तं साध्यं प्रतिज्ञायां हि पक्षस्य सिद्धसाऽन्ते साध्यमभिधीयते तथा च साध्यमभ्युपेत्य उद्दिश्य प्रयुक्तस्तद्विरोधो साध्याभावव्याप्त इति फलितार्थः, यथा वह्निमान् ह्रदत्वादिति एतस्य साध्याभावानुमिति सामग्रीत्वेन साध्यानुमिति प्रतिबन्धो दूषकताबीजं न च सत्प्रतिपक्षाविशेषः तत्र हेत्वन्तरं साध्याभावसाधकं इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्यशक्तिविशेषोन्नायकत्वेन विशेषात् ॥ ४७ ॥

क्रमप्राप्तं प्रकरणसमं लक्षयति। स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स कर्ह्यत्याकाङ्क्षाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माह यस्मात्प्रकरणचिन्तेति प्रकरणं पक्षप्रतिपक्षाविति भाष्यं साध्यतद-भाववत्त्वाविति तदर्थस्तथा च निर्णयार्थं प्रयुक्तो हेतुर्यत्र निर्णयं जनयितु मशक्तस्तुल्यबलेन परेण प्रतिबन्धात् किन्तु धर्म्मिणः साध्यवत्त्वं तदभाव-वत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसमः यद्वा प्रकृष्टं करणं लिङ्गं परामर्शो वा को हेतुरनयोः साधकः एतयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासाभवतीत्यर्थः यस्मादित्यादितु वस्तुस्थितिमात्रं लक्षणन्तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वं स्वसाध्यपरामर्शकालीन तुल्यबलविरोधिपरामर्शो वा विरोधिपरामर्शस्य च हेतुनिष्ठत्वसंकज्ञान-विषयत्वसम्बन्धेन अन्यथा हेतोर्दुष्टत्वं न स्यात् अयञ्च दशाविशेषे दोषः इत्यतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम् ॥ ४८ ॥

क्रमप्राप्तं साध्यसमं लक्षयति। साध्येन वह्न्यादिनाऽविशिष्टः कुत इत्यत आह। साध्यत्वादिति साधनीयत्वादित्यर्थः यथा हि साध्यं साध-नीयं तथा हेतुरपि चेत्साध्यसम इत्युच्यते अत एव चासिद्ध इति व्यवह्रियते अयञ्चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धिभेदात्त्रिविधः। आश्रया सिद्धिश्च पक्षे पक्षतावच्छेदकाभावः यथा काञ्चनमयः पर्वतो वह्निमानि-त्यादौ स्वरूपासिद्धिः पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः यथा ह्रदो-द्रव्यं धूमादित्यादौ व्याप्यत्वासिद्धिश्चाव्यभिचरितसामानाधिकरण्यस्याभावः न च स्वरूपासिद्धेरेव सूत्राल्लक्ष्यत्वप्रतीतेर्नोभयोरितरयोर्लक्ष्यत्वमिति वाच्यं हेतुरिति पदं ह्यत्र पूरणीयं हेतुपदञ्च गमकहेतोर्व्याप्तिविशिष्टपक्षधर्मस्य वाचकं व्याप्तिविशिष्टपक्षधर्म इत्येव वा पूर्यतां तथा च तस्य किञ्चिदंश-साध्यत्वेनैव साध्यसमत्वम् अत एव साध्ये साध्यतावच्छेदकाभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः यथा पक्षतावच्छेदकाभावपक्षताव-च्छेदकवह्न्यादेरन्यतमत्वेनाश्रयासिद्धित्वं यथा च पक्षे हेत्वभावहेतुभङ्गेदा-देरन्यतमत्वेन स्वरूपासिद्धित्वं तथा साध्यतावच्छेदकाभावादेरन्यतमत्वेन व्याप्यत्वासिद्धित्वं त्रितयान्यतमत्वं चासिद्धिसामान्यलक्षणं नीलधूमत्वादे-रपि व्याप्यत्वासिद्धावन्तर्भावं वदन्ति तेषामयमाशयः व्याप्तिर्हि साध्य-सम्बन्धितावच्छेदकरूपा गुरुधर्मस्य साध्यसम्बन्धितानवच्छेदकोऽतो नील-धूमत्वादेः साध्यसम्बन्धितानवच्छेदकत्वान्न व्याप्तिस्वरूपत्वं तथा च साध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तावच्छेदकाभावादिरिव साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि भवति व्याप्यत्वासिद्धिरिति॥ ४९॥

क्रमप्राप्तमतीतकालं लक्षयति। अतीतकालस्य समानार्थकत्वात् कालातीतशब्देनोक्तं कालस्य साधनकालस्यात्यये ऽभावेऽपदिष्टः प्रयुक्तो हेतुः एतेन साध्याभावप्रमालक्षणार्थ इति सूचितं साध्याभावनिर्णये साधनासम्भवादयमेव बाधितसाध्यक इति गीयते यथा वह्निरनुष्णः कृतकत्वादित्यादौ न च बाधे आवश्यकस्य व्यभिचारस्वरूपा सिद्ध्यन्यतरस्यैव दोषत्वमुचितमिति वाच्यं तदप्रतिसन्धानेन बाधस्य दोषत्वावश्यकत्वात् उपधेयसङ्करेऽप्युपाधेरसङ्करात् उत्पत्तिकालावच्छिन्नो घटो गन्धवान् शिखरावच्छिन्नः पर्वतो वह्निमानित्यादावसङ्कराच्च साध्याभाववत्त्वप्रत्यक्षतावच्छेदकावच्छिन्नकत्वस्य तत्र सत्त्वात्। परे तु घटः सकर्तृकः कार्यत्वादित्यादौ यत्र लाघवोपनीतमेकमात्रकर्तृकत्वं भासत इत्युच्यते तत्र तदभावोऽसङ्कीर्णोदाहरणमितिवदन्ति॥ ५०॥ समाप्तं हेत्वाभासप्रकरणम्॥ ८॥

क्रमप्राप्तं छलं लक्षयति। अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पो अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणं तच्छलमित्यर्थः वक्तृतात्पर्याविषयार्थकल्पने न दूषणाभिधानमिति फलितं तात्पर्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्ध्यभिधानं प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भोगासिद्धिविधानं वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम्॥ ५१॥

लक्षितं छलं विभजते। तत्र वाक्छलं लक्षयति। यत्र शक्यार्थद्वये सम्भवति एकार्थनिर्णायकविशेषाभावादनभिप्रेतशक्यार्थकल्पनेन दूषणाभिधानं तद्वाक्छलं लक्षणन्तु शक्त्या एकार्थशाब्दबोधतात्पर्यकशब्दस्य शक्त्यार्थान्तरतात्पर्यकत्वकल्पनया दूषणाभिधानं यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्यकाः कम्बला इति एवं गौर्विषाणीत्युक्ते कुतो गजस्य शृङ्गं श्वेतो धावतीति श्वेतरूपवदभिप्रायेणोक्ते श्वेतो न धावतीत्यभिधानमित्यादिकमुह्यम्॥ ५२॥

सामान्यछलं लक्षयति। सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य अति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पद् साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पद्व्रात्ये व्यभिचारात् ॥ ५४ ॥

उपचारच्छलं लक्षयति। धर्मशब्दस्यार्थेन सम्बन्धस्तस्य विकल्पो विविधः कल्पः शक्तिलक्षणान्यतररूपस्तथा च शक्तिलक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्या यः प्रतिषेधः स उपचारच्छलं यथा मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चा एवं घटस्य कथं नीलरूपाभेदः एवम् अहं नित्य इति शक्त्या प्रयुक्ते असुकस्यादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलं वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम्। न च क्लिष्टवाच्यणिके प्रयोगाद्वादिनएवापराधः स्यादिति वाच्यं तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् अन्यथा पर्वतोवह्निमानित्युक्ते पर्वतेऽयं कथसवह्निमानित्यादिदूषणेनानुमानाद्युच्छेदः स्यात् ॥ ५५ ॥

प्रसङ्गाच्छलं परीक्षितुं पूर्वपक्षयति। शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यादिति छलस्य द्वित्वमेव न तु त्रित्वमिति शङ्कार्थः ॥ ५६ ॥

समाधत्ते। उपचारच्छलस्य वाक्छलाभेदो न तयोरर्थान्तरभावात् भिन्नत्वात् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः पूर्व्वोक्तभेदकधर्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्व्वत्र सम्भवाद्विभागः कुत्रापि न स्यादिति ॥ ५७ ॥

विपक्षे बाधकमभिप्रेत्याह। यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्याच्छलत्वादिरूपाच्छलस्यैक्यं स्यान्न तु त्वदभिमतं द्वित्वमपीति भावः ॥ ५८ ॥

समाप्तं छलप्रकरणम् ॥ १० ॥

क्रमप्राप्तां जातिं लक्षयति। साधर्म्यवैधर्म्याभ्यामिति सावधारणोनिर्देशस्तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिरेकप्रत्यवस्थानस्य लक्षणत्वे परप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियतं सर्वत्र जातावभावात्तथापि व्याप्तिनिरपेक्षतया दूषणाभिधान-मित्येव वाच्यं तेन च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितं तथा च छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितं साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थ इत्यपि वदन्ति ॥ ५९ ॥

क्रमप्राप्तं निग्रहस्थानं लक्षयति । निग्रहस्य खलीकारस्य स्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिरप्रतिपत्तिः प्रकृताज्ञानं यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादे-र्निग्रहस्थानत्वानुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्म-वत्त्वं तदर्थः उद्देश्यानुगुणसम्यक् ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्य-तमत्वं वा लक्षणमित्यपि वदन्ति ॥ ६० ॥

जातिनिग्रहस्थानयोर्विभागो नास्तीति भ्रमो माभूदित्यत आह । तद्-विकल्पात्साधर्म्यादिना प्रत्यवस्थानस्य विप्रतिपत्त्याद्युन्नायकव्यापारस्य च विकल्पाद्भेदान्नानाप्रकारत्वादिति यावत् इत्यञ्च तयोर्बहुत्वेऽपि प्रमा-णादिपरीक्षाविषयकशिष्यजिज्ञासया प्रतिबन्धान्नेदानीं तद्विभागः क्रि-यत इति भावः ॥ ६१ ॥

समाप्तं पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् ॥ ११ ॥

प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

इति विश्वनाथभट्टाचार्य्यकृतन्यायसूत्रवृत्तौ प्रथमाध्याय-वृत्तिः समाप्ता ॥ १ ॥

प्रमाणैः प्रथितैर्दोर्भिर्विवादेषु परीक्षितैः ।
हरिं द्वितीयमध्यायं भासमानमहं भजे ॥ १ ॥

अथ प्रमाणादिषु लक्षितेषु परीक्षणीयेषु संशयं विना परीक्षाया असम्भवादादौ संशय एव परिक्षणीयः शिष्यजिज्ञासानुसारात्सूचीकटाह-न्यायाच्चाऽतः संशयपरीक्षायाः प्रमाणादिपरीक्षोपयोगित्वात् प्रमाण-परीक्षैवाध्यायार्थ इति वदन्ति । वस्तुतस्तु छलस्य परीक्षितत्वात् तृतीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थयोः प्रमेयस्य पञ्चमे च जाते परीक्षिष्यमाणत्व।त्तदतिरिक्तयावत्-पदार्थपरीक्षैवाध्यायार्थः॥ प्रयोजनादिपरीक्षाया अप्यत्रैवातिदेशेन करिष्यमाणत्वात् तत्र विभागसापेक्ष प्रमाणपरीक्षातिरिक्तोक्तयावत्पदार्थ परीक्षाप्रथमाह्निकार्थः तत्र च नव प्रकरणानि तत्रादौ संशयपरीक्षाप्रकरणं अन्यानि यथायथं वक्ष्यन्ते तत्र संशयपरीक्षणाय पूर्व्वपक्षसूत्रम्।

अत्र सूत्रकृता संशयस्याऽदर्शनात् संशयपरीक्षायां संशयो नाङ्गमनवस्थाभयादित्याशयं सूत्रकृतो वर्णयन्ति तदसत् न ह्यत्र संशयस्वरूपं परीक्षते। येनानवस्था स्यात् अपि तु लक्षणसूत्रोक्तं संशयकारणं तथा च संशयः समानधर्मदर्शनादिजन्यो न वेति संशयः सम्भवत्येव। परन्तु सूत्रकृतो निर्णयसत्त्वात् पूर्व्वपक्ष निराससात्रस्यापेक्षणात् संशयो न दर्शित एवमेव प्रमाणादिपरीक्षायामपि अतएवाभिहितं भाष्ये शास्त्रे-वादे च विमर्षवर्जमिति तत्त्व समानादिधर्मदर्शनान्न संशयः प्रत्येकं व्यभिचारात् अन्यतरत्वेनानुगतीकृततद्दर्शनादपि न संशयः न हि स्थाणुधर्म-समानधर्मायं पुरुषधर्मसमानधर्मायमिति वा जानन् स्थाणुर्नवेति सन्दिग्धे समानत्वस्य भेदगर्भत्वाद्भिन्नधर्मत्वेन ज्ञाते तद्भेदग्रहस्यैव सम्भवात् यद्वा समानानेकधर्मोपपत्तेरिति लक्षणसूत्रे उपपत्तिपदं स्वरूपपरमिति भ्रान्तस्येयं शङ्का तथाचायमर्थः न संशयः समानधर्मादितः स्वरूपसत इति शेषः यतः समानधर्मादेरध्यवसायादन्यतरत्वेनानुगतीकृततदध्यवसायाद्वा संशयः अन्यथा संशयस्य सार्व्वत्रिकत्वापत्तेः॥ १॥

विप्रतिपत्त्यादिजन्यसंशयत्वयं प्रतिक्षिपति। न संशय इत्यनुवर्त्तते विप्रतिपत्तेरुपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च न संशयजनकत्वं प्रत्येकं व्यभिचारादित्यर्थः यद्वा स्वरूपसद्विप्रतिपत्त्यादितो न संशयः किन्तु तदध्यवसायादित्यर्थः॥ २॥

विप्रतिपत्तिजसंशयमात्रप्रतिक्षेपाय सूत्रान्तरम्। विप्रतिपत्तौ न संशयहेतुत्वं संप्रतिपत्तेः निश्चयात् वादिनोर्मध्यस्थस्य च निश्चयसत्त्वात् सति च निश्चये संशयायोगादिति भावः॥ ३॥

उपलब्ध्यनुपलब्ध्यव्यवस्थातः संशयद्वय निरासाय सूत्रम्। उपलब्ध्यव्यवस्थायां अनुपलब्ध्यव्यवस्थायाश्च संशयजनकत्वं तदा स्यात् यदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्मिन्नप्यव्यवस्थितत्वं स्यात् नत्वेवं तथा च स्वात्मनि व्यवस्थितायास्तस्याः कथमन्यत्राव्यवस्थात्वमित्यर्थः ॥ ४ ॥

नन्वव्यवस्थाप्रामाण्यसंशयस्तस्य च न स्वसंशयरूपत्वं संशयस्य विषयविशेषघटितत्वात् तस्य चान्यसंशयजनकत्वं न विरुद्धम्। अतो दूषणान्तरमाह।

तथा तथा सति अव्यवस्थाया हेतुत्वे सति तथाशब्दोऽयं न सूत्रान्तर्गतोऽपितु भाष्यस्य इत्यन्ये अत्यन्तसंशयः संशयानुच्छेदः स्यात् तद्धर्मस्य तज्जनकस्य ज्ञानत्वादिसाधारणधर्मदर्शनस्य सातत्योपपत्तेः सर्व्वदा सम्भवाद्यथ ज्ञानत्वादिसाधारणधर्म्मदर्शनेऽपि कारणान्तरविलम्बान्न सर्व्वत्र प्रामाण्यसंशय इति यदि तदा तस्यैव विषयसंशयेऽपि हेतुत्वमस्त्विति किं प्रामाण्यसंशयस्य साधारणधर्मदर्शनादेर्वा संशयहेतुत्वे नेति भावः ॥ ५ ॥

सिद्धान्तमाह। यथोक्ताध्यवसायात् साधरणादिधर्मदर्शनात् तस्य पुरुषत्वादेर्यो विशेष इतरव्यावर्त्तकोधर्मस्तस्यापगत ईचदर्शनं ततः विशेषादर्शनादित्यर्थस्तथा च विशेषादर्शनसहितसाधारणधर्मदर्शनादितः संशये स्वीकृते न कारणाभावादसंशयो नवा यत्किञ्चित्कारणसत्त्वादत्यन्तसंशय इत्यर्थः साधारणधर्मदर्शनादेश्च संशय विशेषे जनकत्वात् संशयत्वावच्छिन्नंप्रति व्यभिचारेऽपि न क्षतिः विप्रतिपत्तौ च वादिवाक्याभ्यां मध्यस्यस्यैव संशयोपगमात् यच्चोक्तं समानधर्म्मदर्शनात् कथं संशयः समानत्वस्य भेदगर्भत्वादिति तदपि न नहि समानधर्मत्वेन तज्ज्ञानं हेतुरपि तु उभयसहचरितधर्म्मवत्त्वज्ञानं तथेत्युक्तदोषाभावात् ॥ ६ ॥

सम्प्रति संशयपरीक्षयैव परेषां पदार्थानां परीक्षामतिदिशन्नाह। एवमुक्तरीत्या उत्तरोत्तरेषु प्रयोजनादि प्रसङ्गः प्रकृष्टः सङ्गः परीक्षायाः सम्बन्धो बोध्यस्तत्किं प्रयोजनमपि परीक्षणीयं नेत्याह यत्र संशय इति यदि तल्लक्षणार्थसंशयस्तदा तदपि परीक्षणीयं अथवा उत्तरोत्तरं उक्तिप्रत्युक्तिरूपं तत्प्रसङ्गः तद्रूपा परीक्षा संशयितेऽर्थे कर्त्तव्येत्यर्थः ॥ ७ ॥

समाप्तं संशयपरीक्षा प्रकरणम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमवसरतः प्रमाणसामान्यपरीक्षणाय पूर्वपक्षयति । काल-त्रयेऽपि प्रमाणात्प्रमायाः सिद्धेर्वक्तुमशक्यत्वात् प्रत्यक्षादीनां न प्रामाण्य-मित्यर्थः ॥ ८ ॥

त्रिसूत्र्या त्रैकाल्यासिद्धत्वं व्युत्पादयति । प्रमाणस्य पूर्वत्वं तावन्न सम्भवति हि यतः प्रमायाः पूर्वं प्रमाणसिद्धौ प्रमाणसत्त्वे इन्द्रियार्थ-सन्निकर्षात् प्रत्यक्षं सिध्यतीति न स्यात् प्रत्यक्षप्रमाणतः पूर्वमेव प्रमायाः सत्त्वात् प्रमाणत्वं हि प्रमाकरणत्वं पूर्वं प्रमाया अभावे प्रमाकरणत्वमपि कथं स्यात् पूर्वमेव प्रमायाः सिद्धिरुपेयेति कथं इन्द्रियार्थसन्निकर्षात् इन्द्रियार्थसन्निकर्षादिति प्रत्यक्षोत्पत्तिः प्रत्यक्षाद्युत्पत्तिः परेतु प्रत्यक्षं प्रति करणत्वे खण्डिते तद्रीत्या करणान्तरमपि खण्डनीयमित्या-शयं सूत्रकृतो वर्णयन्ति प्रमाणस्य प्रमावैशिष्ट्याभावे प्रमाणमिति ज्ञानेऽपि प्रमावैशिष्ट्यसंशयः स्यादिति भावः ॥ ९ ॥

प्रमाणस्य प्रमातः पश्चात् सिद्धौ विषयस्य प्रमेयत्वं प्रमाणात्पूर्वमेव सिद्धमिति न प्रमाणतः प्रमाया उत्पत्तिः प्रमेयस्य च ज्ञप्तिरिति ॥ १० ॥

इदञ्च सूत्रद्वयं अनुमानाद्यभिप्रायेण चक्षुः श्रोत्रादेः प्रमानन्तरं प्रमा-समकालं वा सत्त्वस्येष्टत्वादुत्पत्तेः शङ्कितुमशक्यत्वात् तदयमर्थः प्रमाण-प्रमेययोर्युगपत्सत्त्वे युगपदुत्पत्तौ बुद्धीनामर्थविशेषनियतत्वाद्यत्क्रमवृत्तित्वं तन्न स्यात् पदज्ञानं हि शब्दविषयकं श्रावणप्रत्यक्षरूपं शाब्दबोधश्च पदार्थविषयकः परोक्षरूपो विजातीयश्चानयोर्न यौगपद्यं सम्भवति कार्य्यकारणभाववत्वात् क्रमिकत्वेनैव सिद्धेरतएवैकमेव ज्ञानमुभयविषयक-मित्यपि नाशङ्कनीयं सङ्करप्रसङ्गश्च एवं व्याप्तिज्ञानानुमित्यादावपि द्रष्टव्यं परेतु प्रमाणप्रमेययोर्न युगपत्सिद्धिर्न युगपत्ज्ञानं बुद्धीनामर्थविशेष-नियतत्वात् क्रमवृत्तित्वं तथा सति न स्यात्तथा हि चक्षुषो ज्ञानमनुमित्यादि रूपं घटादेश्च प्रत्यक्षादिरूपं न चानयोर्यौगपद्यं सम्भवतीत्यर्थ इत्याहुः ॥ ११ ॥

सिद्धान्तसूत्रम् । यदि त्रैकाल्यासिद्ध्या प्रमाणात् प्रमेयसिद्धिर्नोपेयते तदा तद्रीत्या त्वदीयः प्रतिषेधोऽप्यनुपपन्न इति जात्युत्तरमेतदिति भावः किञ्च सर्वप्रमाणप्रतिषेधे प्रतिषेधकं प्रमाणमपि नाभ्युपगन्तव्यम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा च कथं प्रतिषेधसिद्धिरित्याह। यदि च प्रतिषेधकं प्रमाणमुपेयते तदा कथं सर्वप्रमाणप्रतिषेध इत्याह ॥ १३ ॥

ननु मन्मते वस्तुसिद्धिर्नापेक्षिता विश्वस्य शून्यत्वात् प्रमाणप्रमेयभावोऽपि न वास्तविकस्त्वन्मते च त्रैकाल्यासिद्धिरुक्तैवेत्यतस्तदुद्धरति ॥ १४ ॥

त्रैकाल्यो यः प्रतिषेध उक्तः स न सम्भवति कुत इत्यत आह शब्दादिति यथा शब्दात्पश्चाद्भाविनः पूर्वसिद्धस्यातोद्यस्य मुरजादेः सिद्धिर्यथाग्निः यथा वा पूर्वसिद्धात्सूर्यादुत्तरकालीनवस्तुप्रकाशनं यथा वा वह्निसमकालीनाद्धूमाद्वह्निसिद्धिस्तथात्रापि प्रमा वः सर्वत्र प्रमाणादुत्तरभाविन्येव प्रमाणस्य चक्षुरादेः प्रमातः पूर्वभावित्वमस्त्येव पूर्वं प्रमावैशिष्ट्यन्तु तस्य नोपेयते यदा कदाचित्प्रमासम्बन्धेनैव प्रमाणत्वसम्भवाद्यदा कदाचित् पाकसम्बन्धेनैव पाचकमानयेत्यादिवदिति भावः अत्र चकारान्तं न सूत्रान्तर्गतमिति तत्त्वालोके वस्तुतटीकादिस्वरसात् सूत्रान्तर्गतमेव ॥ १५ ॥

नन्वनियतत्त्वादेव प्रमाणप्रमेयव्यवहारो न पारमार्थिकः रज्जौ सर्पादिकव्यवहारवदित्याशङ्कायामाह। यथाहि तुलायाः सुवर्णादिगुरुत्वे यत्तापरिच्छेदकत्वात्प्रमाणव्यवहारस्तुलान्तरेण च तदीयगुरुत्वेयत्तापरिच्छेदे च प्रमेयव्यवहारस्तथा निमित्तद्वयसमावेशादिन्द्रियादेरपि प्रमाणप्रमेयव्यवहार इति यद्वा प्रमाणता प्रमेयता च प्रमावैशिष्ट्यादिति यत्प्रागाशङ्कितं तत्राह प्रमेयता चेति यथा कदाचिद्गुरुत्वे यत्तापरिच्छेदकत्वात्तुलायः प्रमाणव्यवहारस्तथेन्द्रियघटादेरपि प्रमाणप्रमेयव्यवहार इति ॥ १६ ॥

अनवस्थया प्रत्यवस्थानपरं पूर्वपक्षसूत्रम्। प्रमाणानां प्रमाणतः सिद्धेः स्वीकारे प्रमाणान्तरस्वीकारः स्यात् तथाहि प्रमाणस्य तावन्न स्वतःसिद्धिरात्माश्रयापत्तेरतः प्रमाणान्तरं स्वीकार्यं तयोश्च परस्परसाधकत्वेऽन्योन्याश्रयापत्तिरतस्तत्रापि प्रमाणान्तरसङ्गीकार्यमित्येव मनवस्थेति भावः॥१७

न तु प्रमाणसिद्धिः प्रमाणं विनैव स्यादित्यत्राह। यदि च प्रमाणविनिवृत्तितः प्रमाणव्यतिरेकात् प्रमाणसिद्धिः स्वीक्रियते तदा तद्वदेव तत्सिद्धिः स्वीक्रियतां किं प्रमाणाङ्गीकारेण तथा चाव्यवस्थितमेव जगत् स्यादिति शून्यतायां पर्यवसानमिति भावः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तसूत्रम् । यथाहि प्रदीपालोकाद्घटादिप्रकाशस्तथा प्रमाणानां प्रमेयप्रकाशकत्वमन्यथा प्रदीपस्य घटप्रकाशकत्वं प्रदीपप्रकाशकं चक्षुस्तज्ज्ञापकमन्यदित्यनवस्थाभयात्प्रदीपोऽपि न घटप्रकाशकः स्यात् यदि च घटप्रत्यक्षे तत्तत्प्रकाशानां नापेक्षेति नानवस्थेत्युच्यते तदा प्रकृतेऽपि तुल्यं नहि प्रमाणात्प्रमेयसिद्धौ प्रमाणसिद्धिरपेक्षिता यदा च प्रमाणसिद्धिरपेक्षिता तदा तत्रापि प्रमाणमपेक्ष्यतां तच्चानुमानादिकमेवेति न प्रमाणान्तरकल्पना नवानवस्था सर्वत्र प्रमाणसिद्धेरनपेक्षितत्वात् क्वचिद्बीजाङ्कुरवदपेक्षापि न क्षतिकरीति भावः प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत्प्रमाणानामपि प्रमाणमन्तरेणैव प्रमेय प्रकाशकत्वमिति सूत्रार्थं केचन मन्यन्ते तान् प्रत्याह भाष्यकारः । क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः क्वचित्प्रदीपादौ प्रमाणान्तरान्निवृत्तिदर्शनात् क्वचिद्घटादौ प्रमाणान्तरादनिवृत्तिदर्शनात् प्रमाणान्तरापेक्षादर्शनात्त्वदीयो हेतुरनैकान्तः अनियतः तथा च प्रदीपदृष्टान्तात् प्रमाणान्तरापेक्षा निवृत्तिः साध्यते घटदृष्टान्तेन प्रमाणान्तरापेक्षैव किं न तत्र साध्यते तथा च दृष्टान्तसमा जातिरियमिति भावः त्वद्व्याख्याने कथं नानैकान्त इत्यत आह भाष्यकारः विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः मन्यते विशेषहेतोः व्याप्तिपक्षधर्मताश्रयस्य परिग्रहे सत्युपसंहारस्य साध्यसाधनस्याभ्यनुज्ञानादुक्तानैकात्मकः प्रतिषेधो न भवति ॥ १९ ॥

समाप्तं प्रमाणसामान्यपरीक्षा प्रकरणम् ॥ १३ ॥

प्रमाणसामान्यपरीक्षानन्तरं प्रमाणविशेषेषु परीक्षणीयेषु प्रथमोद्दिष्टं प्रत्यक्षं परीक्षणीयं तत्र च फलद्वारकमेव लक्षणं पूर्वमुक्तमतः फललक्षणं यथाभूतमाक्षिपति । प्रत्यक्षस्य यल्लक्षणमिन्द्रियार्थसन्निकर्षोत्पन्नत्वं तन्नोपपद्यतेऽसमग्रवचनात् अयमर्थः प्रत्यक्षस्य कारणघटितं लक्षणमभिहितं तत्र कारणकलापघटितायाः सामग्र्या विनिवेशनमतिव्याप्तिनिरासकं तच्च नाभिहितम् असमग्रम् इन्द्रियार्थसन्निकर्षजन्यत्वमात्रं ह्यभिहितम् आत्ममनः संयोगेन्द्रियमनःसंयोगादिकन्तु नाभिहितं तथा चात्ममनःसंयोगघटितेन्द्रियार्थसंयोगजन्यतयानुमित्यादावतिव्याप्तिरित्यर्थः ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वात्ममनोयोगादेः कारणत्वमेव नास्तीत्याशङ्कायामाह । शरीरावच्छिन्नस्यात्मनो मनसा यः सन्निकर्षस्तदभावे न प्रत्यक्षोत्पत्तिर्यतोऽत आत्मनः संयोगस्य कारणत्वमावश्यकम् । प्रत्यक्षोत्पत्तिरिति प्रकृतं ज्ञानोत्पत्तिरिति विवक्षितम् ॥ २१ ॥

नन्वेवं दिगादीनामपि कारणत्वं स्यादित्याशङ्कते । यथाकथञ्चित्पौर्वापर्य्यस्य तत्रापि सत्त्वात्तेषामन्यथा—सिद्धत्वे प्रकृतेऽप्येवम् ॥ २२ ॥

अत्रोत्तरमभिधातुमाह । आत्मनो नावरोधोऽसंग्रहः कारणत्वेनेति न कुतः ज्ञानलिङ्गत्वात् ज्ञानं लिङ्गं यस्य तत्तथा ज्ञानं हि भावकार्यं समवायिकारणं साधयति तच्च परिशेषादात्मैव दिगादीनाञ्च कारणत्वे न मानमिति भावः इत्यञ्च समवायिकारणस्यात्मनो मनसा संयोगोऽसमवायिकारणमित्यप्यर्थात् सिद्धम् ॥ २३ ॥

आत्मशरीरादिसंयोगस्य कुतो नासमवायिकारणत्वमित्यतो मनसः प्राधान्ये युक्तिमाह । नानवरोध इत्यनुवर्त्तते इन्द्रियमनोयोगद्वारा ज्ञानायौगपद्यनियामकत्वान्मनसोऽपि हेतुत्वमावश्यकमिति शरीरमनोयोगादेश्च न तन्नियामकमिति भावः इत्यञ्चात्मनः संयोगस्यासमवायिकारणत्वं युक्तम् ॥ २४ ॥

[प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचनम् ॥]

अयं सिद्धान्तसूत्रम् । प्रत्यक्षनिमित्तत्वात् प्रत्यक्षासाधारणकारणत्वात् अयमर्थः प्रत्यक्षसूत्रे इन्द्रियार्थसन्निकर्षाभिधानं हि न कारणाभिधित्सया येनात्ममनोयोगाद्यनभिधानेन न्यूनत्वं अपि तु लक्षणाभिप्रायेण तत्र च सामग्रीघटितस्येवासाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वादिन्द्रियार्थसन्निकर्षस्य चासाधारणत्वात् पृथग्वचनम् आत्मनः संयोगादिसाधारणकारणाद्यवच्छिद्य लक्षणघटकतया वचनं युक्तम् अयं भावः इन्द्रियार्थसन्निकर्षत्वावच्छिन्नकारणताप्रतियोगिककार्य्यताश्रयत्वस्य इन्द्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्वावच्छिन्नकारणताप्रतियोगिककार्य्यताशालित्वस्य वा लक्षणस्य सम्यक्त्वे क्षतमात्ममनोयोगाद्यनुप्रवेशेनेति परिष्कृतं चेदमधस्तात् इदं न सूत्रं किन्तु भाष्यमिति केचित् ॥ क ॥

[सुप्तव्यासक्तमनसाञ्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥]

समाध्यन्तरमाह । ज्ञानस्येति शेषः सुप्तानां व्यासक्तमनसाञ्च घनगर्जितादिना श्रोत्रसन्निकर्षाद्दिक्षुप्रादिना त्वक्सन्निकर्षाच्च द्रागेव ज्ञानोत्पत्तेरिन्द्रियार्थसन्निकर्षस्य प्राधान्यम् ॥ ख ॥

युक्त्यन्तरमाह । ज्ञानविशेषाणां तैरिन्द्रियार्थसन्निकर्षैरपदेशो-विशेषणं व्यावृत्तिः आत्ममनोयोगादिकं हि न व्यावर्त्तकं तज्जन्यत्वस्य ज्ञानान्तरसाधारणत्वात् एवमिन्द्रियमनोयोगजत्वमपि न लक्षणं मानसेऽव्याप्तेः परे तु तैरिन्द्रियैर्ज्ञानविशेषाणां प्रत्यक्षविशेषाणामपदेशोभाषणं यतस्तेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यं भाषन्ते हि चाक्षुषं प्रत्यक्षं रासनं प्रत्यक्षमितीत्याहुः नव्यास्तु प्रत्यक्षविशेषाणामिन्द्रियैरपदेशो यतोऽतश्चाक्षुषादिघटितविशेषलक्षणान्यपि सम्भवन्ति चाक्षुषत्वत्यनुमित्यवृत्तिजातिमत्त्वादीनि लक्षणान्तराण्यपि द्रष्टव्यानीत्याशयं वर्णयन्ति ॥ २५ ॥

इन्द्रियार्थसन्निकर्षो न हेतुरन्वयव्यभिचारादित्याशयेन शङ्कते । गीतश्रवणादिकाले चक्षुर्घटसंयोगादौ विद्यमानेऽपि चाक्षुषादेर्व्याहतत्वे इन्द्रियार्थसंयोगो न हेतुरित्यर्थः ॥ २६ ॥

समाधत्ते । अर्थविशेषस्य गीतादेः प्राबल्यात् बुभुत्सितत्वाद्गीतादिश्रवणं तथा च गीतशुश्रूषादेश्चाक्षुषादिप्रतिबन्धकत्वात् प्रतिबन्धकाभावस्य च कार्य्याजकत्वात्तत् सहकारेण चेन्द्रियार्थसन्निकर्षस्य हेतुत्वमतः पूर्वपक्षो न युक्त इति परे तु इन्द्रियार्थसन्निकर्षस्य हेतुत्वमित्यत्र इन्द्रियमनोयोगादेरहेतुत्वमिति भ्रान्तः शङ्कते व्याहतत्वादहेतुः- इन्द्रियार्थसन्निकर्षस्यैव हेतुत्वमित्यत्र यो हेतुरुक्तः स न युक्तः कुतः व्याहतत्वात् इन्द्रियमनयोगादे हेतुताया अभ्युपगमात्तद्व्याघातापत्तेः भ्रमं खण्डयति नार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषप्राबल्यात्' नास्ति व्याघातः' कुतः' अर्थविशेषस्य इन्द्रियार्थस्य प्राधान्यात्' तथा चेन्द्रियार्थसन्निकर्षप्राधान्यार्थं हि पूर्वमुक्तं' नत्वितरनिषेधार्थमिति' ॥ २७ ॥

ननु सति प्रत्यक्षस्य प्रमाणान्तरत्वे' तल्लक्षणपरीक्षासङ्गच्छते। तदेव तु नास्तीत्याशङ्कते। प्रत्यक्षत्वेनाभिमतं घटादिज्ञानमनुमानमनुमितिरेकदेशस्य पुरोभागस्य ग्रहणानन्तरमुपलब्धेस्तथाचैकदेशग्रहणात्मकलिङ्गज्ञानजन्यत्वाद्वृक्षादिज्ञानमनुमितिरित्यर्थः ॥ २८ ॥

समाधत्ते। प्रत्यक्षमनुमानमिति न' प्रत्यक्षत्वावच्छेदेनानुमितित्वं नेत्यर्थः। यावत्तावदुपलम्भात्' यावत्तावतोऽपि यस्य कस्यचिद्भागस्य' प्रत्यक्षेणेन्द्रियेणोपलम्भादुपलम्भस्य त्वयाप्यभ्युपगमात्' इदमुपलक्षणं' शब्दगन्धादिप्रत्यक्षस्यावारणात् न प्रत्यक्षमात्र निषेधइत्यपि बोध्यम् ॥ २९ ॥

यदपि वृक्षादिज्ञानस्यानुमितित्वमिति' तदपि दूषयति। न च नवेत्यर्थः' न चैकदेशस्यैवोपलब्धिरित्यपि युक्तं' अवयविसद्भावात्' यतोहि' अवयव्यस्ति' अतस्तदवयवप्रत्यक्षकालेऽवयविनोऽपि प्रत्यक्षं न व्याहतं' तेनापि सह चक्षुः संयोगादिसत्त्वादिति भावः ॥ ३० ॥

'समाप्तं' प्रत्यक्षपरीक्षा' प्रकरणम्' ॥ १४ ॥

अवयविसद्भावादिति हेतुसाधनतयोपोद्घातसङ्गत्यावयविप्रकरणमारभते। अत्र चावयविनि सन्देहः साध्यत्वादिति' यथा श्रुतार्थो न सङ्गच्छते' वज्रादौ व्यभिचारात्तस्मादयमर्थः' अवयविनि साध्यत्वादसिद्धत्वात्' सन्देहोऽवयविसद्भावादित्युक्तहेतोस्तथाच सन्दिग्धा सिद्धो हेतुरित्यर्थः' तत्र च द्रव्यत्वं स्पर्शवत्त्वं वा' अणुत्वव्याप्यं न वेत्यादयोविप्रतिपत्तयः' तत्र च सकम्पत्वाकम्पत्वरक्तत्वारक्तत्वावृतत्वानावृतत्वादिलक्षणविरुद्धधर्माध्यासादेकोऽवयवी न सम्भवति' तथाहि' शाखावच्छेदेन कम्पो' मूलावच्छेदेन तदभावोऽप्युपलभ्यते' न चैकस्मिन्नेव द्रव्ये' एकदैव विरुद्धधर्मद्वयसमावेशः सम्भवति' तस्मादवयवा एव तथाभूता' नत्वन्योऽवयवी' मानाभावात्' एवं 'महारजनरक्तैकदेशस्यांशुकस्य दशावच्छेदेनारक्तत्वोपलम्भादेवं त्यादृत पृष्ठादेरनावृतत्वोपलम्भादवसेयं' इति बौद्धानां पूर्वपक्षः' अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च बौद्धानां पूर्वपक्ष सूत्राणि वार्त्तिककृता लिखितानि च विस्तारभयान्न लिख्यन्ते ॥ ३१ ॥

सिद्धान्तसूत्रम् । अवयविनोऽसिद्धौ तद्गुणकर्म्मादीनां सर्वेषामग्रहणं तथा च सकम्पाकम्पत्वरक्तारक्तत्वादिकमपि न सुग्रहं परमाणुगतत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात् ॥ ३२ ॥

हेत्वन्तरमाह । अवयवेभ्योऽवयव्यतिरिच्यते तथा सति धारणाकर्षणयोरुपपत्तेरन्यथा परमाणु पुञ्जत्वे चैकदेशधारणेन सकलधारण मैकदेशाकर्षणेन सकलाकर्षणञ्च न स्यादित्यर्थः ॥ ३३ ॥

इदमवद्य "नौकाघर्षणेन नौकास्थाकर्षणवत् कुण्डधारणेन कुण्डस्थदधिधारणवच्चोपपत्तेर्विजातीयसंयोगबलेनैवावयवावयविभावाभावेऽप्युपपत्तेरतः पूर्वोक्तां युक्तिमेव साधीयसीं मन्यमानस्तत्र परोक्तं समाधानमाशङ्क्य दूषयति । अतिदूरस्थैकमनुष्यैकवृक्षादेरप्रत्यक्षत्वेऽपि सेनावनादि प्रत्यक्षवदेकपरमाणोरप्रत्यक्षत्वेऽपि तत्समूहरूपघटादेः प्रत्यक्षं स्यादिति चेन्न तदपि अणूनामतीन्द्रियत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वाच्चेतत्सत्त्वात्सेनावनादि प्रत्यक्षं युज्यते नत्वणूनां महत्त्वाभावादिति भावः ॥३४॥

समाप्तमवयविपरीक्षा प्रकरणम् ॥ १५ ॥

अवसरेण क्रमप्राप्तमनुमानं परीक्षितुं पूर्वपक्षयति । अनुमानस्य त्रैविध्यं पूर्वमुक्तं तत्र त्रिविधस्याप्रामाण्ये साधितेऽनुमानमप्रमाणमर्थात्सिद्धमित्याशयेनेदं अनुमानं अनुमानत्वेनाभिमतं न प्रमाणं प्रमितिकरणं व्यभिचारिहेतुकत्वात् तत्र त्रिविधे व्यभिचारं दर्शयति रोधेत्यादिना नदीवृद्ध्या पिपीलिकाण्डसञ्चारेण मयूररुतेन च वृष्ट्यनुमानं त्रिविधसुदाहृणं न सम्भवति नदीरोधाधीननदीवृद्ध्या आश्रमोपघाताधीनपिपीलिकाण्डसञ्चारेण मनुष्यकर्त्तृकमयूररुतसदृशरुतेन व्यभिचारात् पिपीलिकाण्डसञ्चारस्य वृष्टिहेतुत्वाभिप्रायेणेदं अथवा लक्षणसूत्रे पूर्ववत् पूर्वकालीन साध्यानुमापकं शेषवदुत्तरकालीन साध्यानुमापकं सामान्यतो दृष्टं विद्यमानसाध्यस्याप्यनुमापकमित्यर्थ इत्याशयः एतेन त्रैकालिकसाध्यानुमापकत्वं सम्भवति परेतु पिपीलिकाण्डसञ्चारेणात्यन्तोष्मानुमानं ततश्च महाभूतक्षोभानुमानं तस्य च वृष्टिहेतुत्वात्तेन वृष्ट्यनुमान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति' वदन्ति' एवमन्यत्रापि' व्यभिचारशङ्कासम्भवादव्यभिचारनिश्चयस्या-नुमितिहेतोरेव दुर्लभत्वात्तत्प्रामाण्यं न सम्भवतीत्याशयः ॥ २५ ॥

समाधत्ते । अनुमानाप्रामाण्यं न युक्तं' एकदेशरोधजनदीवृद्धे'स्त्रासज-पिपीलिकाण्डसञ्चारान्मयूररुतसदृशरुताच्च'लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वान्न दोषः' न च' सर्वत्र व्यभिचारशङ्का'सत्याञ्च तस्यान्तर्कैण तद-पनयनाच्च दोष इत्याशयः ॥ ३६ ॥ समाप्तमनुमानपरीक्षा प्रकरणम् ॥ १६ ॥

अनुमानस्य त्रिकालविषयत्वमभिमतं तन्न युक्तं वर्त्तमानाभावेन तद-धीनज्ञानयोरतीतानागतयोरभावेन कालत्रयात्मकविषयाभावादित्याश-येनव र्त्तमानपरीक्षाप्रकरणमारभमाणो वर्त्तमानमाक्षिपते। वर्त्तमानाभावः अतीतानागतभिन्ने कालत्वाभावः' व्युत्पादयति पतत इति पततः फलादे-र्दृश्चावधिकः कश्चन देशः पतिताध्वा' भूम्यवधिकः कश्चन पतितव्याध्वा' न तु वर्त्तमानस्य प्रसङ्गोऽपीति भावः ॥ २७ ॥

समाधत्ते । वर्त्तमानाभावे' तयोरतीतानागतयोरप्यभावः स्यात्तयो-स्तदपेक्षत्वात् वर्त्तमानध्वंसप्रतियोगित्वं ह्यतीतत्वं' वर्त्तमान प्रागभाव-प्रतियोगित्वं ह्यनागतत्वमिति भावः ॥ ३८ ॥

ननु तयोः परस्परापेक्षयैव सिद्धेर्न वर्त्तमानापेक्षेत्यत आह। अन्यो-न्याश्रयादिति भावः ॥ ३६ ॥

तयोरप्यभावे का क्षतिरतो युक्त्यन्तरमाह। वर्त्तमानाभावे प्रत्यक्षं नोपपद्यते' प्रत्यक्षस्य वर्त्तमानविषयत्वात् अतएवाह सम्बद्धं वर्त्तमानञ्च गृह्यते चक्षुरादिनेति प्रत्यक्षाभावे च सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः ॥ ४० ॥

ननु यदि वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं' वर्त्तमानप्रागभावप्रति-योगित्वञ्च भविष्यत्त्वं तदा वर्त्तमान एव घटे कथं श्याम आसीद्रक्तो भवि-ष्यतीति धीरत आह। वर्त्तमानस्यापि घटादेः श्यामरक्तरूपादीनां क्रतता कर्त्तव्यतयोरतीतता भविष्यत्तयोरुपपत्तेर्घटादेरप्यतीतानागतत्वेन व्यव-हारः परम्परासम्बन्धादित्यर्थः ॥ ४१ ॥

समाप्तं वर्त्तमानपरीक्षाप्रकरणम्॥१७

अथावसरेण क्रमप्राप्तोपमानं परीक्षितुं पूर्वपक्षयति। प्रसिद्धसाधर्म्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुपमानमुक्तं तन्न युक्तं यतः साधर्म्यमात्यन्तिकं प्रायिकमैकदेशिकं वा न सम्भवति न हि आत्यन्तिकसाधर्म्येण गौरिव गौरित्युपमानं प्रवर्त्तते न वा प्रायिकसाधर्म्येण गौरिव महिष इति न च यत्किञ्चित्साधर्म्येण मेरुरिव सर्षप इति साधर्म्यस्य चोपलक्षणत्वाद्वैधर्म्योपमानमप्येवं खण्डनीयम् ॥४२॥

समाधत्ते। प्रसिद्धं प्रकर्षेण महिषादिव्यावृत्त्या सिद्धं ज्ञातं यत्साधर्म्यन्तज्ज्ञानस्योपमितिकरणत्वान्न दोषः साधर्म्यञ्च प्रकरणाद्यनुसारात्क्वचित्किञ्चिदिति ॥ ४३ ॥

अनुमानेन चरितार्थं नोपमानं प्रमाणान्तरमिति वैशेषिकमतमाशङ्कते। प्रत्यक्षेण गोसादृश्यविशेषेण अप्रत्यक्षस्य गवयपदवाच्यत्वस्यानुमितेर्नोपमानं मानान्तरमिति ॥ ४४ ॥

अत्रोत्तरयति। अप्रत्यक्षे व्याप्यवत्तयाऽप्रत्यक्षे अनुमानत्वेन प्रमाणार्थं प्रमाप्रयोजन मुपमानस्य न पश्याम इत्यर्थः अथवा गवये गवयवृत्तौ अप्रत्यक्षे गवयपदवाच्यत्वे उपमानस्य प्रमाणार्थं प्रमां उपमानजन्यां प्रमां अनुमानत्वेन न पश्याम इत्यर्थः व्याप्तिज्ञानाभावादिति भावः ॥ ४५ ॥

ननु व्याप्तिज्ञाननियमः कल्पनीयमित्यनुशयेन युक्त्यन्तरमाह। अनुमानादुपमानस्य नाविशेषः तथेत्युपसंहारात् यथा गौस्तथा गवय इति ज्ञानादुपमानसिद्धेरुपमानाधीनसिद्धेरुपमितेः तथा च व्याप्तिज्ञानानपेक्षसादृश्यज्ञानाधीनोपमिति रित्यनुभवसिद्धं किञ्च नानुमिनोमि किन्तूपमिनोमीत्यनुव्यवसायसिद्धोपमितिर्नापलपितुं शक्यत इत्याशयः ॥४६॥
समाप्तमुपमानप्रामाण्यपरीक्षाप्रकरणम् ॥ १७ ॥

क्रमप्राप्तं शब्दं परीक्षितुं पूर्वपक्षयति। शब्दोऽनुमानमित्यस्य शाब्दबोधोऽनुमितिरिति पर्य्यवसितार्थस्तथा च शब्दो लिङ्गविधयानुमितिकरणं अर्थस्य शब्द प्रतिपाद्यस्य अनुपलब्धेरप्रत्यक्षत्वात् अनुमेयत्वादिति तथा च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात् प्रत्यक्षभिन्नत्वाद्वेत्यत्र तात्पर्य्यम् ॥ ४७ ॥

हेत्वन्तरमाह। उपलब्धेः शाब्दबोधत्वेनाभिमताया अनुमितित्वेनाभिमतायाश्च अद्विप्रवृत्तित्वात् अद्विप्रकारत्वात् अनुमितित्वं शाब्दत्वञ्च न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञातिद्वयं शब्दस्य लिङ्गविधया बोधकत्वाल्लिङ्गान्तरजन्यज्ञान वह्निजातीयत्वाभावात् ॥ ४८ ॥

हेत्वन्तरमाह । सम्बन्धान्नियतसम्बन्धात् ज्ञायमानादिति शेषः शब्दो हि व्याप्तिग्रहसापेक्षो बोधयति तेन शाब्दबोधोऽनुमितिरिति भावः ॥ ४९ ॥

सिद्धान्तसूत्रम् । आप्तस्य भ्रमादिशून्यस्य य उपदेशः शब्दस्तत्र यत्सामर्थ्यं आकाङ्क्षायोग्यतादिमत्त्वं ततः अथवा आप्तं प्राप्तं यदुपदेशसामर्थ्यं आकाङ्क्षादिमत्त्वं ततः तत्सहकारात्साधारणस्यायं निर्देशस्तेन व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादर्थे सम्प्रत्ययः शाब्दबोधः सम्भवतीति नानुमानान्तर्भावः शब्दस्येत्यर्थः शब्दादसुमर्थं प्रत्येमि नत्वनुमिनोमीत्यनुभवादिति भावः ॥ ५० ॥

शब्दार्थयोः सम्बन्धाभाव इत्यप्याह । शब्देन सहार्थस्य सम्बन्धाभावः व्याप्त्यभावः हेतुमाह पूरणेति, यदि शब्दस्यार्थेन व्याप्तिः स्यात्तदा ह्यग्निवासीशब्दैर्मुखपूरणमुखप्रदाहमुखपाटनानि स्युः शब्दस्य व्याप्यस्य सत्त्वे नान्नादेरर्थस्यापि सत्त्वात् ॥ ५२ ॥

तत्किं शब्दोऽसम्बद्धमेवार्थं प्रत्याययति तथा सत्यतिप्रसङ्ग इत्याशङ्कते । अप्रतिषेधः शब्दार्थयोः सम्बन्धप्रतिषेधो न शब्दार्थयोर्व्यवस्थितत्वात्कश्चिदेव हि शब्दः कञ्चिदेवार्थं बोधयति न सर्वः सर्वमिति इत्यञ्च सम्बन्धे स्वीकृते तेन सम्बन्धेन व्याप्तिरप्यावश्यकी सच सम्बन्धो न मुखपूरणादिनियामक इति भावः ॥ ५३ ॥

उत्तरयति । मन्यतेऽपि शब्दार्थयोरव्यवस्था न शब्दाधीनस्यार्थसंप्रत्ययस्य सामयिकत्वात् शक्तिग्रहाधीनत्वात् शक्तिरूपसम्बन्धेन न च व्याप्तिस्तस्याद्वृत्तिनियामकसम्बन्धाधीनत्वादिति भावः ॥ ५४ ॥

शब्दस्यार्थेन सह न स्वाभाविकः सम्बन्धः जातिविशेषेऽनियमात् शब्दस्यानियतार्थकत्वदर्शनादार्या हि यवशब्दाद्दीर्घशूकविशेषं प्रतियन्ति म्लेच्छास्तु कङ्गुमिति नियमे तु सर्वः सर्वं प्रतीयात् आपाततश्चेदं नानाशक्तावपि यत्र यस्य शक्तिग्रहस्तस्य तदर्थोपस्थितेः ॥ ५५ ॥ समाप्तं शब्दसामान्यपरीक्षाप्रकरणम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दस्य दृष्टादृष्टार्थकत्वेन द्वैविध्यमुक्तं तत्र चादृष्टार्थकशब्दस्य वेदस्य प्रामाण्यं परीक्षितुं पूर्वपक्षयति। तस्य दृष्टार्थकव्यतिरिक्तशब्दस्य वेदस्य अप्रामाण्यं कुतः अनृतत्वादिदोषात् तत्र च पुत्रेष्टिकारीयागादौ क्वचित् फलानुत्पत्तिदर्शनादनृतत्वं व्याघातः पूर्व्वापरविरोधः यथा उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोति श्यावोऽस्याहुतिमभ्यवहरति यउदिते जुहोति शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति श्यावशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति अत्र चोदितादिवाक्यानां निन्दानुमितानिष्टसाधनताबोधकवाक्येन सह विरोधः पौनरुक्त्यादप्रामाण्यं यथा त्रिःप्रथमामन्वाह त्रिरुत्तमामन्वाहेत्यत्रोत्तमत्वस्य प्रथमत्वपर्य्यवसानात् त्रिःकथनेन पौनरुक्त्यं एतेषामप्रामाण्ये तद्दृष्टान्तेन तदेककर्तृकत्वेन तदेकजातीयत्वेन वा सर्ववेदाप्रामाण्यं साधनीयमिति भावः ॥ ५६ ॥

सिद्धान्तसूत्रम्। न वेदाप्रामाण्यं कर्म्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्तेः कर्म्मणः क्रियायावैगुण्यमयथाविधित्वादि कर्त्तुर्व्वैगुण्यमविद्वत्त्वादि साधनस्य हविरादेर्वैगुण्यमप्रोक्षितत्वादि यथोक्तकर्म्मणः फलाभावे ह्यनृतत्वं न चैवमस्तीति भावः ॥ ५७ ॥

व्याघातं परिहरति। न व्याघात इति शेषः अग्न्याधानकाले उदितहोमादिकमभ्युपेत्य स्वीकृत्यानुदितहोमादिकरणे पूर्व्वोक्तदोषकथनान्न व्याघात इत्यर्थः ॥ ५८ ॥

पौनरुक्त्यं परिहरति। च पुनरर्थे अनुवादोपपत्तेः पुनर्नपौनरुक्त्यं निष्प्रयोजनत्वे हि पौनरुक्त्यं दोष उक्तस्थले त्वनुवादस्य उपपत्तेः प्रयोजनस्य सम्भवात् एकादशसामिधेनीनां प्रथमोत्तमयोः त्रिरभिधाने हि पञ्चदशत्वं सम्भवति तथा च पञ्चदशत्वं श्रूयते इममहं भ्रातृव्यं पञ्चदशावरेण वाग्वज्रेण च बाधे योऽस्मान्द्वेष्टि यञ्च वयं द्विष्म इति ॥ ५९ ॥

अनुवादस्य सार्थकत्वं लोकसिद्धमित्याह। वाक्यविभागस्य अनुवादत्वेन विभक्तवाक्यस्यार्थग्रहणात् प्रयोजनस्वीकारात् शिष्टैरिति शेषः शिष्टा हि विधायकानुवादकादिभेदेन वाक्यं विभज्यानुवादकस्यापि सप्रयोजनत्वं मन्यन्ते वेदेऽप्येवमिति भावः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदे वाक्यविभागं दर्शयति । मन्त्रब्राह्मणभेदाद्द्विधा वेदस्तत्र ब्राह्मणस्यायं विभागः विधिवचनत्वेनार्थवादवचनत्वेनानुवादवचनत्वेन च वेदस्य विनियोगात् विभजनात् अथवा विनियोगात् भेदात् तथा च विध्यादिभेदाद्ब्राह्मणभागस्त्रिधेति शेषः ॥ ६१ ॥

तत्र विधिलक्षणमाह । इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यं विधिः अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि अर्थवादः अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरं वचनमित्यर्थः अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवृत्तये प्रशंसति ॥ ६२ ॥

तत्र स्तुत्यादिभेदादर्थवादं विभजते । स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसार्थकं वाक्यं यथा सर्व्वजिता वै देवाः सर्व्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैते नाप्नोति सर्वं जयतीत्यादि अनिष्टबोधनद्वारा विध्यर्थे प्रवर्त्तकं निन्दा एषवावप्रथमोयज्ञानां यज्ज्योतिष्टोमोय एतेनानिष्ट्वा अन्येन यजते स गर्त्ते पतत्ययमेवैतज्जीर्य्यते प्रवासीयत इत्यादि पुरुषविशेषनिष्ठमिथोविरुद्धकथनं परकृतिः यथा हुत्वा वपामेवाग्रेऽभिघारयन्त्यथ पृषदाज्यं तदु हचरकाध्वर्य्यवः पृषदाज्यमेवाग्रे भिघारयत्यग्नेः प्राणाः पृषदाज्यमित्यभिदधतीत्यादि ऐतिह्यसमाचरिततयाकीर्त्तनं पुराकल्पः यथा तस्माद्वा एतेनपुराब्राह्मणावहिः पवमानसामस्तोमम स्तौषन् यज्ञं प्रतनवामह इत्यादि ॥ ६३ ॥

अनुवादलक्षणमाह । प्राप्तस्य अनु पश्चात्कथनं स प्रयोजनमनुवाद इति सामान्य लक्षणं तद्विशेषोविधिविहितस्येति विध्यनुवादोविहितानुवादश्चेत्यर्थः अयं चार्थवादानुवादविभागोविधिसमभिव्याहृतवाक्यानां तेन भूतार्थवादरूपाणां वेदान्तवाक्यानामसपरिग्रहान्न न्यूनता ॥ ६४ ॥

शङ्कते । शब्दाभ्यासस्य बोधितार्थकशब्दस्य योऽभ्यासः पुनः प्रयोगस्तस्योपपत्तेः सत्त्वात् अनुवादः पुनरुक्तान्न भिद्यतइत्यर्थः ॥ ६५ ॥

समाधत्ते । अनुवादस्य पुनरुक्तान्नाविशेषः अभ्यासात् अभ्यासस्य सप्रयोजनत्वात् तत्र दृष्टान्तमाह शीघ्रेति यथा लोके गम्यतामित्युक्ता पुनर्गम्यतां गम्यतां इत्यादि कर्माविलम्बादिबोधनार्थमुच्यते तथा प्रकृतेऽपीति ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमप्रामाण्यसाधकं निरस्य प्रामाण्यं साधयति । आप्तस्य वेदकर्त्तुः प्रामाण्यात् यथार्थोपदेशकत्वात् वेदस्य तदुक्तत्वमर्थाल्लब्धं तेन हेतुना वेदस्य प्रामाण्यमनुमेयं तत्र दृष्टान्तमाह मन्त्रायुर्वेदवदिति मन्त्रोविषादिनाशकः आयुर्वेदभागश्च वेदस्य एव तत्र सम्वादेन प्रामाण्यग्रहात् तद्दृष्टान्तेन वेदत्वावच्छेदेन प्रामाण्यमनुमेयम् आप्तं गृहीतं प्रामाण्यं यत्र स वेदस्ता-दृशेन वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ॥ ६७ ॥

समाप्तं शब्दविशेषपरीक्षाप्रकरणम् ॥ १६ ॥

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ विभागपरी-क्षानिरपेक्षसाङ्गप्रमाणपरीक्षणं नाम द्वितीयस्या-ध्यमाह्निकम् ॥ १ ॥

अथ विभागसापेक्षप्रमाणपरीक्षणं तदेवचाह्निकार्थः चत्वारि चात्र प्रकरणानि तत्रादौ चतुष्ट्वपरीक्षाप्रकरणम् । अन्यानि च तत्र तत्र व-क्ष्यन्ते तत्राक्षेपसूत्रम् । प्रमाणानां न चतुष्ट्वं प्रमाणत्वं नोक्तचतुष्कान्य-तमत्वव्याप्यं उक्तान्यवृत्तित्वात् तत्रान्यवृत्तित्वं व्युत्पादयति ऐतिह्येत्यादि ऐतिह्यं इति ह्योचुरित्यनेन प्रकारेण यदुच्यते तद्धि अनिर्दिष्टप्रवक्तृकं परम्परागतं वाक्यं यथा वटे वटे यक्ष इत्यादि तस्य चाप्तोक्तत्वानिश्चयान्न शब्देऽन्तर्भाव इति भावः अर्थापत्तिरनुपपद्यमानेनार्थेनोपपादककल्पनं यथा दृष्ट्वा मेघज्ञानं दृष्ट्वा गृह मेघस्य वैयधिकरण्यान्न व्याप्तिरिति नानुमाने-ऽन्तर्भावः सम्भवो भूयः सहचाराधीनज्ञानं यथा सम्भवति ब्राह्मणे विद्या-सम्भवति सहस्रे शतं अत्र च व्याप्तिर्नापेक्षितेत्याशयः अभावस्तु विरोध्य-भावज्ञानाधीनविरोध्यन्तरकल्पनं यथा नकुलाभावज्ञानेन नकुलविरो-धिनो व्यालस्य कल्पनम् अत्रापि व्याप्तिर्नापेक्षितेत्याशयः अथवा कार-णाभावादिना कार्य्याभावादिज्ञानम् अभावः भावनिष्ठव्याप्तिरेवानुमाना-ङ्गमित्याशयः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तसूत्रम्। न प्रमाणचतुष्टयस्य प्रतिषेधः शब्दे ऐतिह्यस्यानर्थान्तरभावादन्तर्भावात्सामान्यत आप्तोक्तत्वज्ञानसम्भवादस्तु ततआप्तोक्तत्वज्ञानं न शाब्दे कारणं किन्त्वाकाङ्क्षादिज्ञानं योग्यताप्रमाधीना च शाब्दप्रमेति अर्थापत्त्यादेरनुमानेऽन्तर्भावः उपपादककल्पनं हि विना व्याप्तिज्ञानं न सम्भवति वृष्टित्वादावपि मेघजन्यत्वव्याप्तिरस्त्येव सम्भवोऽपि व्याप्तिमूलकत्वादनुमानं व्याप्त्यनपेक्षित्वे च व्यभिचारादप्रमाणम् एवमभावो व्याप्तिसापेक्षोऽनुमानम् अभावनिष्ठव्याप्तेस्तानुमानाङ्गत्वे न विरोध इति भावः ॥ २ ॥

सत्यर्थापत्तेः प्रामाण्ये वहिर्भावान्तर्भावचिन्ता तदेव तु नास्तीति तटस्थः शङ्कते। असति मेघे वृष्टिर्न भवतीत्यनेन सति मेघे वृष्टिर्भवतीत्यर्थापत्तिविषयस्तत्र च न प्रामाण्यं सत्यपि मेघे वृष्ट्यभावादनैकान्तिकत्वात् ॥ ३ ॥

समाधत्ते। अर्थापत्तेर्नानैकान्तिकत्वमिति शेषः असत्सु मेघेषु न वृष्टिरित्यनेन सति मेघे वृष्टिरिति तत्र च वृष्ट्या मेघज्ञानमभिमतं यत्र च मेघे न वृष्टिज्ञानं तत्रानर्थापत्तावर्थापत्तिभ्रमः नचैतावता प्रामाण्यविरोधः व्याप्यादिभ्रमाद्भ्रमानुमिति दर्शनादनुमानस्याप्यप्रामाण्यापत्तेः नानैकान्तिकत्वमर्थापत्तेरिति भाष्यस्यावतारणिकां सूत्रादौ केचिल्लिखन्ति ॥ ४

प्रतिबन्धिमप्याह। त्वदुक्तरीत्या त्वदीयप्रतिषेधस्याप्यप्रामाण्यं स्यादनैकान्तिकत्वात् यत्र कुत्रचिदनैकान्तिकत्वस्य प्रतिषेधासाधकत्वादनैकान्तिकत्वात् ॥ ५ ॥

अथ यत्र कुत्रचिदनैकान्तिकत्वं न दोषाय किन्तु स्वविषये इति यदि तदार्थापत्तेरपि नाप्रामाण्यमित्याह। अनैकान्तिकत्वस्य स्वविषये साधकत्वाद्यदि स्वहेतोः प्रामाण्यं मन्यसे तदार्थापत्तेरपि स्वविषये प्रामाण्यमिति ॥ ६ ॥

अभावस्य न प्रमाणेऽन्तर्भाव इति तटस्थः शङ्कते। अभावनामकं प्रमाणं तदा स्याद्यदि तस्य प्रमेयःसिद्धिः तदेव तु नास्ति अभावस्य तुच्छत्वान्न तत्र प्रमाणप्रवृत्तिरिति भावः ॥ ७ ॥

सिद्धान्तसूत्रम्। तस्याभावप्रमाणस्य प्रमेयसिद्धिः भावप्रधानो निर्देशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्तप्रमेयमित्यताह लक्षितेष्विति लक्षितेषु घटादिष्वलक्षितानां तत्प्रमेयत्वसिद्धिः अलक्षितानां कथं प्रमेयत्वमत आह अलक्षणलक्षितत्वादिति यद्यप्यभावस्य गुणकर्म्मादिभिर्लक्षणं न सम्भवति तथाप्यलक्षणेनैव तल्लक्षितं भवति अनीलमानयेत्युक्ते नीलाभावो हि इतरव्यावर्त्तकतया लक्षणम् अतोऽभावोनाप्रामाणिक इति भावः ॥ ८ ॥

आक्षिप्य समाधत्ते । असति प्रतियोगिन्यभावो वक्तुं न शक्यते सति च प्रतियोगिनि कथं तदभाव इति चेन्नान्यत्र लक्षणेन सत्त्वेनार्थात्प्रतियोगिनः उपपत्तेरभावोपपत्तेः न हि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितम् ॥ ९ ॥

शङ्कते । लक्षितेषु लक्षणस्य तत्सिद्धेः व्यावर्त्तकत्वसिद्धेरलक्षितेषु अभावेषु अहेतुः अहेतुत्वं व्यावृत्त्यहेतुत्वम् अभावस्य लक्षणाभावान्निःस्वरूपस्य न व्यावर्त्तकत्वमिति भावः ॥ १० ॥

समाधत्ते । पूर्वपक्षो न युक्तः प्रतियोगिनो लक्षणस्य यदवस्थितमवस्थानं तस्यापेक्षाय तादृशसिद्धेः अयमर्थः प्रतियोगिस्वरूपज्ञानादेवाभावस्वरूपनिरूपणसम्भवान्नाभावलक्षणापेक्षेति भावः ॥ ११ ॥

प्रमेयसिद्धिरिति मण्डूकप्लुत्यानुवर्त्तते प्रतियोगिन उत्पत्तेः प्राक् अभावस्य उपपत्तेः उपलम्भात् घटो भविष्यतीत्यादिप्रागभावविषयकप्रत्यक्षस्य सार्वलौकिकत्वादिति भावः चकारेण ध्वंसादेरपि प्रत्यक्षसिद्धत्वं समुच्चीयते चेष्टाया निर्व्यापारत्वेन न प्रामाण्यं वस्तुतो लिप्यादिवत्साङ्केतिकत्वात्तस्याप्यनुमाने शब्देवान्तर्भाव इति ॥ १२ ॥

समाप्तं प्रमाणचतुष्टप्रकरणम् ॥ २० ॥

वेदस्य प्रामाण्यमाप्तप्रामाण्यात्सिद्धं न चेदं युज्यते वेदस्य नित्यत्वादित्याशङ्कायां वर्णानामनित्यत्वात् कथं तत्समुदायरूपस्य वेदस्य नित्यत्वमित्याशयेन शब्दानित्यत्वप्रकरणमारभते तत्र सिद्धान्तसूत्रम् । शब्दोऽनित्य इत्यादिः आदिमत्त्वात् सकारणकत्वात् ननु न सकारणकत्वं कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरत आह ऐन्द्रियकत्वादिति सामान्यवत्त्वे सति वहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः परे तु ऐन्द्रियकत्वं लौकिकप्रत्यक्षविशेष्यत्वं सामान्यसमवाययोस्तु न तथात्वं जाति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादिना विशेष्यत्वसम्भवेऽपि जातित्वादेरप्रत्यक्षत्वान्न व्यभिचारः मनसइन्द्रियत्वाभावाच्च नात्मनि व्यभिचार आत्मन ऐन्द्रियकत्वाभावादित्याहुः अप्रयोजकत्वमाशङ्क्याह कृतकेति कृतके घटादौ यथा उपचारो ज्ञानं तथैव कार्य्यत्वप्रकारकप्रत्यक्षविषयत्वादित्यर्थः तथा च कार्य्यत्वेनानाहार्य्य-सार्व्वलौकिकप्रत्यक्षबलादनित्यत्वमेव सिध्यति केचित्तु उपचाराद्विनाशित्वात् कृतकवत् इति दृष्टान्त इति परे तु कृतकवदुपचारात् कृतकसुख-दुःखादिवद्व्यवहारात् यथाहि सुखादौ तीव्रमन्दादिव्यवहारः शब्देऽप्येवं न तु नित्ये तथेत्याहुः ॥ १४ ॥

यथाश्रुते हेतूनां व्यभिचारमाशङ्कते । नोक्ता हेतवः घटाभावस्य घटध्वंसस्य नित्यत्वादविनाशित्वादादिमत्त्वं व्यभिचारि ऐन्द्रियकत्वं सामान्ये व्यभिचारि नित्येष्वप्यनित्यवदुपचारात् यथा घटाकाशमुत्पन्नम् अहं सुखीजात इत्यादि ॥ १५ ॥

प्रथमे व्यभिचारं परिहरति । तत्त्वस्य पारमार्थिकस्य भाक्तस्य च नानात्वस्य भेदस्य विभागात् विवेकान्न व्यभिचारः ध्वंसे हि उत्पत्ति-मत्त्वलक्षणम् आदिमत्त्वं त्रैकालिकत्वरूपनित्यत्वाभावरूपञ्चानित्यत्वमसत्येवाविनाशित्वान्नित्यत्वमौपचारिकमतो न व्यभिचारः आदिमत्त्वं प्रागभावावच्छिन्नसत्त्वं न चैतदभाव इति वार्थः ॥ १६ ॥

द्वितीये व्यभिचारमुद्धरति । सन्तानस्यानुमानेऽनुमिति करणे लिङ्गे विशेषणात् सन्तानः सन्तन्यमानः एकधर्म्मावच्छिन्नत्वेन ज्ञायमानः तेन सामान्यवत्त्वे सतीति विशेषणीयमिति ॥ १७ ॥

तृतीये व्यभिचारं वारयति । आकाशे हेतुर्नास्त्येव आकाशे प्रादेशिकत्वव्यवहारस्तु गौणः प्रदेशशब्देन कारणद्रव्यस्य कारणवतो द्रव्यस्याभिधानान्न चाकाशं तादृशं तादृशत्वे वा साध्यसत्त्वान्न व्यभिचारः एवं सुखीजात इत्यादौ सुखाद्युत्पत्तिरेव विषय इति भावः ॥ १८ ॥

न चोक्तहेतूनामप्रयोजकत्वं विपक्षबाधकसत्त्वादित्याह । शब्दो यदि नित्यः स्यादुच्चारणात् प्रागप्युपलभ्येत श्रोत्र सन्निकर्षसत्त्वान्नचात प्रति-बन्धकमस्तीत्याहावरणेति आवरणादेः प्रतिबन्धकस्यानुपलब्धप्राऽभाव-निर्णयात् देशान्तरगमनन्तु शब्दस्यामूर्त्तत्वान्न सम्भाव्यते अतीन्द्रियानन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबन्धकत्वकल्पनामपेक्ष्य शब्दानित्यत्वकल्पनैव लघीयसीति भावः ॥ १९ ॥

भ्रान्तस्य पूर्वपक्षपरं सूत्रद्वयम्। अनुपलम्भादनुपलब्धिसद्भाववन्ना-वरणानुपपत्तिरनुपलम्भात् यथा त्वया आवरणस्यानुपलब्ध्या अभाव इत्युच्यते तथा आवरणानुपलब्धेरनुपलम्भात्तदभाव आवरणोपलब्धिरेव स्यात् यदि वा आवरणानुपलब्धेरनुपलम्भेऽपि नावरणानुपलब्धेरभाव-स्तदा आवरणस्यानुपलम्भादपि नावरणस्यानुपपत्तिरित्यर्थः ॥ २० ॥

सिद्धान्तसूत्रम्। आवरणानुपलब्धेरनुपलम्भादावरणोपलब्धिरिति जात्यु-त्तरम् अहेतुः न सम्मतप्रतिषेधसाधनम् अनुपलब्धेरावरणानुपलब्धेरनुप-लम्भात्मकत्वादुपलम्भाभावात्मकत्वात्तस्य च मनसैव सुग्रहत्वात्तदनुपलब्धिर-सिद्धेति भावः ॥ २२ ॥

सप्रतिपक्षमाशङ्कते। शब्दो नित्यः अस्पर्शत्वाद्गगनवदिति भावः ॥ २३ ॥

न सप्रतिपक्षस्त्वदीयहेतोरनैकान्तिकत्वादित्याह। अस्पर्शत्वं न शब्दनित्यत्वसाधकं कर्मणि व्यभिचारात् ॥ २४ ॥

अनैकान्तिकमपि साधकं स्यादत्वाह। अनैकान्तिकस्य साधकत्वेऽणोः परमाणोर्नित्यत्वं न स्याद्रूपवत्त्वादिना तत्वानित्यत्वानुमानापत्तेरि-त्यर्थः ॥ २५ ॥

शङ्कते। गुरुणा शिष्याय विद्यायाः सम्प्रदानात् तथा च शब्दस्य प्राक्-सत्त्वं सिद्धं तथा च तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति न्यायान्नित्यत्वमर्थसिद्धमिति भावः ॥ २६ ॥

सिद्धान्तसूत्रम्। शिष्ये उपसन्ने गुरुरध्यापयति यदि च शब्दो नित्यः स्यात्तदा शिष्यागमनानन्तरमध्यापनात् पूर्वमपि शब्द उपलभ्येतेत्यनुपल-ब्ध्या च नास्ति शब्द इत्यतस्त्वदुक्तोन हेतुः ॥ २७ ॥

पूर्वपक्षसूत्रम्। मदीयहेतोः प्रतिषेधो न युक्तः कुतः 'अध्यापनात् यद्यन्तरालकाले शब्दो न स्यात् कथमध्यापनं घटेत अनुपलब्धिस्तु शब्दस्य कण्ठताल्वाद्यभिघातरूपव्यञ्जकाभावादुपपद्यत' इति भावः आचार्यास्तु सूत्रद्वयमेवं प्रचक्षते विभक्तिव्यत्यासादहेतोस्तदनन्तरालानुपलब्धिरर्थ-स्तथा च हेतोः स्वत्वस्याभावात्तदनन्तरालस्य स्वत्वध्वंसस्यानुपलब्धिरतोन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानमित्यर्थः प्रतिषेधोन युक्तः न हि दानं ममाभिप्रेतं किन्त्वध्यापनं तच्च विद्यमानस्य शब्दस्यैवेति भावः ॥ २८ ॥

सिद्धान्तसूत्रम् । अन्यतरस्य पक्षस्यानित्यत्वसाधकस्याध्यापनाद्यः प्रतिषेधः स न सम्भवति उभयोः पक्षयोरध्यापनस्य समानत्वादिति शेषः अध्यापनं हि गुरूच्चारणानूच्चारणं शिष्योच्चारणानुकूलोच्चारणं वा तच्च स्थैर्य्यास्थैर्य्यपक्षयोस्तुल्यं न शब्दनित्यतायाः साहायकं विधातुमलं न ह्यध्यापनं दानं येन स्वस्वत्वध्वंसपरस्वत्वापादनार्थं तस्य स्थैर्य्यमाशङ्कनीयं न वा सम्भवति बहूनामेकदा स्वत्वविरोधात्परस्वदानासम्भवाच्च अपि तु न्यत्याध्यापनादाविवोपदेशमात्रमिति भावः ॥ २९ ॥

पूर्व्वपक्षसूत्रम् । यद्धि स्थिरं तदभ्यस्यमानं दृष्टं यथा दशकृत्वो रूपं पश्यति एवं शतकृत्वोनुवाकमधीत इत्यभ्यासात्स्थैर्य्यं शब्दस्येति भावः ॥ ३० ॥

उत्तरयति । पूर्व्वपक्षोन युक्तः कुतः अन्यत्वे भेदेपि शब्दानां अध्ययनाभ्यासस्य उपचारात्सम्भवात् न ह्यभ्यासः स्थैर्य्यं साधयति द्विर्जुहोति त्रिर्नृत्यतीत्यादौ भेदेऽप्यभ्यासदर्शनादिति भावः ॥ ३१ ॥

अन्यतैव जगति नास्तीति कथमन्यत्वेऽप्यभ्यासोपपत्तिरिति तटस्थ आशङ्कते । यदन्यस्मादन्यदुच्यते तत्स्वस्मादनन्य दभिन्नं तत्कथमन्यद्भेदाभेदयोर्व्विरोधादिति भावः स्वाभेदस्यावश्यकत्वमिति हृदयम् ॥ ३२ ॥

समाधत्ते । तदभावेऽन्यत्वस्याभावेऽनन्यतापि नास्ति तयोर्भेदाभेदयोः सिद्धेः परस्परसापेक्षत्वात् वस्तुतस्तु तयोर्मध्य इतरस्य एकतरस्य अनन्यत्वस्य इतरापेक्षसिद्धेः इतरत्वस्य भेदस्य ज्ञानापेक्षासिद्धिर्य्यस्य तादृशत्वादित्यर्थः ॥ ३३ ॥

शङ्कते । शब्दोनित्य इत्यादिः अनुपलब्धिरप्रत्यक्षमज्ञानं वा ॥ ३४ ॥

आद्ये प्रतिबन्धिमाह । यद्यप्रत्यक्षत्वादभावसिद्धिस्तदा श्रवणकारणस्याप्रत्यक्षत्व दश्रवणं न स्यादिति सततश्रवणप्रसङ्ग इत्यर्थः ॥ ३५ ॥

द्वितीयेत्वाह । अनुमानादिना उपलभ्यमाने विनाशकारणे अनुपलब्धे रभावात्त्वदीयो हेतुरनुपदेशः असाधकः असिद्धत्वात् जन्यभावत्वेन विनाशकल्पनमिति भावः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तिनः सूत्रान्तरम् । शब्दायमाने कांस्यादौ पाणिरूपनिमित्तस्य प्रश्लेषात् संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथा श्रुतानुयायिनः । परेतु । पाणिरूपनिमित्तस्य प्रश्लेषः सम्बन्धो यत्र स पाणिजः शब्दः अर्थात् उत्तरशब्दः ततःशब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः । अन्येतु पूर्वसूत्रे-शब्दस्य तावद्वेगाख्यः संस्कारविशेषोहेतुस्तस्य तीव्रतीव्रतरमन्दमन्दतरत्वाच्छब्दोऽपि तादृशः तत्र चोत्तरोत्तरशब्दानां पूर्वपूर्वशब्दनाशकत्वं कल्प्यत इत्यर्थः ननु तादृशसंस्कारएव नास्तीत्यत्राह पाणीति नानुपलब्धिः संस्कारस्येति शेषः । पाणेर्निमित्तस्य प्रश्लेषात् घण्टादिसंयोगात्संस्काररूपकारणाभावद्वारा शब्दाभावे शब्दानुत्पत्तौ नानुपलम्भः संस्कारस्येत्यर्थ इत्याहुः ॥ ३७ ॥

ननु घण्टादिपाणिसंयोगस्य शब्दनिवर्त्तकत्वे घण्टाद्याश्रयएव शब्दः स्यादित्याशङ्कायामाह । उक्तः प्रतिषेधो न सम्भवति अस्पर्शत्वात् शब्दाश्रयस्येति शेषः शब्दोहि न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभाववदकारण गुणपूर्वककार्य्यत्वादित्याशयः ॥ ३९ ॥

एतदेव व्युत्पादयितुमाह । समासे स्पर्शादिसमुदाये साहित्येन शब्दो वर्त्तत इति न युक्तं विभक्त्यन्तरस्य विभागान्तरस्य तारमन्दादेरुपपत्तेः अय मर्थः एकस्मिन्नेव शङ्खादौ तारमन्दादि नानाशब्दा जायन्ते गन्धादयस्तु विनाग्निसंयोगं नपरावर्त्तन्त इति भावः ॥ १०५ ॥ समाप्तं शब्दानित्यत्वप्रकरणम् ॥ ४० ॥

प्रसङ्गाच्छब्दपरिणामवादं दूषयितुं संशयं प्रदर्शयति । इकोयणचीत्यादिना इकारादेर्विकारो यकारादिरिति केचित् सारं वा व्याचक्षते परेतु इकारे प्रयोक्तव्ये यकारः प्रयोक्तव्य इत्यादेशमादिशन्ति अतश्च वर्णाविकारिणो न वेति संशयः विकारश्च स्वरूपस्य विनाशेऽविनाशे वा द्रव्यान्तरारम्भकत्वं । यथा दुग्धादेर्दध्यारम्भकत्वं वीजादेर्वाद्यारम्भकत्वञ्च सुवर्णादेरपि लौहाघातजन्यावयवसंयोगनाशादवयविनो नाशे सत्येव कुण्डलारम्भकत्वं कपालादेश्च स्वरूपाविनाशेन घटाद्यारम्भकत्वम् ॥ ४१ ॥

तत्र विकार निराकरणाय सूत्रम् । न वर्णा दिकारिणस्तया सति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्प्रकृतेरुपादानत्वाभिमतस्य विवृद्ध्या विकारस्यापि विवृद्ध्यापत्तेः महदल्पावयवारब्धावयविनो महदल्पत्ववत् ह्रस्वेकारारब्धयकारापेक्षया दीर्घेकारारब्धयकारस्य विवृद्धिः स्यादित्यर्थः तस्मादादेशपक्षः श्रेयानिति भावः ॥ ४२ ॥

आक्षिपति । उक्तो हेतुर्न युक्तः विकाराणां प्रकृत्यपेक्षया न्यूनत्वस्य समत्वस्याधिकस्य चोपपत्तेर्दर्शनात् यथा तूलकपरिमाणापेक्षया तद्विकारस्तन्तुरल्पपरिमाणः यथा वा न्यग्रोधवीजादुत्कृष्टे न नारिकेलीवीजेन न्यग्रोधादल्पो नारिकेलीतरुर्जन्यते कनकादिसमपरिमाणं कटकादि च यथा वा न्यूनाधिकनारिकेलीवीजाभ्यां समौ वृक्षौ न्यूनपरिमाणाच्च वटवीजात् महान् वटतरुरिति ॥ ४३ ॥

समाधत्ते । नोक्तं समाधानं युक्तं अतुल्यप्रकृतीनां भिन्नप्रकृतीनां हि विकाराणां विकल्पः वैलक्षण्यं मयाभिहितं न हि वीजादेर्ह्रासवृद्ध्यादिना वृक्षादेर्ह्रासवृद्ध्यादिकं प्रक्रान्तं मदुक्तवैलक्षण्यन्तु तत्राप्यस्ति तथा च त्वदुक्तमुपचारच्छलमिति भावः ॥ ४४ ॥

शङ्कते । द्रव्यत्वेन न्यग्रोधादिप्रकृतीनां तुल्यत्वेऽपि विकारवैषम्यं यथा एवमेव वर्णत्वेन तुल्ययोरपि ह्रस्वदीर्घयोर्यो विकारो यकारस्तस्य अविकल्पः ऐकरूप्यं नानुपपन्नमित्यर्थः ॥ ४५ ॥

समाधत्ते । नात्र द्रव्यविकारतुल्यता विकाराणां हि अयं धर्मो प्रकृत्यनुविधानं तद्भेदे भेद इति प्रकृते तदनुपपत्तिः ह्रस्वत्वदीर्घत्वादिना प्रकृतिभेदेऽपि कार्य्यभेदाभावात् ॥ ४६ ॥

इतश्च न विकार इत्याह । विकारप्राप्तस्य न पुनः प्रकृतिरूपता दृष्टा न खलु दधि क्षीरतां पुनरापद्यते इकारस्तु यकारतां प्राप्तः पुनरिकारतामापद्यते दध्यत्रेत्युक्त्वा पुनरपि दधि अत्रेत्युच्यत एवेति भावः ॥ ४७ ॥

आक्षिपति । उक्तो हेतुर्न युक्तः सुवर्णादिकं हि कटकीभावं विहाय कुण्डलतामापन्नं पुनः कटकतामापद्यत एवेति भावः ॥ ४८ ॥

निराकरोति । सुवर्णविकारस्थले हि सुवर्णत्वादिना प्रकृतिता न तु कटकत्वादिना तत्रोभयमपि सुवर्णभावं न जहाति यदि हि सुव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवर्णतामपहाय कटकतामापन्नं पुनः सुवर्णता तदा व्यभिचारः शक्येत न चैवं प्रकृते तु इकारतां हित्वा यकारतां प्राप्तस्याथोकारतापत्तिरस्त्येवेति दोषोद्धारः परिहार इति भावः ॥ ४९ ॥ ॥ ५० ॥ ॥ ५१ ॥ ॥

अविकारे मूलयुक्तिमाह । वर्णानां नित्यत्वे विकारासम्भवादनित्यत्वे चाचिरस्थायित्वेनेकारप्रत्यक्षानन्तरमिकारनाशाद्विकारानुपपत्तिरित्यर्थः ॥ ५२ ॥

अत्र विकारवादी नित्यत्वमतमालम्ब्य परिहरति । विकाराणां प्रतिषेधो न युक्तः नित्यानां धर्मविकल्पाद्धर्मस्य नानाविधत्वादतीन्द्रियत्वात् चकारेणैन्द्रियकत्वं समुच्चीयते यथा हि नित्यानामाकाशादीनामतीन्द्रियत्वेऽपि गोत्वादीनां नित्यत्वमेवमन्येषां नित्यानामविकारित्वेऽपि वर्णानां विकारित्वं स्यादिति ॥ ५३ ॥

अनित्यत्वमालम्ब्य स आह । अनवस्थायित्वेऽपि वर्णानां यथाप्रत्यक्षं भवत्येवं विकारोऽपि स्यादिति भावः ॥ ५४ ॥

उभयतोत्तरयति । उक्तः प्रतिषेधो न युक्तः विकारधर्मित्वे नित्यत्वासम्भवात् विकारो ह्यत्र स्वरूपपरित्यागेन रूपान्तरापत्तिः तथात्वे च नित्यत्वविरोधात् न हि घटादेः कपालाद्युपादेयत्ववत्प्रकृतेः सम्भवति यकारकाले इकारानुपलब्धेः अनित्यत्वपक्षेऽपि प्रतिषेधो न युक्तः प्रत्यक्षं हि वर्णस्य द्वितीयक्षणे युज्यते विकारस्तु कालान्तरीयो न युज्यते दधीति शब्दानन्तरमत्रेत्यादि शब्देन तस्य नाशादिति भावः ॥ ५५ ॥

इतश्च विकारानुपपत्तिरित्याह । विकाराणां हि प्रकृतिनियमो यथा क्षीरदध्नोः प्रकृति विकारभावो न तु वैपरीत्यं प्रकृते तु दध्यत्रेत्यादौ विकारो यकारप्रकृतिर्विध्यतीत्यादौ तु यकारइकारप्रकृतिरिति भावः ॥ ५६ ॥

अत्र छलवादी शङ्कते । अनियमो य उक्तः स न युक्तः कुतः अनियतत्वस्य नियमादित्यर्थः ॥ ५७ ॥

समाधत्ते । अनियमे नियमात् यस्त्वया नियमप्रतिषेधः कृतः स न युक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुतः नियमानियमयोर्विरोधात् अनियमोहि नियमाभावस्तस्मिन्सति नियमासम्भवादिति भावः ॥ ५८ ॥

तदेवं वर्णानां प्रकृतिविकारभावं निरस्य स्वपक्षे विकारव्यवहारमुपपादयति । तु शब्दः पुनरर्थे एतेभ्यः पुनर्वर्णविकारोपपत्ते र्वर्णविकारस्य एकवर्णप्रयोगेण वर्णान्तरप्रयोगस्य उपपत्तेर्वर्णविकार इति व्यवह्रियते तानेवाह गुणान्तरेति गुणान्तरापत्तिर्धर्मिणि सत्येव धर्म्मान्तरापत्तिः यथोदात्ते ऽनुदात्तत्व उपमर्दोधर्म्मि निवृत्तौ धर्म्यन्तरप्रयोगः यथास्तेर्भूः ह्रासोदीर्घस्य ह्रस्वत्व वृद्धिःह्रस्वस्य दीर्घत्व लेशः अल्पत्व यथाऽस्तेरकारलोपः स्लेष आगमः एतैः कारणैर्विकारव्यवहार इति ॥५९॥

समाप्तं शब्दपरिणामप्रकरणम् ॥ २२ ॥

शाब्दबोधे पदजन्यपदार्थोपस्थितेर्हेतुत्वात्तदुपपादनाय पदार्थे निरूपणीये पदमादौ निरूपयति । ते वर्णा विभक्त्यन्ताः पदं बहुत्वमविवक्षितं विभक्तेश्च सुप्त्वमनपेक्षितं विभक्तिश्च सुप्तिङ्रूपा वस्तुतस्तु नेदं पदं शाब्दबोधोपयोगि किन्त्विदमाकाङ्क्षास्वरूपमथ वा विभक्तिर्वृत्तिरन्तः सम्बन्धस्तेन वृत्तिरुक्तं पदत्वमिति इत्यञ्च पदं निरूप्य तदर्थनिरूपणं सङ्गच्छते यत्तु प्रसङ्गात् पदार्थनिरूपणमिति तन्न पदनिरूपणस्यासङ्गतत्वापत्तेः एक सूत्रस्य प्रकरणत्वाभावात् ॥ ६० ॥

तत्र पदे निरूपिते तद्वाच्यत्वं पदार्थत्वं निरूपितं तत्रापि धात्वाद्यर्थस्य निर्विवादत्वाद्गवादिपदार्थं निरूपयितुमाह । व्यक्तिर्गवादिः जातिः गोत्वादिराकृतिरवयवसंस्थानविशेषः तेषां सन्निधिः सामीप्यं मिलनं तत्र सति उपचारात् ज्ञानात् तया च त्रयाणां युगपत्प्रत्ययात्किमेतेषां प्रत्येकं पदार्थ उत समस्तमिति संशयइत्यर्थः इदंभाष्यमिति केचित् वस्तुतस्तु दुर्बोधादिस्वरसात् सूत्रमेव तदर्थ इत्यंशस्तु भाष्यकृतः पूरणमिति प्रतिभाति ॥ ६१ ॥

तत्र व्यक्तिशक्तिवादिनो मतमाह । पदार्थ इति शेषः उक्तानां उपचारात् व्यवहारात् अनुबन्धः प्रजननं या गौर्गच्छतीत्यादि व्यवहारोव्यक्ताविव जात्याकृत्योरमूर्त्तत्वात् एवं गवां समूहः गां ददाति गां प्रतिग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्याति दश गावः गौर्वर्द्धते कृशा गौः कपिला गौः गोर्लोहितं गौः प्रसूत-इत्यादिव्यवहाराणां व्यक्तावेव सम्भवात् समासः सस्यगासनं सम्बन्धो-ऽनुबन्धइत्यर्थे गौरास्ते गोर्मुखमित्युदाहरणीयम् ॥ ६२ ॥

तद्दूषयति। न व्यक्तौ शक्तिर्व्यक्तिमात्रस्यानवस्थानात् अव्यवस्था-नात् ॥ ६३ ॥

व्यक्तिमात्रस्य शक्यत्वे हि गवादिपदाद्यत्किञ्चिद्व्यक्तेरुपस्थितिः स्यादतो गोत्वविशिष्टव्यक्तिर्वाच्या तथा च नागृह्णीत विशेषणान्यायात् जातावेव शक्तिरस्तु कथं तर्हि व्यक्तिबोध इत्यग्रिमसूत्रम्। अतद्भावेऽपि तत्पदाश-क्यत्वेऽपि तदुपचारः तच्छब्दव्यपदेशो यथा सहचरणादितो 'ब्राह्मणादौ यष्ट्यादिपदप्रयोगः सह चरणात्संयोगविशेषाद्यष्टिं भोजयेत्यत्र यष्टिधर-ब्राह्मणे यष्टिशब्दप्रयोग एवं स्थानान्मञ्चाः क्रोशन्तीति मञ्चस्थपुरुषे ताद-र्थ्यात्कटं करोतीति कटार्थकवीरणे कटत्वाविष्टत्वेन कारकत्वायोगात् यमस्य वृत्तादनुशासनादितो राजनि यम इति मानात् आढकेन मिताः शक्तव आढकशक्तव इति धारणात्तुलया धृतं चन्दनं तुलाचन्दनमिति समीप्या-द्गङ्गायां गावश्चरन्तीति कृष्णद्रव्ययोगात् शकटे कृष्णः शकट इत्युदाहर-णीयं प्राणसाधनादन्नं प्राणा इति आधिपत्याद्राजैवास्य कुलमिति कुला-धिपतिः प्रतीयते तथा च 'यथा' गङ्गादिपदाद्गङ्गातीरत्वादिना बोधस्तथा गोपदादितो गोत्वविशिष्टस्य लक्षणया बोध एतेन युगपद्वृत्तिद्वयविरोध एकपदार्थयोः परस्परानन्वयश्च प्रत्युक्तः गोत्वत्वेन रूपेण शक्तिग्रहात्तथै-वोपस्थितिरतोनिष्प्रकारकपदार्थोपस्थितिरपि नास्तीति मन्तव्यम् ॥ ६४ ॥

आकृतिरेव शक्येति मतमुपन्यस्यति। आकृतिः पदार्थः कुतः सत्त्वस्य प्राणिनो गवादेर्व्यवस्थान सिद्धेर्व्यवस्थितत्वसिद्धे स्तदपेक्षत्वादाकृतपेक्षत्वा-दयमश्वो गौरयमित्यादिव्यवहारस्याकृत्यपेक्षत्वादाकृतिरेव शक्येत्यर्थः ॥ ६५ ॥

फलतस्तद् दूषयति। मृद्गवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रस-ङ्गादप्रसञ्जनाज्जातिः पदार्थ इतरथा मृद्गवकस्यापि व्यक्तित्वाद्गवाकृति-सत्त्वाच्च वैध प्रोक्षणादिप्रसङ्गादिति भावः ॥ ६६ ॥

केवलव्यक्त्याकृतिशक्तिपक्षं निराकृत्य केवलजातिपक्षं निराक-रोति। न जातिमात्रं पदार्थः जात्यभिव्यक्तेर्जातिशब्दबोधस्य आकृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यक्त्यपेक्षत्वादाकृतिव्यक्तिविषयकत्वनियमात्तयोरपि वाच्यत्वमावश्यकं शक्तिं विना तज्ज्ञानासम्भवात् न च गोत्वप्रकारकतादृशाकृतिविशिष्टशाब्दत्वस्य कार्य्यतावच्छेदकत्वात्तज्ज्ञानमिति वाच्यं तथा सति गवादिपदस्य घटत्वादावपि शक्तिप्रसङ्गस्तस्मात्पदं स्ववाच्यमेवोपस्थापयति ॥ ६७ ॥

इत्यञ्च त्रयाणामपि वाच्यत्वं सिद्धमित्याह । तुशब्देनैकैकमात्रपदार्थत्वव्यवच्छेदः पदार्थ इत्येकवचनन्तु तिसृष्वप्येकैव शक्तिरिति सूचनार्थं विभिन्नशक्तौ कदाचित्कस्य चिदुपस्थितिः स्यात् शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वात् प्राधान्यं तथैव शक्तिग्रहात् नचाकृत्यादिसाधारणशक्यतावच्छेदकाभावान्न शक्यैक्यमिति वाच्यं तथा नियमे मानाभावात् इदं गवादिपदमभिप्रेत्य तेन पश्वादिपदस्य जात्यवाचकत्वेपि न क्षतिः जातिपदं वा धर्म्मपरं तथैव लक्षणस्य वक्ष्यमाणत्वात् ॥ ६८ ॥

तत्र के व्यक्त्यादय इत्याकाङ्क्षायामाह । यद्यपि जात्यादेरपि व्यक्तित्वात् प्रमेयत्वमेव व्यक्तित्वं तथापि जात्याकृतिशक्तिविषयव्यक्तेरिदं लक्षणं तथा च गुण विशेषो जात्याकृति समानाधिकरणो गुणः संख्यादिभिन्नस्तदाश्रयः मूर्त्तिर्व्यक्तिरिति समानार्थकमित्यर्थः परे तु गुणा रूपादयः विशेषाविशेषकाः उत्क्षेपणादयस्तेषां आश्रयोद्रव्यं तेन जात्याश्रयो व्यक्तिरित्याशयः विशेषलक्षणमाह मूर्त्तिरिति मूर्त्तिः संस्थानविशेषस्तद्वानित्याहुः अत्र च मध्यपदलोपी समास इत्याशयः अन्येतु व्यक्तेर्लक्षणं मूर्त्तिरिति सैव केत्याह गुणविशेषाश्रय इति गुणविशेषस्यावच्छिन्नपरिमाणस्याश्रय इत्यर्थ इत्याहुः ॥ ६९ ॥

आकृतिं लक्षयति । जातिलिङ्गमित्याख्या यस्या जातेर्गोत्वादेर्हि सास्नादि संस्थानविशेषोलिङ्गं तस्य च परम्परया द्रव्यवृत्तित्वं जातिर्द्रव्यासमवायिकारणतावच्छेदिका लिङ्गं धर्मोयस्याःसेत्यर्थ इति कश्चित् ॥ ७० ॥

जातिं लक्षयति । समानः समानाकारकः प्रसवो बुद्धिजननं आत्मा स्वरूपं यस्या सा तथा च समानाकारबुद्धिजननयोग्यत्वमर्थः समानाकारबुद्धिजननयोग्यधर्मविशेषो नित्यानेकसमवेतरूपार्थ इत्यपि वदन्ति इदन्तु बोध्यं एवं सत्याकृत्यविषयको गवादि पदात् न शाब्दबोधः अनुभवलेन तथैव कार्य्यकारणभावकल्पना इत्थञ्चालाघवा ङ्गोपदस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्वविशिष्टे शक्तिरेव स्यादिति ॥ ७१ ॥ समाप्तं शब्दशक्तिपरीक्षाप्रकरणम् ॥ २३ ॥

द्वितीयाध्यायस्य द्वितीयमाह्निकञ्च ॥ २ ॥

विभागपरीक्षाद्वारकसाङ्गप्रमाणपरीक्षणं नाम । इति श्रीविश्वनाथभट्टाचार्य्यकृता न्यायसूत्रवृत्तौ द्वितीयाध्याय-

वृत्तिः समाप्ता ॥ २ ॥

सुरप्रभृतितुल्यता भवति यत्कृपामन्तरा
यदीयकरुणाकणात्तरति मोहजालं जनः ।
विधाय हृदयाम्बुजे रुचिरवाक्प्रचाराय तां
नमामि परदेवतां सततमेव वाणीमहम् ॥

अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिषट्कं तृतीये परीक्षणीयं तेनात्मादिषट्कं परीक्षैवाध्यायार्थः तत्रात्मादिचतुष्कपरीक्षा प्रथमाह्निकार्थः तत्र च नवप्रकरणानि तत्रादाविन्द्रियभेदप्रकरणं तत्रेन्द्रियं ज्ञानवन्न वेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्तथा चात्मशब्दस्य नानार्थत्वादिन्द्रियानामभौतिकत्वाद्वा न साङ्कर्य्यमितीन्द्रियचैतन्यवादिनस्तन्निराकरणाय सूत्रम् । एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात् दर्शनस्पर्शने ज्ञानविशेषौ तृतीया च प्रकारे तेन चाक्षुषस्पार्शनोभयवत्त्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्त एक इति ॥ १॥

अत्र शङ्कते । चक्षुस्त्वगादीनां रूपस्पर्शादिनियतविषयत्वाच्चक्षुरादेश्चाक्षुषादिसमवायित्वमित्यश्चाभेदप्रत्ययो भ्रान्त इति भावः ॥ २ ॥

समाधत्ते । उक्तप्रतिषेधो न युक्तः उक्तविषयव्यवस्थानादेवात्मसद्भावादतिरिक्तात्मकल्पनादित्यर्थः अयं भावः तत्तदिन्द्रियाणां तत्तद्विषयक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षं प्रति समवायित्वं वाच्यं न तु प्रत्यक्षत्वावच्छिन्नं प्रति अनुमित्यादि जनकत्वे तु विनिगमकाभावः तेन जन्यज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वं चक्षुरादेरनित्यत्वादात्मनश्च नित्यतायावच्यमाणत्वाच्चक्षुरादिनाशेऽपि स्मरणाच्चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादो युज्यत इति ॥३॥

समाप्तमिन्द्रियभेदप्रकरणम् ॥ १४ ॥

ननु गौरोऽहं जानामीत्यादिप्रतीतेरस्तु शरीरमात्मेत्याशङ्क्य दूषयति । पातकाभावात् पातकादेरभावप्रसङ्गात् तथा चोत्तरकालिकं दुःखादिकं न स्यादिति यद्वा दाहोनाशः तथा च शरीरनाशे क्षते कर्त्तरि शरीरे विनष्टे पातकं न स्यादित्यर्थः । यद्यपि भूतचैतन्यवादिना पातकादिकं नोपेयते तथापि तस्य प्रसाध्याङ्गकत्वादेकदेशिनः पूर्वपक्षित्वाद्वा न दोष इति भावः ॥ ४ ॥

तत्रापि तुल्यदोष इत्याशङ्कते । तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात् तस्य आत्मनो नित्यत्वात् नित्यत्वेन निर्विकारत्वं तेन जन्यधर्म्मानाश्रयत्वमभिमतमिति केचित् तन्नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित् किञ्च सात्मकशरीरनाशेऽपि हन्तुः पातकाभावः स्यात् तस्यात्मनो नित्यत्वेन तन्नाशकत्वाभावात् ॥ ५ ॥

परिहरति । कार्य्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः क्षत्यवच्छेदकस्य शरीरस्यैव नाशो न त्वात्मन इति न पातकाभावः यद्वा न हन्तुः पातकाभावः कार्य्याश्रयकर्त्तुर्वधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति भावः वस्तुतस्तु पूर्वशरीरावच्छिन्न प्राणविनाशिनो बन्धनसुखनिरोधादेर्हिंसात्वं न स्यात् पातकानभ्युपगन्तृचार्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ॥ ६ ॥

समाप्तं देहभेदप्रकरणम् ॥ २५ ॥

प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते । वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति केषाञ्चिन्मतं तन्निराकरणायै तदुपन्यासः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतद्दूषयति। मध्यस्थसेतुना तडागस्येव नासास्थिव्यवहितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययो भ्रम इत्यर्थः॥ ८॥

आक्षिपति। चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः॥ ९॥

अत्रैकदेशी परिहरति। अवयवस्य शाखादेर्नाशेऽप्यवयविनो वृक्षस्य प्रत्यभिज्ञानान्नावयवनाशे सर्वत्रावयविनाशनियमस्तथा चैकनाशेऽपि नान्धत्वमिति॥ १०॥

एकदेशिमतस्य पूर्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्। उक्तप्रतिषेधो न युक्तः दृष्टान्तस्य विरोधादयुक्तत्वात् न हि शाखाच्छेदे वृक्षस्तिष्ठति तथा सति वृक्षस्यानाशप्रसङ्गादतोऽवस्थितावयवैस्तत्र खण्डवृक्षोत्पत्तेर्नैकदेशिमतं युक्तम् एतेनैकनाशे द्वितीयाविनाशः द्वैदसाधनमपि प्रत्युक्तं चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुः सम्भवात् इत्यञ्च लाघवाच्चक्षुरद्वैतमिति टीकास्वरसषिद्धं परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिनः सूत्रं सव्येति शङ्कते नैकस्मिन्निति समाधत्ते एकेतिशङ्कते अवयवेति निराकरोति दृष्टान्तेति शाखानाशे वृक्षनाशावश्यकत्वात् दृष्टान्तो न युक्तः यद्वा दृष्टान्तस्य गोलकभेदविरोधादन्यथा अनुपपन्नत्वाद्दृष्टं हि स्मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति॥ ११॥

आत्मन इन्द्रियभेदे युक्त्यन्तरमाह। चिरविल्वाद्यम्लद्रव्ये दृष्टे तद्रसस्मरणाद्दन्तोदकसंप्लवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त आत्मा सिद्ध्यति॥ १२॥

आक्षिपति। स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमस्तस्याश्च दर्शनादिना सामानाधिकरण्ये मानाभावात् अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः॥ १३॥

समाधत्ते। उक्तप्रतिषेधो न युक्तः धर्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषेणात्मगुणत्वसिद्धेरहं स्मरामीत्यनुभवात् विषयनिष्ठ कार्यकारणभावे चैत्रस्य ज्ञानान्मैत्रस्य स्मरणापत्तेरिति भावः॥ १४॥

विषयाणां स्मर्त्तव्यानां स्मृतिसमवायित्वं स्यादित्याशङ्क्य समाधत्ते। अपरिसङ्ख्यानात् आनन्त्यात् तथा च लाघवादतिरिक्तात्मसिद्धिः इदं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्रं किन्तु भाष्यमिति केचित् ॥ १५ ॥ समाप्तं चक्षुरद्वैतप्रकरणम् ॥ १६ ॥

ननु मनसो नित्यत्वादात्मत्वमस्त्वित्याशङ्कते। नातिरिक्त आत्मा आत्मसाधकमानानां मनसार्थान्तरमिति भावः ॥ १६ ॥

समाधत्ते। यदि मनसो ज्ञातृत्वं तदा व्यासङ्गाद्युपपादनाय करणान्तरमवश्यं वाच्यं तथा चैको ज्ञाता ज्ञानसाधनं चैकं सिद्धं मन आत्मास्त्विति संज्ञामात्रं किञ्च व्यासङ्गोपपादकतया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यक्षोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः ॥ १७ ॥

ननु रूपादिप्रत्यक्षं सकरणकमस्तु न तु सुखादिप्रत्यक्षं एवं परमात्मनन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षं स्यादत आह। उक्तो नियमविशेषो निरनुमानः निष्प्रमाणकः गौरवाद्वैपरीत्ये च विनिगमकाभावाच्चेति भावः ॥ १८ ॥ समाप्तं मनोभेदप्रकरणम् ॥ २७ ॥

एवं साधितेऽपि देहादिभिन्ने आत्मनि विना तन्नित्यतां न परलोकार्थिनः प्रवृत्तिरत आत्मनित्यताप्रतिपादनाय सूत्रम्। जातस्य बालस्य एतज्जन्मानुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां स्मृतिघत्तिः उत्पत्तिस्तस्याः पूर्वपूर्वानुभवाधीन स्मृतिसम्बन्धादेव सम्भवात् इत्थं चेदानीन्तनस्यात्मनः पूर्वपूर्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः ॥ १९ ॥

अत्र शङ्कते। बालस्य हर्षादयोमुखविकासाद्यनुमेया न च तत्सम्भवः पद्मादीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः ॥ २० ॥

सिद्धान्तसूत्रम्। उक्तं न युक्तं यतः पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकारास्तेषां उष्णकालादिनिमित्तत्वात् मनुष्यादीनान्तु हर्षादिनिमित्तकामुखविकासादय इति न तुल्यतेति भावः ॥ २१ ॥

आत्मनित्यत्वे हेत्वन्तरमाह। प्रेत्य मृत्वा जातमात्रस्य यः स्तन्याभिलाषः सतात्वदाहाराभ्यासजनितः जन्मान्तरीणाहारेष्टसाधनताधीनजन्यजीवनादृष्टोद्बोधितसंस्काराधीनेष्टसाधनतास्मरणेन हि बालः स्तन पाने प्रवर्त्तत इत्यनादित्वमिति ॥ २२ ॥

शङ्कते। यथायस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतयागमनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथैव वत्सस्यापि स्तनोपसर्पणं न त्विष्टसाधनताज्ञानाधीनप्रवृत्तिजन्यचेष्टे-थमित्यर्थः ॥ २३ ॥

समाधत्ते । स्तनपान एव बालः प्रवर्त्तते नत्वन्यत्रेति नियमः कथं स्यात् वस्तुतस्तु अन्यत्र अयस्ि प्रवृत्त्यभावात् प्रवृत्तिर्हि चेष्टानुमितालिङ्गं न तु क्रियामात्रमतो न व्यभिचार इति भावः ॥२४॥

हेत्वन्तरमाह । वीतरागो रागशून्यस्तावन्नोत्पद्यतेऽपितु सराग स्तत्र च जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मरणं हेतुरिति पूर्वं स्तन्याभिलाष-उक्तः सम्प्रति तु पतंगादीनां कणादिभक्षणाभिलाषसाधारणं रागमात्र-मित्यपौनरुक्त्यम् ॥ २५ ॥

शङ्कते । द्रव्यस्य घटादेर्यथा सगुणस्य रूपादिविशिष्टस्योत्पत्तिर्यथा घटादिः स्वतएव रूपादिमान् भवति तथैवात्मापि स्वतएव सरागो भवती-त्यप्रयोजकत्वं त्वदीयहेतूनामिति भावः ॥ २६ ॥

समाधत्ते । सङ्कल्पो ज्ञानमिष्टसाधनताज्ञानं इति यावत् तन्निमि-त्तका हि रागादय स्तथा चेष्टसाधनताज्ञानत्वेनेच्छात्वादिना कार्य्यकारण-भावात् प्रवृत्तित्वेन चेष्टात्वेन च कार्य्यकारणभावान्नाप्रयोजकत्व मिति भावः ॥ २७ ॥ समाप्त मनादिनिधनप्रकरणम् ॥२८॥

क्रमप्राप्ते शरीरपरीक्षणे मानुषादिशरीरं पाञ्चभौतिक मित्येके तत्र सिद्धान्तसूत्रम् । मानुषादिशरीरं पार्थिवं पृथिवीसमवायिकारणकं गुणान्तरस्य गन्धनीलादिरूपकाठिन्यादेरुपलब्धेरिति ॥ २८ ॥

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ क ॥

निश्वासोच्छ्वासोपलब्धेस्चातुर्भौतिकम् ॥ ख ॥

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ग॥

मतान्तराभिधानाय त्रिसूत्री । तद्गुणानां पृथिव्यप्तेजोगुणानां गन्ध-स्नेहोष्णस्पर्शानामुपलब्धेः एतावता त्रिभौतिकत्वे सिद्धे निःश्वासादित-श्चातुर्भौतिकत्वं निःश्वासोच्छ्वासौ प्राणवायोर्व्यापारविशेषौ क्लेदोजलविशे-षो जलविशिष्ट पृथिवीत्युभयथापि जलमावश्यकं पाकस्य तेजः संयोगा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीनत्वात्तेजः सिद्धिर्व्यूहो निःश्वासादिः अवकाशदानं छिद्रं एतानि मतानि सूत्रकृता तुच्छत्वान्न दूषितानि तथाहि एकस्मिन् शरीरे पृथिवीत्वादिनानाजातेः सङ्करापत्तेरसम्भवात् नवा नानोपादानकत्वं विजातीयानामनारम्भकत्वात् तथात्वे वा जलाद्यारब्धस्य न पृथिवीत्वं व्यभिचारात् नवाचित्वद्रव्यं गन्धवत्त्वविरोधात् 'गन्धादीनामानाशमनपायाच्च' पार्थिवत्वमित्युक्तप्रायं यद्वा पार्थिवत्वे कथं जलादिसम्बन्ध इत्याशङ्कायां जलादिनिमित्तवशात्तु भौतिकत्वादिव्यपदेश इत्याशयेन त्रिसूत्री ॥ क ॥ ॥ ख ॥ ग ॥

पार्थिवत्वे युक्त्यन्तरमाह । सूर्यन्ते चक्षुः गच्छतीति मन्त्रान्ते पृथिव्यान्ते शरीरमित्यभिधानादेवं प्रकृतौ विकारस्य लयाभिधाने सूर्यन्ते चक्षुर्गच्छतादि मन्त्रान्ते पृथिव्यान्तेशरीरमिति इमां चतुःसूत्रीं केचन भाष्यतया वर्णयन्ति तन्न तथा सत्येकसूत्रस्य प्रकरणत्वानुपपत्तेः अतएव चतुर्थं सूत्रमेवेत्यपरे अन्ये तूक्तयैवानुपपत्त्या आप्यतैजसवायव्यानि लोकान्तरशरीराणि तेष्वपि भूत संयोगः पुरुषार्थतन्त्र इति भाष्यं सूत्रतया वर्णयन्ति तदर्थस्तु आप्यादीनि लोकान्तरेषु वरुण लोकादिषु प्रसिद्धानि शरीराणि जलादिरूपत्वे कथमुपभोगक्षमतेत्यत्र तेष्वपीति भूतसंयोगः पृथिव्युपष्टम्भः पुरुषार्थतन्त्र उपभोगसम्पादकः ॥ २९ ॥

समाप्तं शरीरपरीक्षाप्रकरणम् ॥ २९ ॥

अथेन्द्रियं परीक्षणीयं तत्र लक्षणसूत्रोक्तं भौतिकत्वमिन्द्रियाणां परीक्षितुं संशयमाह कृष्णसारे चक्षुर्गोलके सति घटाद्युपलम्भाद्गोलकस्येन्द्रियत्वमिति बौद्धाः व्यतिरिच्य विषयं प्राप्य उपलम्भात् उपलम्भजनाद्गोलकातिरिक्तानीत्यपरे तत्र इन्द्रियाणि गोलकातिरिक्तानि नवेति संशयो गोलकातिरिक्तानीति नैयायिकादयः तत्राप्यभौतिकान्याहङ्कारिकाणीति सांख्याः भौतिकानीत्यपरे ॥ ३० ॥

तत्र सांख्य मतेन बौद्धमतमुदस्यन्नाह । गोलकं नेन्द्रियं अप्राप्यकारित्वेऽति प्रसङ्गात् इत्यञ्च गोलकातिरिक्तं भौतिकमस्ति वाच्यं 'तदप्यसङ्गतं' चक्षुषाहि न्यूनपरिमाणं महत्प रिमाणञ्च गृह्यते नच न्यूनेन महतो व्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनं सम्भवति नवाऽ व्यग्रग्रहणमतोऽ भौतिकानीन्द्रियाख्याहङ्कारिकाणीति ॥ २१ ॥

सांख्यं निरस्यति। रश्मिगोलकावच्छिन्नं तेजः तेजोऽर्थस्य घटादेर्यः सन्निकर्षविशेषः संयोगविशेषस्तस्मात् महदण्वोर्ग्रहणमुपपद्यते भौतिकेऽपि प्रदीपादौ महदणुप्रकाशकत्वं दृष्टं अभौतिकत्वे तु पुरः पश्चाद्वर्त्तिनां सर्वेषामेव ग्रहः स्यात् ॥ २२ ॥

तैजसे चक्षुष्यनुपलब्धिबाधं बौद्धः शङ्कते। रश्म्यर्थसन्निकर्षो न हेतुर्गोलकातिरिक्तस्य रश्मेरनुपलब्धेः ॥२३॥

समाधत्ते। रूपोपलब्धेः सकरणकत्वादिनानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिर्नाभावनिर्णायिकेत्यर्थः ॥ २४ ॥

कथं तर्हि नोपलम्भ इत्यत आह। द्रव्यस्य धर्मभेदो महत्त्वादिर्गुणस्य धर्मभेदः उद्भूतत्वं तदधीनत्वात् प्रत्यक्षस्य द्रव्यमात्रे उपलब्धेर्न नियमः यत्रोद्भूतरूप महत्त्वादिकं तस्य प्रत्यक्षं तदभावाच्चक्षुरादेरप्रत्यक्षम् ॥ २५ ॥

चक्षुरादावुद्भूतरूपमेव न कुत इत्याशङ्कायां भाष्यम्। अदृष्टविशेषाधीन इन्द्रियाणां व्यूहोरचनाविशेष उपभोग साधनमिति सूत्रमेवेदमिति केचित् ॥ ३७ ॥

महतो रूपवतोऽनुपलब्धौ दृष्टान्तमाह। महतो रूपवतश्चोल्काप्रकाशस्य सौरालोकेनाभिभवान्मध्यन्दिनेऽनुपलब्धिवदनुद्भूतरूपवत्त्वाच्चक्षुषोऽप्यनुपलम्भः सम्भवतीति भावः ॥३८॥

नन्वेवं घटादेरपि रश्मिः स्यात्सौरालोकेनाभिभवात्पुनरग्रह इत्यत आह। नेत्यस्य घटादौ रश्मिरिति शेषः ॥ ४० ॥

नन्वनुद्भूतरूपत्वाच्चक्षुषोऽनुपलब्धिर्नत्वभिभवादित्यत्र किं विनिगमकमिति तटस्थाशङ्कायामाह। अनभिव्यक्तितोऽनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धिः कुतः वाह्यप्रकाशानुग्रहात् सौरालोकादिसाहित्याद्विषयोपलब्धेः तस्योद्भूतरूपत्वे वाह्यप्रकाशापेक्षा न स्यात् अभिभूतत्वे च तत्साहित्येनापि प्रत्यक्षजननं न स्यादभिभूतस्य कार्याक्षमत्वादिति भावः ॥ ४१ ॥

ननु चक्षुषो नाभिभवः किन्तु तद्रूपस्य तस्य च प्रत्यक्षजनकत्वे मानाभावः। क्विचाभिभवात्तस्य न प्रत्यक्षमितरप्रत्यक्षजनने च विरोधाभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याशङ्कायामाह। रूपस्य अभिव्यक्तौ प्रत्यक्षे उद्भूतत्व इति यावत्' उद्भूतरूपस्य प्रत्यक्षाभावे ह्यभिभवकल्पना नत्वेवं प्रकृते सुवर्णादिवत्सर्वदाभिभावकद्रव्यान्तरकल्पनेच गौरवमिति भावः ॥ ४२ ॥

चक्षुषि प्रमाणान्तरमाह। नक्तञ्चराणां वृषदंशादीनां 'गोलके रश्मिदर्शनात् 'तद्दृष्टान्तेन परेषामपि रश्म्यनुमानमिति भावः 'अन्यथा तमसि तस्य प्रत्यक्षं न स्यादिति हृदयम् ॥४३॥

अप्राप्यकारित्वं चक्षुषः स्यादित्याशङ्कते ॥ ४४ ॥

समाधत्ते। परेतु उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतारणिका अप्राप्यग्रहणमिति 'वस्तुतः सिद्धान्तसूत्रमेव तत्प्रदीपदृष्टान्तेन काचाद्यन्तरितप्रकाशकत्वेन तैजसत्वं सिध्यतीति 'नन्वप्राप्यकारित्वं किं न स्यादत्राह कुड्येति उक्तस्य तैजसत्वस्य प्रतिषेधी गोलकात्मकत्वं न सम्भवति 'कुड्यान्तरितस्यानुपलब्धेरित्याहुः ॥ ४५ ॥

ननु कुड्यान्तरित इव काचान्तरितेऽपि सन्निकर्षो न सम्भवतीति 'कथं प्राप्यकारित्वमित्याशङ्कायामाह। काचादिना स्वच्छद्रव्येणाप्रतिघातादप्रतिबन्धात्सन्निकर्ष उपपद्यत इति भावः ॥ ४६ ॥

तत्र दृष्टान्तमाह। दाह्य इति वस्तुमात्रोपलक्षणं 'परेतु दाह्ये कपालादौ वह्न्यादेरविघातपरं तदित्याहुः ॥ ४७ ॥

आक्षिपति। अप्रतिघातो न युक्त इतरस्य स्फटिकादेरितरस्य कुड्यादेः' यो धर्मः प्रतिघातकत्वं 'तत्प्रसङ्गात्' स्फटिकादिकमपि कुड्यादिवत्प्रतिबन्धकं भवेदित्यर्थः ॥ ४८ ॥

समाधत्ते। आदर्शे उदके च प्रसादस्वाभाव्यात्स्वच्छस्वभावत्वात् 'मुखादिरूपोपलब्धिर्न तु भित्त्यादावेवं 'स्फटिकाद्यन्तरितस्योपलब्धिर्नतु कुड्याद्यन्तरितस्येति स्वाभाव्याच्च दोषः' एतेन वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि प्रतिघातो न स्यादिति प्रत्युक्तं 'वह्न्याद्यप्रतिबन्धेऽपि दीपालोकादेः प्रतिबन्धवत्सम्भवादिति भावः ॥ ४९ ॥

चक्षुषस्तादृशत्वकल्पने किं मानमित्यत्राह। हि यस्मात् 'दृष्टानामनुमितानां वा पदार्थानां 'दृष्टेनानुमितानामिति वार्थः' तेषामेवं भवितेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियोग एवं मा भवितेति प्रतिषेधो वा नोपपद्यते युक्त्यनुसारिणी हि वल्पनेति भावः ॥ ५० ॥ समाप्तमिन्द्रियपरीक्षाप्रकरणम् ॥ ३० ॥

दर्शनस्पर्शनाभ्यामित्यादिकमिन्द्रियनानात्वे युज्यते इत्युपोद्घातेनेन्द्रियनानात्वं परीक्षणीयं तत्र संशयमाह । स्थानान्यत्वे स्थानभेदे घटपटादीनां नानात्वदर्शनान्नानावयवस्थितस्यावयविन एकत्वदर्शनाच्च इन्द्रियाणां नानात्वमेकत्वं वेति संशयः ॥ ५१ ॥

पूर्वपक्षसूत्रम् । सर्वेष्विन्द्रियप्रदेशेष्वव्यतिरेकात् सत्त्वात्त्वगेवैकमिन्द्रियमस्तु ॥ ५२ ॥ ॥ ५३ ॥ ॥ ५४ ॥ ॥ ५५ ॥ ॥

उत्तरयति । युगपत् एकदा अर्थानां गन्धरूपादीनाम् अनुपलब्धेर्न त्वगेवैकमिन्द्रियं अन्यथा तस्य व्यापकत्वाच्चाक्षुषादिकाले घ्राणजादिकमपि स्यादिति भावः ॥ ५६ ॥ ॥ ५७ ॥ ॥ ॥

इन्द्रियाणां नानात्वे कार्यभेदमानमाह । इन्द्रियार्थानामिन्द्रियग्राह्याणां रूपादीनां पञ्चत्वात् पञ्चविधत्वात् रूपादीनां हि चक्षुराद्येकैकेन्द्रियमात्रग्राह्यत्वाद्वैलक्षण्यं तच्चैकेन्द्रियपक्षे न सम्भवति अन्धादीनां रूपाद्युपलब्धिप्रसङ्गश्चेति भावः ॥ ५८ ॥

शङ्कते । इन्द्रियार्थानां नीलपीतादीनां बहुत्वादिन्द्रियाणां बहुतरत्वप्रसङ्गादिन्द्रियार्थपञ्चत्वादिन्द्रियभेदो न युक्तः ॥ ५९ ॥

समाधत्ते । उक्तप्रतिषेधो न गन्धादीनां सौरभादीनां गन्धत्वाद्यव्यतिरेकाद्गन्धत्वादिसत्त्वात् तथा च विभाजकगन्धत्वावच्छिन्नग्राहकत्वमभिप्रेतं नत्ववान्तरधर्मावच्छिन्नग्राहकत्वमिति भावः ॥ ६० ॥

यदि गन्धत्वादिना सुरभ्यादीनामैक्यं तदा विषयत्वेन गन्धरसादीनामप्यैक्यादिन्द्रियैक्यं स्यादिति ।

शङ्कते । विषयत्वाव्यतिरेकाद्विषयत्वेनैक्यात् ॥ ६१ ॥

उत्तरयति । इन्द्रियाणामैक्यं न हेतुमाह बुद्धीत्यादि बुद्धेश्चाक्षुषादेर्लक्षणं चाक्षुषत्वादि तत्पञ्चत्वे न तदवच्छिन्नकरणानां पञ्चत्वं एवमधिष्ठानं रूपादिविषयस्तत्पञ्चत्वात् गतिः दूरादौ गमनं इदं चक्षुरधिकृत्य यद्वा गतिः प्रकारस्तथा च प्रकाराणां पञ्चत्वात् चक्षुर्हि गत्वा गृह्णाति त्वग्देहावच्छेदेन श्रोत्रं कर्णावच्छेदेनेत्यादिप्रकारभेदात् आकृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोलकानां संस्थानविशेषः जातिः पृथिवीत्वादि वस्तुतोजातिः धर्मस्तेन श्रोत्रत्वसंग्रहः॥ ६२॥

घ्राणादेः पृथिवीत्वादिमत्त्वे मानमाह। भूतानां पृथिव्यादीनां ये गुणविशेषा गन्धादयस्तदुपलम्भकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादिदृष्टान्तेन पृथिवीत्वादि साधनमिति भावः॥ ६३॥

समाप्तमिन्द्रियनानात्वप्रकरणम्॥ ३१॥

क्रमप्राप्तार्थपरीक्षणाय सिद्धान्तसूत्रम्। स्पर्शपर्यन्तेषु मध्ये पूर्वं पूर्वं त्यक्त्वा अप्तेजोवायूनां गुणा ज्ञातव्याः उत्तरः शब्द आकाशस्य गुणः तथा च स्पर्शान्ताः पृथिव्या रसरूपस्पर्शा जलस्य रूपस्पर्शौ तेजसः स्पर्शो- वायोः शब्द आकाशस्य॥ ६४॥

आक्षिपति। उक्तो गुणनियमो न युक्तः पृथिव्यादेर्गुणत्वाभिमतानां सर्वेषां घ्राणादिग्राह्यत्वाभावान्न पार्थिवत्वादिकं घ्राणेन पृथिव्या रसा- द्यग्रहणात् वहिरिन्द्रियाणां स्वप्रकृतिवृत्तियोग्याशेषगुणग्राहकत्वनि- यमो भज्येतेति भावः॥ ६५॥

इत्यश्च पृथिव्यादावुपलभ्यमानानां रसादीनां कागतिरित्यत्र स्व- मतमाह। उत्तरोत्तराणाम् अवादीनाम् एकैकस्यैव एकैकक्रमेण तदु- त्तरोत्तरगुणसद्भावात् रसादिगुणसद्भावात् तदनुपलब्धिस्तेषां रसादीनां घ्राणादिनानुपलब्धिरित्यर्थः॥ ६६॥

तर्हि कथं पृथिव्यादौ रसादिग्रहणं तत्राह। अपरं पृथिव्यादि- परेण जलादिना हि यस्मात् विष्टं सम्बद्धं तथा च पृथिव्याद्यवच्छिन्न जलादिना रसनासंयोगाद्रसादिग्रह इति भावः॥ ६७॥ ६८॥

सिद्धान्तसूत्रम्। उक्तो गुणनियमो न युक्तः कुतः पार्थिवस्याप्यस्य च द्रव्यस्य प्रत्यक्षत्वाद्रूपस्पर्शसिद्धेस्तस्य रूपस्पर्श शून्यत्वे चक्षुषा त्वचा च ग्रहणं न स्याद्घ्राणादेस्स कचित्साक्षात्सम्बन्धेन क्वचिच्च परम्परया हेतुत्वे गौरवमिति भावः॥ ६९॥

रसादेः पृथिव्यादिगुणत्वे घ्राणादिनापि तद्ग्रहणप्रसङ्ग इत्यत्र निया- मकमाह। पूर्वपूर्वं घ्राणादितत्तत्प्रधानं गन्धादिप्रधानं प्राधान्ये वीजमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणोत्कर्षाद्गुणस्य गन्धादेरुत्कर्षात्तद्व्यवस्थापकत्वात् तथा च गन्धादिषु मध्ये स्वव्यवस्थापकगुणस्यैव ग्राहकत्वं घ्राणादीनामिति ॥ ७० ॥

ननु पृथिव्यन्तरस्यापि गन्धप्राधान्यात्किमिन्द्रियं किमनिन्द्रियमित्यत आह । भूयस्त्वात् जलाद्यविशिष्टपृथिव्याद्यारब्धत्वात्तद्व्यवस्थानं घ्राणादीन्द्रियत्वव्यवस्थितिः ॥ ७१ ॥

घ्राणादीनां गन्धादिगुणवत्त्वे मानमाह । सगुणानां गन्धादिविशिष्टानां घ्राणादीनामिन्द्रियभावात् गन्धादिसाक्षात्कारकारणत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादौ तथैव दर्शनात् ॥ ७२ ॥

इत्यञ्च गन्धादिसिद्धावंप्रत्यक्षत्वादनुद्भूतत्वकल्पनमित्याशयेनाह । तेन इन्द्रियेण तस्य सगुणस्येन्द्रियस्याग्रहणादनुद्भूतत्वकल्पनमिति ॥ ७३ ॥

नन्विन्द्रियगुणानामप्रत्यक्षत्वनियमो नेत्याशङ्कते । उक्तनियमो न युक्तः शब्दस्य श्रोत्रगुणस्योपलब्धेः ॥ ७४ ॥

समाधत्ते । द्रव्यगुणानां रूपशब्दादीनां परस्परं वैधर्म्याच्छब्दस्योपलब्धिर्न चक्षूरूपादीनां शब्दाश्रयस्य लाघवेनैक्यसिद्धेरिति भावः ॥ ७५ ॥

सप्राप्तमर्थपरीक्षाप्रकरणम् ॥ २२ ॥

इति तृतीयाध्यायस्याद्यमाह्निकं आत्मादिप्रमेयचतुष्कपरीक्षणं नाम ।

अथ क्रमप्राप्तया बुद्धेर्मनसश्च परीक्षा सप्तभिः प्रकरणैस्तत्परीक्षैव चाह्निकार्थः परेतु शरीराविच्छेदव्याप्यभोगानुकूलसम्बन्धवत्परीक्षा शरीरान्तर्वर्त्तिप्रमेय परीक्षैवाह्निकार्थ इति तदसत् इन्द्रियपरीक्षायामतिव्याप्तेः तत्र च बुद्धिपरीक्षा पञ्चभिः प्रकरणैः तत्रादौ बुद्ध्यनित्यताप्रकरणं तत्र संशय दर्शनाय सूत्रम् । कर्म्मण आकाशस्य च साधर्म्यान्नि स्पर्शत्वाद्बुद्धिपदार्थे नित्यत्वसंशयः बुद्धिपदं नित्यपक्षं नवेति संशयपर्यवसन्नः ॥ १ ॥

तत्र बुद्धिनित्यत्वं सांख्यः साधयति । बुद्धिर्न्नित्येति शेषः योऽहं घटमद्राक्षं सोऽहं घटं स्पृशामीति प्रत्यभिज्ञानमेकं वृत्तिमन्तं विषयीकरोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नचात्मा तथा तस्य जन्यधर्म्मानधिकरणस्य कूटस्थत्वात् तस्माद्वृत्तिमती बुद्धिरेव वृत्तिस्तु तस्याः परिणामः बुद्धेरप्याविर्भावतिरोभावावेव न तूत्पादविनाशाविति ॥ २ ॥

परिहरति। साध्यसमत्वात् असिद्धत्वात् प्रतिसन्धातृत्वं न हेतुः अहं जानामीत्यादिना आत्मनएव प्रतिसन्धातृप्रत्ययात् अनादिनिधनत्वमेव तस्य कौटस्थ्यं अन्यादृशं त्वसिद्धमिति भावः ॥ ३ ॥

बुद्धेरेव स्थायिन्या यथाविषयं ज्ञानात्मिका वृत्तयोवृत्तिमदभिन्ना वह्नेरिव स्फुलिङ्गा निःसरन्तीति सांख्यमतं निरस्यति। वृत्तिवृत्तिमतोरभेदे वृत्तिमदवस्थित्या वृत्तेरप्यवस्थितिर्व्वाच्या तथा च सर्वपदार्थग्रहणं युगपत्स्यात् न चैवं तस्मान्नाभेद इति ॥ ४ ॥

अथ वृत्तीनामनवस्थायित्वमुच्यते तत्राह। अप्रत्यभिज्ञाने प्रत्यभिज्ञानस्य अभावे विनाशे वृत्तिमतोऽपि विनाशः स्यादतो न द्वयोरैक्यम् ॥ ५ ॥

अयुगपद्ग्रहणम् स्वमते व्युत्पादयति। मनसइत्यादि मनसोऽणुत्वादिन्द्रियैः सह क्रमेण सम्बन्धात् ज्ञानानां क्रमिकत्वं तथा च अविभु चैकं मनः पर्य्यायेण सर्व्वैरिन्द्रियैः सम्बध्यत इत्यवतारभाष्यं तत्तदिन्द्रियमनःसंयोगे सति ज्ञानमुपपद्यते ॥ ६ ॥

तद्व्यतिरेके ज्ञानाभावमुपपादयति। अप्रत्यभिज्ञानं तत्तदिन्द्रियजज्ञानाभावः विषयान्तरेण इन्द्रियान्तरेण मनसः सम्बन्धादित्यर्थः ॥ ७ ॥

त्वन्मते चेदन्नोपपद्यतइत्याह। त्वन्मते मनसः क्रमेणेन्द्रियसम्बन्धो न मनसो विभुत्वेन गत्यभावात् परेत नकारोन-सूत्रान्तर्गतः किन्तुविभुत्वे चान्तःकरणस्य पर्य्यायेणेन्द्रियैः संयोगो नेति भाष्यावतारणिकायां इत्याहुः ॥ ८ ॥

वृत्तिवृत्तिमतोर्वस्तुतोऽभेदेऽपि भेदप्रत्ययप्रतिपादनाय शङ्कते। यथा जवाकुसुमादिसन्निधानादेकस्यापि स्फटिकस्य तत्तद्रूपाभिमानस्तथावृत्तिमदभिन्नापि वृत्तिस्तत्तद्विषयसन्निकर्षवशान्नानेव प्रतिभासत इति ॥ ९ ॥

दूषयति। अमत्वे साधकाभावान्नोक्तं युक्तमित्यर्थः केचित्तु न हेत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावादिति भाष्यमिति टीकादर्शनान्नेदं सूत्रं किन्तु तुच्छतया सूत्रकृताऽदूषणान्न्यूनतापरिहाराय भाष्यकृता तदुक्तमिति मन्यन्ते ॥ १० ॥

समाप्तं बुद्धिनित्यताप्रकरणम् ॥ २३ ॥

स्फटिके इव नानात्वभ्रम इत्यसहमानः सौगतः शङ्कते। स्फटिकान्यत्वाभिमानवदित्यहेतुः कुतः स्फटिकेऽप्यपरापरोत्पत्तेः विलक्षणविलक्षणस्फटिकोत्पत्तेः तत्र मानमाह व्यक्तीनां भावानां क्षणिकत्वात् तत्साधनाय भाष्यं उपचयापचयप्रबन्धदर्शनाच्छरीरेषु प्रतिक्षणं शरीरेषूपचयापचयदर्शनान्नानात्वं नह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः इदं सूत्रमेवेति केचित् ॥ ११ ॥

सिद्धान्तसूत्रम्। पदार्थानां विनाशसामग्रीवैशिष्ट्यनियमे मानाभावात् अभ्युपेत्याह यथा दर्शनमिति यदि कस्यचिद्विनाशसामग्रीवैशिष्ट्ये मानं स्यात्तदा क्षणिकत्वं तस्याप्यनुज्ञायतएव यथाऽन्त्यशब्द इति ॥ १२ ॥

युक्त्यन्तरमाह। न स्फटिकादेः क्षणिकत्वं यतउत्पत्तिविनाशकारणान्युपलब्ध्या निर्णीतान्यवयवोपचयापचयादीनि न च स्फटिके विनाशकारणमुपलभ्यते येन पूर्वविनाशोऽपरोत्पत्तिश्च स्यादिति भावः ॥ १३ ॥

आक्षिपति। दध्युत्पत्तिवद्दध्युत्पत्तिकारणानुपलब्धिवत् तदुपपत्तिः पूर्वस्फटिकविनाशकारणानुपलब्धेरुत्तरस्फटिकोत्पत्तिकारणानुपलब्धेश्चोपपत्तिः स्यादिति भावः ॥ १४ ॥

सिद्धान्तसूत्रम्। दध्नः क्षीरविनाशस्य च प्रत्यक्षसिद्धत्वात्तत्कारणं कल्प्यते नत्वेवं स्फटिकविनाशोत्पादावुपलभ्येते येन तत्कारणकल्पनं॥ १५ ॥

सौगतमते सांख्यदूषणमुपन्यस्यति। न क्षीरस्य नाशो दध्नश्चोत्पत्तिः किन्तु क्षीरस्य परिणामः परिणामशब्दार्थोगुणान्तरप्रादुर्भावः विद्यमानस्य क्षीरस्य पूर्वरसतिरोभावोऽम्लरसात्मकगुणान्तरस्याविर्भावादित्यर्थः ॥ १६ ॥

एतन्निराकरोति सूत्रकारः। व्यूहान्तराद्रचनान्तरात् पूर्वावयवसंयोगनाशो द्रव्यान्तरोत्पादस्यानुभविक इति भावः ॥ १७ ॥

दोषान्तराभिधानाय सिद्धान्तिनः सूत्रम्। क्वचिच्चोपलब्धेरनैकान्तः क्षीरदधिदृष्टान्तेन विनाशोत्पादावकारणकावेवेति न युक्तं घटादौ सका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रणकत्वोपलब्धेर्व्यभिचारात् वस्तुतः चोरविनाशेऽम्लद्रव्यसंयोगस्य हेतुत्वादम्लरसवत् परमाणुभिश्चं दध्यारम्भान्नाकारणकौ चोरविनाशदध्युत्पादाविति॥ १८॥ समाप्तं क्षणभङ्गप्रकरणम्॥ २४॥

बुद्धेरात्मगुणत्वं यद्यप्यात्मपरीक्षातएव सिद्धप्रायं तथापि विशिष्य व्युत्पादनाय बुद्ध्यात्मगुणत्वप्रकरणं तत्र चेन्द्रियार्थसन्निकर्षाधीनत्वादिन्द्रियादिनिष्ठत्वमेवास्तु भेर्य्याकाशसंयोगाधीनशब्दस्याकाशनिष्ठत्ववदिति पूर्वपक्षे सिद्धान्तसूत्रम्। बुद्धिर्नेन्द्रियस्य न वार्थस्य गुणस्तन्नाशेऽपि ज्ञानस्य स्मरणस्यावस्थानात् उत्पत्तेः नह्यनुभवितुरभावे स्मरणमुपपद्यतेऽति प्रसङ्गादिति भावः॥ १९॥

मनोगुणत्वं निरस्यति। युगपज्ज्ञेयानुपलब्धेर्हेतोः सिद्धस्य मनसो न कर्त्तृत्वं धर्म्मिग्राहकमानेन करणत्वेनैव सिद्धेः वस्तुतोयुगपज्ज्ञेयानुपलब्धेरित्यनेन मनसोऽणुत्वं सूचितं तथा च तद्गतसुखाद्यप्रत्यक्षता स्यात् एवं कायव्यूहे तत्तद्देहावच्छेदेन ज्ञानादिकं न स्यादिति॥ २०॥

शङ्कते। तस्या बुद्धेरात्मगुणत्वेऽपि ज्ञानयौगपद्यं तुल्यं आत्मनः सर्वेन्द्रियसंयोगात्तथा च सदोषस्तदवस्थएवेति कथं तया युक्त्या मनःसिद्धिरिति भावः॥ २१॥

उत्तरयति। युगपन्नानेन्द्रियैः सह मनसः सन्निकर्षाभावान्न युगपन्नाना विषयोपलब्धिरिति भावः॥ २२॥

आक्षिपति। बुद्ध्युत्पत्तौ कारणस्यानपदेशात् अकथनात् नात्मगुणो बुद्धिः आत्ममनः संयोगस्य कारणत्वे ज्ञानस्य सार्वदिकत्वप्रसङ्ग इति भावः॥ २३॥

बुद्धेरात्मगुणत्वे दोषमप्याह। बुद्धेरात्मन्यवस्थाने विनाशकारणस्याप्रयनाशादेरनुपलब्धेस्तस्या बुद्धेर्नित्यत प्रसङ्गः॥ २४॥

उत्तरयति। बुद्धेरनित्यत्वस्य ग्रहणात् उत्पत्तिनाशयोरानुभविकत्वात्तत्कारणे कल्पनीये आत्ममनोयोगादेरुत्पादकत्वमनन्तरोत्पन्नबुद्धेः संस्कारादेर्वा नाशकत्वं कल्प्यते चरमबुद्धेस्तु अदृष्टनाशात्कालाद्वा नाशः बुद्धेर्बुद्ध्यन्तरनाश्यत्वेऽनुरूपं दृष्टान्तमाह शब्दवदिति। शब्दस्य यथा शब्दान्तराद्वाशश्चरमशब्दस्य निमित्तनाशनाश्यत्वं तथा प्रकृतेऽपीति भावः॥ २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु बुद्धेरात्मगुणत्वे संस्कारात्ममनोयोगयोः सत्त्वात् स्मृतीनां यौगपद्यं स्यादत्रैकदेशिनः परिहारमाशङ्कते। ज्ञानं संस्कारकारणं समवेतं यदवच्छेदेन तदवच्छेदेन मनःसन्निकर्षस्य स्मृत्युत्पादकत्वात्तस्य च क्रमिकत्वान्न स्मृतियौगपद्यमित्यर्थः ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानपदं संस्कारपरमित्यन्ये ॥ २६ ॥

तन्मतं दूषयति। उक्तं न युक्तं मनसः अन्तःशरीरवृत्तित्वात् अन्तःशरीरे वृत्तिर्ज्ञानजनकीभूतोव्यापारो यस्य तत्त्वात् शरीरातिरिक्तावच्छेदेनात्ममनोयोगस्य ज्ञानाहेतुत्वाच्छरीरावच्छिन्नस्य हेतुत्वे तद्दोषतादवस्थ्यमिति भावः ॥ २७ ॥

एकदेशी शङ्कते। शरीरावच्छिन्नात्ममनोयोगेन हेतुः साध्यत्वात् असिद्धत्वात् मानाभावादिति भावः ॥ २८ ॥

सिद्धान्तसूत्रम्। उक्तप्रतिषेधोन युक्तः स्मरतः शरीरधारणस्योपाया-उपपत्तेर्युक्तेरन्यथा मनसोवहिर्भावे शरीरावच्छिन्नात्ममनोयोगाभावेन प्रयत्नाभावे शरीरधारणं न स्यादिति भावः ॥ २९ ॥

पुनःशङ्कते। शरीराधारणं न मनसः आशुगतित्वाच्छीघ्रमेव शरीरे परावृत्तेः ॥ ३० ॥

दूषयति। मनसः शीघ्रमागमनं न युक्तं स्मरणे कालनियमाभावात् कदाचिच्छीघ्रं स्मर्यते कदाचित्प्रणिधानादिविलम्बेनापीति न च प्रणिधानं शरीरान्तःस्थितमनसएव वहिर्निगमस्तु स्मरणाव्यवहितपूर्वमेवेति वाच्यं वहिर्निर्गमानन्तःप्रवेशानुकूलक्रियाविभागादिकालकलापं यावच्छरीरधारणं न स्यादिति भावः ॥ ३१ ॥

एकदेशिमतमन्य एकदेशी दूषयति। वहिः प्रदेशविशेषे मनः संयोगविशेषेण सम्भवति स हि न स्मृत्यर्थमात्मप्रेरणेन तस्य स्मरणीयज्ञानपूर्वकतया प्रागेव स्मृत्यापत्तेः नापि यदृच्छया अकस्मात् आकस्मिकत्वस्य निषेधात् नापि मनसोज्ञतयाज्ञातत्वया मनसोज्ञातत्वानभ्युपगमात् प्रेरणयदृच्छाज्ञताभिः प्रयत्नेच्छाज्ञानैरित्यर्थ इति कश्चित्तन्न प्रयत्नेनैव चरितार्थत्वापत्तेः ॥ ३२ ॥

एतन्निराकरोति। व्यत्यादिकं पश्यतः कण्टकादिना पादव्यथनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदवच्छेदेन मनः संयोगोयथा जायते तथैतदपीति भावः इतरथा तत्र मनः संयोगेऽप्युक्तदोषाः स्युः अदृष्टविशेषाधीनकर्मवशादसाविति चेत्तुल्यं प्रकृतेऽपीति भावः ॥ ३३ ॥

स्मरणायौगपद्यं स्वयमुपपादयति। प्रणिधानं चित्तैकाग्र्यं सूत्रैति यावत् लिङ्गज्ञानं उद्बोधकं उद्बोधकानामानन्त्यादादिपदं ज्ञानात्परतोयोजनीयं तस्य क्रमात् स्मरणक्रमः यदि च युगपदुद्बोधकानि तदा तावद्विषयकस्मरणमिष्यत एव यथा पदज्ञानादाविति मन्तव्यम् ॥ ३४ ॥ ३५॥

नन्विच्छादीनां मनोधर्म्मत्वात्तेषां ज्ञानजन्यत्वात् सामानाधिकरण्येन च तत्र कार्य्यकारणभावात्कथं ज्ञानस्यात्मगुणत्व मित्याशङ्कायां सिद्धान्तसूत्रम्। ज्ञस्य ज्ञानवतआत्मन इच्छादयः हेतुमाह आरम्भनिवृत्त्योरिच्छाद्वेषनिमित्तत्वादिति प्रवृत्तिनिवृत्त्योरिच्छाद्वेषजन्यत्वात्तत्र सामानाधिकरण्येन ज्ञानस्य हेतुत्वमिति भावः यद्वा ज्ञस्य ज्ञानवतो याविच्छाद्वेषौ तन्निमित्तत्वादित्यर्थः तथा च ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यं नासिद्धम् ॥ ३६ ॥

नन्वस्तु तेषां सामानाधिकरण्यं परन्तु तेषामधिकरणं कायाकारः पार्थिवादिपरमाणुपुञ्जएवेति चार्वाकः शङ्कते। पार्थिवाद्येषु देहेषु ज्ञानादेर्न प्रतिषेधः कुतः इच्छाद्वेषयोस्तल्लिङ्गत्वादारम्भनिवृत्तिलिङ्गकत्वात्तयोः चेष्टाविशेषलिङ्गकत्वाच्चेष्टायाश्च शरीरे प्रत्यक्षसिद्धत्वादिति भावः ॥ ३७ ॥

समाधित्सुः प्रतिबन्दिमाह। आरम्भनिवृत्त्यनुमापकक्रियाविशेषदर्शनात् परश्वादिषु ज्ञानादिसिद्धिप्रसङ्गः तस्मात्क्रियाविशेषाणां प्रयत्नादिजन्यत्वं सम्बन्धान्तरेण नतु समवायेन व्यभिचारादिति भावः ॥ ३८ ॥ ३९॥

स्वमते व्युत्पादयति। तद्विशेषकौ तयोश्चेतनाचेतनयोर्विशेषकौ इतरव्यावर्त्तकौ नियमानियमौ समवायेन जन्यतानियमतदभावौ समवायेन ज्ञानेच्छादीनां चेतनधर्मत्वादवच्छेदकतया च शरीरे तेषां जन्य जनकभावः परश्वादौ यत्नविषयतया क्रिया वस्तुतस्तु चेष्टैव परश्वादिक्रियाजनिका यत्नादेस्तद्धेतुत्वे मानाभावः ॥ ४० ॥

इच्छादीनां मनोगुणत्वाभावे युक्त्यन्तरमाह। इच्छादय इति शेषः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथोक्तहेतुत्वात् ज्ञानेच्छादीनां सामानाधिकरण्येन कार्यकारणभावात् पारतन्त्र्यात् मनसश्चेतन सहकारित्वादिच्छादयो न तद्गुणाः वस्तुतस्तु इच्छादीनां पारतन्त्र्यात् पराधीनविषयताशालित्वात् इच्छादीनां हि समानाधिकरणस्वजनकज्ञानविषयतैव विषयता ज्ञानवैयधिकरण्ये च तन्न स्यादिति भावः स्वकृतात् स्वयंकृतात्कर्म्मणः अभ्यागमो भोगः स मनसोयत्ना-दिसत्त्वेन स्यान्नह्यन्यकृतात्कर्म्मणोभोगः नवा भोगोऽपि मनसः भोक्तुर्बन्धमो-क्षादि भागिनएवात्मत्वात्तद्भिन्नः आत्मनि मानाभावात् आत्मनः सुखादि-साक्षात्कारानुरोधान्महत्त्वं मनसश्च धर्म्मिग्राहकमानादणुत्वमतोऽपि नैक्यं न च मनसः परमाणुत्वाल्लाघवाच्च नित्यत्वं तन्मतं तथाचात्ममनसोर्नित्य-त्वात्सदाज्ञानादिप्रसङ्गादनिर्मोक्षः स्यादतोऽन्तः करणस्यानित्यत्वं तन्नाशश्च मोक्ष इति वाच्यं अदृष्टाद्यभावेन नित्ययोरपिवन्ध्ययोरिव फलाजनकत्वात् न च ज्ञानादिकं मनस्य इत्येतत्सर्वं मनएवेति श्रुतेर्म्मनसएव ज्ञानादिकं अभेदमुखेनो पादानोपादेयभावकथनादिति वाच्यं अन्नं वै प्राणा इत्यादौ निमित्तेऽपि दर्शनात् कारणत्वमात्रे तात्पर्य्यादिति तत्त्वम् ॥ ४१ ॥

आत्मगुणत्वमुपसंहरति। इच्छादिकमात्मगुण इत्यादिः हेतुमाह परिशेषात् शरीरादिहेतुनिराशात् यथोक्तहेतूनां दर्शनस्पर्शनाभ्यामेक-कार्थग्रहणादित्यादीनां उपपत्तेः उपपन्नत्वात् ॥ ४२ ॥

स्मृतेरात्मगुणत्वमर्थसिद्धमपि शिष्यबुद्धिवैशद्याय पृथग्व्युत्पादयति।

तदप्यर्थे ज्ञस्वाभाव्यात् ज्ञानवत्स्वाभाव्यात् ज्ञानत्वावच्छिन्नवत्त्वं ह्यात्मनः स्वभावः स्मृतेश्च ज्ञानत्वावच्छिन्नत्वात्तद्धर्मत्वमर्थात्सिद्धं। यद्वा ज्ञस्वाभाव्यात् स्मृतिहेतुज्ञानस्यात्मवृत्तित्वसिद्धेः स्मृतेरात्मवृत्तित्वमपि सिद्धं परे तु ज्ञानस्याशुविनाशित्वात्कथं स्मृतिहेतुनेत्यत आह स्मरणमित्यादि ज्ञानवतः स्वभावः संस्कारः तस्मादित्यर्थः इत्याहुः ॥ ४३ ॥

स्मृतेर्यौगपद्यसमाधानाय प्रणिधानादीनामुद्बोधकानां क्रमो हेतु-रुक्तस्तत्र प्रणिधानादीनि दर्शयति। स्मरणमित्यनुवर्त्ततेनिमित्तशब्दस्य द्वन्द्वात्परं श्रुतस्य प्रत्येकमभेदेनान्वयः प्रणिधानं मनसोविषयान्तरसञ्चारवा-रणं निबन्ध एकग्रन्थोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणं अभ्यासः संस्कारबाहुल्यं एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्यनवधानं स्यादित्याशयेन तदुपन्यासः अभ्यासो दृढतरसंस्कार उद्बोधकत्वेनोक्त इति केचित् लिङ्गं व्याप्यं व्यापकस्य स्मारकं लक्षणं यथा कपिध्वजादि अर्जुनादेः सादृश्यं देहादेः परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः तदेकतरेणान्यतरस्मरणं आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ सम्बन्धोगुरुशिष्यभावादिः गोवृषन्यायात् पृथगुक्तः आनन्तर्यं प्रोक्षणावघातादेः वियोगो यथा दारादेः एककार्य्या अन्तेवासिप्रभृतयः परस्परस्मारकाः विरोधादहिनकुलादेरन्यतरेणापरस्मरणं अतिशयः संस्कारउपनयनादिराचार्य्यादिस्मारकः प्राप्तिर्धनादेर्दातारं स्मारयति व्यवधानमावरणं यथा खड्गादेः कोषादि सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणं इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ भयं मरणादेर्भयहेतोर्वा स्मारकं अर्थित्वं दातुः शाखादेः क्रिया वाय्वादेरागात्प्रीतिः पुत्रादेःस्मरणं धर्म्माधर्म्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणमिति उक्तेषु च किञ्चित्स्वरूपसत्किञ्चिच्च ज्ञातसदुद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः ॥ ४४ ॥ समाप्तं बुद्ध्यात्मगुणत्वप्रकरणम् ॥ ३५ ॥

बुद्धेर्बुद्ध्यन्तराद्विनाश उक्तः स च तृतीयक्षणवर्त्तिध्वंसप्रतियोगित्वसिद्धौ स्यादतोबुद्धेरुत्पन्नापवर्गित्वं व्युत्पादनीयं तत्रसिद्धान्तसूत्रम् । शरीरादिकर्मधाराया अनवस्थायिन्याः प्रत्यक्षधारापि वाच्या न चाद्यबुद्धेरुत्तरोत्तरग्राहकत्वं चिरस्य व्यापाराभावात् पूर्वपूर्वस्य च परपरतोऽननुभवाद्विनाशसिद्धावाश्रयनाशादेरभावाद्विरोधिगुणस्यैव नाशकत्वमिति कर्म्मवद्बुद्धेरनवस्थायित्वग्रहणादिति वार्थः ॥ ४५ ॥

शङ्कते । बुद्धिर्यद्याशुविनाशिनी स्याद्योग्यविशेषविशेषधर्मविशिष्टधर्म्मिग्राहिणी न स्याद्विद्युत्सम्पातकालीनवस्तुग्रहणवत् न चैवं तस्मान्न तथेत्यर्थः ॥ ४७ ॥

उत्तरयति । प्रतिषेद्धव्यस्य बुद्धेराशुविनाशित्वस्याभ्यनुज्ञा त्वया कृता विद्युत्सम्पातदृष्टान्तरूपस्य हेतोः साधकस्योपादानात् तथा चांशतोबाध इति भावः ॥ ४८ ॥

अस्तु तर्हि तद्दृष्टान्तेनान्यासां बुद्धीनामनवस्थायित्वमित्याह । यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदीपार्चिषां सन्तन्यमानानामनवस्थायित्वेऽप्यभिव्यक्तग्रहणं तथान्यत्रापि स्यात् विद्युत्सम्पातस्थले या बुद्धिरुत्पन्ना सा स्वविषये व्यक्तैवेति भावः ॥ ॥ ४९ ॥ समाप्तं बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥ २६ ॥

अथ बुद्धेः शरीरगुणत्वाभावप्रकरणं न च प्रागेव तत्सिद्धेरनारम्भणीयमेतत् गौरोऽहं जानामीत्याद्यनुभवेन तत्साधकानामाभासीकरणादतोविशिष्य तद्युत्पादनाय संशयवीजमाह । द्रव्ये चन्दनादौ स्वगुणस्य रूपादेः परगुणस्य शैत्यादेश्च ग्रहादेवं शरीरे रूपादेरौष्ण्यस्य च ग्रहाद्बुद्ध्यादिः शरीरगुणो न वेति संशयः ॥ ५० ॥

तत्र सिद्धान्तसूत्रम् । न शरीरगुणश्चेतनेति आदौ भाष्यस्ततः पूरणं न शरीरविशेषगुण इत्यर्थः अयं तर्काकारः बुद्ध्यादिकं शरीरविशेषगुणः स्याद्यावच्छरीरभावि स्यात् रूपादिवत् तत्परिष्कार्थं चानुमानं बुद्ध्यादिकं न शरीरविशेषगुणः अयावद्द्रव्यभावित्वात् शब्दवत् व्यतिरेके रूपवद्वा अयावद्द्रव्यभावित्वञ्च आश्रयत्वाभिमतकालीननाशप्रतियोगित्वम् ॥ ५१ ॥

पिठरपाकमते व्यभिचारमाशङ्कते । शरीरे पाकाधीनरूपादिना व्यभिचारान्नोक्तं साधनं युक्त मित्यर्थः परे तु सिद्धान्तसूत्रमेवेदं तथा हि पाकजरूपेण व्यभिचारः शङ्कनीयः पाकजगुणान्तरस्य रूपान्तरस्योत्पत्तेः तथा च स्वसमानाधिकरणस्वसमानजातीयासमानकालीनत्वं पूर्वोक्तहेतौ नाशप्रतियोगित्वे विशेषणीयमित्यर्थ इत्याहुः ॥ ५२ ॥

सिद्धान्तसूत्रम् पाकजानां प्रतिद्वन्द्विनि पूर्वशरीरप्रतिरूपके शरीरान्तरे सिद्धेः घटादौ पाकजरूपसम्भवेऽपि शरीरे न तत्सम्भवः शरीरावयवानाञ्चर्मादीनामग्निसंयोगविशेषेण नाशावश्यकत्वात् परेतु पाकजानां प्रतिद्वन्द्विनोऽग्निसंयोगात्सिद्धेः तथा च तादृशाग्निसंयोगासमानाधिकरणत्वमर्थस्ते नाग्निसंयोग नाश्येऽग्निसंयोगजन्ये च न व्यभिचार इत्याहुः अन्ये तु शरीरगुणत्वाभावे हेत्वन्तरमाह प्रतिद्वन्द्वीति पाकजानां पूर्वरूपादिकंप्रतिद्वन्द्वि विरोधि एकस्मिन् रूपे विद्यमाने रूपान्तराभावात् प्रकृते त्वेकस्मिन् ज्ञाने सत्यपि द्वितीयक्षणे ज्ञानान्तरोत्पत्तेर्ज्ञानादिकं न शरीरविशेषगुण इत्यर्थ इत्याहुः ॥ ५३ ॥

हेत्वन्तरमाह । शरीरविशेषगुणानामिति शेषः ज्ञानसुखादिकन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न शरीरव्यापकं हृदयाद्यवच्छेदेन तदानुभविकत्वादिति भावः ॥ ५४ ॥

देशयति । शरीररूपादेराश्रयव्यापकत्वं न शारीरस्य गौररूपस्पर्शादेः केशनखादावनुपलब्धेरित्यर्थः ॥ ५५ ॥

दूषयति । स्पष्टं अन्ये तु चेतना न शरीरगुणः शरीरव्यापित्वात् शरीरे तदवयवेषु सर्वेष्वेकेन सम्बन्धेन वृत्त्वात् शरीरगुणस्तु न स्वावयववृत्तिः शङ्कते न केशेति चैतन्यस्यानुपलब्धेः समाधत्ते त्वगितीत्याहुः ॥ ५६ ॥

हेत्वन्तरमाह । बुद्धिर्न शरीरगुणः शरीरगुणवैधर्म्यात् वहिरिन्द्रियावेद्यत्वे सति वेद्यत्वात् ॥ ५७ ॥

आक्षिपति । नोक्तं युक्तं रूपादीनां परस्परवैधर्म्यात् तथाच तद्रीत्या स्पर्शादीनां शरीरगुणत्वं न स्यादचाक्षुषत्वात्तथाचोक्तमप्रयोजकमिति भावः ॥ ५८ ॥

समाधत्ते । रूपादीनां न शरीरगुणत्वप्रतिषेधः कुतः ऐन्द्रियकत्वात् तत्तदिन्द्रियाग्राह्यत्वलक्षणतत्तद्गुणवैधर्म्येऽपि शरीरगुणत्वावच्छिन्नवैधर्म्यस्य वहिरिन्द्रियाग्राह्यत्वे सति ग्राह्यत्वस्याभावात् बुद्धौ च तत्सत्त्वादिति भावः ॥ ५९ ॥ समाप्तं बुद्धेशरीर-गणभेद प्रकरणम् ॥ ३७ ॥

अथ क्रमप्राप्ता मनःपरीक्षा तत्र प्रतिशरीरमेकं मनश्चक्षुरादिसहकारितया मनःपञ्चकं वेति संशये मनःपञ्चकमेवोचितं तेन च प्रत्येकं सकलमनःसम्बन्धाद्व्यासङ्गयौगपद्ये उपपद्येते इति पूर्व्वपक्षे सिद्धान्तसूत्रम् । प्रतिशरीरं मनो नानात्वे व्यासङ्गस्थलेऽपि यौगपद्यं स्यादतो न मनो नानात्वमिति भावः ॥ ६० ॥

दीर्घशष्कुलीभक्षणादौ ज्ञानयौगपद्यान्नानात्वं स्यादित्याशङ्कते । न एकं मनः अनेकक्रियाणां अनेकज्ञानानामुपलब्धेरित्यर्थः ॥ ६१ ॥

समाधत्ते । क्रमिकेऽपि तदुपलब्धियौगपद्योपलब्धिराशुसञ्चारात् शीघ्रसञ्चारात्मकदोषात् यथा अलातचक्रे वेगातिशयेन भ्रास्यमाणे क्रियासन्तानस्य भेदेनानुपलब्धिरिति ॥ ६२ ॥

ननु यौगपद्योपपादकतया मनसो वैभवं स्यादत्राह । मन इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषः यथोक्तस्य ज्ञानायौगपद्यस्य हेतुत्वान्मनोऽणुत्वसाधकत्वादित्यर्थः ॥ ॥ ६३ ॥ समाप्तं मनःपरीक्षाप्रकरणम् ॥ २८ ॥

अथ प्रसङ्गाच्छरीरस्य तत्तत्पुरुषादृष्टनिष्पाद्यताप्रकरणम् अथवा एकत्रैव शरीरे मनसः सर्वैरात्मभिः सह संयोगात् सर्वत्रैव मनसा ज्ञानं जन्यतामतस्तददृष्टजन्यताप्रतिपादनप्रकरणं तत्र शरीरं तत्तत्पुरुषसम-वेतादृष्टनिमित्तकं नवेति विप्रतिपत्तौ निषेधकोटिस्त्रेधा अदृष्टाभावात् तस्य शरीरहेतुत्वाभावात् अदृष्टस्य पुरुषसमवायाभावाद्वा तत्राद्यं पक्षं निरस्यति । पूर्वकृतस्य यागदानहिंसादेः फलस्य धर्म्माधर्म्मरूपस्य अनु-बन्धात् सहकारिभावात्तस्य शरीरस्योत्पत्तिः ॥ ६४ ॥

आक्षिपति । भूतेभ्य इति सावधारणं तथा चादृष्टनिरपेक्षेभ्यो भूतेभ्यः परमाणुभ्यो मूर्त्तेर्मृदादेरुपादानमारम्भो यथा तथैव तस्य शरीरस्य उपा-दानमारम्भः परमाणुभ्यो ऽदृष्टनिरपेक्षेभ्य इत्यर्थः ॥ ६५ ॥

समाधत्ते । नोक्तं युक्तं दृष्टान्तस्य साध्यसमत्वात् पक्षसमत्वात् मृदा-देरप्यदृष्टसापेक्षपरमाणुभ्य एवोत्पत्तेरुपगमात्तदजन्यत्वस्य तत्रासिद्धेरिति भावः ॥ ६६ ॥

न मृदादिसाम्यमित्याह सूत्राभ्याम् । शरीरे न मृदादिसाम्यं मातापित्रोः कर्मणः शरीरोत्पत्तिनिमित्तत्वात् पुत्रदर्शनादिजन्यसुखा-नुभावकादृष्टस्य देवाराधनादिजन्यस्य पुत्रादिनिमित्तत्वात् एवं माता-पित्रोराहारस्य शरीरोत्पत्तिनिमित्तत्वाददृष्टसहकारेणाहारस्य शुक्र-शोणितादिद्वारा कललादिजनकत्वात् आहारस्य पितामहपिण्डभोज-नादेरदृष्टद्वारा पुत्रजनकत्वादित्यर्थ इत्यन्ये ॥ ६७ ॥ ६८ ॥

आहारस्यादृष्टसहकारित्वे विपक्षे बाधकमाह । प्राप्तौ दम्पत्योः सम्प्रयोगे तु गर्भधारणस्य यतो न नियमस्ततोऽदृष्टस्य सहकारित्वमावश्य-कमिति भावः ॥ ६९ ॥

नन्वदृष्टनिरपेक्षैरेव भूतैः कैश्चित् स्वभावविशेषाच्छरीरं जन्यतां स्वभावानभ्युपगमे च शरीरस्य सर्व्वात्मसंयुक्तत्वात् साधारण्यापत्तिरत आह । अयमर्थः शरीरस्य सर्व्वात्मसंयुक्तत्वेऽपि संयोगविशेषोऽवच्छेदका-तालक्षणो येनात्मना सह तदीयं तच्छरीरं संयोगविशेष एव कुत इत्यत आह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संयोगेति संयोगविशेषोत्पत्तौ कर्म अदृष्टविशेषो निमित्तं यथा शरीरोत्पत्तावदृष्टविशेषो निमित्तमिति संयोगे विशेषस्तदात्मज्ञानजननियामको जातिविशेष एव संयोगः शरीरावयवसंस्थानविशेष इति कश्चित् ॥ ७० ॥

अथ शरीरं नादृष्टजन्यं प्रकृतेरारम्भस्वभावत्वादेव तदुपपत्तेः प्रतिबन्धकपूर्वशरीरापगमस्त्वदृष्टाधीनः जलस्य निम्नानुसरणस्वभावस्येव बन्धापगमाधीनत्वम् इति द्वितीयपक्षं सांख्यसम्मतं निरस्यति । एतेन अदृष्टहेतुकत्वव्यवस्थापनेन अनियमस्तु आत्मनः कदाचिन्मानुषशरीरसम्बन्धः कदाचिदन्यादृशः किञ्चिच्च शरीरं सकलावयवं किञ्चिच्च विकलावयवमित्यादि अदृष्टहेतुत्वानभ्युपगमे त्वयमनियमो न त्वस्मन्मते किञ्चादृष्टनिरपेक्षप्रकृतिमात्रारब्धत्वे सर्वात्मसाधारण्यं शरीरस्य स्यात् इति भावः अन्ये तु अदृष्टमप्यनियतं स्यादित्यत आह एतेनेति तत्राप्यदृष्टान्तरमित्यनादित्वमेवेति भाव इत्याहुः ॥ ७१ ॥

आर्हतास्तु मनःपरमाणुगुणमदृष्टं मन्यन्ते तथाहि पार्थिवाः परमाणवः सहिताः स्वादृष्टवशाच्छरीरमारभन्ते मनश्च स्वादृष्टप्रयुक्तं शरीरमाविशति तच्चादृष्टं स्वभावादेव पुद्गलस्य सुखदुःखे साधयतीति तत्रोत्तरमाह । तत्तदात्मादृष्टोपग्रहं विनैव तत्तदात्मोपभोगाय परमाणवश्चेच्छरीरमारभन्ते मुक्तोऽपि तदात्मनि तद्भोगाय शरीरमारभेरन् अपवर्ग इत्युपलक्षणं संसारिणामपि नरकरितुरगादिशरीरोपग्रहे विनिगमकं न स्यादिति भावः ॥ ७२ ॥

अदृष्टस्य मनोगुणत्वमपि दूषयति । संयोगस्य शरीरारम्भकस्य ज्ञानादिजनकस्य च उच्छेदो न स्यात् कुतः मनसो यत्कर्म अदृष्टं तन्निमित्तत्वात् तस्य नित्यत्वात्तादृशसंयोगधारा नोच्छिद्येत तस्यानित्यत्वेऽपि व्यधिकरणभोगस्य तन्नाशकत्वेऽति प्रसङ्ग इति भावः ॥ ७५ ॥

संयोगानुच्छेदे का क्षतिरत आह । तथा सति प्राणस्य मरणस्यानुपपत्तेः शरीरादेर्नित्यत्वस्याविनाशित्वस्य प्रसङ्गः ॥ ७६ ॥

आक्षिपति । यथा परमाणोः श्यामता नित्यापि निवर्त्तते तथा शरीरादिकमपि निवर्त्तते यद्वा तथैव परमाणुनिष्ठं नित्यमप्यदृष्टं निवर्त्तते तदभावाच्च नापवर्गे शरीरमिति ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तसूत्रम्। अकृतस्य प्रमाणाविषयस्य अभ्यागमः स्वीकारस्तत्प्रसङ्गादित्यर्थः न हि परमाणुनिष्ठादृष्टस्य कारणस्य सत्त्वे शरीरोच्छेदः स्यादेवमणुश्यामता नित्यत्वस्यापि प्रमाणागोचरस्य स्वीकारः स्यात्तथा च दृष्टान्तासिद्धिः न वाऽनादेर्भावस्य नाशः सम्भवति जन्यभावत्वेन तद्धेतुत्वात् यद्वा नित्यादृष्टाच्छरीरसम्बन्धोपगमे अकृतात् स्वयमजनितात्कर्मणोऽभ्यागमः फलसम्बन्धः स्यात्तथा च स्वाकृतत्वाविशेषात् किं शरीरं कस्य भविष्यतीत्यत्र नियामकाभाव इति भावः॥ ७८॥

समाप्तं शरीरस्यादृष्टनिष्पाद्यताप्रकरणम्॥ ३९॥

समाप्तञ्च तृतीयाध्यायस्य द्वितीयमाह्निकम्॥ २॥

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ तृतीयाध्यायवृत्तिः समाप्ता॥ ३॥

सूरकोटिविजयिप्रभाभरं योगिमानसचरं परं महः।
श्यामलं किमपि धाम कामदं कामकोटिकमनीयमाश्रये॥

तृतीये तावदात्मादिप्रमेयषट्कं कारणरूपं परीक्षितमथ कार्य्यरूपं प्रवृत्त्यादिप्रमेयषट्कमवसरतो हेतुमद्भावेन च परीक्षणीयं यद्यपि प्रथमाह्निके षट्कं परीक्षणीयं द्वितीयाह्निके तु तत्त्वज्ञानं तथापि तस्यापवर्गहेतुत्वादुपोद्घातेन च परीक्षणीयत्वादपवर्गपरीक्षान्तःपातितया षट्कपरीक्षैवाध्यायार्थः तत्र चोद्दिष्टधर्मवत्तया षट्कपरीक्षा प्रथमाह्निकार्थः तत्र प्रथमाह्निके चतुर्दशप्रकरणानि तत्र चोक्तरूपवत्तया प्रवृत्तिदोषयोः परीक्षा प्रथमप्रकरणार्थः न चार्थभेदात् प्रकरणभेदः यथा तथेति परस्परसाकाङ्क्षाभ्यामवयवाभ्यामुक्तरूपवत्त्वलक्षणैकार्थवत्त्वकथनात् प्रवृत्तिपरीक्षायामाकाङ्क्षितायां सूत्रम्। अत्र तथैवेति शेषं पूरयन्ति तदयुक्तं तथा सत्यत्रैव यथा शब्दस्याकाङ्क्षाशान्तावग्रिमसूत्रस्यतथाशब्देऽपि यथाशब्दान्तरस्य पूरणीयतया प्रकरणभेदापत्तेस्तस्मादग्रिमसूत्रस्य तथाशब्दे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नान्वयो युक्तः प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषा अप्युक्तलक्षणवन्त इत्यपिमसूत्रसम्बलितोऽर्थः प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इत्युक्तलक्षणस्त्वात्सिद्धं लक्षणमिति भावः प्रवृत्तिस्तु द्वयी कारणरूपा कार्य्यरूपा च द्वे अप्यात्मसमवेते तत्राद्या जन्यत्वेनाविशिष्टा विशिष्टा वा यत्नत्वजातिमती प्रत्यक्षसिद्धा द्वितीया तु धर्म्माधर्म्मरूपा यागादेरगम्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशाजलस्पर्शादेः प्रायश्चित्तादेश्च नाश्यतया सिध्यतीति ॥ १ ॥

दोषपरीक्षायां प्राप्तायामाह । तथा दोषा अपि प्रवर्त्तना लक्षणा इत्युक्तलक्षणवन्त एवेति नासिद्धिरिति भावः ॥ २ ॥

समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥ ४० ॥

अथ त्रैराश्येन विशेषेण दोषपरीक्षणाय तत्त्रैराश्यप्रकरणं तत्र सिद्धान्तसूत्रम् । तेषां दोषाणां त्रयो राशयः त्रयः पक्षा न तु रागद्वेषमोहानामेकैकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात् तथा च भयशोकमानादीनामेष्वेवान्तर्भावान्न विभागन्यूनत्वं इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वान्न विभागाधिक्यम् इच्छात्वादिकन्तु रागादावनुभवसिद्धं तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति कामो रिरंसा रतिश्च विजातीयः संयोगः नारीगताभिलाष इति तु न युक्तं स्त्रियाः कामेऽव्याप्तेः मत्सरः स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा यथा राजकीयादुदपानान्नोदकं पेयं इत्यादि एवं परगुणनिवारणेच्छाऽपि स्पृहा धर्माविरोधेन प्राप्तीच्छा तृष्णा इदं मे न क्षीयतामितीच्छा उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव धर्मविरोधेन परद्रव्येच्छा लोभः परवञ्चनेच्छा माया कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः । द्वेषपक्षः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽभिमान इति क्रोधो नेत्रलौहित्यादिहेतुर्दोषविशेषः ईर्ष्या साधारणे वस्तुनि परस्वत्वात्तद्ग्रहीतरि द्वेषः यथा दुरन्तदायादानाम् असूया परगुणादौ द्वेषः द्रोहो नाशाय द्वेषः हिंसा तु द्रोहजन्या परे तु तान्द्रोहं मन्यते अमर्षः कृतापराधे असमर्थस्य द्वेषः अभिमानोऽपकारिण्यकिञ्चित्करस्यात्मनि द्वेषः । मोहपक्षः विपर्य्ययसंशयतर्कमानप्रमादभय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोकाः विपर्य्ययो मिथ्याज्ञानापरपर्य्यायोऽयथार्थनिश्चयः एकधर्मिकविरुद्धभावाभावज्ञानं संशयः स एव विचिकित्सेत्युच्यते व्याप्यारोपाद्व्यापकप्रसञ्जनं तर्कः आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः गुणवति निर्गुणत्वधीरूपस्मयोऽपि मानेऽन्तर्भवति प्रमादः पूर्वकर्त्तव्यतया निश्चितेऽप्यकर्त्तव्यताधीः एवं वैपरीत्येऽपि भयमनिष्टहेतूपनिपाते तत्परित्यागानर्हताज्ञानं शोक इष्टवियोगे तल्लाभानर्हताज्ञानम् ॥ ३ ॥

शङ्कते । रागादीनां भेदो न एकप्रत्यनीकभावात् एकस्मिन् प्रत्यनीकभावो विरोधित्वं यस्य तत्तथा तेनैकनाश्यत्वादित्यर्थः एकं हि तत्त्वज्ञानमेषां विरोधि ॥ ४ ॥

समाधत्ते । एकविरोधित्वं भेदनिषेधेन हेतुर्व्यभिचारात् एकाग्निसंयोगनाश्यत्वेऽपि रूपादीनां भेदात् ॥ ५ ॥

किञ्च नैतेषामेकनिवर्त्त्यत्वं तत्त्वज्ञानस्य मोहनिवर्त्तकत्वात्तन्निवृत्त्या रागादिनिवृत्तेरित्याशयेनाह । यद्यपि बहूनां निर्द्धारणे इष्ठनः तमयोर्वा विधानात् पापतमः पापिष्ठ इति वा युक्तं तथापि द्वौ द्वावधिकृत्य निर्द्धारणं द्वयोर्निर्धारणे ईयसुनो विधानात्तेन रागमोहयोर्द्वेषमोहयोर्वा मोहः पापीयाननर्थमूलं बलवद्द्वेष्य इति यावत् हेतुमाह नामूढस्य मोहशून्यस्य रागद्वेषयोरभावादित्यर्थः न च तत्त्वज्ञानिनोऽपि हिताहितगोचरप्रवृत्तिनिवृत्ती रागद्वेषाधीने इति तत्र व्यभिचार इति वाच्यं धर्माधर्मप्रयोजकरागद्वेषयोर्दोषत्वेन विवक्षितत्वात् एतदभिप्रायकमेवासक्तो द्विषंश्च मुक्त इत्यादिकमपीति भावः ॥ ६ ॥

शङ्कते । दोषनिमित्तत्वान्मोहस्य दोषभिन्नत्वं स्यादभेदेन कार्य्यकारणभावाभावात् दोषेभ्य इत्यान्तर्गणिकभेद इङ्गवचनं प्राप्तस्तर्हीत्यशस्तु न सूत्रं किन्तु भाष्यकृतः पूरणमित्यपि वदन्ति ॥ ७ ॥

निराकरोति । मोहस्य दोषलक्षणसत्त्वाद्दोषत्वं व्यक्तिभेदाच्च हेतुहेतुमद्भावो न विरुध्यत इति भावः ॥ ८ ॥

अप्रयोजकमुक्त्वाऽनैकान्तिकत्वमप्याह । एकजातीययोरपि द्रव्ययोर्गुणयोश्च निमित्तनैमित्तिकोपपत्तेर्हेतुहेतुमद्भावस्वीकारात्तुल्यजातीयत्वप्रतिषेधो न युक्त इति ॥ ९ ॥ समाप्तं दोषपरीक्षाप्रकरणम् ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमप्राप्ततया प्रेत्यभावे परीक्षणीये प्रेत्यभावः शरीरस्य बुद्धेरात्मनो वेति संशये पुनरुत्पत्तिः प्रेत्यभाव इति लक्षणसूत्राद्विनष्टस्योत्पादः प्रतीयते न चासौ नित्यस्यात्मनः सम्भवतीति शरीरादेः स्यात् न च सूतस्य शरीरादेरुत्पत्तिविरोधान्नेदं युक्तमिति वाच्यं प्रेत्यभाव इत्यस्य मुखं व्यादाय स्वपितीतिवत् व्यत्ययेन भूत्वा प्रापणमित्यर्थादत्र सिद्धान्तसूत्रम्। आत्मनः पूर्वोक्तयुक्त्या नित्यत्वे प्रेत्यभावस्तस्य सिध्यति एकजातीयशरीराद्यसम्बन्धचरमसम्बन्धनाशयोरुत्पादप्रापणयोरात्मनः सम्भवात् सम्बन्धत्वञ्चच्छेद्यावच्छेदकभावलक्षणः स च स्वरूपसम्बन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत् लक्षणसूत्रे पुनरुत्पत्तिरित्यत्र पुनः पदञ्च प्रेत्यभावप्रवाहस्यानादित्वज्ञापनाय तज्ज्ञानञ्च वैराग्य उपयुज्यत इति ॥ १० ॥

ननु प्रेत्यभाव उत्पत्तिनिरूप्यः सा च न सजातीयाद्विजातीयाद्वा सम्भवति आद्यपृथिव्यादौ व्यभिचारात्तन्नित्यत्वे मानाभावादतः प्रेत्यभावोऽसिद्ध इत्युपोद्घातात् प्रसङ्गाद्वोत्पत्तिप्रकारं दर्शयति। व्यक्तानामुत्पत्तिरिति शेषः व्यक्ताद्यक्तजातीयात् पृथिव्यादितः व्यक्तानां व्यक्तजातीयानां जन्यपृथिव्यादीनामुत्पत्तिः इत्यञ्च पृथिव्यादेः पृथिव्यादितो रूपवदादितश्च रूपवदादीनामुत्पत्तेः प्रत्यक्षसिद्धत्वात्परमाणुरपि कल्प्यते त्रसरेणोरपकृष्टमहत्त्वेन सावयवावयवत्वसिद्धेस्तस्य लाघवान्नित्यत्वमिति भावः ॥ ११ ॥

अबुद्धा शङ्कते। विशेषकार्य्यकारणभावाभावे सामान्यतोऽपि न तथेति भावः ॥ १२ ॥

विशेषतो व्यभिचारो न विरोधी सामान्यतस्तु नास्त्येवेत्याशयवान् समाधत्ते। सजातीयात्सजातीयोत्पत्तेर्न प्रतिषेधः पृथिवीजातीयात् कपालादितो घटादिनिष्पत्तेः उक्तापादनं चाप्रयोजकमिति भावः ॥ १३ ॥

समाप्तं प्रेत्यभावपरीक्षाप्रकरणम् ॥ ४२ ॥

अथाताष्टौ प्रकरणानि प्रसङ्गाद्यक्तानामित्येतत्सिद्ध्यर्थमुपोद्घाताद्वा तत्रादौ शून्यतोपादानप्रकरणं तत्र पूर्वपक्षसूत्रम्। कार्य्याणां भावानामुत्पत्तिर्यतोऽङ्कुरादेर्बीजादिकमनुपमृद्य प्रादुर्भावाभावात् तथा च बीजादिविनाशोऽङ्कुराद्युपादानमिति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोत्तरम्। उपमृद्य प्रादुर्भवतीति न युक्तः प्रयोगव्याघातात् उपमर्दकस्य पूर्वमसत्त्वे उपमर्दकत्वायोगात् पूर्वं सत्त्वे च परतः प्रादुर्भावायोगात्॥ १५॥

पूर्वपक्षी दूषयति। नायुक्तः प्रयोगः अतीतेऽनागते च कारकशब्दप्रयोगात् कर्तृकर्मादिबोधकशब्दप्रयोगात् यथा जनिष्यते पुत्रः जनिष्यमाणं पुत्रमभिनन्दति अभूत्कुम्भो भिन्नं कुम्भमनुशोचतीति॥ १६॥

नन्वास्तामौपचारिकः प्रयोगस्तथापि किं बीजादेर्विनष्टस्योपादानत्वं मन्यसे बीजादिविनाशस्य वा अन्येऽपि तस्योपादानत्वं निमित्तत्वं वा तत्रादौ उत्तरम्। विनष्टानां बीजादीनामुपादानत्वायोगादत एव न द्वितीयस्तत्र विनष्टं विनाशस्ततो नोत्पत्तिद्रव्यत्वस्य भावकार्य्यसमवायिकारणतावच्छेदकत्वात्॥ १७॥

तृतीयेत्वाह। अभावस्य कारणत्वं न प्रतिषिध्यते प्रतिबन्धकाभावस्य हेतुत्वोपगमादित्याह क्रमेति बीजे विनष्टेऽङ्कुरो जायत इति प्रत्ययाद् बीजस्य प्रतिबन्धकस्याभावः कारणं बीजे विनष्टे हि तदवयवैर्जलाभिषिक्तभूम्यवयवसहितैरङ्कुर आरभ्यते अभावमात्रस्य कारणत्वे चूर्णीकृतादपि बीजादङ्कुरोत्पत्तिः स्यादभावस्य निर्विशेषत्वादिति भावः॥१८॥

समाप्तं शून्यतोपादाननिराकरणप्रकरणम्॥ ४३॥

मतान्तरमाह। अनेन ब्रह्मपरिणामवादो ब्रह्मविवर्त्तवादो वा दर्शित इति वदन्ति तथा हि ब्रह्मैव नामरूपप्रपञ्चभेदेन विपरिणमते मृत्तिकेवोदञ्चनादिभावेन अत एव प्राकृतरूपस्य स्वस्यापरित्यागः प्रपञ्चेषु उदञ्चनादाविव मृत्तिकात्वस्येति परिणामवादः ब्रह्मैव चानाद्यनिर्वचनीयाऽविद्यावशान्नानारूपेण विवर्त्तते मुखमिव तत्तज्जल द्यालम्बनभेदादिति विवर्त्तवादः ननु पुरुषकर्मैव कारणमस्तु किमीश्वरस्य कारणत्वेनेत्यत आह पुरुषेति पुरुषकर्मणो हि वैफल्यमपि दृश्यते सहकार्य्यन्तरमवश्यं वाच्यं तथाचेश्वर एव यथा यथेच्छति तथा जगद्विपरिवर्त्तत इत्येवास्तु किं पुरुषकर्मणेति भावः वस्तुतस्तु केवलेश्वरकारणतापरं प्रकरणं तदुपादानतापरत्वे तु न किमपि मानमाकलयाम इति॥ १९॥

समाधत्ते। केवलब्रह्मण एव हेतुत्वे तदिच्छाया अप्यतिरिक्तायास्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विषयतायाश्चानभ्युपगमादभ्युपगमे द्वैतापत्तिरतः सर्वं सर्वदा स्यान्न स्याच्च कार्य्यवैचित्र्यमिति पुरुषकर्मणोऽपि सहकारितावश्यकी ब्रह्मण उपादानत्वन्तु न सम्भवति असमवायिकारणासम्भवात्तस्य कारणतामात्रं लिप्यत एवेति भावः ॥ २० ॥

नन्वेवं पुरुषव्यापारस्य फले व्यभिचारो न स्यादिति चेदत्राह। फलाभावस्य पुरुषकर्माभावकारितत्वात् पुरुषस्य कर्म अदृष्टन्तदभावाधीनत्वात्पुरुषकारः अहेतुः फलानुपधायकः नन्वीश्वर एव क इत्यत्र भाष्यं गुणविशिष्टमात्मान्तरमीश्वरः गुणैर्नित्यज्ञानेच्छाप्रयत्नैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशको जगतः पितेति परेत्तु प्रसङ्गादीश्वरप्रतिपादनयतान्त्रिसूत्री तथाहि ईश्वरः कारणम् अर्थाज्जन्यजातस्य अनुमानन्तु क्षित्यादिकं सकर्तृकं कार्य्यत्वाद्घटवदित्यूह्यं ननु जीवानामेव कर्तृत्वं स्यादत्राह पुरुषेति पुरुषकर्मणां वैफल्यं दृश्यते तथा च विफले कर्मणि प्रवर्त्तमानत्वादज्ञत्वं जीवानां यतः उपादानगोचरापरोक्षज्ञानादिमतो हि कर्तृत्वं न च क्षित्याद्युपादानगोचरज्ञानं जीवानामिति भावः नन्वदृष्टद्वारा जीवानां कर्तृत्वमस्त्वित्याशङ्कते न पुरुषेति फलस्य कार्य्यस्य कर्माभावेऽनिष्पत्तेः तत्तत्पुरुषोपभोगसाधनत्वात्तत्कर्मजन्यत्वमिति स्फोरणाय पुरुषेति समाधत्ते तदिति कर्मणोऽपि तत्कारितत्वादीश्वरकारितत्वादचेतनस्य चेतनाधिष्ठितस्यैव जनकत्वादिति भावः ॥ २१ ॥

समाप्तमीश्वरोपादानताप्रकरणम् ॥ ४४ ॥

यदि च कार्य्याणामाकस्मिकत्वं तदा न परमाण्वादीनामप्युपादानत्वं नवेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणप्रकरणमारभते तत्र पूर्वपक्षसूत्रम्। अनिमित्तत इति प्रथमान्तात्तसिल् अनिमित्ता भावोत्पत्तिरित्यर्थः भावेति स्पष्टार्थं घटाद्युत्पत्तिर्न कारणनियम्या उत्पत्तित्वात् कण्टकतैक्ष्ण्याद्युत्पत्तिवत् यद्वा घटादिकं न सकारणकं भावत्वात्कण्टकतैक्ष्ण्यादिवत् तैक्ष्ण्यं संस्थानविशेषः आदिपदान्मयूरचित्रादिपरिग्रहः तदकारणकमेवेत्याशयः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकदेशी भ्रान्तो दूषयति। अनिमित्तत इति हेतुपञ्चमीनिर्देशादनिमित्तस्यैव निमित्तत्वात् कथमनिमित्तत इति॥ २३॥

दूषयति। अनिमित्तस्य निमित्तस्य च अर्थान्तरभावात् भेदात् उक्तः प्रतिषेधो न युक्तः अनिमित्तस्य निमित्तासम्भवात् शरीरस्याकर्म्मनिमित्तत्वदूषणेनैव च तद्दूषितप्रायमित्याशयेन नात्र दूषितमिति नव्यास्तु सूत्रद्वयीमेवं व्याचक्षते समाधत्ते अनिमित्तेति अनिमित्तस्य अनिमित्तत्वसाधकस्य निमित्तत्वादनिमित्तत्वानुमितिजनकत्वादनिमित्तत इति व्याहृतम् अनिमित्तत्वानुमिति जनकानभ्युपगमेऽनिमित्तत्वं न सिध्येदिति कण्टकतैक्ष्ण्यादिकमपि नानिमित्तकं अदृष्टविशेषसहकृतैरणुभिस्तदुत्पादनादिति हृदयं दोषान्तरमाह निमित्तेति इदमत्र निमित्तमिदमनिमित्तमिति प्रतीत्या तयोर्भेदसिद्धेर्निमित्तप्रतिषेधो न युक्तः इतरथा च सार्वलौकिकी प्रतीतिर्नोपपद्येतेति भावः॥ २४॥

समाप्तमाकस्मिकत्वप्रकरणम्॥ ४५॥

सर्व्वस्यैवानित्यत्वे नात्मादेरपि नित्यत्वं स्यादतः सर्व्वानित्यत्वनिराकरणप्रकरणं तत्र प्रमेयत्वं अनित्यत्वव्याप्यं नवेति संशये पूर्व्वपक्षसूत्रम्। अनित्यं विनाशि उत्पत्तिमतो विनाशधर्मकत्वात् उत्पत्तिमत्वञ्चाकाशादेरपि मेयत्वात् सिद्धमिति भावः तेन परमते तत्र नासिद्धिः यद्वा उत्पत्तिविनाशधर्मकत्वात् उत्पत्तिविनाशधर्मकाणां मानसिद्धत्वात्तद्भिन्नमप्रमाणकमिति हृदयं परे तु अनित्यत्वं कादाचित्कत्वं उत्पत्तिधर्मकत्वाद्विनाशधर्मकत्वादिति हेतुद्वये तात्पर्य्यमित्याहुः॥ २५॥

दूषयति। उत्पत्तिमत्त्वं न विनाशित्वसाधकं अनित्यताया ध्वंसस्य नित्यत्वादविनाशित्वात्तत्र व्यभिचारात्॥ २६॥

आक्षिपति। तस्या अनित्यताया अप्यनित्यत्वं यथाग्निर्दाह्यस्येन्धनादेर्विनाशानन्तरं स्वयमपि नश्यति न तु दाह्योन्मज्जनं तथा घटादेरपि नाशो नश्यति न घटाद्युन्मज्जनं ध्वंसध्वंसस्यापि प्रतियोगिध्वंसत्वात् ध्वंसप्रागभावानाधारकालस्य प्रतियोग्यधिकरणत्वमिति व्याप्तेरप्रयोजकत्वान्नोन्मज्जनमित्यन्ये॥ २७॥

समाधत्ते। नित्यस्य नित्यत्वविशिष्टस्य नित्यत्वस्य न प्रत्याख्यानमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलितं यथोपलब्धि उपलब्ध्यनतिक्रमेण तथा च धर्मिग्राहकमानेन लाघवसहकृतेनाकाशादेर्नित्यत्वव्यवस्थापनादिति ॥ २८ ॥

समाप्तं सर्व्वानित्यत्वनिराकरणप्रकरणम् ॥ ४६ ॥

सर्वनित्यत्वे न प्रेत्यभावादिसिद्धिरतस्तन्निराकरणप्रकरणं तत्राद्यपक्षसूत्रम् । सर्वं नित्यं भूतत्वान्मेयत्वाद्वा तत्र दृष्टान्तप्रदर्शनाय पञ्चभूतनित्यत्वादित्युक्तं तेन परमाण्वाकाशदृष्टान्तता लभ्यते ॥ २९ ॥

समाधत्ते । सर्व्वनित्यत्वं न युक्तं घटादीनां उत्पत्तिविनाशकारणानां कपालसंयोगमुद्गरपातादीनां उपलब्धेस्तथाचोत्पादविनाशावावश्यकाविति ॥ ३० ॥

पुनः साङ्ख्य आह । उक्तप्रतिषेधो न नित्यस्य परमाण्वादेर्यल्लक्षणं भूतत्वादि घटादौ तदवरोधात् तल्लक्षण. तथाचोत्पादादिप्रत्ययो भ्रान्त इति भावः ॥ ३१ ॥

दूषयति । अनित्यत्वनिषेधो न युक्तः उत्पत्तेस्तत्कारणात्तत्प्रमापकादुपलब्धेः तथाचोत्पादविनाशप्रतीतेः प्रामाणिकत्वान्न तन्निषेध इतरथा कादाचित्कत्वप्रतीत्यनुपपत्तेः नचाविर्भावात्तदुपपत्तिस्तस्यैवानित्यत्वे सर्वनित्यत्वव्याघातात् । विवेचयिष्यते चेदं स्पष्टतरमुपरिष्टात् ॥ ३२ ॥

उत्पादविनाशप्रत्ययस्य भ्रान्तत्वं स्यादित्याशङ्क्याह । सार्वलौकिकप्रमात्वेन सिद्धस्यापि भ्रमत्वशङ्कायां प्रमाणमव्यवहारविलोपः स्यादित्यर्थः ॥ ३३ ॥ समाप्तं सर्व्वनित्यत्वनिराकरणप्रकरणम् ॥ ४७ ॥

अथ प्रसङ्गात्सर्व्वपृथक्त्वप्रकरणं तत्र पूर्वपक्षसूत्रम् । सर्वं वस्तु पृथक् नाना लक्ष्यतेऽनेनेति लक्षणं समाख्या तस्याः पृथक्त्वं पृथगर्थकत्वं तथा च प्रयोगः घटादिः समूहरूपः वाच्यत्वात् सेनावनादिवत् अतीन्द्रिये गगनादौ मानाभावादात्मनः शरीरानतिरेकाद्गुणकर्मणोराश्रयाभेदाद्विशेषसमवाययोर्मानाभावादभावस्य तुच्छत्वान्न व्यभिचारः यद्वा घटादिकं स्वस्मादपि पृथग्भावलक्षणानां गन्धरसादीनां तत्तदवयवादीनाञ्च पृथक्त्वात् घटादेश्च तदभेदादिति भावः ॥ ३४ ॥

समाधत्ते । अनेकलक्षणैरनेकस्वरूपैरूपरसादिभिस्तत्तदवयवैश्च विशिष्टस्यैकस्यैव भावस्य निष्पत्तेरुत्पत्तेरित्यर्थः तथाचैकस्य धर्म्मिणः प्रत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षादिप्रमाणसिद्धत्वात् तस्य च चाक्षुषत्वरासनत्वादिविरुद्धधर्माध्यस्तरूपस्याद्यात्मकत्वाभावादवयवानाञ्च कारणत्वात् कार्य्यकारणयोरभेदासम्भवाच्च न तत्तदात्मकत्वं घटादेः सम्भवतीति भावः॥ ३५॥

हेतुमाह। लक्षणस्य अर्थाद्भावानां घटपटादीनां व्यवस्थानाद्व्यवस्थितत्वादेवाप्रतिषेधः पृथक्त्वाव्यवस्थापनं नेत्यर्थः कपालसमवेतद्रव्यत्वादिकं हि घटादेर्लक्षणं कपाले घट इत्यादिप्रतीतिसिद्धं न चेदं समूहात्मकत्वे सम्भवति एवं लक्षणस्य घटादिस्वरूपस्य यमहमद्राक्षं स्पृशामीति प्रत्यक्षेण व्यवस्थितत्वात् परमाणोश्चाप्रत्यक्षत्वान्न तत्सम्भवः किञ्च समूहलक्षणव्यवस्थितेरेव नोक्तं युक्तं समूहो हि नानाव्यक्तिसमुदायः स च नैकव्यक्तेरनभ्युपगमे सिध्यतीति भावः॥ ३६॥

समाप्तं सर्वपृथक्त्वनिराकरणप्रकरणम्॥ ४८॥

सर्वम्शून्यत्वेन कार्य्यकारणभावासम्भव इति तन्निराकरणप्रकरणमारभते तत्र ज्ञानविषयत्वमभावत्वव्याप्यं न वेति संशये पूर्वपक्षसूत्रम्। सर्वं विवादपदमभावस्तुच्छं तत्र प्रत्यक्षं मानमाह भावेष्विति भावत्वाभिमतेषु घटादिषु अभावत्वसिद्धेः घटः पटो नेत्यादि प्रतीत्या सर्वेषामभावत्वसिद्धेः॥ ३७॥

सिद्धान्तसूत्रम्। भावानां पृथिव्यादीनां स्वभावस्य गन्धादेः सत्त्वादेश्च सिद्धेः न हि तुच्छस्य गन्धरूपादिकंसत्त्वेन प्रतीतिर्वा सम्भवति॥ ३८॥

पुनः शङ्कते। न हि सर्वेषां भावानामेकः स्वभावः सम्भवति आपेक्षिकत्वात् भिन्नत्वात् भिन्नस्य स्वभावत्वे स्वस्मादपि भेदापत्तेः यद्वा इतरसापेक्षत्वात् एतदपेक्षयाऽयं नीलतर एतदपेक्षया ह्रस्व इति प्रतीतेः यच्च सापेक्षन्तदवस्तु यथा जवासापेक्षं स्फटिकारुण्यम्॥ ३९॥

समाधत्ते। सापेक्षत्वस्य तुच्छत्वव्याप्तेर्व्याहतत्वादसिद्धत्वात् न वा घटादेः सापेक्षत्वं सम्भवति किञ्च सापेक्षत्वं सापेक्षं न वा आद्ये तस्य तुच्छत्वान्न साधकत्वं अन्त्ये तस्यैव सत्यत्वात् कुतः सर्वम्शून्यत्वमिति भावः॥ ४०॥

समाप्तं सर्वम्शून्यतानिराकरणप्रकरणम्॥ ४९॥

अथ संख्यैकान्तवादनिराकरणप्रकरणं तत्र भाष्यं अथेमे संख्यैकान्तवादाः सर्वमेकं सदविशेषात् सर्वं द्वेधा नित्यानित्यभेदात् सर्वं त्रेधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञाता ज्ञेयं ज्ञानमिति सर्वं चतुर्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति एवं यथासम्भवमन्येऽपि तत्र यथा नित्यत्वानित्यत्वलक्षणधर्म्माभ्यां द्वैधं तथा सत्त्वेनैकमिति स्पष्टोऽर्थः परेत्वेवं व्याचक्षते एकमित्यद्वैतवादस्तथा च ब्रह्मैवैकं निर्विशेषं सत्यं सर्वमन्यन्मिथ्या यद्वा सर्वं प्रपञ्चजातं एकं द्वैत-शून्यं सदविशेषात् घटः सन् पटः सन्निति प्रतीतेः घटाभिन्नसदभिन्न-पटस्य घटाभेदसिद्धेः श्रुतिरपि एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्च-नेत्यादि अन्येऽपीत्यनेन रूपसंज्ञासंस्कारवेदनानुभवाः पञ्चस्कन्धा इति सौत्रान्तिका इत्यादिसमुच्चयः एतेष्वाक्षेपेषु सिद्धान्तसूत्रम् । सङ्ख्यैकान्ता न सिध्यन्ति कारणस्य प्रमाणस्यानुपपत्तेः उपपत्तौ वा न सङ्ख्यैकान्तः साधनस्य साध्यातिरिक्तस्यापेक्षितत्वात् ॥ ४१ ॥

आक्षिपति । न सङ्ख्यैकान्तस्यासिद्धिः कारणस्य प्रमाणस्यावयवभा-वात् उक्तस्यैकदेशत्वादवयवावयविनोश्च भेदाभावः ॥ ४२ ॥

दूषयति । उक्तो हेतुर्न युक्तः सर्वस्यैव पक्षत्वेनावशिष्टस्याभावा-त्पक्षैकदेशस्य हेतुत्वासम्भवादिति भावः श्रुतिस्तु ब्रह्मैक्यपरेति एतच्च नास्मभ्यं रोचते सत्त्वेनैक्यस्य नित्यानित्यभेदाद्द्वैविध्यादेश्चाभ्युपगतत्वादनि-त्यस्याप्यनुमानस्य नित्यानित्यसाधकत्वे विरोधाभावात् कथमितरथा षट्प-दार्थी सप्तपदार्थी च सिध्येदिति तस्मादद्वैतवादनिराकरणपरत्व एव प्रक-रणं सङ्गच्छत इति संक्षेपः ॥ ४३ ॥

समाप्तं संख्यैक वादप्रकरणम् ॥ ५० ॥

अथावसरतः फले परीक्षणीये संशयमाह । पाकादिक्रियायाः सद्यः फलकत्वस्य कृष्यादेः कालान्तरफलकत्वस्य दर्शनादग्निहोत्रहवनादेर्हिं-सादेर्वा फलं साद्यस्कं कालान्तरीयं वेति संशयः ॥ ४४ ॥

तत्रैहिककीर्त्य कीर्त्त्यादीनामेव फलत्वसम्भवे नादृष्टादिकल्पनमिति पूर्वपक्षे सिद्धान्तसूत्रम् । कालान्तरोपभोग्यत्वेन प्रतिपादनादित्यर्थः स्वर्गो हि फलं श्रूयते स च दुःखासम्भिन्नसुखं न चैहिकं सुख तथा एवं हिंसादेस्तत्तन्नरकोपभोगः फलं श्रूयते न चेह तत्सम्भव इति भावः ॥ ४५ ॥

शङ्कते । कालान्तरेण तत्तत्कर्मणः फलं न सम्भवति हेतोस्तत्कर्मणो विनाशात् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाधत्ते। स्वर्गादिनिष्पत्तेः प्राक् तद्द्वारं स्यात् दृष्टान्तमाह वृक्षफलवत् यथा मूलसेकादिनाशेऽपि तदधीनावयवोपचयादिद्वारवत्वेन फलोत्पत्तिस्तथा प्रकृतेऽपि यागादिनाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वान्न स्वर्गाद्युत्पत्तिविरोधः ॥ ४७ ॥

ननु कार्यकारणभाव एव न विचारसह इत्याशङ्कते। प्राङ्निष्पत्तेरित्यनुवर्त्तते फलमित्यध्याहर्त्तव्यं तथा चोत्पत्तेः प्राक् फलं नासत् असत उत्पत्तौ शशशृङ्गादेरप्युत्पत्तिः स्यात् स्याच्च सिकतादावपि तैलं नवासत् सत उत्पत्तिविरोधात् अतएव न सदसत्सदसतोः रूपत्वारूपत्वलक्षणवैधर्म्यात् ॥ ४८ ॥

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात् ॥ ४९ ॥

समाधत्ते। उत्पत्तिधर्मकं उत्पत्तिधर्मकत्वेनोपलभ्यमानं पटादिकमुत्पत्तेः प्रागसदिति अद्धा तत्त्वम् उत्पादनाशयोः प्रमितत्त्वात् इदानीं घट उत्पन्न इदानीं घटो विनष्ट इति प्रत्ययात् सतस्तु नोत्पत्तिसम्भव उत्पन्नपुनरुत्पादप्रसङ्गात् यद्यपि नाशस्य तत्र हेतुत्वं तथाप्यनुत्पन्नभावस्य नाशायोगादुत्पादसाधकत्वेन नाश उक्तः ॥ ४९ ॥

असत उत्पत्तौ नियमो न स्यादित्यत्राह। तत्कार्य्यम् असत् प्रागभावप्रतियोगिबुद्धिसिद्धं बुद्ध्या विषयीकृतं तथा हि इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्त्तते न तु पटोऽस्तीति ज्ञात्वा तथा सति सिद्धत्वेन ज्ञात इच्छाऽभावात् प्रवृत्त्यनुपपत्तेः सिकतादौ पटो भविष्यतीति न ज्ञायते किन्तु न भविष्यतीति ज्ञायत एव कुत इति चेदनुभवमपृच्छः किञ्च त्वन्मतेऽपि कुतो न ज्ञायते तत्र पटाभावादिति चेत् कथमिदं निरणायि पटात्पूर्वं तन्तुसिकतयोस्तुल्यत्वात् तन्तुत्वेनान्वयतेति चेत्तन्तुत्वेन कारणतेत्येवं स्यात् प्रवृत्त्यनुरोधात् ॥५०॥

नन्वस्तु हेतुफलभावस्तथापि वृक्षफलवदिति दृष्टान्तवैषम्यान्नादृष्टसिद्धिरित्याशयेन शङ्कते। प्राङ्निष्पत्तेर्वृक्षफलवदित्यहेतुः कुतः आश्रय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यतिरेकात् येन कायेन कर्मकृतं तस्य नाशात् वृक्षस्थले तु तस्य वृक्षस्य सत्त्वात् सलिलसेकादिकं परिकर्मोपयुज्यत इत्यभिमानः ॥ ५१ ॥

समाधत्ते । आश्रयव्यतिरेकादिति हेतुर्न युक्तः प्रीतेः सुखस्य स्वर्गिशरीरावच्छेदेन जायमानस्यात्मवृत्तित्वाद्यागादिसामानाधिकरण्यादित्यर्थः ॥ ५२ ॥

क्वचित्सामानाधिकरण्यसम्भवेऽपि सर्वत्र न तथेति शङ्कते। पुत्रादीनां फलनिर्देशात् सामानाधिकरण्यं न सम्भवतीति भावः ॥ ५३ ॥

यद्यपि पुत्रादीनामैहिकफलत्वात्तत्राश्रयव्यतिरेकाभावात् शङ्कैव न तथापि यत्र जन्मान्तरीयधनादिकमपि फलं स्यात्तत्रापि नानुपपत्तिरित्याशयेनाह। तत्सम्बन्धात्पुत्रादिसम्बन्धात् फलनिष्पत्तेः प्रीत्युत्पत्तेः तेषु पुत्रादिषु फलवदुपचारः फलत्वेन व्यपदेशः यथाऽन्नं वै प्राणिनां प्राणा इति ॥ ५४ ॥ समाप्तं फलपरीक्षाप्रकरणम् ॥ ५० ॥

अथ क्रमप्राप्तं दुःखं परीक्षणीयं तत्र च बाधनालक्षणं दुःखमित्युक्तं तदर्थस्तु दुःखत्वजातिरूक्त्वमित्युक्तं तच्च शरीरादौ दुःखेऽव्याप्तमित्याशङ्क्याह। जननयोगाज्जन्मशरीरादिकं तदुत्पत्तिस्तत्सम्बन्धः त्रिविधबाधनायोगात् दुःखमिति व्यपदिश्यते न तु वास्तवमेव तत् दुःखं तथा च विविधदुःखानुषक्ततया हेयत्वार्थं दुःखमिति भावनीयमुपदिश्यते ॥ ५५ ॥

ननु दुःखभावनेन किं सुखं प्रत्याख्यायते न चैतच्छक्यमत आह। दुःखानां मध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानस्याशक्यत्वात् ॥ ५६ ॥

ननु सुखदुःखसम्बन्धाविशेषात् सुखभावनमेव किं नेष्यत इत्यत्राह। दुःखभावनस्य न प्रतिषेधः वेदयतः सुखसाधनत्वं जानतः पर्य्येषण दोषात् पर्य्येषणे सुखार्थप्रवर्त्तने दोषात् सुखार्थप्रवर्त्तमानो हि अर्जनपालनादौ विविधाभिर्बाधनाभिरुपतप्यतेऽतोदुःखभावनं वैराग्यहेतुतयोपदिश्यते ॥५७॥

ननु दुःखमनुभवतः स्वत एव निवृत्तिसम्भवात् दुःखभावनोपदेशो व्यर्थ इत्यत आह। दुःखस्य विविधः कल्पो यत्र तादृशे प्रतिषिद्धहिंसाभोजनमैथुनादौ प्रवृत्तिर्माभूदित्ययमुपदेश इति भावः ॥ ५८ ॥

समाप्तं दुःखपरीक्षाप्रकरणम् ॥ ५१ ॥

अथ क्रमप्राप्ततयाऽपवर्गः परीक्षणीयः' तत्र च'तदर्थकप्रवृत्तिकाला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावात्तदभाव इति पूर्वपक्षयति। ऋणाद्यनुबन्धादपवर्गानुष्ठानकाला-भावादपवर्गाभावः स्यात्'तथा च श्रूयते'जायमानो ह वै ब्राह्मणस्त्रिभि: ऋणवान् जायते'ब्रह्मचर्य्येण ऋषिभ्यः'यज्ञेन देवेभ्यः'प्रजया पितृभ्य' इति' इति' ऋषिभ्यः ऋष्यृणेभ्यो ब्रह्मचर्य्येण मुच्यते' देवेभ्यः देवर्णेभ्यः यज्ञेन मुच्यते'प्रजया अपत्येन पितृणेभ्योमुच्यते' ऋणापाकरणेनैव च जीवनाप-गमः'तथा च श्रूयते'तत्सत्रं यदग्निहोत्रं दर्शपौर्णमासौ च जरयाह्वा एष तस्माद्विमुच्यते मृत्युनाचेति'ऋणापाकरणमन्तरेण च न तत्र प्रवृत्तिः' तथा च स्मर्यते'ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत् । अनपा-कृत्य मोक्षन्तु सेवमानो व्रजत्यधः'एवं क्लेशानुबन्धादपि'पुरुषो हि रागा-दिभिस्तत्तत्कर्माण्यारभमाणः क्लेशानुविद्ध एव दृश्यते तत्कथमपवर्गः'एवं प्रवृत्त्यनुबन्धादपि'पुरुषो हि वाग्बुद्धिशरीरैस्तत्तत्कर्माण्यारभमाणो धर्मा-धर्मौ यावज्जीवमुपार्जयन् कथमपवृज्यतामिति ॥ ५८ ॥

समाधत्ते। जायमान इत्याद्यनुवादो हि प्रधानशब्दः' न हि जाय-मानः कर्मण्यधिक्रियते'तथा च भाष्यं'यदा तु मातृजो जायते कुमारको न तदा कर्मभिरधिक्रियते अर्थिनः शक्तस्य चाधिकारादिति' जायमान इत्यनेन कोवा व्यावर्त्तनीयः नह्यजातस्य प्रसक्तिरस्ति येनासौ व्यावर्त्त-नीयः' तत्र भाष्यं'जायमान इति गुणशब्दो विपर्य्ययेऽनधिकारादिति तथा च जायमान इत्यनेनोपनीत उच्यते' तस्य ब्रह्मचर्य्यादावधिकारात् अग्निहोत्रादौ गृहस्थस्याधिकारः'क्षौमे वसानो वाधीयतामिति श्रुतेः' एवमृणशब्दोऽपि न मुख्यः'नह्यत्र प्रत्यादेयं कश्चन ददाति' परन्तु ऋणा-पाकरणवदावश्यकत्वख्यापनाय तथोक्तं' लाक्षणिकशब्दप्रयोगे बीजमाह निन्दाप्रशंसोपपत्तेः' ऋणानपाकरणतदपाकरणाभ्यामिवाग्निहोत्राद्यक-रणतत्करणाभ्यां निन्दाप्रशंसे उपपद्येते'नचानुष्ठानकालाभावः जरया-विमुच्यत इत्युक्तेः' न च जरयाऽशक्तिरुपलक्ष्यते'अन्ते वासी वा जुहुयात् ब्रह्मणा हि स परिक्रीत इत्यादिनाऽशक्तस्यापि विधानात्' तस्मादायुष-श्चतुर्थभागो जरेत्युच्यते' किञ्च' जरामर्य्यवादः कामनाभिप्रायेण' तथा च भाष्यम्'अर्थित्वस्य चापरिणामे जरामर्य्यवादोपपत्तेरिति' अर्थित्वं का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मना तदपरिणामे तन्नाशे कर्मकारणाभिप्रायेण जरामर्य्यवाद उपपद्यते ॥ ६० ॥ ॥ ६१ ॥ " "

ननु काम्यानां कामनाविरहेण त्यागसम्भवेऽपि नित्यानां कथं त्यागः श्रूयते हि यावज्जीवमग्निहोत्रं जुहुयादिति तत्राह। अपवर्गप्रतिषेधो न युक्तः अग्नीनामात्मनि समारोपविधानात् श्रूयते प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं दत्वात्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति अतएव चत्वारः पथयो देवयाना इति चातुराश्रम्यश्रुतिरपि सङ्गच्छते ॥ ६२

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ क ॥

नन्वग्निहोत्रस्याप्रतिबन्धकत्वेऽपि तत्फलस्वर्ग एवापवर्गप्रतिबन्धकः स्यादत्राह। ज्ञानिनः फलस्य स्वर्गस्याभावः 'अग्निहोत्रं हि पात्रचयान्तं पात्राण्यग्निहोत्रपात्राणि तेषाञ्चयः प्रमीतस्य यजमानस्याङ्गेषु विन्यासः मुखे घृतपूर्णां स्रुचमिति क्रमेण' भिक्षोस्तदनुपपत्तेः 'तेन तत्परित्यागात् अग्निहोत्रफलाभावेऽपि ज्योतिष्टोमगङ्गास्नानादिहिंसादिफलानां प्रतिबन्धकत्वं स्यादतो हेत्वन्तरसमुच्चयाय चकार उपन्यस्तस्तथा च प्रारब्धातिरिक्तकर्मणां ज्ञानादेव क्षय इत्याशयः 'श्रूयते हि' तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' एवं 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे। स्मर्यते' ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति' इत्यञ्च कामनाशून्यस्य प्रजाद्युत्पादेऽपि नापवर्गविरोधी 'तथा च श्रूयते' एतद्ध स्म वै पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नायमात्मालोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्य्यं चरन्तीति' अन्ये तु' फलाभावः फलस्य मुमुक्षून् प्रति अग्निहोत्रादौ प्रयोजकत्वाभावस्तथा सति भिक्षूणामपि पात्रचयान्तं स्यादित्यर्थ 'इत्याहुः ॥ क ॥

क्लेशानुबन्धं दूषयति। स्वप्नादर्शनकाले सुषुप्तस्य यथा हेत्वभावेन दुःखाभावस्तथाऽपवर्गेऽपि रागाद्यभावेन दुःखाभावः स्यात् ॥ ६३ ॥

यदप्यनुबन्धादपवर्गाभावं दूषयति। क्लिश्यन्तेऽनेनेति क्लेशो रागादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्विरहिणो या प्रवृत्तिः सा प्रतिसन्धानाय प्रतिबन्धाय न भवति धर्मा-धर्मौ न जनयतीत्यर्थः ॥ ६४ ॥

क्लेशाभावमसहमानः शङ्कते। क्लेशसन्ततेरुच्छेदो न युक्तः स्वाभा-विकत्वात् ॥ ६५ ॥

एकदेशी समाधत्ते। प्रागुत्पत्तेरभावानित्यत्ववत्प्रागभावानित्यत्व-वत् अनादेः परमाणुश्यामतायाविनाशवद्वा विनाशः ॥ ६६ ॥ ६७ ॥

अनित्यत्वं विनाशिभावत्वं न च तत्प्रागभावे नवाऽणुश्यामतादिर-नादिस्तथा च भाष्यम् अनादिरणुश्यामतेति हेत्वभावादयुक्तमित्यतो मत-द्वयमुपेक्ष्य सिद्धान्तमाह। नोक्तं युक्तं कुतो रागादीनां सङ्कल्पनिमित्तत्वात् सङ्कल्पो मिथ्याज्ञानं निमित्तं येषां तथा च तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ रागादिनिवृत्तिर्युज्यत एवेति भावः ॥ ६८ ॥

समाप्तमपवर्गपरीक्षाप्रकरणम् ॥ ५२ ॥

समाप्तं चतुर्थाध्यायस्य प्रथममाह्निकम् ॥१॥

अथ शास्त्रस्य परमं प्रयोजनमपवर्गः स चोद्दिष्टो लक्षितः परीक्षितो-ऽप्यकिञ्चित्करः कारणानिरूपणात् नन्वभिहितमेव दुःखादिसूत्रे कारण-नाशक्रमेण दुःखाभावोऽपवर्गः इतीति चेत्सत्यं मिथ्याज्ञानापगमहेतुर्ना-भिहितः तत्त्वज्ञानं तत्र हेतुरिति चेत् कस्य तत्त्वं ज्ञातव्यमित्यभिधानीय-मित्याशयेन तत्त्वज्ञानपरीक्षा सैव चाह्निकार्थः तत्र च षट्प्रकरणानि आदौ तत्त्वज्ञानोत्पत्तिप्रकरणम् अन्यानि च यथायथं वक्ष्यन्ते तत्र सिद्धान्तसूत्रम्। अहङ्कारोऽहमित्यभिमानः स च शरीरादिविषयको मिथ्याज्ञानमुच्यते तच्च दोषनिमित्तानां शरीरादीनां तत्त्वस्य अनात्मत्वस्य ज्ञानान्निवर्त्तते आत्मत्वेन हि शरीरादौ बुध्यन् रञ्जनीयत्वात् रज्यति कोपनीयेषु कुप्यति केचित्तु दोषनिमित्तानां रागादीनां तत्त्वज्ञानाद्बलवद-निष्टानुबन्धित्वज्ञानादहङ्कारस्याभिलाषस्य निवृत्तिरित्यर्थः इत्याहुः ॥ १ ॥

ननु के तावदनुरञ्जनीया विषयाः येषु रज्यन् संसरतीत्यतो विवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काय तानुपदिशति। सङ्कल्पः समीचीनत्वेन भावनं तद्विषयीकृताद्रूपादयः दोषस्य र.ग.द्वेर्निमित्तं सुन्दरीयमिति जानन् रज्यति शत्रुरयमिति द्वेष्टि ते रूपादयो हेयत्वेन भावनीयाः प्रथमं ततः शरीरात्मविवेकः ॥२॥

ननु सौन्दर्य्यादिकं पश्यतो रागादिर्बलक्षणोऽपि दुष्परिहरः तदुक्तं चञ्चलं हि मनः कृष्णप्रमाथिबलवद्दृढमित्यतो रागादिनिवृत्त्युपायं दर्शयिष्यन्नाह। अवयविनि तरुण्यादिशरीरे अभिमानः सपरिष्कारबुद्धिस्तन्निमित्तं रागादिनिमित्तं तथा च सा बुद्धिर्हेया अतएव भाष्यादौ परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीयेति अनुरञ्जनसंज्ञाय यथा खेलत्खञ्जननयना परिणतविम्बाधरा पृथुश्रोणी। कमलमुकुलस्तनीयं पूर्णेन्दुमुखी सुखाय मे भवितेति अशुभसंज्ञा यथा चर्मनिर्मितपात्रीयं मांसासृक्पूयपूरिता अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः। स्वशरीरादौ अप्यशुभसंज्ञैव भावनीया एवं कोपनीयेऽपि शुभसंज्ञा। मां द्वेष्ट्यसौ दुराचार दुष्टादिषु यथेष्टतः। कण्ठपीठं कुठारेण छित्वास्य स्यां सुखी कदा। अशुभसंज्ञा तु मांसासृक्कीकसमयो देहः किं मेऽपराध्यति एतस्मादपरः कर्त्ता कर्त्तनीयः कथं मयेति ॥ ७० ॥ समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥ २ ॥

अथ प्रसङ्गादवयविप्रकरणं वस्तुतस्तु शरीरे धर्मद्वयस्य सम्बन्धेऽपि एकं ध्येयमपरं हेयमिति निर्युक्तिकम् अतोऽवयवी नास्ति किन्तु परमाणुपुञ्ज इति तत्त्वं तदेव तन्मुमुक्षुभि र्भावनीयं परमाणुपुञ्ज इत्यप्यापाततः परमाणोरप्यग्रे निराकरिष्यमाणत्वादिति सौगतशङ्कामपाकर्त्तुमयमारम्भः यद्यपि द्वितीयाध्याये व्यवस्थापित एवावयवी तथापि स्वयुक्तिदार्ढ्येन सौत्रान्तिकस्य वैभाषिकस्य चात्र प्रत्यवस्थानमिति तत्र संशयप्रदर्शनाय सूत्रम्। संशय इत्यस्य अवयविनीत्यादिः अवयविनः प्रत्यक्षसिद्धत्वात् तदपलापो दुःशक्य इत्यत उक्तं विद्येति प्रमाप्रमभेदेन ज्ञानद्वैविध्यात् ज्ञानत्वलक्षणसाधारणधर्मदर्शनात् ज्ञाने प्रमाणत्वसंशयादवयविनि संशय इत्यर्थः ॥ ४ ॥

समाधत्ते। तत्रावयविनि न संशयः पूर्वहेतुप्रसिद्धत्वात् द्वितीयाध्यायोक्तयुक्तिभिरवयविनः प्रकर्षेण सिद्धत्वात् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवयविनि बाधकं शङ्कते। अपिरवधारणे तर्हि संशयानुपपत्तिवृत्त्यनुपपत्तितोऽवयव्यभावादेव स्यादित्यर्थः वृत्त्यनुपपत्तिं विवृणोति भाष्यकारः कृत्स्नैकदेशवृत्तित्वादवयवानामवयव्यभावः अवयवी हि एकैकावयवे कात्स्न्येन एकदेशेन वा नाद्यः विषमपरिमाणत्वात् अन्त्येऽपि तेनैवावयवेनान्येन वा नाद्यः स्वस्मिन्वृत्तिविरोधात् नान्त्यः अवयवान्तरस्यावयवान्तरावृत्तेः तथापि कथमवयव्यभाव इत्यत्र भाष्यं तेषु चावृत्तेरवयव्यभावः तेषु अवयवेषु पूर्व्वोक्तयुक्त्या अभावादवयवी नास्ति नह्यसाववृत्तिस्त्वयाऽभ्युपेयत इति भावः सूत्रमेवेदमित्यपि वदन्ति॥ ६॥ ॥७॥ ॥८॥ ॥

नन्वास्तामवृत्तिरेवावयवीति शङ्कायां पूर्व्वपक्षिसूत्रम् अवयवेभ्यः पृथक् अवयवी नास्तीति शेषः तेषु चावृत्तेरित्यस्य सूत्रत्वे अवयव्यभाव इत्यनुवर्त्तते कुतः अवृत्तेः वृत्त्यभावेऽवयविनो नित्यत्वप्रसङ्गः न च नित्योऽवयव्युपलभ्यते ततो नास्त्येवावयवीति भावः यद्वा कृत्स्नैकदेशाभ्यामवयवी न वर्त्तते किन्तु स्वरूपेणैवेति शङ्कायां पूर्वपक्षिणः सूत्रं पृथगिति अवयवेभ्यः पृथगवयवी नास्ति कुतः अवृत्तेः अवृत्तित्वप्रसङ्गात् तथा सति-नित्यं स्यादिति भावः कश्चित्तु अवयवातिरिक्तोऽवयवी वर्त्तत मित्यत्र पूर्वपक्षिणः सूत्रं पृथगिति पूर्व्वोक्तयुक्त्याऽवयवेभ्यः पृथगप्यवृत्तेः॥९॥

नन्ववयवावयविनोस्तादात्म्यमेव सम्बन्धः स्यादत आह। नहि तन्तुः पटस्तस्मोऽत्वहमिति कश्चित्प्रत्येति नवाऽभेदेनाधाराधेयभाव उपपद्यते॥१०

सिद्धान्तसूत्रम्। अवयवी कात्स्न्येन एकदेशेन वा वर्त्तत इति प्रश्नोन युक्तः एकस्मिन्नवयविनि भेदाभावाद्भेदनियतशब्दप्रयोगस्यायुक्तत्वात् अनेकस्याशेषता हि कात्स्न्यं समुदायिनां किञ्चित्त्वमेकदेशत्वं नचैकस्य तत्सम्भव इति भावः॥ ११॥

इतश्च वृत्तिविकल्पोनयुक्त इत्याह। अवयवी स्वावयवेषु नैकदेशेन वर्त्तते अवयवान्तराभावादिति यः परेषां हेतुः स न युक्तः कुतः अवयवान्तरभावेऽप्यवृत्तेः अवयवान्तरसत्त्वेऽति तस्यैव परं वृत्तिरायाति न त्ववयविनोऽपीति यद्वा अवृत्तेर्वर्त्तनाभावस्य कृत्स्नैकदेशविकल्पो न हेतुः कुतः अवयवान्तरस्य अवयविभिन्नस्य अवयवस्य भावेऽपि सत्त्वेऽपि सम्भवात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटत्वादिवत् स्वरूपेणैवावयविनो वृत्तेः सम्भवात् वृत्तेः कृत्स्नैकदेशान्यतरनियमोघटत्वादौ व्यभिचार्य्यप्रयोजकश्चेति भावः ॥ १२ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वादित्यनेन सर्व्वाग्रहणमवयव्यसिद्धेरिति पूर्व्वोक्तायुक्तिः ख्यारिता पूर्वपक्षी तां दूषयितुमुपक्रमते । यथा तैमिरिकस्य तिमिरग्रस्तचक्षुषो नैकः केशः प्रत्यक्षः किन्तु तत्समूहः एवमेकः परमाणुरप्रत्यक्षः तत्समूहरूपो घटादिः प्रत्यक्षः स्यात् ॥१३॥

उत्तरयति । इन्द्रियाणां पाटवे विषयग्रहणस्य पाटवं प्रकर्षः इन्द्रियाणां मान्द्ये तद्ग्रहणस्य मान्द्यमपकर्षः न तु पटुतरं चक्षुः शब्दं गृह्णाति तदिदमुक्तं स्वविषयानतिक्रमेणेति फलितार्थमाह नाविषये वृत्तिरिति तथा च स्वाविषयं परमाणुं समूहत्वापन्नमपि कथं चक्षुर्गृह्णीयादिति भावः ॥ १४ ॥

दोषान्तराभिधानाय सूत्रम् एवमुक्तप्रकारेण वृत्तिविकल्पदोषोऽवयविन्यवयवे च प्रसक्तः आप्रलयात् प्रलयोऽभावस्तथा च सर्व्वाभाव एव स्यान्न कस्यापि ग्रहणमिति साधूक्तं सर्व्वाग्रहणमवयव्यसिद्धेरिति ॥१५॥

अस्तु सर्व्वाभावइत्यताह । आश्रयनाशाद्यभावेन परमाणोर्नाशाभावेन तत्सम्भवात् यद्वा नन्ववयवावयविप्रवाहस्त्वया प्रलयपर्य्यन्तं स्वीकार्य्यः प्रलये च निखिलपृथिव्यादिनाशात्मनः सर्गोन स्यादित्याशयेन शङ्कते अवयवेति समाधत्ते नेति न सकलपृथिव्यादिनाशः परमाणुसद्भावादित्यर्थः ॥ १६ ॥

परमाणुरेव क इत्यताह । त्रुटेः परं यदतिसूक्ष्मं तत्परमाणुः वाशब्दोऽवधारणे अथ वा त्रुटेरवयवस्तदवयवोवा परमाणुरिति विकल्पार्थो वाशब्दः यद्वा त्रुटेः परं सूक्ष्मं परमाणुः त्रुटावेव वा विश्राम इति विकल्पोऽभिमतः ॥ १७ ॥ समाप्तमवयवावयविप्रकरणम् ॥ ५४ ॥

अथ विश्वस्य शून्यत्वात् क परमाणुसम्भावनेति मतनिराकरणाय निरवयवप्रकरणं तत्र पूर्वपक्षसूत्रम् । तस्य निरवयवस्याणोरनुपपत्तिः कुतः आकाशव्यतिभेदात् अन्तर्बहिश्चाकाशसमावेशात् तथा च सावयवस्ततश्चानित्य इति ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नाकाशव्यतिभेदस्तर्हि आकाशमसर्व्वगतं स्यादित्याह । स्यादिति शेषः ॥ १९ ॥

समाधत्ते । अन्तःशब्दो बहिःशब्दश्च कार्य्यद्रव्यस्यावयवविशेषवाची न चाकार्य्येऽवयवसम्भवदृत्यर्थः बहिरिति दृष्टान्तार्थम् ॥ २० ॥

आकाशस्यासर्वगतत्वं स्यादित्यत्राह । शब्दस्य संयोगस्य च यो विभवः अथ वा शब्दजनकसंयोगस्य यो विभवः सार्व्वत्रिकत्वं तस्मात् पुनः सर्वगतं आकाशमिति शेषः सर्वदेशे शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् सर्वमूर्त्तसंयोगित्वरूपसर्वगतत्वं तस्य सिद्धम् ॥ २१ ॥

आकाशस्य सर्वसंयोगित्वे व्यूहनविष्टम्भौ स्यातामत आह । व्यूहः प्रतिहतस्य परावर्त्तनं विष्टम्भ उत्तरदेशगतिप्रतिबन्धः आकाशे तयोरभावः निस्पर्शत्वात् विभुत्वं सर्वगतत्वं यद्येते सूत्रे शून्यतावादिमते न संगच्छेते आकाशादेस्तैरनभ्युपगमात्तथापि त्वन्मत इति पूरयित्वा व्याख्येये ॥ २२ ॥

पूर्वपक्षी युक्त्यन्तरमाशङ्कते । परमाणोरिति शेषः हेतुमाह संस्थानोपपत्तेः संस्थानवत्त्वात् परमाणुर्हि परिमण्डलाकारः संस्थानवत्त्वे मानं भङ्ग्या वदति मूर्त्तिमतामिति मूर्त्तत्वात् संस्थानवत्त्वमित्यर्थः चः पूर्वोक्तहेतुं समुच्चिनोति पूर्वक्तहेतुं समुच्चिनोति मूर्त्तत्वस्य हेतुत्वसमुच्चयार्थो वा चकारः ॥ २३ ॥

युक्त्यन्तरमाह । अवयवसद्भावदृत्यनुवर्त्तते संयोगवत्त्वादिति हेत्वर्थः संयोगवत्त्वात् कथं सावयवत्वमिति चेत् इत्थ संयोगस्याव्याप्यवृत्तित्वादव्याप्यवृत्तित्वञ्चावच्छेदकभेदं विना नोपपद्यते अवच्छेदकञ्चावयव इति ननु परमाण्ववयवेऽप्ययं दोषः स्यात्तथाचानवस्थितपरम्पराप्रसङ्ग इति चेत् त्यज तर्हि परमाणुव्यसनं स्वीकुरु शून्यतावादं निरवयवमाकाशादिकमपि नास्तीति भावः ॥ २४ ॥

समाधत्ते । पूर्व्वोक्तयुक्त्या परमाणोर्निरवयवत्वप्रतिषेधोन युक्तः कुत अनवस्थाकारित्वात् प्रामाणिकीयमनवस्था स्यादत आह अनवस्थानुपपत्तेश्चेति सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्य परिमाणत्वापत्तिरित्यञ्च तत्संयोगावच्छेकादिग्विभागा न वा शून्यतायुक्ता निष्प्रमाणत्वात्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माणसत्त्वे शून्यत्वविरोधात् निष्प्रमाणकशून्यताऽभ्युपगमे किमपराद्धं पूर्णतयेति दिक् ॥ २५ ॥ समाप्तं निरवयवप्रकरणम् ॥ ५५ ॥

ननु वाह्यार्थाभावात् कुतोऽवयवावयविव्यवस्थेति मतमपाकर्त्तुं वाह्यार्थभङ्गनिराकरणमारभते प्रमेयत्वं ज्ञानत्वव्याप्यं नवेति संशयः तत्र पूर्वपक्षसूत्रम्। तुः प्रकरणविच्छेदार्थः भावानां बुद्ध्या विवेचनादभेदोल्लेखात् याथात्म्यस्य ज्ञानभेदलक्षणस्यानुपलब्धिरनुपपत्तिः घट इति ज्ञानं मम जातमिति ह्यनुभूयते तत्र घट इति ज्ञान मित्यनेन ज्ञानघटयोरभेदउल्लिख्यते ततोन ज्ञानातिरिक्तो विषयः यथा पटे विविच्यमाने तन्तूनामेवापकर्षणादावतिरिक्तं न वस्तु एवं तन्तुरपि नांशुव्यतिरिक्त इति घटत्वादिस्तु ज्ञानस्यैवाकारविशेष इति भावः ॥ २६ ॥

समाधत्ते। उक्तो हेतुर्न युक्तः व्याहतत्वात् न हि बुद्ध्या विवेचने पटस्य तन्तुरूपता सिध्यति तन्तुतः पट इति हि प्रतीयते न तु तन्तुः पट इति एवं पटेन प्रावरणं न तु तन्तुभिः किञ्च तन्तुपटविवेचनादेववाह्यार्थसिद्धिः ज्ञानेन तु स्वस्मिन् पटाभेदो नोल्लिख्यते स्वाविषयकत्वादनुव्यवसायेन तु पटविषयकत्वं व्यवसाये समुल्लिख्यते ॥ २७ ॥

ननु तन्तु पटयोर्भेदे पार्थक्येन ग्रहणं स्यादित्यत्राह। पृथग्ग्रहणं यदि तन्त्वविषयकप्रत्यक्षविषयत्वं पटस्यापाद्यते तत्रोत्तरं तदाश्रयत्वादिति पटो हि तन्त्वाश्रितः तेन सामग्रीसत्त्वात्पटप्रत्यक्षस्य तन्तु विषयकत्वं यदि च भेदप्रत्यय आपाद्यते तदा भवत्येवेति भावः ॥ २८ ॥

ननु ज्ञानस्योभयवादिसिद्धत्वात्तन्मात्र पदार्थकल्पने लाघवात्तदतिरिक्तपदार्थाभावसिद्धिः स्यादित्यत आह। पूर्वोक्तहेतुं समुच्चिनोति चकारः अर्थस्य घटादेः प्रतिपत्तेः प्रमाणाधीनत्वात् तथा च प्रामाणिकेऽर्थे गौरवं न वाधकमिति भावः अन्यथा ज्ञानमपि न सिध्येद्गौरवादि शून्यतापत्तिः ॥ २९ ॥

न वा वाह्यार्थाभावसाधनं सम्भवतीत्याह। व्याघातान्न वाह्याभाव इति शेषः वाह्यं नास्तीत्यत्र यदि प्रमाणमस्ति तदा प्रमाणस्य वाह्यस्य सत्त्वान्न वाह्याभावः अथ नास्ति तदा निष्प्रमाणकत्वान्न तत्सिद्धिरित्यर्थः किञ्च घटादौ यदि प्रमाणमस्ति तदा तत एव वाह्यार्थसिद्धिः अथा प्रमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदा कथं घट इति ज्ञानस्य घटाकारत्वं मन्यसे ज्ञानस्यैवानुत्पत्तेरिति ॥२०॥

ननु प्रमाणप्रमेयव्यवहारो न पारमार्थिकः परन्तु विज्ञानानि तत् तदाकाराणि वासनापरिपाकवशादेव स्वाप्नप्रत्ययवदैन्द्रजालिकप्रतीतिवच्चाविर्भवन्तीत्याशयेन शङ्कते सूत्राभ्यांस्पष्टम् ॥ ३१ ॥ ३२ ॥

समाधत्ते। वाह्याभावस्यासिद्धिः हेत्वभावात् प्रमाणाभावात् अथवा हेतोश्चक्षुरादेरनभ्युपगमे घटोऽयमित्यादिज्ञानानामसिद्धिरित्यर्थः न च वासनावशात्स्यादिति वाच्यं वासनाया अतिरिक्तत्वेवाह्योपगमप्रसङ्गात् वासनायाः सन्तन्यमानतया चाक्षुषादेरपि सन्तानापत्तिरिति दिक् ॥ ३३ ॥

नन्वसद्विषया अहेतुका अपि स्वाप्नप्रत्ययाइव भावना प्रत्यया इव परेऽपि प्रत्ययाभवेयुरित्यत आह। पूर्व्वोपलब्धविषय इति शेषः सङ्कल्पउपनीतभानं यथा स्मृत्यादिः पूर्व्वोपलब्धविषयकः तथा स्वाप्नप्रत्ययोऽपीति न निर्व्विषयकः न च स्वप्ने खमपि खादति निजशिरः खण्डनमपि पश्यति नत्विदं पूर्व्वोपलब्धमिति वाच्यं खस्य खादनस्य च निजशिरसः खण्डनस्य च पूर्व्वोपलब्धत्वात्संसर्गभानस्य च भ्रान्तत्वात् नवाऽहेतुकत्वं स्मृत्यादिदृष्टान्तेन संस्कारस्य स्मृतेश्च स्मृतौ विशिष्ट बुद्धौ च हेतुत्वस्याभिमतत्वात् तत्र भ्रमे दोषः कालविशेषोऽदृष्टविशेषोदोषोवेत्यन्यदेतत् ॥३४॥

ननु भ्रमस्यापि सद्विषयकत्वे तत्प्रतिरोधः कथं स्यादित्याशङ्क्याह। मिथ्योपलब्धेर्मायागन्धर्वनगरादिज्ञानस्य तत्त्वज्ञानादनारोपितवस्तुप्रत्ययाद्विनाशः प्रतिरोधः भ्रमत्वज्ञानं वा एवं स्वप्नप्रत्ययस्यापि दर्पणमुखविभ्रमस्य तत्त्वज्ञानेनाप्रतिरोधेऽपि भ्रमत्वज्ञानं भवत्येवेति भावः ॥ ३५ ॥

माध्यमिकस्तु वाह्यासत्त्वं प्रसाध्यते तद्दृष्टान्तेन बुद्धेरप्य सत्त्वं साधयति तं प्रत्याह। एवं वाह्यवद्बुद्धेरपि न प्रतिषेधः निमित्तसद्भावोपलम्भात् सहेतुकत्वस्य प्रमितत्वात् नह्यलीकं सहेतुकं सम्भवति अहेतुकत्वे च कादाचित्कत्वव्याकोपः केचित्तु भ्रमस्य सद्विषयत्वे प्रमात्वं स्यादित्यत्राह बुद्धेरिति एवं प्रमात्वं निमित्तस्य प्रकारस्य सद्भावः सत्त्वं यत्र तथा च शुक्तिरजतयोः सत्यत्वेऽपि शुक्तौ रजतत्ववैशिष्ट्याभावान्न तद्बुद्धेः प्रमात्वमिति भाव इत्याहुः अत्र चोपलम्भ पदमनतिप्रयोजनकम् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न वा मिथ्याबुद्धिदृष्टान्तेन ज्ञानमात्रस्यासन्मात्रविषयकत्वं सद्विषयकत्वाभावोवा सम्भवतीत्याह। तत्त्वं धर्म्मिस्वरूप प्रधानं आरोप्यं तथाच भ्रमे धर्म्म्यंशे प्रमात्वमारोप्यरजतत्वाद्यंशे च भ्रमत्वमिति दृष्टान्तासिद्धिरिति भावः केचित्तु प्रमात्वाप्रमात्वयोर्विरोधान्नैकत्र समावेश इत्यत आह तत्त्वेति तथा च विषयभेदान्न विरोध इति भावः इत्याहुः ॥ ३७ ॥

समाप्तं बाह्यार्थभङ्गनिराकरणप्रकरणम् ॥ ५६ ॥

ननु शास्त्राधीनं तत्त्वज्ञानं क्षणिकमतस्तन्नाशे मिथ्याज्ञानं स्यादेव नहि तादृशं किञ्चिदेव ज्ञानं दृढभूमिसवासनमिथ्याज्ञानसमुन्मूलनक्षमम-तस्तत्त्वज्ञानविवृद्धिप्रकरणमारभते तत्त्वज्ञानविवृद्धिस्तत्त्वज्ञानवासना ततस्तात्यन्तिकोमिथ्याज्ञान नाशः तत्र तत्त्वज्ञानविवृद्धौ हेतुमाह। समाधिः चित्तस्याभिमतविषयनिष्ठत्वं तस्य प्रकर्षोविषयान्तरानभिष्वङ्गलक्षणस्तस्याभ्यासात् पौनःपुन्यात् तत्त्वज्ञान विवृद्धिः तदेव च निदिध्यासनमामनन्ति तत्त्वज्ञानविवृद्ध्या च मिथ्याज्ञानवासनातिरोभावस्तथा च योगसूत्रं तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी प्रतिबन्धः कार्य्याक्षमतासम्पादनं विनाशोवा॥ ३८ ॥

ननु रागादिभिः प्रतिबन्धात् समाधिरेव नोदेतीत्याक्षिपति सूत्राभ्याम्। अर्थविशेषस्य तनयवनितादिरागस्य प्राबल्याच्चिरकालानुबन्धात्तदनुसन्धानमवर्ज्जनीयमिति तदभावः स्याच्च घनगर्जितादिज्ञानेन प्रतिबन्धः एवं क्षुत्तृष्णाभयादिभिः प्रतिरुद्ध स्तदुपशमाय प्रयतेत ॥ ३९ ॥ ४० ॥

परिहरति। जन्मान्तरकृतसमाधिजन्यसंस्कारवशात् समाधिसिद्धिरित्यर्थः अतएव चानेकजन्मसंसिद्ध इत्यादि सङ्गच्छते वयन्तु पूर्वकृतस्य प्रथमतः कृतस्येश्वराराधनस्य फलं धर्मविशेषस्तत्सम्बन्धादित्यर्थः तथा च योगसूत्रं समाधिसिद्धिरीश्वरप्रणिधानात् सूत्रान्तरञ्च तत्रैव ततः प्रत्यक्‌चेतनाधिगमोऽप्यन्तरायाभावश्च तत ईश्वरप्रणिधानात् विषयप्रातिकूल्येन चित्तावस्थानं प्रत्यूहाभावश्चेत्यर्थः ॥ ४१ ॥

योगाभ्यासस्थानमुपदिशति। तत्र स्थिरचित्तता स्यादिति भावः इदं न सूत्रं भाष्यमिति केचित् ॥४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तटस्थः शङ्कते। एवं प्रसङ्गः अर्थविशेषप्राबल्याद्विषयावभासप्रसङ्गः॥४३॥ समाधत्ते। निष्पन्नस्य शरीरादेः अवश्यम्भावित्वात् कारणत्वात् ज्ञानादिष्विति शेषः॥ ४४॥

ननु किमेतावतेत्यत आह। तस्य शरीरादेरभावः तदारम्भकधर्म्माधर्म्मविरहादिति भावः॥ ४५॥

ननु समाधिमात्रादेव निष्प्रत्यूहोऽपवर्गः स्यात् साधनान्तरं वाऽपेक्षणीयमत आह यद्वा समाधिसाधनान्याह। तदर्थमपवर्गार्थमिति भाष्यादौ तदर्थं समाध्यर्थमिति वा यमानाह योगसूत्रं अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः नियमानाह शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः स्वाध्यायः स्वाभिमतमन्त्रजपः निषिद्धानाचरणतत्तदाश्रमविहिताचरणे यमनियमा इत्यन्ये आत्मसंस्कारः आत्मनोऽपवर्गाधिगमक्षमता ननु यमनियमावेव साधने उताहो अन्यदस्तीत्यत आह योगादिति आत्मविधिः आत्मसाक्षात्कारविधायकवाक्यं आत्मा वा अरे द्रष्टव्य आत्मानं चेद्विजानीयादित्यादि योगादिति प्रतिपाद्यत्वं पञ्चम्यर्थः तथाच योगशास्त्रोक्तात्मतत्वाधिगमसाधनैश्चात्मसंस्कारः कर्त्तव्य इत्यर्थः तथाच योगसूत्रं योगसूत्रं योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः तदर्थञ्च योगाङ्गानां यमनियमादीनां अनुष्ठानाच्चित्तस्याशुद्धेरविद्यादिरूपस्य क्षये सति ज्ञानस्य दीप्तिः प्रकर्षः स च विवेकख्यातिपर्य्यन्तो जायते सा च सत्त्वपुरुषान्यतासाक्षात्कारः अस्मन्मते तु देहादिभिन्नात्मसाक्षात्कारः स च नेदानीमविद्याप्रतिबन्धाद्देहात्मनोर्मनश्चक्षुराद्ययोग्यत्वाच्च भवति चासौ योगजधर्म्मात् योगाङ्गानि तत्रोक्तानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि आसनं पद्मासनादि कुशासनादि च चैलाजिनकुशोत्तरमिति भगवद्वचनात् प्राणायाममाह योगसूत्रं तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः तस्मिन् आसनस्थैर्य्ये प्राणवायोरेव निर्गमप्रवेशरूपक्रियाविशेषात् श्वासप्रश्वासव्यपदेशः वहिरिन्द्रियाणां स्वस्वविषयवैमुख्येनावस्थानं प्रत्याहारः धारणामाह योगसूत्रं देशबन्धश्चित्तस्य धारणा देशे नाभिचक्रादौ चित्तस्य बन्धविषयान्तरवैमुख्येनावस्थानं ध्यानमाह तत्रप्रत्ययैकतानताध्यानं धारणैव धारावा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हीनी ध्यानमित्यर्थः समाधिमाह तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः अर्थस्य धर्म्मो ज्ञानस्वरूपञ्च यदि ध्याने न भासते तदा समाधिरित्यर्थः सूत्रान्तरं त्रयमन्तरङ्गं पूर्व्वेभ्यः चरमत्रयं साक्षादुपकारकमित्यर्थः ॥४६

नन्वेवं किमान्वीक्षिक्येत्यत आह । तदर्थमित्यनुवर्त्तते ज्ञायतेऽनेनेति ज्ञानं शास्त्रं प्रकृतं तस्य ग्रहणमध्ययनधारणे तत्राभ्यासो दृढ़तरसंस्कारः तद्विद्यैस्तदभियुक्तैः संवादः स्वानुभवदार्ढ्याय न हि योगाङ्गज्ञानाय तत्सापेक्षत्वेन न प्रकृतशास्त्रवैफल्यं ध्येयस्वरूपवैलक्षण्यात् ॥ ४७ ॥

संवादप्रकारं वा दर्शयितुमाह । तं तद्विद्यं सब्रह्मचारी सहाध्यायी विशिष्टः प्रकृष्टज्ञानवान् श्रेयोऽर्थी मुमुक्षुः विशिष्टः पूर्व्वोक्तभिन्न इत्यर्थः इति कश्चित् विजिगीषुव्यावृत्त्यर्थं अनसूयिभिरिति ॥ ४८ ॥

संवादप्रकारमाह । वाशब्दो निश्चयार्थः अर्थित्वे तत्त्वबुभुत्सायां सत्यां प्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिकूलपक्षहीनं यथा स्यात्तथाऽभ्युपेयात् तथा च भाष्यं स्वपक्षमनवस्थाप्य स्वदर्शनं परिशोधयेदिति तत्त्वनिर्णीषुतया न पक्षपात इति भावः ॥ ४९ ॥

समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम् ॥ ५७ ॥

तद्विद्यैः सह संवाद इत्यत्र त्रयीबाह्यैः सह संवादः कर्त्तव्य इति भ्रमो माभूदिति तत्त्वज्ञानपरिपालनप्रकरणमारभते । तत्त्वाध्यवसायस्य तत्त्वनिर्णयस्य संरक्षणं परोक्तदूषणास्कन्दनेनाप्रामाण्यशङ्काविघटनं तदर्थं जल्पवितण्डे पूर्व्वमुक्ते इति शेषः ॥ ५० ॥

ताभ्यां विगृह्य कथनं ॥ क ॥

ननु ताभ्यां किङ्कार्य्यमित्यत आह । अयमर्थः त्रयीबाह्यैः तद्दर्शनाभ्यासाहितकुज्ञानैरपरैर्व्वा यदि स्वपक्ष आक्षिप्यते तदा ताभ्यां जल्पवितण्डाभ्यां सावधारणं चैतत् त्रय्यन्तःपातिनामाक्षेपे तु वादजल्पवितण्डाभिर्ययेच्छङ्कयेदिति भावः वस्तुतस्तु मुमुक्षोर्न तादृशैः सह संवादो वीतरागत्वाद्धि शास्त्रपरिपालनमपि तदुद्देश्यं नवा तदुपेक्षयैव शास्त्रं गच्छति किन्तु शास्त्रमभ्यस्येतेति तत्त्वर्मिति ॥ क ॥

समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम् ॥ ५८॥

समाप्तं चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति महामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्यात्मज श्रीविश्वनाथ सिद्धान्तपञ्चाननभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ चतुर्थोऽध्यायः ॥ ४ ॥

नत्वा शङ्करचरणं शरणं दीनस्य दुर्गमे तरणम्।
सम्प्रति निरूपयामः पञ्चममध्यायमतिगहनम्।

अथ जातिनिग्रहस्थानयोरुद्दिष्टयोर्लक्षितयोर्बहुत्वं तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वमित्यनेन सूचितं तत्तच्छिष्यजिज्ञासानुसारिप्रमाणादिपरीक्षयाऽन्तरितं सम्प्रत्यवसरतः प्रपञ्चनीयं तत्र जातिपरीक्षासहितजातिनिग्रहस्थानविशेषलक्षणमध्यायार्थः जातिपरीक्षासहितजातिविशेषलक्षणं प्रथमाह्निकार्थः सप्तदश चात्र प्रकरणानि तत्रादौ सत्प्रतिपक्षदेशनाभासाप्रकरणम् अन्यानि च यथास्थानं वक्ष्यन्ते तत्र च विशेषलक्षणार्थं जातिं विभजते।

अत्र च साधर्म्यादीनां कार्य्यान्तानां द्वन्द्वे तैः समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिजातय इत्यर्थः अत्र च जातेर्विशेष्यत्वात् समाशब्दं मन्यन्ते भाष्यवार्त्तिकादौ समाशब्दः अग्रिमसूत्रेषु तु समशब्दो निर्विवाद एव तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयस्तथापि प्रतिषेधो विशेष्य इति भाष्यादयः वयन्तु तद्विकल्पादिति सूत्रस्थविकल्पस्यैव विशेष्यत्वं विविधः कल्पः प्रकारो विकल्पः तथा चैते साधर्म्यसमादयोजातिविकल्पा एवमग्रिमसूत्रेष्वपि इत्यञ्च जातेर्विशेष्यत्वे साधर्म्यसमेत्यपीति ब्रूमः समीकरणार्थं प्रयोगः समइति वार्त्तिकं यद्यपि नैतावतासमीकरणं तथापि समीकरणोद्देश्यकत्वमस्त्येव अथवा साधर्म्यमेव समं यत्र स साधर्म्यसमः एकत्रव्याप्तेराधिक्येऽपि साधर्म्यं सममेवेति भावः ॥ १ ॥

साधर्म्यवैधर्म्यसमौ लक्षयति। उपसंहारे साध्यस्योपसंहरणे वादिनाकृते तद्धर्म्मस्य साध्यरूपधर्म्मस्य यो विपर्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां यदुपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमावुच्येते तदयमर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं साधर्म्यसमावैधर्म्यमात्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यद्यनित्यघट-साधर्म्यान्नित्याकाशवैधर्म्याद्वाऽनित्यः स्यान्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्यः वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् आ-काशवद्वेति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्य इति अत्र साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं वा गमकतौपयिकमित्यभि-मानात् सत्प्रतिपक्षदेशनाभासे चेमे अनैकान्तिकदेशनाभासेति वार्त्तिके त्वनैकान्तिकपदं योगात्सत्प्रतिपक्षपरं एकान्ततः साध्यसाधकत्वाभा-वात्॥ २॥

अनयोरसदुत्तरत्वे वीजमाह। गोत्वात् गोसिद्धिर्गोर्व्यवहार इति सम्प्रदायः वयन्तु गोत्वाद्गवेतरासमवेतत्वे सति गोसमवेतात्मात्स्नादितः एतेन व्याप्तिपक्षधर्म्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धिर्यया तथैव कृतकत्वादपि व्याप्तिपक्षधर्म्मतासहितादनित्यत्वसिद्धिर्नतु व्याप्तिपक्ष-धर्म्मतारहितात् साधर्म्यमात्रात् तथा सति अदूषकसाधर्म्यात्प्रमेयत्वादित-स्त्वद्वचनमप्यदूषकं स्यादित्ययं विशेषः॥ ३॥

इति सत्प्रतिपक्षदेशनाभासाप्रकरणम्॥ ५८॥

क्रमप्राप्तं जातिषट्कं निरूपयति। उत्कर्षेण सम उत्कर्षसम एवमप-कर्षसमोऽपि वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः वर्ण्यत्वादिना समो वर्ण्यसमादिः अविद्यमानधर्म्मारोप उत्कर्षः विद्यमानधर्म्मापचयोऽपकर्षः वर्ण्यत्वं वर्णनीयत्वं तच्च सन्दिग्धसाध्यकत्वादि तदभावोऽवर्ण्यत्वं विकल्पो-द्वैविध्यं साध्यत्वं पञ्चावयवसाधनीयत्वं साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चानामुत्थानवीजं उभयसाध्यत्वादिति प्रष्टस्य तदयमर्थः साध्यतेऽनेनेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मि-न्नित्यर्थः धर्मविकल्पो धर्म्मस्य वैचित्र्यं तच्च क्वचित्सत्त्वं क्वचिदसत्त्वं प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्योऽविद्यमानधर्म्मारोपः स उत्कर्षसमः व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्य-तरेणाविद्यमानधर्मप्रसञ्जनं उत्कर्षसम इति फलितार्थः यथाशब्दोऽनित्यः कृतकत्वादिति स्थापनायां अनित्यत्वं कृतकत्वं घटे रूपसहचरितमतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दोऽपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाधनाद्विशेषविरुद्धो हेतुस्तद्देशनाभासाचेयम् एवं श्रावणशब्दसाधर्म्यात्कृतकत्वाद्घटोऽपि श्रावणः स्यादविशेषात् वस्तुतस्तु घटे श्रावणत्वापादनेऽर्थान्तरमतउक्तलक्षणे दृष्टान्तपदं साध्यपदञ्च न देयम् अपकर्षसमायान्तु धर्मविकल्पः धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वं ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनं तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्माभावेन हेतुसाध्यान्यतराभाव प्रसञ्जनमपकर्षसमा यथाशब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मरूपवत्त्वव्यावृत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात् आद्येऽसिद्धिदेशना द्वितीये बाधदेशना एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटेऽनित्यत्वं कृतकत्वञ्च व्यावर्त्तेतेति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासाऽपीयं यत्तु वार्त्तिके शब्दो नीरूप इति घटोऽपि नीरूपः स्यादित्यपकर्ष इति तदसत् घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्य्यस्वरसोऽप्येवं यत्तु वैधर्म्यसमाया अत्रैवान्तर्भावः स्यादिति तन्न उपधेयसङ्करेऽप्युपाधेरसङ्करात् वर्ण्यसमायान्तु साध्यः सिद्ध्यभाववान् सन्दिग्धसाध्यकादिर्वा तस्य धर्मः सन्दिग्धसाध्यकादिवृत्तिहेतुस्तस्य विकल्पावृत्त्यात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमा तदयमर्थः पक्षवृत्तिहेतुर्हि गमकः पक्षस्य सन्दिग्धसाध्यकस्तथा च सन्दिग्धसाध्यकवृत्तिर्हेतुस्त्वया दृष्टान्तेऽपि स्वीकार्य्यः तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात्पक्षवदनित्यानिश्चयादसाधारणो हेतुस्तद्देशनाभासा चेयं हेतुः सन्दिग्धसाध्यकवृत्तिर्यदि न दृष्टान्ते सदा गमकहेत्वभावात् साधनविकल्पो दृष्टान्तः स्यादिति भावः अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यके यो धर्मो हेतुस्तस्य वृत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमा दृष्टान्ते हेतोर्यादृशत्वं तादृशो हेतुरेव गमक इत्यभिमानेन एवमापादनं दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे तदागमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तादृशो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्यः तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावादाश्रयासिद्धिः असिद्धिदेशना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भासा चेयं विकल्पसमायान्तु पक्षे दृष्टान्ते च योधर्म्मस्तस्य विकल्पौविरुद्धः कल्पो व्यभिचारित्वम् उपलक्षणं चैतत् अन्यवृत्तिधर्मस्यापि वोध्यं व्यभिचारोऽपि हेतोर्धर्म्मान्तरं प्रति धर्म्मान्तरस्य साध्यं प्रति धर्म्मान्तरस्य धर्म्मान्तरं प्रति वा तथा च कस्यचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनं विकल्पसमा यथा शब्दोऽनित्य कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनैकान्तिकदेशनाभासा चेयं पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं साध्यसमा तत्रायमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वं तथा च पक्षादेरनुमितिविषयत्वात् साध्यवदेतत्प्रयोगसाध्यत्वम् अतः साध्यसमा तथा हि पक्षादेः पूर्वं सिद्धत्वे एतत्प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रया सिद्ध्यादयस्तद्देशनाभासा चेयं सूत्रार्थस्तु उभयसाध्यत्वात् उभयं पक्षदृष्टान्तौ तद्धर्म्मौ हेत्वादिः तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यतापादनमिति लिङ्गोपहितभानमते लिङ्गस्याप्यनुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमान्दृष्टान्तोऽपि साध्य इत्याशयः ॥ ४ ॥

एतासामसदुत्तरत्वे वीजमाह । किञ्चित्साधर्म्यात् साधर्म्यविशेषात् व्याप्तिसहितात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्यादेतद्विपरीतात् व्याप्तिनिरपेक्षात् साधर्म्यमात्रात् भवता कृतः प्रतिषेधो न सम्भवतीत्यर्थः अन्यथा प्रमेयत्वरूपासाधकसाधर्म्यात् तद्दूषणमप्यसम्यक् स्यादिति भावः तथा चायं क्रमः अनित्यत्वव्याप्यात् कृतकत्वात् शब्देऽनित्यत्वमुपसंहरामो नतु कृतकत्वं रूपस्यापि व्याप्यं येन ततो रूपमप्यापादनीयं शब्दे एवं अनित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात् एवं वर्ण्यसमेऽपि किञ्चित्साधर्म्यात् व्याप्यतावच्छेदकावच्छिन्नाद्धेतोः साध्यसिद्धिः तादृशहेतुमत्त्वञ्च दृष्टान्ततात्प्रयोजकं न तु पक्षे यावद्विशेषणावच्छिन्नो हेतुस्तावदवच्छिन्नहेतुमत्त्वं अन्यथा त्वयाऽपि दूषणीयो दृष्टान्तो कर्त्तव्यः सोऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात्साध्यसिद्धिर्न तु दृष्टान्तवृत्तियावद्धर्मावच्छिन्नस्य पक्षे सत्त्वम् एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिस्तद्वैधर्म्यात् यत्किञ्चिद्व्यभिचारात् अतः प्रतिषेधो न सम्भवति नहि यत्किञ्चिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यासाधकत्वमतिप्रसङ्गात् एवं साध्यसमेऽपि व्याप्याद्धेतोः सिद्धे पक्षे साध्यसिद्धिर्न तु पक्षदृष्टान्तादयोऽप्यनेन साध्यन्ते तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात् त्वदीयदूषणमपि विलीयेत ॥ ५ ॥

वर्ण्यावर्ण्यसाध्यसमास्तु समाध्यन्तरमप्याह । दृष्टान्तोपपत्तिर्दृष्टान्ततोपपत्तिः साध्यातिदेशात् दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते नत्वशेषो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः पक्षादेरपि साध्यसमत्वमेतेन प्रत्युक्तं दृष्टोऽन्तो दृष्टान्तः पक्षः तस्माद्वह्निमानित्यतः पक्षोत्कीर्त्तनात्तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः ॥ ६ ॥

समाप्तं जातिषट्कप्रकरणम् ॥ ६ ॥

क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति । हेतोरिति साधकत्वमिति शेषः प्राप्तिपक्षे दोषमाह प्राप्त्याऽविशिष्टत्वादिति द्वयोरपि प्राप्तत्वाविशेषात् किङ्कस्य साधकं अप्राप्तिपक्षे दोषमाह अप्राप्येति अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वञ्चात्र कारकज्ञापकसाधारणम् एवञ्च कारकज्ञापकलक्षणं साधनं कार्य्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं सत्साधकं चेत्तदा स्वत्वविशेषात्र कार्य्यकारणभावः तत्सम्बन्धस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभावः प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन लवणोदकयोरिवाभेदादित्याशय इत्यन्ये तथा च प्राप्त्याऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा यदि चाप्राप्तं लिङ्गं साध्यबुद्धिं जनयति साध्याभावबुद्धिमेव किन्तेन न जनयेत् अप्राप्तत्वाविशेषात् तथा चाप्राप्त्या साधकत्वादनिष्टापादनमप्राप्तिसमा प्रतिकूलतर्कदेशनाभासे चेमे ॥ ७ ॥

अनयोरसदुत्तरत्वे वीजमाह । दण्डादितो घटादिनिष्पत्तेर्दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वादभिचारात् श्येनादितः शत्रुपीड़ने च व्यभिचारान्न त्वदुक्तः प्रतिषेधः सम्भवति न हि कारणं दण्डादि प्रागेव घटा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिना सम्बद्धमपि तु सदादिना श्येनादिरप्युद्देश्यतया पीडां जनयति अन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे त्वदुक्तो हेतुरप्यसाधकं स्यादिति ॥ ८ ॥ प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम् ॥ ६१ ॥

क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमे जाती लक्षयति। दृष्टान्तस्य कारणं प्रमाणं तदनपदेशेऽनभिधानम् अभिधानं चानतिप्रयोजनकं तथा च दृष्टान्तस्य साध्यवत्त्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यं तदुक्तमाचार्यैरनवस्थाभासप्रसङ्गः प्रसङ्गसम इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाकृतिगणेष्वन्तर्भूतमिति विशेषः अनवस्थादेशनाभासा चेयं प्रतिदृष्टान्तसमः प्रत्येतव्यः प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसमः एतच्च सावधारणं तेन प्रतिदृष्टान्तमात्रबलेन प्रत्यवस्थानार्थः तेन साधर्म्यसमाव्युदासः यदि घटदृष्टान्तबलेनानित्यः शब्दः (तदा~~काशदृष्टान्तबलेनानित्यः शब्दः~~) तदाकाशदृष्टान्तबलेन नित्य एव स्यात् नित्यः किं न स्यादिति बाधः प्रतिरोधो वापादनीयः हेत्वनङ्गं दृष्टान्तमात्रबलादेव साध्यसिद्धिरित्यभिमानः बाधप्रतिरोधान्यतरदेशनाभासा चेयम् ॥ ९ ॥

प्रसङ्गसमे प्रत्युत्तरमाह। दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्ताद्दृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रदीपप्रत्ययार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत त्वदीयसाधनमपि व्याहन्येत ॥ १० ॥

प्रतिदृष्टान्तसमे प्रत्युत्तरमाह। अत्रायमुत्तरक्रमः प्रतिदृष्टान्तस्त्वया किमर्थमुपादीयते मदीयहेतोर्बाधार्थं सत्प्रतिपक्षितत्वार्थं वा नाद्यः यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वे मदीयो दृष्टान्तो नाहेतुः नासाधकस्तथा च तुल्यबलत्वान्न बाधः न वा द्वितीयोऽपि यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुर्दृष्टान्तः मदीयो दृष्टान्तस्तु सहेतुकत्वादधिकबलः वस्तुतो हेतुं विना दृष्टान्तमात्रेण न सत्प्रतिपक्षसम्भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वना तदभावव्याप्यवत्ताज्ञानाभावात् हेतूपादाने तु सदुत्तरत्वमेवेति भावः इति॥ ११॥ इति प्रसङ्गसमप्रतिदृष्टान्तसमप्रकरणम्॥६२॥

क्रमप्राप्तमनुत्पत्तिसमं लक्षयति। प्रागुत्पत्तेरिति साधनाङ्गस्येति शेषः कारणाभावात् हेत्वभावात् तथा च साधनाङ्गपक्षहेतुदृष्टान्तानामुत्पत्तेः प्राक् हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः यथा घटो रूपवान् गन्धात् पटवदित्युक्ते घटोत्पत्तेर्गन्धोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः पटे च गन्धोत्पत्तेः पूर्वं हेत्वभावेन दृष्टान्तासिद्धिः एवं आद्यक्षणे रूपाभावाद्बाधश्च अनुत्पत्त्या प्रत्यवस्थानस्य तत्रापि सत्त्वात् उत्पत्तेः पूर्वं हेत्वाद्यभावेन प्रत्यवस्थानस्यैव लक्षणत्वात् जातित्वे सतीति च विशेषणीयं तेनोत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यत्र बाधेन प्रत्यवस्थाने नातिव्याप्तिः असिद्ध्यादिदेशनाभासा चेयम्॥ १२॥

अत्रोत्तरमाह। उत्पन्नस्य तथा भावात् घटाद्यात्मकत्वात् तत्र कारणस्य हेतोरुपपत्तेः सत्त्वात् कथं कारणप्रतिषेधः अयमाशयः पक्षे हेत्वभावोऽसिद्धिः नत्वनुत्पन्ने हेत्वभावः सम्भवति अधिकरणाभावात् न हि हेत्वभावमात्रासिद्धिः त्वदीयहेतोरपि क्वचिदभावसत्त्वादेतेन दृष्टान्तासिद्धिर्व्याख्याता यदा कदाचिद्धेतुसत्त्वेनैव दृष्टान्तत्वोपपत्तेः एवं हेत्वादीनां यदा कदाचित्पक्षे सत्त्वादेव हेत्वादिभावो न तु सार्वत्रिकी तदपेक्षेति॥१३

इत्यनुत्पत्तिसमप्रकरणम्॥ ६३॥

क्रमप्राप्तं संशयसमं लक्षयति। नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणं तेन समानधर्मदर्शनादियत्किञ्चित्संशयकारणबलात् संशयेन प्रत्यवस्थानं संशयसमः अधिकन्तूदाहरणपरं तथा हि शब्दोऽनित्यः कार्य्यत्वाद्घटवदित्युक्ते सामान्ये गोत्वादौ दृष्टान्ते घटे ऐन्द्रियकत्वं तुल्यं तथा कार्य्यत्वान्निर्णायकादनित्यत्वं निर्णीयते तथा ऐन्द्रियकत्वात् संशयकारणादनित्यत्वं सन्दिह्यतां एवं शब्दत्वाद्यसाधर्म्यदर्शनादपि संशयो बोध्यः तथा च हेतुज्ञानेऽप्रामाण्यशङ्काधानद्वारा साध्यसंशयात् सत्प्रतिपक्षदेशनाभासेयम्॥ १४॥

अत्रोत्तरम्। साधर्म्यात्साधर्म्यदर्शनात् संशय आपाद्यमानेऽपि न संशयो वैधर्म्याद्वैधर्म्यदर्शनात् यदि च कार्य्यत्वरूपविशेषदर्शनेऽपि संशयस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः न च तथाऽभ्युपगन्तुं शक्यमिन्त्याह नित्यत्वेति सामान्यस्य समानधर्म्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात्तथा सति त्वदीयहेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात् तत्रापि साधारणधर्म्मप्रमेयत्वादिना संशय एव स्यादिति केचित् ॥ १५ ॥ इति संशयसमप्रकरणम् ॥ ६५ ॥

क्रमप्राप्तं प्रकरणसमं लक्षयति । उभयसाधर्म्यात् अन्वयसहचाराद्व्यतिरेकसहचाराद्वा प्रक्रियाप्रकर्षेण क्रियासाधनं विपरीतसाधनमिति फलितार्थः तत्सिद्धेस्तस्य पूर्व्वमेव सिद्धेः तथा बाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधदेशनाभासा चेयम् ॥१६॥

अत्रोत्तरमाह । प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् अयमाशयः श्रावणत्वेन पूर्व्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्व्वं साधितस्य बलवत्त्वाभावात् कदाचित्कृतकत्वेनानित्यत्वस्यापि पूर्व्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात् ॥१७॥

इति प्रकरणसमप्रकरणम् ॥ ६५ ॥

क्रमप्राप्तमहेतुसमं लक्षयति । त्रैकाल्यं कार्य्यकालतत्पूर्व्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेः अयमर्थः दण्डादिकं घटादेर्न पूर्व्ववर्त्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात् अत एव न घटाद्युत्तरकालवर्त्तितयाऽपि नवा समानकालवर्त्तितया तुल्यकालवर्त्तिनोः सव्येतरविषाणयोरिवाविनिगमनापत्तेः तथा च कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थानमहेतुसमः कारणमात्रखण्डनेन ज्ञप्तिहेतोरपि खण्डनान्न तदसंग्रहः प्रतिकूलतर्कदेशनाभासा चेयम् ॥ १८ ॥

अत्रोत्तरमाह । त्रैकाल्यासिद्धिस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न कुतः हेतुतः साध्यसिद्धेः त्वयाऽप्यभ्युपगमात् ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्व्ववर्त्तितामात्रेणैव हेतुतासम्भवात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह। हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः॥ २०॥

इति अहेतुसमप्रकरणम्॥ ६६॥

क्रमप्राप्तमर्थापत्तिसमं लक्षयति। अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापद्यतेऽन्यत् नित्यं तथा च दृष्टान्तासिद्धिः विरोधश्च कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यस्माद्धेतोर्बाधः सत्प्रतिपक्षो वा अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति एवं बाधः विशेषविधेः शेष निषेधफलकत्वमित्यभिमानः सर्व्वदोषदेशनाभासा चेयम्॥ २१॥

अत्रोत्तरम्। किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापद्यते उक्तोपपादकं वा आद्ये त्वत्पक्षहानिरप्यापाद्यतां त्वयानुक्तत्वात् अन्त्ये अस्या अर्थापत्तेरनैकान्तिकत्वम् एकान्तिकत्वम् एकपक्षसाधकत्वं वक्तं तन्नास्ति न हि अनित्य इत्यस्योपपादकं नित्यत्वमिति न हि विशेषविधिमात्रं शेषनिषेधफलकमपि तु सति तात्पर्य्ये क्वचित् न हि नीलोघट इत्युक्ते सर्व्वमन्यदनीलमिति कश्चित्प्रतिपद्यते॥२२॥

इति अर्थापत्तिसमप्रकरणम्॥ ६७॥

अविशेषसमं लक्षयति। एकस्य धर्म्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेषः उच्यते तदा सर्व्वेषामविशेषप्रसङ्गः कुतः सद्भावोपपत्तेः सतः सन्मात्रस्य ये भावाधर्म्माः सत्त्वप्रमेयत्वादयस्तेषामुपपत्तेः सत्त्वात् तथा च सर्व्वेषामभेदे पक्षाद्यविभागः सर्व्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः सर्व्वेषामनित्यत्वे जात्यादिविलय इत्यादि तथा च सन्मात्रवृत्तिधर्म्मेणाविशेषापादनमविशेषसमेति फलितम् अत्र चाविशेषसम इति लक्ष्यनिर्देशः सद्भावोपपत्तेः सर्व्वाविशेषप्रसङ्गादिति लक्षणं शेषं व्युत्पादकं प्रतिकूलतर्कदेशनाभासा चेयम्॥२३॥

अत्रोत्तरमाह। तद्धर्म्मस्तस्य हेतोर्धर्म्मोव्याप्त्यादिस्तस्य क्वचित् स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तकत्वादौ उपपत्तेः सत्त्वात् क्वचित् सत्त्वादौ अनुपपत्तेः अभावात् त्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः ॥ २४ ॥

इति अविशेषसमप्रकरणम् ॥ ६८ ॥

उपपत्तिसमं लक्षयति । उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्धर्म्मेण परपक्षदृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानम् उपपत्तिसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षोऽपि सप्रमाणकः त्वत्पक्षमत्पक्षान्यतरत्वात् त्वत्पक्षवत् तथा च बाधः प्रतिरोधो वा तद्दूषणाभासा चेयम् ॥ २५ ॥

अत्रोत्तरमाह । अयं त्वदुक्तप्रतिषेधो न सम्भवति कुतः मत्पक्षे उपपत्तिकारणस्य मत्पक्षसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् त्वयाहि मत्पक्षस्य दृष्टान्तीकरणेन सप्रमाणकत्वमनुज्ञातमतः कथं तत्प्रतिषेधः शक्यते कर्त्तुम् अनुज्ञातस्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते ॥ २६ ॥

इति उपपत्तिसमप्रकरणम् ॥ ६९ ॥

उपलब्धिसमं लक्षयति । वादिना निर्दिष्टस्य कारणस्य साधनस्याभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमुपलब्धिसमइत्यर्थः तथाहि पर्व्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते न च तत्सम्भवति धूमं विना आलोकादितोऽपि वह्निसिद्धेः तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात् न वा पर्वत एव वह्निमानेवेत्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वादन्यथादृष्टान्तासिद्धिः स्यात् एवं वह्निशून्यपर्व्वतस्यापि सत्त्वाद्बाध इत्यादि तद्दूषणाभासा चेयम् ॥ २७ ॥

अत्रोत्तरमाह । कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्तः प्रतिषेधो न सम्भवति अयमाशयः नहिवयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे अपितु इन्द्रिग्राह्यस्य वह्नेः सिद्ध्यर्थं अन्यथा त्वदुक्तस्यसाधकतासाधनस्यापि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात् ॥ २८ ॥ इति उपलब्धिप्रकरणम् ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुपलब्धिसमं लक्षयति । यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाप्यनुपलब्धिसमजातिरेवमिति तत्रानुक्तेरत्र क्रमप्राप्ताऽभिधीयते तत्रायं क्रमः नैयायिकैस्तावच्छब्दानित्यत्वमेव साध्यते यदि शब्दो नित्यः स्यादुच्चारणात् प्राक्कुतोनोपलभ्यते न हि घटाद्यावरण कुड्यादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति तत्रैवं जातिवादी प्रत्यवतिष्ठते यद्यावरणानुपलब्धेरावरण भावः सिध्यति तदा चावरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत् तथाचावरणानुपलब्धिप्रमाणक आवरणाभावो न स्यादपित्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वेनोक्तं बाधकं युक्तं नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात् कथमेवमिति चेत् इत्थं अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यं तथा च तथैवानुपलब्ध्यानुपलम्भत्वसम्भवात्तदभावसिद्धेः स्वात्मन्यनुपलब्धिरूपत्वाभावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणेऽनवस्था स्पष्टैव इत्यत्रैवंरूपेण प्रत्यवस्थानमनुपलब्धिसम इत्यर्थः प्रतिकूलतर्कदेशनाभासा चेयम् ॥ २९ ॥

अत्रोत्तरमाह । अनुपलब्धिः आत्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धिरूपेति चेन्नत्वेन स्वविषयिण्यनुपलब्धिरिति चेन्नेदं प्रसक्तं अनुपलब्धेरनुपलम्भात्मकत्वात् उपलम्भाभावात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत् कतमोविरोधः नहि घटः स्वविषयो न भवतीति नायं घटः आवरणाभावः कथमनुपलब्धिविषय इति चेत् क एवमाह किन्त्वनुपलब्धिसहकृतेन्द्रियग्राह्यत्वादनुपलब्धिग्राह्य इत्युपचर्य्यते अतस्तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः अन्यथा त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति ॥ ३० ॥

नन्वनुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येदत आह । अध्यात्मं आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा सम्वेदनात् घटं साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमीत्येवं ज्ञानविशेषतदभावानां मनसैव ग्रहणादिति भावः ॥ ३१ ॥

इति अनुपलब्धिसम प्रकरणम् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनित्यसमं लक्षयति । यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात्तेन सह तुल्यधर्म्मतोपपद्यत इत्यतः शब्देऽनित्यत्वं साध्यते तदा सर्व्वस्यैवानित्यत्वं स्यात् सत्त्वादिरूपसाधर्म्यसम्भवात् नचेदमर्थान्तरग्रस्तमिति वाच्यं सर्व्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्य्यात् परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्व्वस्य साध्यवत्त्वापादनमनित्यसमा साध्यपदादविशेषसमाऽतोव्यवच्छेदस्तत्र सर्व्वाविशेष एवापाद्यते नतु सर्व्वस्य साध्यवत्त्वं यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्द्देशस्तथा च अन्वर्थलब्धमेव लक्षणमिति तन्न वह्निमान् धूमादित्यादौ महानससाधर्म्यात् सत्त्वात्सर्व्वस्य वह्निमत्त्वं स्यादित्यस्य जात्यन्तरत्वापत्तेः आचर्य्यास्तु साधर्म्यं वैधर्म्यस्याप्युपलक्षकं यथाकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्व्वमेवानित्यं स्यादित्यञ्च लक्षणे यत्किञ्चिद्धर्म्मेणेत्येव वाच्यमित्याहुः अत्र च वैधर्म्यस्य विपक्षावृत्तित्वान्न सर्वस्य साध्यवत्त्वापादनं किन्त्वात्मादीनामप्यनित्यत्वं स्यादिति तत्र चार्थान्तरमित्यवधेयं प्रतिकूलतर्कदेशनाभासा चेयम् ॥ ३२ ॥

अत्रोत्तरमाह । यदि यत्किञ्चित्साधर्म्यात्सर्व्वस्य साध्यवत्त्वमापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्मेण प्रवृत्तत्वात् त्वया ह्येवं साध्यते कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात्सत्त्वादिवत् अत्र च त्वदीयहेतुस्त्वत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्वेन च सह साधर्म्य रूपस्तथाचायमपि न साधकः स्यात् ॥ ३३ ॥

यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं तदा कृतकत्वे तदस्ति नतु सत्त्वइति विशेष इत्याह । साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य तस्य हेतुत्वात्साधकत्वात् तस्य हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् मदीयहेतौ सत्त्वात् सत्त्वादिनाऽविशेष इति यदुक्तं तन्न भवति ॥ ३४ ॥

इत्यनित्यसमप्रकरणम् ॥ ७२ ॥

नित्यसमं लक्षयति । अनित्यस्य भावः अनित्यत्वं तस्य नित्यं सर्व्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा अयमाशयः अनित्यस्य नित्यमस्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न तस्यापि नित्यत्वापत्तिः नहि दण्डाभावदशायां दण्डीत्युच्यते अतोऽनित्यत्वं नित्यमेवस्वीकार इत्यभ्युपगन्तव्यं तथा च शब्दस्यापि नित्यत्वापत्तिः तेन बाधः सत्प्रतिपक्षो वा तद्देशनाभासा चेयं एवमनित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्य्यात् नहि रक्तं महारजनं परस्य नीलतां सम्पादयति अथाऽनित्यं तदा तदभावदशायां अनित्यत्वं न स्यादित्यादिक मूह्यं एतदनुसारेण लक्षणमपि कार्य्यमित्याचार्य्याः वयन्तु अनित्यस्य भावो धर्म्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात् यथा क्षितिः सकर्तृकेत्यत्र अनित्यक्षितेर्धर्म्मः सकर्तृकत्वं त्वया क्षितौ नित्यमुपेयते नवा नचेत् तदा साध्याभावादंशतोबाधः अथ क्षितौ नित्यमेव सकर्तृकत्वं विरुद्धं तद्देशनाभासा चेय मिति ब्रूमः ॥ ३५ ॥

अत्रोत्तरमाह। प्रतिषेध्ये सत्पक्षे शब्दे सर्व्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे अनित्यत्वमुपपद्यते नहि सम्भवति अनित्यत्वं नित्यमस्ति अथ च तन्नित्यमिति व्याघातात् नच नित्यमिति सर्वकालमित्यर्थः तथा च शब्दस्यानित्यत्वे कथं सर्व्वकालमनित्यत्वसम्बन्ध इति वाच्यं सर्व्वकालमित्यस्य यावत्सत्त्वमित्यर्थात् अतः त्वत्कृतः प्रतिषेधो न सम्भवति मतान्तरे तु अनित्येऽनित्यत्वोपपन्ने हेतोरूपायः प्रतिषेधः स्ततः स न सम्भवतीत्यर्थः ॥ ३६ ॥

इति नित्यसमप्रकरणम् ॥ ७३ ॥

कार्य्यसमं लक्षयति। प्रयत्नकार्य्यस्य प्रयत्नसम्पादनीयस्यानेकत्वात् अनेकविषयत्वात् अयमर्थः शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्य्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कीलकादावपि दृष्टन्तत्र द्वितीयं न तज्जन्यत्वसाधकं आद्ये तु असिद्धं तथा च सामान्यत उक्ते हेतोरनभिमतविशेष निराकरणेन प्रत्यवस्थानं कार्य्यसमा असिद्धदेशनाभासा चेयं अथवा प्रयत्नकार्य्याणां प्रयत्नकर्त्तव्यानां कर्त्तव्यप्रयत्नानामिति यावत् तादृशानां अनेकविधत्वादुक्तान्यस्य व्याघातकमुत्तरं कार्य्यसमा तथा चास्या आकृतिगणत्वात्पट्सूत्रानुदर्शितानां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽपि परिग्रहः यथा त्वत्पत्ते किञ्चिद्दूषणं भविष्यतीति शङ्काऽपि शाठीसमा कार्य्यकारणभावस्योपकारनियतत्वे ऽनवस्थेत्यनुपकारसमा इत्यादि ॥ ३७॥

अत्रोत्तरम्। शब्दस्य कार्य्यान्यत्वेऽकार्य्यत्वे प्रयत्नस्य वक्तृप्रयत्नस्य अहेतुत्वं अकारणत्वं इदञ्च तदा स्यात् यद्यनुपलब्धिकारणमावरणादिकमुपपद्यते न च तच्छब्देऽस्तीत्यर्थः आकृतिगणपत्ते तु कार्य्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वं असाधकतासाधकत्वाभावः उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् तद्वाक्यस्य स्वव्याघातकत्वादित्यर्थः ॥२८॥

इति कार्य्यसमप्रकरणम् ॥ ७४ ॥

कार्य्यसमप्रकरणस्य एवं तावज्जातिवादिनं प्रति सर्वत्र सदुत्तरेणैवोद्धारः कार्य्य इत्यभिहितं तदेवाभिमतं तन्निर्णयविजयफलकत्वं कथायां सम्पद्यते असदुत्तरोद्भावने तु बध्ययोः संप्रयोगवन्नाभिमतफलसिद्धिरिति व्युत्पादयितुं कथाभासरूपां षट्पत्तीं शिष्यशिक्षायै प्रदर्शयति। प्रयत्नानन्तरीयकत्वं न शब्दोनित्यत्वं साधयति अनैकान्तिकत्वादिति योदोषः स त्वत्पत्तेऽपि तुल्यः प्रयत्नाभिव्यङ्ग्यत्वस्याप्यसाधकत्वात् अथवा अनैकान्तिकत्वादसाधक इति त्वया प्रतिषेधः कृतः तत्राप्ययं दोषः समानः नह्यनैकान्तिकत्वं सर्व्वस्यैवासाधकत्वं साधयति स्वस्यैवासाधकत्वासाधनत्वात् ॥ ३९ ॥

सेयं मतानुज्ञा किं कार्य्यसमायामेव नेत्याह। एवंविधमसदुत्तरं सर्व्वत्रैव जातौ सम्भवतीत्यर्थः यथा शब्दोऽनित्यः शब्दत्वादित्यत्र नित्याकाशसाधर्म्यादमूर्त्तत्वाच्चित्यः स्यादिति साधर्म्यसमायां आकाशधर्म्यानित्यत्वे आकाशवच्छब्दे परमहत्त्वं स्यादित्युत्कर्षसमा एव मन्यत्राप्यूह्यं यद्यप्ययमतिदेशः षट्पत्त्यनन्तरमेव कर्त्तुमुचितस्तथापि त्रिपत्त्यादिकमपि सूचयितुमत्रैवोक्तः उभयाभ्युक्तत्वबोधफला हि षट्पत्ती त्रिपत्त्यादावपि तत्फलकत्वं तुल्यमिति भावः तर्हि त्रिपत्त्यामेव मध्यस्थेन पर्य्यनुयोज्योपेक्षणस्योद्भावने कथासमाप्तौ कुतः षट्पत्तीति चेत् पुंसां स्फुरणवैचित्त्र्येण तत्सम्भवात् ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुल्यत्वविरोधोविप्रतिषेधः तथा च प्रतिषेधस्य यो विप्रतिषेधस्तत्र प्रतिषेधदोषवद्दोष इत्यर्थः तथाहि शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति स्थापनावादिनः प्रथमः पक्षः प्रयत्नकार्य्यानेकत्वात् कार्य्यसम इति प्रतिवादिनो द्वितीयः पक्षः प्रतिषेधाप्रतिषेधेऽप्यनैकान्तिकत्वं तुल्यमिति वादिनस्तृतीयः पक्षः विप्रतिषेधस्तत्रापि तथैवानैकान्तिकत्वं तत्समानदोषोद्भावनं वा चतुर्थः पक्षः॥ ४१॥

पञ्चमं पक्षमाह प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तत्र मदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे मदीयपक्षे तृतीये समानं दोषं प्रसञ्जयतस्तत्र मतानुज्ञानामकं निग्रहस्थानमित्यर्थः ॥ ४२॥

षष्ठं पक्षमाह। स्वपक्षः स्थापनारूपः प्रथमः पक्षः तं लक्षीकृत्य प्रवृत्तोद्वितीयपक्षः स्वपक्षलक्षणस्तस्यापेक्षा समादरः तत्र दोषानुद्धावमजिति फलितार्थः तथा च मदीयपक्षे दोषमनुद्धाव्यैव स्वपक्षोपपादनं कर्त्तुं यस्त्वया हेतुर्निर्दिष्टः प्रतिषेधेऽपि समानोदोष इति तावता तत्रापि मतानुज्ञा प्रसक्तैवेत्यर्थः तदेवं षट्पक्ष्यामुभयोरप्ययुक्तवादित्वादर्थासिद्धिः यदि तु स्थापनावादी जातिवादिनं सदुत्तरेणैव दूषयति तदा षट्पक्षी न प्रवर्त्तत इति॥ ४३॥ इति कथाभासप्रकरणम्॥ ७५॥

इति श्रीविश्वनाथभट्टाचार्य्यकृतायां न्यायसूत्रवृत्तौ पञ्चमाध्यायस्याद्यमाह्निकम्॥ १॥

अथेदानीं निग्रहस्थानविशेषलक्षणाभिधानं तदेव चाह्निकार्थः सन्ति चेह प्रकरणानि तत्र चाद्यं प्रतिज्ञाहेत्वन्यतराश्रित निग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम् अन्यानि च यथास्थानं वक्ष्यन्ते तत्र विशेषलक्षणार्थमादौ विभजते। अत्र चस्त्वर्थे तेन एतानि तु निग्रहस्थानानि न पुनरपस्मारादिनाऽननुभाषणादिकं न वा झटिति स्मरणेन तिरोहिता च वाणीत्यर्थोलभ्यत इति प्राञ्चः नव्यास्तु चकारोऽनुक्तसमुच्चये तेन दृष्टान्ते साधनवैकल्यादीनां परिग्रहः॥ १॥

तत्र क्रमेण प्रतिज्ञाहान्यादीनां लक्षणेषु वक्तव्येषु प्रथमोद्दिष्टां प्रतिज्ञाहानिं लक्षयति। प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वः स्वीयः दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः तथा च स्वपक्षे परपक्षधर्म्मा-भ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलि-तार्थः सिद्धान्तस्तु स्वयं विशिष्य नाभिधीयत इति नापसिद्धान्तसाङ्कर्य्यं सेयं पक्षहेतुदृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा भवति यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युच्चरिते अस्तु तर्हि घटएव पक्ष इति एवं तत्रैव ऐन्द्रियकत्वादिति हेतोरनैकान्तिकत्वमिति प्रत्युक्ते अस्तु कृतकत्वादिति हेतुरिति एवं पर्व्वतो वह्निमान्धूमादयोगोल-कवदित्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते अस्तु तर्हि महानसवदिति एवं अत्रैव सिद्धसाधने च प्रत्युक्ते अस्तु तर्हि इन्धनवानिति अन्यहानिस्तु विशेषणहान्यादिः यथा तत्रैव नीलधूमादित्युक्तेऽसमर्थविशेषणत्वेन प्र-त्युक्ते अस्तु तर्हि धूमादिति हेतुरित्यादि ॥ २ ॥

प्रतिज्ञान्तरं लक्षयति । प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते त दूषणोद्दि-धीर्षया धर्मस्य धर्म्मान्तरस्य विशिष्टः कल्पोविकल्पः तस्माद्विशेषणान्तर विशिष्टतया प्रतिज्ञातार्थस्य कथनमिति फलितार्थः प्रतिषेध इत्यनेन झ-टिति स्फुरणे विलम्बेनापि स्वयं दूषणं विभाव्य विशेषणे न दोषइत्युक्तं प्रतिज्ञातार्थस्येत्युपलक्षणं हेत्वतिरिक्तार्थस्येति तत्त्वं तेन उदाहरणा-न्तरमुपनयान्तरञ्च प्रतिज्ञान्तरत्वेन संगृहीतं भवति इदञ्च पक्षसाध्य-विशेषणभेदात् प्रत्येकं द्विविधं यथा शब्दोऽनित्य इत्युक्ते ध्वनौ बाधेन परेण प्रत्युक्ते वर्णात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरं न चेदमर्थान्तरं प्रकृतोप्र-योगात् नचेयं प्रतिज्ञाहानिः पूर्व्वोक्तस्यापरित्यागात् एवं पर्व्वतोवह्नि-मान् सुरभिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेन च परेण प्रत्युक्ते कृष्णागुरुप्रभववह्निमानित्यत्र एवं तादृशवह्नौ साध्ये यः सुरभिमलिन-धूमवान् स वह्निमानित्युदाहरणे न्यूनत्वेन प्रत्युक्ते स तादृशवह्निमानि-त्यत्र एवमन्यदप्यूह्यम् ॥ ३ ॥

प्रतिज्ञाविरोधं लक्षयति । अत्र च प्रतिज्ञाहेतुपदे कथाकालीनवा-क्यपरे तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यद्यपि काञ्चनमयः पर्वतोवह्निमान् पर्वतः काञ्चनमयवह्निमान् ह्रदोवह्निमान् ह्रदत्वात् पर्व्वतोवह्निम न् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाङ्कर्य्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाप्युपधेयसङ्करेऽप्युपाधेरसाङ्कर्याच्च दोषः न चावङ्कीर्णस्वभावः पर्वतोवह्निमान् धूमात् योयो धूमवान् स निरग्निरित्युदाहरणे निरग्निश्चायमित्युपनये च तल्लक्षत्वात् एवं निगमनेऽपि बोध्यम् ॥ ४७ ॥

प्रतिज्ञासन्न्यासं लक्षयति। पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलापइत्यर्थः यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ॥ ५ ॥

हेत्वन्तरं लक्षयति। अत्र च हेताविव्यनेन हेत्ववयवांशो न विवक्षितोऽपि तु साधकांशः स च हेत्ववयस्य उदाहरणादिस्थोवा अविशेषोक्त इति पूर्वोक्तइत्यर्थं विशेषमिच्छत इति साभिप्रायं तेन परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ विशेषणान्तरप्रक्षेपोऽन्यहेतुकरणं वा द्वयमपि हेत्वन्तरं तथा च परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्ट वचनं हेत्वन्तरं हेतौ विशेषणदानएव हेत्वन्तरमिति प्राञ्चः पूर्वोक्तत्वं हेत्ववयवे उदाहरणादौ वा यथा शब्दोऽनित्यः वाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्येऽनैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणं एवं विशिष्टहेतुमुक्ता यद्वाह्येन्द्रियप्रत्यक्षं तदनित्यमित्युदारणे न्यूनत्वेन प्रत्युक्ते विशिष्टोक्तौ एवमुपनयविशेषणेऽपि ॥ ६ ॥ समाप्तं प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहपञ्चकाविशेषलक्षणप्रकरणम् ॥ ७६ ॥

अर्थान्तरं लक्षयति। प्रकृता प्रकृतोपयुक्तात् ल्यब्लोपे पञ्चमी तेन प्रकृतोपयुक्त मर्थमुपेक्ष्यासम्बद्धार्थाभिधानं अर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः यथा शब्दोऽनित्यः कृतकत्वादित्युक्त्वा शब्दोगुणः सच आकाशस्येत्यादि ॥ ७ ॥

निरर्थकं लक्षयति। वर्णानां क्रमेण निर्देशोजवगतेत्यादिप्रयोगस्तत्तुल्योनिर्देशोनिरर्थकं निग्रहस्थानं अवाचकपदप्रयोग इति फलितार्थः वाचकत्वंशक्त्या निरूढलक्षणया शास्त्रपरिभाषया वा बोध्यं समयवन्व्यतिरेकेणेति विशेषणीयं तेन यत्नापभ्रंशेन विचारः कर्त्तव्य इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समयसबन्धस्तत्रापभ्रंशे न दोषः झटिति सम्बरणे तु न दोषइत्युक्तप्रायं अस्य सम्भवः प्रमादादित्यवधेयम् ॥ ८ ॥

अविज्ञातार्थं लक्षयति । त्रिरभिहितं वादिनेति शेषः त्रिरभिधानं चान-वधानादिनाऽबोधनिरासाय परिषत्प्रतिवाद्यन्यतरेण विज्ञाते तु नावि-ज्ञातार्थमिति भावः तथा च अवहिताविकलव्युत्पन्नपरिषत्प्रतिवादि-बोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगोऽविज्ञातार्थमिति वाचकेत्य-नेन निरर्थकापार्थकव्युदासः अत्र च पराज्ञानापादनेन मम जयो भ-विष्यतीति भ्रमादुक्तिसम्भवः न च यथाकथञ्चित्परो जेतव्यइत्यज्ञानापादनं न्याय्यमेवेति वाच्यं तथासति भङ्गकाले परमदुर्बोधयत्किञ्चिदभिधानेनैव सर्वत्र जयसम्भवात् एतस्य त्रेधासम्भवः असाधारणतन्त्रमात्र प्रसिद्धं यथा पञ्चस्कन्धादयोबौद्धानान्तत्र रूपादयः पञ्चेन्द्रियाणि च रूपस्कन्धः सवि-कल्पकं संज्ञास्कन्धः रागद्वेषाभिनिवेशाः संस्कारस्कन्धः सुखदुःखे वेदना-स्कन्धः निर्विकल्पकं ज्ञानस्कन्धः द्वितीयमति प्रसक्तयोगमनपेक्षितरूढिकं यथाकश्यपतनयधृतिहेतुरयं त्रिनयनसमानमानधेयवान् तत्केतुमत्त्वा-दित्यादि तृतीयं श्लिष्टं यथा श्वेतो धावतीत्यादि एवं अतिद्रुतोच्चरितादि-कमपीति भाष्यं अत्र नाद्यस्य सम्भव.उभय तन्त्राभिज्ञमध्यस्थे सति उभय-तन्त्राभिज्ञयोरेव विचारसम्भवादिति चेत् सत्यं तथापि यत्र नैयायिक-मीमांसकयोर्विचारेऽन्यतरो बौद्धतन्त्रादिपरिभाषया वदति तत्र निग्रह इत्याशयः तत्रापि चेत् यया कयाचित् परिभाषयोच्यतामिति परः प्रौढ्या वदतिन तत्राद्यस्योपादानमिति उत्तरयोस्तु न सर्वथैवेति ॥ ९ ॥

अपार्थकं लक्षयति । पौर्वापर्य्यं कार्यकारणभावस्तस्यायोगादस-म्भवात् शाब्दबोधजनकाकाङ्क्षाज्ञानाद्यभावादिति फलितार्थः अप्रतिसम्ब-द्धोऽसम्बद्धेऽर्थः प्रयोजनं शाब्दबोधरूपं यत्र यद्यपि दशदाडिमानि षडपू पाः कुण्डमजाजिनमित्यादाववान्तरवाक्यादर्थबोधकत्वाद्व्याप्तिरति-व्याप्तिश्च निरर्थके तथाप्यभिमतवाक्यार्थबोधानुकूलाकाङ्क्षादिशून्यबोध-जनकपदत्वं तत् अ-विज्ञातार्थे तु स्वस्य बोधोभवत्येवेति नातिव्याप्तिः उदाहरणन्तु अयोध्यानासन्नानाकाङ्क्षवाक्यम् ॥ १० ॥ समाप्तमभिमतवा-क्यार्थाप्रतिपादकमिग्रहस्थानचतुष्टय प्रकरणम् ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्राप्तकालं लक्षयति। अवयवस्य कथैकदेशस्य विपर्यासो वैपरीत्यं तथा च समयबन्धविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानं पर्य्यवसन्नं तत्रायं क्रमः वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासाउद्धरणीयाद्- त्येकः पादः प्रतिवादिनश्च तत्रोपालम्भोद्वितीयः पादः प्रतिवादिनः स्वपक्ष- साधनं तत्र हेत्वाभासोद्धरणोञ्चेति तृतीयः पादः जयपराजयव्यवस्था चतुर्थः पादः एवं प्रतिज्ञा हेत्वादीनां क्रमः तत्र सभाक्षोभव्यामोहादिना व्यत्यस्ता- भिधानमप्राप्तकालमिति ॥ ११ ॥

न्यूनं लक्षयति॥ अवयवेन स्वशास्त्रसिद्धेन तेन सौगतस्य द्व्यवयवा- भिधानेऽपि न न्यूनत्वं नन्ववयवहीनत्वं अवयवत्वावच्छिन्नाभावः तथा चा कथनमेव स्यादतआहान्यतमेनापीति, तथा च यत्किञ्चिदवयवशून्या- वयवाभिधानं फलितं नचायमपसिद्धान्तः सिद्धान्तविरुद्धानभ्युपगमात् अपि तु सभाक्षोभादिनाऽनभिधानात् ॥ १२ ॥

अधिकं लक्षयति। हेतूदाहरणेत्युपलक्षणं दूषणाद्यधिकमपि बोध्यं तथा च कृतकर्त्तव्यापुनरुक्ताभिधानमिति फलितम् अनुवादस्तु न कृतक- र्त्तव्यः साभिप्रायत्वात् प्रतिज्ञाधिक्यञ्च पुनरुक्तं धूमादालोकात् महानस- वच्चत्वरवदित्यादिकन्तु विना समयबन्धं दार्ढ्यादिभ्रमादुक्तमधिकं यथा म- हानसं महानसवदिति तु नाधिकं किन्तु पुनरुक्तम् ॥१३॥ समाप्तं स्वसि- द्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिक प्रकरणम् ॥ ७६ ॥

पुनरुक्तं लक्षयति। पुनर्वचनं पुनरुक्तं तस्य विभागार्थं शब्दार्थयोरिति तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते अनुवादेऽतिव्याप्तिवारणायान्यत्रानु- वादादिति अनुवादान्यत्वे सतीत्यर्थः निष्प्रयोजनं पुनरभिधानं हि पुनरुक्तं अनुवादस्तु व्याख्यारूपः सप्रयोजनक एवेति भावः तथा च समानार्थक पूर्वानुपूर्वीक शब्दप्रयोगः शब्दपुनरुक्तं समानार्थकभिन्नानु- पूर्वीक शब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तं आद्यं यथा घटोघट इति द्वितीयं तथा घटः कलस इति एतस्य प्रमादादिना सम्भवः ॥ १४ ॥

पुनरुक्तप्रभेदान्तरमाह। पुनरुक्तमित्यनुवर्त्तते यस्मिन्नुक्ते यस्या- र्थस्यौत्सर्गिको प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्त इदमेव च अर्थपुनरुक्तमिति गीयते यथा वह्निरुष्ण इति पूर्वपदाक्षिप्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तिरियं उष्णोवह्निरिति उत्तरपदाक्षिप्तोक्तिः एवं वहिरस्ति गेहे नास्तीति विध्याक्षिप्तोक्तिः जीवन् गेहे नास्ति बहिरस्तीति निषेधाक्षिप्तोक्तिः पुनरुक्तत्वं विध्यञ्चेदम्भाष्यादिसम्मतं अन्ये तु शब्दपुनरुक्तं द्विविधं तस्यैव शब्दस्य पुनरभिधानं पर्य्यायेणाभिधानं अन्यत्पुनरर्थपुनरुक्तमित्याहुः ॥ १६ ॥

अननुभाषणं लक्षयति। परिषदा विज्ञातस्य विशिष्य बुद्धार्थस्य वादिना त्रिभिरभिहितस्य तथा च प्रथमवचनेऽननुभाषणे वादिना वारत्रयं वाक्यमिति दर्शितं तथा च त्रिभिरभिधानेऽपि यत्रानुभाषणविरोधी व्यापारः तत्राननुभाषणं निग्रहस्थानमित्यर्थः अज्ञान साङ्कर्य्यनिरासायाज्ञानमनाविष्कुर्वतेति विक्षेपसाङ्कर्य्यनिरासाय कथामविच्छिन्दतेति च विशेषणीयमित्याचार्य्याः न चाप्रतिभासाङ्कर्य्यं उत्तरप्रतिपत्तावपि सभाक्षोभादिनाऽननुभाषणसम्भवात् तदिदं चतुर्धा एकदेशानुवादाद्विपरीतानुवादात् केवलदूषणोक्त्या स्तम्भेन वेति सर्वनामपदेनानुवादात् पञ्चममित्याचार्य्याः क्वचिदज्ञानाप्रतिभाऽननुभाषणासाङ्कार्य्ये यन्निश्चेतुं शक्यते तदेवोद्भाव्यम् ॥ १७ ॥

अज्ञानं लक्षयति। भावे क्तः चकारश्च परिषदा विज्ञातस्येत्याद्यनुकर्षणार्थस्तथाच परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याप्यविज्ञानमित्यर्थः इदञ्च किंवदसि बुध्यतएव नेत्याद्याविष्करणेन ज्ञातुं शक्यतइति ॥ १८॥

अप्रतिभां लक्षयति। उत्तरार्हे परोक्ते बुद्धेऽपि यत्रोत्तरसमये उत्तरं न प्रतिपद्यते तत्राप्रतिभा निग्रहस्थानं नचात्राननुभाषणस्यावश्यकत्वात् तदेव दूषणमस्त्विति वाच्यं परोक्तानुवादे हि तत् यत्र परोक्तमनूद्यापि नोत्तरं प्रतिपद्यते तत्रासाङ्कर्य्यात् स्वसूचन श्लोकपाठाद्युन्नेया चेयम् ॥ १९ ॥

विक्षेपं लक्षयति। कार्य्यव्यासङ्गात्कार्य्यव्यासङ्गमुद्भाव्येत्यर्थः ल्यब्लोपे पञ्चमी कार्य्यव्यासङ्गस्यासम्भवात्कालान्तरकत्वे नारोपितः तेन तादृशकथाविच्छेदोविक्षेपः तेन राजपुरुषादिभिराकारणे गृहजनादिभिर्व्वावश्यकाकार्य्यार्थमाकारणे स्वगृहदाहादिकं पश्यतो गमने वा शिरोरोगादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबन्धे वा न विक्षेपः ननु कार्य्यव्यासङ्गोद्भावनं कुतः सभाक्षोभादिना चेदननुभाषणमेव उत्तराप्रतिपत्त्या चेदप्रतिभैवेति चेन्न उत्तरावसराभावात् वस्तुतस्तूत्तरस्फूर्त्तावपि तद्दूषणसम्भावनया विक्षेपसम्भवात् यथा क्षितिः सकर्तृका कार्य्यत्वादित्युक्तम् अत्राङ्कुरे व्यभिचारस्तावन्मया उद्भाव्यस्तत्र चेदयं पक्षसमत्वं ब्रूयात् तदा मे किमुत्तरमतोऽत्र महार्णवलिखितं मया च विचारितं किञ्चित्कार्य्यमुद्भाव्य गृहे गत्वा दृश्यत इत्येवं विक्षेपसम्भवात् ॥ ६२ ॥

मतानुज्ञां लक्षयति । दोषाभ्युपगमात् दोषमनुद्धृत्येत्यर्थः यथा शब्दोनित्यः श्रावणत्वादित्युक्ते ध्वनावनैकान्तिकत्वेन हेत्वाभासोऽयमित्युक्तौ शब्दोऽनित्यः कृतकत्वादिति साधिते ध्वनेरपि पक्षत्वान्न दोष इत्युक्तौ असिद्धत्वात् तत्रापि हेत्वाभासोऽयमित्युक्तौ सोऽयं मतानुज्ञया निगृहीतः स्यादप्रतिषिद्धमनुमतं भवतीति स्वपक्षे दोषाभ्युपगमात् ॥ ६३ ॥

पर्य्यनुयोज्योपेक्षणं लक्षयति । निग्रहस्थानं प्राप्तवतोऽनिग्रहः निग्रहस्थानानुद्भावनमित्यर्थः यत्र त्वनेकनिग्रहस्थानपाते एकतरोद्भावनं तत्र न पर्य्यनुयोज्योपेक्षणं अवसरे निग्रहस्थानोद्भावनत्वावच्छिन्नाभावस्यैव तत्त्वात् ननु वादिना कथमिदमुद्भाव्यं स्वकौपीनविवरणस्यायुक्तत्वादिति चेत् सत्यं मध्यस्थेनैवेदमुद्भाव्यं वादे च स्वयमुद्भावनेऽप्यदोषः ॥ ६४ ॥

निरनुयोज्यानुयोगं लक्षयति । अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः एतेनावसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नातिव्याप्तिः सोऽयं चतुर्धा छलं जातिराभासोऽनवसरग्रहणञ्च आभासो व्यभिचारादावसिद्ध्याद्युद्भावनम् अनवसरग्रहणञ्चाकाले एवोद्भावनं यथा त्यक्षसि चेत् प्रतिज्ञाहानिः विशेषयसि चेत् हेत्वन्तरं एवमवसरमतीत्य कथनमपि यथा उच्यमानग्राह्यस्यापशब्दादेः परिसमाप्तौ एवमुक्तग्राह्याज्ञानाद्यननुभाषणावसरेऽनुद्भाव्यबोधाविष्करणानुभाषणप्रवृत्ते वादिनि तदुद्भावनमित्यादिकमूह्यम् ॥ ६५ ॥

असिद्धान्तं लक्षयति । सिद्धान्तं स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियमात्तन्नियमप्रच्यवात् कथाप्रसङ्ग इति तथा च कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्तः तथा च साङ्ख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायां कथायाम् आविर्भावस्याविर्भावाभ्युपगमेऽनवस्थेति दूषणोद्धारायाविर्भावस्यासतः उत्पत्तिं यद्यभ्युपैति तदाऽपसिद्धान्तः यस्त्वेकदेशिमतेन कथामारभते तस्य शास्त्रकाराभ्युपगमविरोधे नापसिद्धान्त इति विवेचयितुमभ्युपेत्येत्युक्तं, सौगतास्त्वपसिद्धान्तं दूषणं न मन्यत इत्यन्यदेतत् ॥ ६६ ॥

क्रमप्राप्तहेत्वाभासलक्षणे वक्तव्ये तदकथनवीजमाह। च पुनरर्थे हेत्वाभासाः पुनर्यथा येन रूपेण पूर्वमुक्ताः तेनैव रूपेण तेषां निग्रहस्थानत्वमिति न लक्षणान्तरमपेक्षितमिति अत्र चकारस्य दृष्टान्ते साधनवैकल्यादिसमुच्चायकत्वमिति केचित् तन्न यथोक्ता इत्यस्यानन्वयापत्तेरिति ॥ ६७ ॥

समाप्तं निग्रहस्थानविशेषलक्षणम् ।

समाप्तं पञ्चमस्य द्वितीयाह्निकम् ।

एषा मुनिप्रवरगोतमसूत्रवृत्तिः श्रीविश्वनाथकृतिना सुगमाल्पवर्णा ।
श्रीकृष्णचन्द्रचरणाम्बुजपञ्चरीकश्रीमच्छिरोमणिवचः प्रचयैरकारि ।

इति श्रीमहामहोपाध्याय श्रीविद्यानिवासभट्टाचार्यात्मज श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ पञ्चमोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu